GOVERNMENT OF INDIA

ARCHÆOLOGICAL SURVEY OF INDIA

CENTRAL
ARCHÆOLOGICAL
LIBRARY

ACCESSION NO 23641

CALL No. 091.4912/G.O.M.L.M.

D.G.A. 79

OFFICE OF THE DIRECTOR GENERAL OF ARCHAEOLOGY
32775
Library Regn No.
INDIA

CENTRAL ARCHAEOLOGICAL
LIBRARY, NEW DELHI.
Acc. No. 23641
Date 26. 4. 56.
Call No. 091.4912/G.O.M.L.M.

# A TRIENNIAL CATALOGUE OF MANUSCRIPTS.

1919-20 TO 1921-22.

## VOLUME IV.

## PART I—SANSKRIT—B.

### R. No. 3204.

Paper. $11\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 180. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920-21 from a MS. of the Sanskrit Library of Bobbili Samsthānam, Bobbili.

(*a*) क्रियाकैरवचन्द्रिका.

KRIYĀKAIRAVACANDRIKĀ.

Foll. 1*a*—164*a*. Foll. 164*a*—167*a* contain Pavitralakṣaṇapūjā, Kumbhārcana, etc.

An Āgama work on Śrī-Vaiṣṇavism, by Varāhadeśika, disciple of Saumyaviṣṇuguru, and son of Peddārya of Kauśikagōtra. The author says that he has based his work on the Pādmasaṁhitā of the Pāñcarātrāgama. The subjects dealt with herein are apparent from the headings of the Paricchēdas given below :—

१. भूपरीक्षाविधिः.
२. कर्षणविधिः.
३. बालालयप्रतिष्ठाविधिः.
४. प्रथमेष्टकाविधिः.
५. गर्भन्यासविधिः.
६. मूर्धेष्टकाकवाटादिस्थापनाविधिः.
७. शिलादारुसङ्ग्रहणविधिः.
८. मृत्सङ्ग्रहणविधिः.
९. अङ्कुरार्पणविधिः.
१०. होमकुण्डादिलक्षणविधिः.
११. छायाधिवासजलाधिवासविधिः.
१२. वास्तुनाथयागनयनोन्मीलनविधिः.
१३. कर्माङ्गस्नपनविधिः.
१४. शयनाधिवासक्रमस्थापनविधिः.
१५. तत्त्वन्यासविधिः.

१६. षोडशन्यासविधिः.
१७. शान्तिहोमपरिवारहोमविधिः.
१८. प्रतिष्ठाविधिः.
१९. लक्ष्मीप्रतिष्ठाविधिः.
२०. श्रीदेव्यादिपाणिग्रहणविधिः.
२१. विमानप्रतिष्ठाविधिः.
२२. मण्डपादिप्रतिष्ठाविधिः.
२३. महानसवाप्यादिप्रतिष्ठाविधिः.
२४. प्रभादिप्रतिष्ठाविधिः.
२५. गृहार्चादिप्रतिष्ठाविधिः.
२६. दीक्षाविधिः.
२७. भूतमन्त्रन्यासान्तयोगविधिः
२८. समाराधनविधिः
२९. अग्निकार्यविधिः.
३०. नित्योत्सवविधिः.
३१. उत्तमादिस्नपनविधिः.
३२. सहस्रकलशस्नपनविधिः.
३३. महोत्सवविधिः.
३४. जीर्णोद्धारविधिः.
३५. सम्प्रोक्षणविधिः.
३६. पवित्रारोपणविधिः.

Complete.

**Beginning:**

अस्तु मेधाप्रदं नित्यं वस्तु कौस्तुभलक्षणम् ।
कारणं जगतामासीत्कमलं यस्य नाभिजम् ॥
भद्राण्युन्निद्रयन्तु प्रबलतरसुधासिन्धुकल्लोलमाला-
पारम्पर्यप्रचारप्रहसननिपुणप्राज्यकान्तिप्ररोहाः ।
निर्मर्यादं सदा नस्त्रिभुवनजनतानन्दसन्दोहदान-
प्रावीण्यप्रौढचारप्रकटितविभवाः पद्मवल्लीकटाक्षाः ॥
श्रीमत्कौशिकवंशाब्धिचन्द्रेण गुरुसेविना ।
तन्यते श्रीवराहेण क्रियाकैरवचन्द्रिका ॥
पाञ्चरात्राब्धिसम्भूतपाद्मतन्त्रसुधाकरात् ।
क्रियासुधां समुद्धृत्य करोमि विबुधप्रियाम् ॥

आदौ तावद्गुरुपरीक्षाविधिरुच्यते—

श्रद्धावानास्तिको भक्तो धनधान्यसमेधितः ।
महोत्साहश्शुचिर्दक्षः कृतज्ञो लोभवर्जितः ॥
ब्राह्मणः क्षत्रियो वैश्यश्शूद्रो वाप्यनुलोमजः ।

समस्तगुणैस्समेतो यजमानः—

पाञ्चरात्रविदं शान्तं सिद्धान्तेषु कृतश्रमम् ।
भगवद्धंशजं शुद्धमलोलुपमदाम्भिकम् ॥

अपापमृजुमन्याविमदुष्टपरमास्तिकम् ।

एवम्भूतमाचार्यं प्रथमं वरयेत् । तत आचार्यो यजमानश्च दैवज्ञेन सह शुभे दिने ग्रामस्थापनायादौ निमित्तानि परीक्ष्य शुभे निमित्ते ग्रामादीन् संरभेत । तदर्थं स्थकारेण सह भुवं परीक्षयेत् ।

* * * *

**Colophon:**

इति श्रीमत्कौशिककुलतिलकेन पेत्ताराचार्यतनयेन श्रीवराहगुरुणा विरचितायां क्रियाकैरवचन्द्रिकायां भूपरीक्षाविधिर्नाम प्रथमः परिच्छेदः ॥

**End:**

मूलमन्त्रेण वा पवित्राण्यारोप्य देवस्य स्नपनकर्म कृत्वा सम्पूज्य पूर्वं गुरवे तदनु भक्तानां पवित्राणि दापयेत् । यजमानोऽपि गुरुं जीवाजीवात्मकैर्धनैस्तोषयित्वा प्रणम्य तं यानादिकमारोप्य सर्वमङ्गलसहितस्तन्मन्दिरं नयेत् ॥

**Colophon:**

इति श्रीवराहगुरुविरचितायां क्रियाकैरवचन्द्रिकायां पवित्रारोपणविधिर्नाम षट्त्रिंशपरिच्छेदः ॥

इति श्रीमत्कौशिककुलकलशोदधिसुधाकरस्य श्रीपाञ्चरात्रप्रमुखसकलशास्त्रपारङ्गतस्य श्रीवराहकमलचरणसमर्चननिष्णातस्य श्री(पे)त्ताराचार्यवर्यस्य सूनुना श्रीसौम्यविष्ण्वाख्यगुरुवर्यकरुणाकटाक्षवीक्षणलब्धसकलविद्येन श्रीवराहदेशिकेन विरचिता श्रीपाञ्चरात्रप्रथमसिद्धान्तक्रियाकैरवचन्द्रिका समाप्ता ॥

---

(*b*) वैखानसागमः.

VAIKHĀNASĀGAMAḤ.

*Foll.* 167*a*—171*b*.

Similar to the work described under R. No. 1314(*a*) ante.

Contains the portion of Vimānārcanakalpa and Samūrtārcādhikaraṇa.

**Beginning:**

अथ पवित्रारोपणविधिः—

श्रावणद्वादश्यां पौर्णमास्यां (वा) पूर्वमङ्कुरानर्पयित्वा सौवर्णरजतताम्राणि उत्तमम् । अथ वा ब्राह्मणपत्नीभिर्वा निर्मितान् तन्तूनाहृत्य तमेकनेममि-

त्युक्त्वा त्रिगुणीकृत्य आ मा वाजस्येति, तन्तुं तन्वन्निति प्रक्षाल्यापो हि ष्ठेति, यन्मे गर्भे इति पञ्चगव्येन प्रोक्ष्य ।

* * * *

**Colophon:**

इति श्रीवैखानसे मरीचिप्रोक्ते विमानार्चनकल्पे वसन्तोत्सवधमनोत्सव इति चतुःपञ्चाशः पटलः ॥

**End:**

प्रथमावरणे चैव परिवारान् प्रकल्पयेत् ।
गोपुरात्पुरतो बाह्ये भूतपीठं प्रकल्पयेत् ॥

**Colophon:**

इति श्रीवैखानसे, अत्रिप्रोक्ते समूर्तार्चाधिकरणे पञ्चमूर्तिप्रतिष्ठाविधिर्नाम सप्तत्रिंशोऽध्यायः ॥

Foll. 172*a*—173*b* contain the Nṛsimhadēvanityapūjāvidhi. Foll. 174*a*—176*b* contain the Pañcarātratantraprayōga and Pīṭhasthāpanavidhi, Trikuṇḍalakṣaṇa, Pīṭhikā and Aṅganyāsa.

---

R. No. **3205**.

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 94. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of the Raja of Chirakkal, Malabar district.

तन्त्रसङ्ग्रहः, सव्याख्यः.

TANTRASAÑGRAHAḤ WITH COMMENTARY.

Foll. 1*a*—92*a*. Foll. 92*b*—94*b* give the contents of this work.

The work Tantrasaṅgraha has been described under No. 1426 of the D.C.S. MSS., Vol. XXIV. It is followed by a short commentary.

Complete in eight Adhyāyas.

**Beginning:**

प्रत्यूहव्यूहविहतिकारकं परमं महः ।
अन्तःकरणशुद्धिं मे विदधातु सनातनम् ॥
यत्प्रसादात्कवीन्द्रत्वं मन्दोऽपि लभते क्षणात् ।
तां शारदेन्दुस्वच्छाङ्गीं वन्दे देवीं सरस्वतीम् ॥
नारायणं जगदनुग्रहजागरूकं श्रीनीलकण्ठमपि सर्वविदं प्रणम्य ।
यत्तन्त्रसङ्ग्रहगतं ग्रहतन्त्रजातं तस्यापरां च विवृतिं विलिखामि लघ्वीम् ॥

* *

तत्रादौ तावदाचार्यः प्रारिप्सितप्रबन्धप्रत्यूहशमनायाभीष्टदेवतां नमस्करोति—हे विष्णो ।

हे विष्णो निहितं कृत्स्नं जगत्त्वय्येव कारणे ।
ज्योतिषां ज्योतिषे तस्मै नमो नारायणाय ते ॥ इति ।

हे विष्णो सर्वव्यापिन्! यस्मिन् त्वयि कृत्स्नमिदं जगत् निहितं भाति घटशरावादिकमिव मृत्तिकायाम् । तस्मै ते नमोऽस्तु ।

* * * *

दोर्भ्यां प्राङ्गैस्स्थानं स्वङ्कयं सविराशिनिष्ठाग्निः ।
अनुदिनमुच्चमिनादेरनुक्रमारादिशैत्रचमिनमध्यम् ॥
इति तन्त्रसङ्ग्रहस्य क्रियाकलापं क्रमेण सङ्ग्रह्य ।
रचिते तद्व्याख्याने प्रथमोऽध्यायः प्रपूर्णोऽभूत् ॥

**End :**

अनेनात्मना क्रियमाणस्य प्रबन्धस्य गौरवातिशयशालितां प्रदर्शयता परमात्मन्यौद्धत्यं च परिहृतमिति । अत्र लक्ष्मीशनिहितध्यानैरित्यक्षरसङ्ख्यया समाप्तिसमयाहर्गणश्च दर्शित इति सर्वमवदातम् ॥

इति तन्त्रसङ्ग्रहस्य क्रियाकलापं क्रमेण सङ्गृह्य ।
रचिते तद्व्याख्याने पूर्णोऽभूदष्टमोऽध्यायः ॥

**Colophon :**

समाप्तश्चायं ग्रन्थः ॥

---

R. No. 3206.

Paper. 10⅝ × 9¼ inches. Foll. 61. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920-21 from a MS. of the Maharaja's Library, Vizianagram.

विष्णुपुराणव्याख्यानम्—पुराणरत्नाञ्जनम्.

VIṢṆUPURĀṆAVYĀKHYĀNAM: PURĀṆARATNĀÑJANAM.

Same work as that described under R. No. 1577(a) ante, wherein see for the beginning. By Bhāṣyakāra, son of Veṅkaṭācārya.

Contains the first Aṁśa only complete.

**End:**

भवतीति भवो देहः तस्मादुद्भवन्तीति भवोद्भवाः रागद्वेषादयो न भवन्ति। यस्मिन्नंशे श्रुते सति। अस्यांशस्य वरदा भवन्तीति शेषः। अथापि पुनरपीत्यर्थः। तुरीयधाम्नः त्र्यय . . . . तत्स्वरूपस्य यस्य पुरुषोत्तमस्य त्रयी ऋग्यजुस्सामसंज्ञिका त्रिजगती लोकत्रयं त्रयो देवाः ब्रह्मरुद्रेन्द्रा अपि त्रिपदी गङ्गा वर्णत्रयं त्रैवर्णिकाः ॥

**Colophon:**

इति कौण्डिन्यकुलतिलकवेङ्कटाचार्यसूनुभगवद्भाष्यकारविरचिते विष्णुपुराणव्याख्याने पुराणरत्नाञ्जनसमाख्याने प्रथमांशे द्वाविंशोऽध्यायस्समाप्तः प्रथमांशः ॥

---

## R. No. 3207.

Paper. 10½ × 9¾ inches. Foll. 36. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of Mānavikrama Anujan Kuññuṇṇi Raja of Paḍiññāre Kōvilakam, Calicut, Malabar district.

(*a*) चन्द्रलेखा (सट्टकम्).

CANDRALĒKHĀ (SAṬṬAKAM).

Foll. 1*a*—21*b*.

A drama belonging to the minor kind called Saṭṭaka characterized by containing only four Acts or Javanikas. The work describes the story of the marriage between Candralēkha and Mānavēdarāja. By Rudradāsa, pupil of Rudra and Śrīkaṇṭha.

This work is also called Mānavēdacarita.

Complete.

**Beginning:**

भद्रं ददातु गजाननो भगवती भाषा मुखे भातु सा
भूदेवः कुशलं कुर्वन्तु(करोतु) कवयस्सर्वे प्रसीदन्तु ते।
आनन्दाकुलमानसास्सहृदयास्सज्जन्तु निर्मत्सराः
अच्छेसु परिक्रीडितुं रससुधास्रोतस्सु सूक्ष्मे(क्ते)षु नः ॥

सू—प्रणमतसु(शु)चिराय(जा)हंसकेषु हरवद(नय)नेषु मुखाम्बुजोत्सुकेषु।
पदकमलप्रधावितामुमायाः प्रथमनतावपाङ्गभृङ्गमालाम् ॥

* * * *

भाषा खलु प्राकृतमयी विषयः श्रीमानवेदचरितश्रीः ।
रसगर्भस्सन्दर्भस्सज्जनप्रीतीनां यौवनमेतत् ॥

सूत्र—केन वि(नि)युक्ताः पुनः प्रवर्तध्वं सभिकनर्तने ?

पारि—तस्यैव निरन्तरानमच्छ्रीमत्सामन्तविकटमकुटान्तर्निपतन्माणिक्यमणिसमूहमयूखले(खा)पल्लवितपादपीठस्य

* * * *

परमेश्वरपादपल्लवस्य समरमुखवहा(ला)त्कारमुषि(गृही)तजगलक्ष्मीमल्लधम्मिल्लपर्यङ्कसुमल्लिका( किल )नाटिकायास्तस्याश्चतुर्यवनिकान्तरबन्धुराङ्गश्चित्रार्थसूक्तिक-(त्रित)रसः परमेकभाषो विष्कम्भकादिरहितः कथितो बुधैः । मारिष कस्य पुनस्सरस्वतीनिष्यन्दः सट्टको नर्तितव्यः ।

* * * *

(यद्देवमन्दिर)बाह्यालिन्दसंमार्जनव्यापारमात्रपारीणात् पारशवपशोस्स-न्ध्यासमयसम्फुल्लमल्लिकामधुरमकरन्दनिष्यन्दपीवरः(गर्भास्पन्दमाः प्रभवन्ति । मारिष मैवं न खलु निन्दनीयास्तत्रभवन्तः पारशवाः । यतः—

येषां ब्राह्मणलोकपादयुगलीशुश्रूषणं भूषणं
येषां निर्मलकाव्यचर्वणकथासंशीलनं क्रीडनम् ।
वंशे चैषां च शुद्धवृत्तसुभगस्सुरद्रुमुक्तामणिर्जातः ।
तेषां स्तुतिषु कस्य भुवने जिह्वा निरीहा भवेत् ॥

तस्य रुद्रस्य श्रीकण्ठस्य च शिष्यो रुद्रदासनामधेयः किल तस्य कविः । तदुपपद्यते तरणिकिरणजालनिरस्ततन्द्रादेवारविन्दान्मधुकरानन्दकन्दः प्रसरति मकरन्दनिष्यन्दः । किं तादृशस्तयोः रुद्रश्रीकण्ठयोः शिक्षाविशेषैः) ।

* * * *

**Colophon:**

(इ अ चन्दलेखहाये पुढमं जवनिकान्तरम्).

**End:**

अतः परं किं मे प्रियम्?

आ(नन्दचन्द्रवर्मा) कथमपि(च)गदितं नन्दनादर्शनेन
प्राप्ता चित्तप्रसादं निजभगिनिकासङ्गमेन च(नाथ) देवी ।
लब्धामुग्धा च सप्तार्णवलसितमतिप्राप्तिसंपत्तिमूलं
हस्ते मे चन्द्रलेखा भगवति (च) तया येन यस्मिन् स्पृहा मे ॥

तथापि एतावद्भवतु—

कुर्वन्तु कुमुदप्रभा त्रिभुवने कीर्ति नृपा
जानन्तु इतरेतरमुपकृतिं घना मानुषाः ।
शृण्वन्तु गतमत्सरास्सहृदयाः कवीनां कृति
जयन्तु कप(व)यः चिरं वहतु भारती मङ्गलम् ॥)

**Colophon:**

इति चतुर्थ (यवनिकान्तरम्) ॥
समाप्तोऽयं ग्रन्थः ॥

Foll. 21*b* and 22*a* contain some pithy stanzas. Fol. 22*b* is left blank.

---

Transcribed in 1920-21 from a MS. of M.R.Ry. Paravastu Gōvindācaryulugaru, Dēvāḍa, Singavarapukota taluk.

(*b*) बालानन्दप्रकाशिका.

BĀLĀNANDAPRAKĀŚIKĀ.

Foll. 23*a*–35*a*. Foll. 35*b* and 36 are left blank.

A commentary on the Bālānandīya, which is a treatise for beginners in the Nyāya philosophy. The original work is called Bālānandīya after the name of the author, who is probably Bālānanda.

The commentator is stated to be the son of Vīrabhadra and has written the work entitled the Anumānakhaṇḍamālikā, which is referred to herein.

Breaks off in the Anumānakhaṇḍa.

**Beginning:**

देवतापितरौ रामवीरभद्राभिधावुभौ ।
स्वीयसंरक्षणाशेषविद्यादानपरौ भजे ॥
श्रीमद्गुरुपदाम्भोजयुगलं हृदयालयम् ।
समालम्ब्य करिष्यामि बालानन्दप्रकाशिकाम् ॥

अथ ग्रन्थकृत् स्वस्य ग्रन्थकरणसामर्थ्यशङ्कां पुरातनग्रन्थैर्गतार्थतया स्वीयग्रन्थस्य वैयर्थ्यशङ्कां परिहरन् चिकीर्षितग्रन्थनाम, प्रेक्षावत्प्रवृत्त्यङ्गे विषयप्रयोजने च सूचयन् निर्विघ्नपरिसमाप्त्यर्थं सीतापतिपादारविन्दस्मरणाख्यं मङ्गलं शिष्यशिक्षायै निबध्नाति—सीतानायकेति । अगस्त्यादीनामिव स्वस्य साक्षाध्ययने सामर्थ्यं नास्तीति सूचयन् गर्वं परिहरति—लेशत इति। एवंविधग्रन्थकरणसामर्थ्यसम्पादनाय ध्यानलेश एवालमिति वा सूचयितुं लेशपदोपादानम् । आनन्दयिष्यामीति । अभिनवग्रन्थनिर्माणेनेति शेषः । तथा

च न्यायशास्त्रे प्रवृत्त्यर्थमसौ ग्रन्थ इति भावः। एतेनार्थात् नाम्नो यौगिकार्थव्युत्पादनेन बालानन्द इति ग्रन्थनाम सूचितं भवति। बालशब्दस्य स्तनन्धयपरत्वशङ्कां व्यावर्तयितुं विशिनष्टि—न्यायबोधसम्मुखानिति। न्यायपदेन च पञ्चाध्याय्यात्मकं न्यायशास्त्रं विवक्षितम्। तथा च मूलशास्त्रविषयप्रयोजने अस्यापीति सूचितं भवति। षोडशपदार्थान् निरूपयितुं शिष्यबुद्धिवैशद्याय प्रथमं पदार्थसामान्यलक्षणमाह—ज्ञेयः पदार्थ इति।

* * * *

स्वतन्त्रगौतमेच्छाधीनोद्देशानुसारेण प्रथमं प्रमाणलक्षणमाह—तत्रेति। यथा च नोपजीव्योपजीवकभावस्सङ्गतिः तथोक्तमस्मत्कृतायामनुमानखण्डमालिकायामिति।

End:

तृतीयविधो विशेषणविशेष्यभावोऽस्त्विति न किंचिदवद्यमिति स्पष्टमन्यत्॥

प्रत्यक्षपरिच्छेदस्समाप्तः॥

ननु यत्राप्तवाक्यादिति। स्वसमानाधिकरणात्यन्ताभाव(?)प्रतियोगिसाध्यसमानाधिकरणधूमवानित्याप्तवाक्यात् व्याप्तिज्ञानं विना वाक्यार्थज्ञानात्मकपरामर्शस्योत्पत्त्या तदनन्तरमनुमिति(ते)श्चोत्पत्त्या न व्याप्तिज्ञानमनुमितिकरणमित्यर्थः।

* * * *

धर्मिगतत्वेन गौरवलाघवविचारस्य प्रसङ्गाभावात्, तथापि धूमाग्न्योस्सहचारग्रहसम्भवादित्युत्तरग्रन्थसामानाधिकरण्या.

---

## R. No. 3208.

Paper. $10\frac{1}{2} \times 9\frac{1}{4}$ inches. Foll. 95. Lines, 20 in a page. Grantha. Good.

Transcribed (in 1920–21) from a MS. of Naḍuvil-maṭham, Trichur, Cochin State.

तैत्तिरीयोपनिषद्विवृतिः.

TAITTIRĪYŌPANIṢADVIVṚTIḤ.

A commentary on the Taittirīyōpanisad, which is described under No. 486 of the D.C.S. MSS., Vol. I, Part III: by Vijñānātma-bhagavat, a disciple of Jñānōttamapūjyapāda.

Contains the Yajñikōpaniṣad only, but wants the last Anuvāka.

**Beginning :**

सरस्वतीं गणाध्यक्षं वेदव्यासं मुनीश्वरम् ।
शङ्कराचार्यवर्यं च प्रणमामि सदादरात् ॥
योगिनां योगरूपाय ज्ञानिनां ज्ञानमूर्तये ।
मुक्तानां मोक्षरूपाय दक्षिणामूर्तये नमः ॥
प्रमाणन्यायनखरैः प्रतिवादिभभेदिने ।
ज्ञानोत्तममृगेन्द्राय नमो वेदादि(द्रि)चारिणे ॥
श्रियः पतिं श्रियं वाण्याः पतिं वाणीं शिवं शिवाम् ।
प्रणम्य याज्ञिकं वेदशिरो व्याख्यायते मया ॥
कैश्चिद्विपश्चिद्भिरुदारसत्वैरिदं पुरा व्याकृतमप्युदारम् ।
तत्पक्षपाताकुलितं विलोक्य समं विधातुं क्रियते प्रयत्नः ॥

वेदाध्ययनमाराध्याधानपूर्विकास्सर्वांस्तमापद्य वेदो(दे) ब्रह्मात्मैकत्वविद्यामुपनिषद्भागेन वक्तुं प्रक्रमते । तत्रोपनिषदः त्रिविधाः—सांहितिक्यः, वारुण्यः, याज्ञिक्यश्च । तत्र सांहितिक्यो वारुण्यश्च गताः । तत्र वारुणी स्तू(तू)पनिषत् ब्रह्मविदाप्नोति परमित्यारभ्य केवलं ब्रह्मात्मैकत्वज्ञानमुद्दिष्टम् । इदानीं संन्यासं तदेव ज्ञानं प्रतिपादयितुं याज्ञिक्यः प्रवर्तन्ते । नारायणाख्योऽयं समस्तः प्रश्नो याज्ञिक्य उपनिषद इत्युच्यन्ते(ते) ; यज्ञात्मना भगवता नारायणेन दृष्टत्वात् । अम्भस्यपारे अन्तरिति । अम्भसि अपारे पाररहिते । अपार इति विशेषणेन परिच्छिन्नाभ्यस्सर्वाभ्योऽद्भ्यो व्यावृत्तिः क्रियते ।

* * *

**Colophon :**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमज्ज्ञानोत्तमपूज्यपादशिष्यस्य विज्ञानात्मभगवतः कृतौ नारायणाख्यप्रश्नयाज्ञिक्यु(को)पनिषद्विवृतौ प्रथमोऽनुवाकः ॥

**End :**

सोऽपि सर्वस्मादुपरि स्थितः सर्वोत्कृष्टो भवति । इत्युपनिषदिति । इत्थमुपनिषद्रहस्यमुक्तम् ॥

इति द्विषष्टितमोऽनुवाकः ॥

पूर्वानुवाकोक्तसत्यादिन्यासा[न्त]रे(न्ते)षु तपसः न्यासस्यैव प्रकारान्तरेण श्रैष्ठ्यं प्रतिपादयितुमुक्तमेव सत्यादिसाधनकलापं सविस्तरं प्रतिपादयत्युत्तरोऽनुवाकः ।

* * * *

यदि ब्रह्मयोनिः वेदाख्यस्य वा हिरण्यगर्भाख्यस्य वा ब्रह्मणो योनिः स वा एष पुरुषः पञ्चधा पञ्चात्मा । येन सर्वमिदं प्रोतं स योनित्वेन प्रस्तुतः तत्पदार्थभूतः ॥

**Colophon**:

तैत्तिरीयोपनिषद्व्याख्या समाप्ता ॥

---

R. No. **3209**.

Paper. 10⅝ × 9¼ inches. Foll. 326. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Raṅganāthamiśragāru, Chaṅgudi, Parlakimedi.

Bound in two volumes.

दानार्णवः.

DĀNĀRṆAVAḤ.

Foll. 1a—325a. Foll. 325b and 326 are left blank.

An exhaustive treatise on the gifts to be made to Brahmins, and on the nature and the efficacy of such gifts.

Deals with the following subjects:—

१. दानस्वरूपम्.
२. पात्रप्रशंसा.
३. पुण्यदेशाः.
४. दानकालविवेकः.
५. दानपात्राणि.
६. प्रत्यक्षदानविधिः.
७. निष्कादिमानम्.
८. ग्राह्याग्राह्यम्.
९. दानशौचविधिः.
१० प्रतिग्रहदोषगायत्रीजपः.
११. प्रतिग्रहीतृधर्माः.
१२. सङ्क्रान्तिदानफलम्.
१३. हिरण्यादिदानविधिः.
१४. कन्यादानम्.
१५. घृतभारदानविधिः.
१६. कृष्णाजिनदानविधिः.
१७. पुस्तकदानम्.
१८. अन्नदानम्.
१९. सालग्रामदानविधिः.
२०. दानसंभारः.
२१. महादानविधिः.
२२. रोगनिर्हरणदानानि.
२३. क्षयरोगहरदानम्.
२४. शूलरोगहरदानम्.

२५. पाण्डुरोगहरदानम्.
२६. वातव्याधिहरदानम्.
२७. अपस्माररोगहरदानम्.
२८. मूकत्वहरदानम्.
२९. कुष्ठरोगहरदानम्.
३०. दरिद्रत्वहरदानम्.

Complete.

**Beginning:**

वन्दे मुकुन्दस्य पदारविन्दं वन्दारुवृन्दारकवृन्दवन्द्यम् ।
मन्दाकिनी यन्मकरन्दबिन्दुसन्दोहसन्देहधियं ददाति ॥

* * * *

श्रीकामेश्वरराजपण्डितकुलालङ्कारसाच(र)श्रिया-
मावासो नरसिंहदेवमिथिलाभूमण्डलाखण्डलः ।
प्रागल्भ्ये रिपुवर्गदर्पदलने श्रीवीरनारायणो
विख्यातः शरदिन्दु(दीप्ति)धवलआम्यद्यशोमण्डलः ॥
तस्योदारगुणाश्रयस्य मिथिलाक्ष्मापालचूडामणेः
श्रीमद्धीरमतिः प्रिया विजयते भूमण्डलालङ्कृतिः ।
दाने कल्पलतेव चारुचरिते याहन्धतीव स्थिरा
या लक्ष्मीरिव वैभवे च वचसां गौरीव या गण्यते ॥
लक्ष्मीभाजः कृतार्थिनः(र्थीनकृत) सुमनसो यो महादानहेम-
ग्रामै राजीवराजीबहलतरपरास्वाल(गात)रागैस्तडागैः ।
विज्ञानुज्ञापविद्यामतिमतिकुलिनं सप्रज्ञामामुदारा
राज्ञी पुण्यावलोका विरचयति तदा दानवाक्यावली(लीं) सा ॥

* * * *

विष्णुधर्मोत्तरे—

दानं देवाः प्रशंसन्ति मनुष्याश्च तथा सुराः ।
दानेन कामानाप्नोति यान्कांश्चिन्मनसेच्छति(ति) ॥

**End:**

कुबेरप्रतिमां षोडशोपचारेण पूजादिकं विधाय ब्राह्मणाय वस्त्रयुग्मकुण्डल-मुद्रिकानारिकेलफलाक्षतेन वृणुयात् । ब्राह्मणाय नमः, ब्राह्मणाय दरिद्रत्वं ते ददानि । ददस्वेति ब्राह्मणः, कर्ता ब्राह्मणसंमुखं पठेत् ।

मम कर्मसमुद्भूतं दरिद्रत्वं ददाम्यहम् ।
गृहाण त्वं द्विजश्रेष्ठ मुक्तोऽहं त्वत्प्रसादतः ॥

* * * *

प्रार्थना—

उत्तराशापते देव कुबेर नरवाहन ।
शङ्खपद्मनिधीनां त्वं पतिः श्रीकण्ठवल्लभः ॥
अदानेन यथाप्राप्तं दारिद्र्यं मम दुःसहम् ।
ते(त्वं) सर्वं मम दानेन पापमाशु विनाशय ॥

* * * *

दानमत्र ततः खात्वा भुञ्जीत ब्राह्मणैर्बहु ।
विष्णुर्हिंसासमुत्पन्नां वेदनामाशु नाशय ॥

**Colophon:**

इति श्रीदानार्णवे रोगहरदानानि । दरिद्रत्वहरं समाप्तम् ॥

* * * * *

The scribe adds—

फाल्गुनस्यासिते पक्षे कुम्भस्थे दिवसाधिपे ।
प्लवङ्गेऽब्दे मयालेखि गोपीनाथेन धीमता ॥

**Colophon:**

इति दानार्णवः समाप्तः ॥

---

## R. No. 3210.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 139. Lines, 29 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. obtained from M.R.Ry. Nigamānta-Śrīkṛṣṇacakravartyācārya, Kōtaṇḍapaṭṭi.

रससुधानिधिः.

RASASUDHĀNIDHIḤ.

Foll. 1a—138b. Fol. 139a contains the subject index of this work. Fol. 139b is left blank.

Similar to the work described under R. No. 830 ante. By Mārabhaṭṭāraka, son of Pōramāmbā and Kṛṣṇabhaṭṭāraka of Śōṇṭhi family. The author wrote this work in praise of and at the instance of Hanumanmantrin, son of Yābāji of Tōknmalla family.

Complete in eight Pravāhas dealing with the following subjects:—

१. नायकप्रकरणम्.
२. काव्यप्रकरणम्.
३. रसप्रकरणम्.
४. दोषप्रकरणम्.
५. गुणप्रकरणम्.
६. शब्दालङ्कारप्रकरणम्.
७. अर्थालङ्कारप्रकरणम्.
८. संसृष्टिसङ्करौ.

**Beginning :**

कल्याणं घटयन्तु कैटभजितो लीलावलोकच्छटा-
श्च्योतच्चन्द्रमरीचिवीचय इवोद्भूतास्सदा शीतलाः ।
लक्ष्मीः कौस्तुभकैतवोदितदयाङ्कुरश्रियामाश्रये
यस्य क्रीडति विश्वलोकजननी कामोत्सवैर्वक्षसि ॥

* * * *

श्रीमद्रामपदारविन्दभजनोन्निद्रस्सुमित्रात्मभूः
क्लेशच्छिन्महनीयपावनतनुः सूर्यात्मजातप्रियः ।
पावाजिप्रभुसूनुरेष हनुमन्मन्त्री शतानन्दता-
योग्यारोग्यचिरायुरस्तु जगद्रक्षोदयप्रक्रमः ॥
स एष हनुमत्प्रभुर्निजसभामधिष्ठाय मां
कदाचिद्वदन्मुदा विदिततन्त्रिभिर्मन्त्रिभिः ।
सनाभिभिरलोभिभिस्सरससूरिभिर्भूरिभिः
वचःप्रसविभिस्समं कविभिरिष्टगोष्ठीयुतः ॥
लोके शोण्टिकुलारविन्दतरणे ! श्रीमारभट्टारक !
त्वत्तुल्योऽस्ति बुधो न कोऽपि मधुरोदाराढ्यभाषाकविः ।
विश्वख्यातिसुपैषि संस्तुतमहाषड्दर्शनीमर्मभिः(वित्)
वाचां नर्मभिरक्षयामितलसद्युक्तिप्रथामर्मभिः ॥
यशो मम विशोभय क्षितिषु काव्यमीमांसया
बुधश्रुतिसमाख्यया रससुधानिधिप्रख्यया ।
अनायकसनायकाः कतिचनावनौ कल्पिताः
न तासु मम मानसं रसविनोदमासीदिति ॥

* * * *

गुणाढ्यत्वं यथा—

पावाजिप्रभुनन्दनस्य हनुमन्मन्त्रीशितुः सद्गुणान्
संख्यातुं क्षमते न कोऽपि भुवने सोऽयं परब्रह्मणः ।
निर्दोषामितदिव्यमङ्गलगुणालङ्कारमूर्त्यन्तरं
सत्यज्ञानसुखाद्वितीयगरिमा यस्मात्स्वयं द्योतते ॥

* * * *

**Colophon :**

इति श्रीशोण्ठिकुलकमलभानुना पेरमाम्बाकृष्णभट्टारकसूनुना गौरीरमण-भक्तिमासेदुषा मारभट्टविदुषा विरचिते श्रीमत्तकुमुल्लहनुमत्प्रभुशुभगुणाप-चिते रससुधानिधिनाम्न्यलङ्कारशास्त्रललामन्यादिमः प्रवाहः ॥

**End:**

अत्र समासस्यैकपदवद्भावात्कीर्तिव्रजे मलिम्लुचत्वारोपणाद्रूपकस्य, अतिशयसमृद्धावध्यवसाने(न)सर्वस्वपदेनातिशयोक्तेश्चैकवाचकप्रवेशेन सङ्करः । यथावा—

वितरणलीलालङ्घितसुरतरुनिस्सीमविश्रुतश्लाघः ।
धरणौ हनुमन्मन्त्री हनुमन्मन्त्रीव राजते भूम्ना ॥

**Colophon:**

इति श्रीशोण्ठिकुलकमलभानुना पेरमाम्बाकृष्णभट्टारकसूनुना गौरीरमणचरणभक्तिमासेदुषा मारभट्टविदुषा विरचिते श्रीरेकुमल्लहनुमल्लभुग्रुभगुणोपचिते रससुधानिधिनामन्यलङ्कारशास्त्रे अष्टमः प्रवाहः ॥

समाप्तश्च रससुधानिधिः ॥

हनुमत्पण्डितीयोऽसौ महान्रससुधानिधिः ।
बुधैरास्वाद्यमानोऽप्याकल्पं विजयतां क्षितौ ॥

---

## R. No. 3211.

Paper. 10¾ × 9¼ inches. Foll. 42. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of the Naḍuvil-maṭham, Trichur

### (a) उपाधिप्रकरणम्.
### UPĀDHIPRAKARAṆAM.

Foll. 1a—2a.

An explanatory exposition of the fallacy called Upādhi in accordance with the Nyāya philosophy: by Hṛṣīkēśācārya

Wants the beginning; otherwise complete.

**Beginning:**

. . . . . . . . . . . . . . . न्न प्रतीयते ।
अनित्यत्वमुपाधिश्चेत् कृतकत्वप्रसाधने ॥
तत्साधनेषु सर्वत्र तस्योपाधित्वसम्भवात् ।
केनचित्कृतकत्वं नो हेतुना साध्यते क्वचित् ॥

**End:**

व्याप्तत्वांशविहीनत्वाद्व्याप्यत्वासिद्धिरिष्यते ।
अन्यैरयं च सन्दिग्धानेक(नैकान्तिक) उदाहृतः ॥

सन्दिग्धकालातीतो वा भविष्यद्बाधशङ्कनात् ।
तस्मादित्थं विवेक्तव्य उपाधिस्सूक्ष्मदर्शिभिः ॥

**Colophon:**

इति हृषीकेशाचार्ययज्वविरचितमुपाधिप्रकरणं समाप्तम् ॥

---

(b) उपाधिखण्डनम्.

UPĀDHIKHAṆḌANAM.

Foll. 2a—6b.

An unfavourable criticism on the work described above: by Puruṣōttamavana, who salutes Prajñānagiri, Ānandagiri, Murāri (preceptor of the commentator) and Mukundavana.

Complete.

**Beginning:**

श्रियेऽस्तु नः श्रीपुरुषोत्तमाख्यो महामणिर्मङ्गलदस्त्रिलोक्याः ।
यन्नायकं मध्यगतं दधानो हारश्रियं पुष्यति दुग्धवार्धिः ॥
यद्वक्त्रेन्दुविनिर्गलन्नयसुधाधाराजुषो धीधनाः
धीरा दिक्षु न(ज)यन्ति गर्वितमतींस्तन्त्रेषु तर्केषु च ।
यत्कीर्तिः ककुबङ्गनासु कबरीमालायते निर्मला
तं प्रज्ञानगिरिं गुरुं तनुमनोवाग्भिर्नमस्कुर्महे ॥
षट्तर्ककुमुदिनीन्दु(न्दुं)दिगङ्गनागीयमानगुणनिचयम् ।
आनन्दगिरियतीन्द्रं भूयो भूयो नमस्यामः ॥
प्रणम्य गणनायकं प्रणतकामकल्पद्रुमं
त्रयीशिरसि विश्रुतं विविधविघ्नविध्वंसकम् ।
प्रसाद्य करुणानिधिं भुवनमातरं भारतीं
पराभिमतलक्षणावलिरुपाधिगा खण्ड्यते ॥

* * * *

इत्थमुपाधिव्याधेर्निदानवेत्ता चिकित्सितं विहितम् ।
पुरुषोत्तमवनभिषजा दिशानयात्रोह्यनीयमपरमपि ॥

**End:**

यदीयमुखचन्द्रम(नि)स्सृतवचोमृतास्वादिनः
विनेयविबुधा भृशं मुखरवादिनोत्पादितम् ।
जय(भज)न्ति भुवि दुःश्रुतिं गुणनिधिं गुरूणां गुरुं
मुरारिमनिशं वयं तनुमनोवचोभिर्नुमः ॥

यद्यशःपुष्पगन्धेन त्रैलोक्यमधिवासितम् ।
तं मुकुन्दवनं वन्दे ब्रह्मविद्यालताश्रयम् ॥

**Colophon:**

इति श्रीपरमहंसपरिव्राजकाचार्येण पुरुषोत्तमवनापरनामधेयेन विरचितमुपाधिखण्डनं समाप्तम् ॥

---

(c) दशश्लोकी.
DAŚAŚLOKĪ.

Foll. 6b—7a.

A treatise in ten stanzas similar to the work described above: by Kulārkapaṇḍita.

Complete.

**Beginning:**

अपक्षसाध्यवद्वृत्तिविपक्षान्वयि यत्र तत् ;
साध्यवद्वृत्तितायुक्तं साध्यते साध्यवर्जिते ॥
अपक्षसाध्यवद्वृत्ति विपक्षे पक्षिते न यत् ।
साध्यवद्वृत्तितायुक्तं साध्यते तद्विपक्षगम् ॥

**End:**

पक्षेषु ये सन्ति विवादहीना विहाय तानन्वयुतः प्रसाध्यः ।
पक्षेऽथवा साध्यविनाकृतेन विच्छिद्य वाभावतदन्वितेन ॥
विपक्षपक्षाश्रितताविहीनं विपक्षगं साध्यमसाध्यभिन्नम् ।
तद्व्याप्यताशून्यमभावभावि तस्यैव तद्वृत्त्यसमाश्रितत्व ॥

**Colophon:**

तार्किकचक्रचरणवन्दितानां कुलार्कपण्डितानां कृतिरियम् ॥

---

(d) महाविद्याविडम्बनम्.
MAHĀVIDYĀVIḌAMBANAM.

Foll. 7a—14a.

The work has been printed in Baroda Oriental Series.

Similar to the work described above: by Harakiṅkaranyāyācārya alias Vādīndra, who criticises unfavourably the views of Kulārkapaṇḍita.

Contains a portion in the first Paricchēda and the last portion in the third Paricchēda.

**Beginning :**

वाक्कायचेतःप्रभवापराधप्रबन्धसंबन्धतमःप्रकाश ।
उन्मुद्रितज्ञानसुधानिधान गौरीपते त्वां शरणं प्रपद्ये ॥
समुल्लसति वादीन्द्रचन्द्रे शङ्करकिंकरे ।
उन्मीलन्ति महाविद्यादोषकैरवकोरकाः ॥

केवलान्वयिव्यापके प्रवर्तमानो हेतुः पक्षे व्यापकप्रतीत्या पर्यवसानबला-दन्वयव्यतिरेकिसाध्यविशेषं वाद्यभिमतं साधयन् महाविद्येत्युच्यते । तस्य च महाविद्यात्वमसिद्धत्वादिसकलदोषाविरहः ।

कुलार्कपण्डितेन केनाभिप्रायेण स्वेतरपदं प्रयुक्तमिति चिन्त्यम् । अत्र चैकैक-नित्यनिष्ठैकैकानित्यनिष्ठान्यत्वाद्युपादाय साध्यप्रसिद्धेरप्रसिद्धविशेषणं निरस-नीयमिति ।

**End :**

इति दूषणपाषाणजर्झरीकृतमूर्तयः ।
महाविद्याः क्षणं स्थातुं न क्षमन्ते रणाङ्क(ङ्ग)णे ॥

अथ किमर्थं स्वाभिमतसकलप्रमेयसाधकमहाविद्यानिराकरणं जातीना-मिव तासामाभासत्वख्यापनार्थम् । अन्यथा महाविद्याप्रयोक्तॄणां प्रतिवाद्युदीरित-प्राचीनदूषणैः पराजयादिति । किंच—

यत्र यत्र (पर)प्रौढिः प्रकर्षमवलम्बते ।
श्लाघ्यस्तत्तन्निरासार्थः प्रज्ञाभ्यासवतां श्रमः ॥

**Colophon :**

इति श्रीहरकिङ्करन्यायाचार्यपरमपण्डितवादीन्द्रविरचिते महाविद्या-विडम्बने दूषणविवेको नाम तृतीयः परिच्छेदः ॥

---

(*e*) उपाधिप्रकरणम्.

UPĀDHIPRAKARAṆAM.

Foll. 14*a*—19*b*.

Similar to the work described under subdivision (*a*) of this number.

By Udayana.

Complete.

**Beginning :**

पक्षीकृते प्रसिद्धा व्यावृत्ता नियमतो विपक्षेभ्यः ।
श्रीचिन्मयार्यकरुणा निरुपाधिर्जयति तां महाविद्या(म्) ॥

मैत्रतनयश्यामत्वे साध्ये शाकाद्याहारपरिणतिपूर्वकत्वमुपाधिः । ननु कथमस्योपाधित्वं साध्याभावाविनाभाव्यत्ययत्वादिति चेत्

**End:**

यच्च साधनाव्यापकत्वे सति साध्यकारण(त्व)मुपाधित्वं, तन्न, क्रत्वन्तःपातिनि-(नी)हिंसा, अधर्मः हिंसात्वात् ब्राह्मणहिंसावत् इत्यत्र निषिद्धत्वमुपाधिः । न च निषिद्धत्वेन अधर्मत्वं क्रियते, अपि तु ज्ञाप्यते तथाचानुपाधित्वं स्यात् , तथाहि —अधर्मत्वं अधर्मसाधनत्वं तच्चाधर्मोपलक्षितं स्वरूपमेव, निषिद्धत्वं च करणीयताप्रतिषेधप्रतिपादकवेदवाक्यजनितप्रतिपत्तिविषयत्वं, न च तेन हिंसा क्रियते, नाप्यधर्म(र्मः) क्रियत इत्यलमतिविस्तरेण ॥

**Colophon:**

उदयनस्योपाधिप्रकरणं समाप्तम् ॥

---

(*f*) महाविद्याविडम्बनम्.

MAHĀVIDYĀVIḌAMBANAM.

Foll. 20*a*—21*b*.

The Karikas of the Mahāvidyāviḍambanam are written separately here.

Same work as that described under subdivision (*d*) of this number: by Harakinkara alias Vadindra.

Complete.

**Beginning:**

श्रीमत्तर्कचमूचक्रचक्रवर्ती प्रवर्तते ।
परदर्शनसञ्चूर्णीकरणक्षमचूर्णकः ॥
वाकायचेतःप्रभवापराधप्रबन्धसम्बन्धतमःप्रकाश ।
उन्मुद्रितज्ञानसुधानिधान गौरीपते त्वां शरणं प्रपद्ये ॥
समुल्लसति वादीन्द्रचन्द्रे शङ्करकिङ्करे ।
उन्मीलन्ति महाविद्यादोषकैरवकोरकाः ॥

**End:**

इति दूषणपाषाणजर्झरीकृतमूर्तयः ।
महाविद्याः क्षणं स्यातुं न क्षमन्ते रणाङ्ग(ङ्ग)णे ॥
यत्र यत्र परप्रौढि(:) प्रकर्षमवलम्बते ।
श्लाघ्यस्तत्तन्निरासार्थः मज्ञाभ्यासवतां श्रमः ॥

पक्षीकृते प्रसिद्धा व्यावृत्ता नियमतो विपक्षेभ्यः ।
श्रीचिन्मयार्यकरुणा निरुपाधिर्जयति तां महाविद्याम् ॥

**Colophon :**

इति श्रीहरकिङ्करवादीन्द्रकृतिस्समाप्तिमगमत् ॥

---

(७) महाविद्यादशश्लोकी, वादिवल्लभाव्याख्यासहिता.

MAHĀVIDYĀDAŚAŚLŌKĪ WITH THE COMMENTARY VĀDIVALLABHĀ.

Foll. 22*a*—42*b*.

Similar to the work described above. The commentary is by Nityaprajña alias Puruṣōttamavana, who was the disciple of Pūrṇaprajña-bhaṭṭāraka. Herein the author praises Prajñānagiri, Vidyāsāgara, Vādīndra Kulārkapaṇḍita, Śivāditya, etc.

Complete.

**Beginning :**

रमाकुलावण्यविलोकनेन स्विन्नं वपुः स्वं मथनश्रमेण ।
तिरोदधानं(:) पुरुषोत्तमो वः श्रियेऽस्तु सा श्रीरपि चाब्धिजाता ॥

* * * *

यद्वक्त्रेन्दुविनिर्गलन्नयसुधाधाराजुषो धीधनाः
धीरा दिक्षु जयन्ति गर्वितमतिं(तीन्) तन्त्रेषु तर्केषु च ।
यत्कीर्तिः ककुबङ्गनासु कबरीमालायते निर्मला
तं प्रज्ञानगिरिं गुरुं तनुमनोवाग्भिः नमस्कुर्महे ॥
येनापारमहाविद्यासागराचारिता वयम् ।
विद्यासागरसंज्ञं तं विद्यागुरुमुपास्महे ॥
वादीन्द्रादिनिबन्धान्या(ना)लोच्य न्यायसंभृतान् यत्नात् ।
पुरुषोत्तमवनमुनिना विभज्यते श्रीकुलार्ककृतिरमला ॥

* * * *

या मोहं सहसा वितत्य विदुषां चित्ते चमत्कार(रि)ता-
माधत्ते प्रतिवादिनो मुखरतां रुन्द्धे सदस्सु क्षणात् ।
तां वादीन्द्रकुलार्कपण्डितशिवादित्यादिभिर्मानितां
वादीन्द्राखिलसाध्यसाधकमहाविद्यां भजध्वं बुधाः ॥

* * * *

तत्रादौ विपक्षं पक्षीकृत्य प्रवर्तमानां श्लोकद्वयेन दर्शयति—

अपक्षसाध्यवद्वृत्तिविपक्षान्वयि यत्र तत् ।

साध्यवद्वृत्तितायुक्तं साध्यते साध्यवर्जिते ॥ इति ।

अयमस्यार्थः—

**End:**

तदेवम्—

महाविद्याभुजङ्गानां सर्वार्थेष्वभिधावताम् ।

दुर्वाराणां दुरन्तानां दुस्साधो दुर्लभो बहुविधः ! ॥

इत्यशेषमतिमङ्गलम् ॥

* * * *

पुरुषोत्तमचरणाम्बुजरजो निजे मनसि नित्यमुद्वहता ।

पुरुषोत्तमवनमुनिना रचितेयं वादिवल्लभा विमला ॥

* * * *

**Colophon:**

इति श्रीपरमहंसपरिव्राजकाचार्यपूर्णप्रज्ञभट्टारकशिष्येण परमहंसपरिव्राजकेण नित्यप्रज्ञेन पुरुषोत्तमवनापरनामधेयेन रचिता महाविद्यादशश्लोकीव्याख्या वादिवल्लभाख्या संपूर्णा ॥

---

R. No. **3212.**

Paper. 10¼ × 9⅝ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of Raja of Chirakkal, Malabar district.

**अष्टाङ्गहृदयव्याख्या.**

ASṬĀṄGAHṚDAYAVYĀKHYĀ.

Foll. 1*a*—21*a*. Fol. 21*b* contains the subject index of this work. Fol. 22 is left blank.

Similar to the work described under R. No. 37 ante.

Contains complete the fourth and fifth Adhyāyas in the Śārīrasthāna and the sixth incomplete. The meaning of some words is given in the Malayalam language.

Deals with the following subjects :—

१. मर्मविभागकथनम्.

२. रूपेन्द्रियादिविकारविज्ञानम्.

३. दूतशकुनस्वप्नैरातुरस्य शुभाशुभज्ञानम्.

**Beginning :**

विभागोऽङ्गस्य न ज्ञातो यदि ज्ञाते न मर्मणि ।
जीवितायतने तस्मान्मर्मज्ञानार्थमुच्यते ॥

अथात इति—अयातः शारीरमर्मविभागन्नामाध्यायं व्याख्यास्यामः । मर्मणां विभज्यकथनमस्मिन्नध्याये इत्यादि पूर्ववत् ।

**Colophon :**

इति शारीरे पञ्चमोऽध्यायः ॥

**End :**

अन्यद्रव्यजातं यल्लभं विशिष्टं तच्च तथा अर्धरात्रादिषु कालेषु पर्वादिदिनेषु च समागता दूता मरिष्यतान्दूता वयमिति व्याहरन्ति । पर्वदिवसे षष्ठीचतुर्थीनवमीषु राह्वाद्युदयेषु च । तथा भरण्यादि.

---

R. No. 3213.

Paper. 10¾ × 9½ inches. Foll. 14. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūtalūr-mana, Nareri, Trittala, Malabar district.

इन्दुमतीराघवम्.

INDUMATĪRĀGHAVAM.

Foll. 1*a*—13*a*. Foll. 13*b* and 14 are left blank.

A drama representing the story of the marriage of Indumati with the king Aja. The author, whose name is not given, mentions the king Ravivarman of the Kerala country and the river Prāci.

Contains the first Aṅka complete and breaks off in the beginning of the second Aṅka.

**Beginning :**

लक्ष्मीमक्षीणरूपां पुलकमुकुलकैर्दन्तुरीभूतघ(त)न्वो-
र्लक्ष्मीपद्माक्षयोस्स प्रदिशतु भवतां प्रौढमन्दाक्षभाजोः ।
मन्दं मन्दं प्रवृत्तः प्रसृमरमदनाचार्यकः प्रेमभारा-
दुद्यन्नानाविलासाङ्कुरमधुरदृशोरादिमोऽयं प्रसङ्गः ॥

नान्द्यन्ते

ततः प्रविशति सूत्रधारः ।

* * * *

सूत्र—आर्ये श्रूयतां तावत् । अस्ति किल केरलेषु समस्तजनदुश्चरितविध्वंसिनी निरस्तमलविमकुलपरिभ्रान्ततटप्रदेशा प्राचीनामधेया सरिद्वरा ।

* * * *

सूत्र—तस्यास्तीरे विलसतितरां तारकाधीशमौलेः
क्षेत्रं तत्र प्रथितयशसामस्ति वस्त्यं प्रशस्तम् ।
कैलासानामजनि रविवर्माभिधेयस्तदीये
वंशे विद्याविहृतिनिलयः पथ्यबोधो नराणाम् ॥

अपि च—

आस्येन्दोर्यस्य निर्यद्भणितिमयसुधास्यन्दमास्वाद्य हृष्टं
मर्त्याः केचित्प्रयाताः जगति विबुधतां पूर्वपुण्यातिरेकात् ।
सोऽयं निश्शेषशब्दाम्बुधिचुलकयिता कुम्भसंभूतिरन्यः
कीर्त्या संप्रत्यपीह प्रथितगुणगणो हन्त सन्देदिवीति ॥
देशिकस्यास्य करुणामवलम्ब्य परं बलम् ।
अकरोद्रूपकमिदं कोऽपि भूसुरबालकः ॥

**Colophon:**

इति प्रथमोऽङ्कः ॥

**End:**

कुमारः—ततः,
दीर्घ—ततश्चायं महाराजमापृच्छ्य निजं लोकं प्रति प्रस्थितवान् ।
कुमारः—भगवन्नद्य तावदत्रैव सोऽयं महिमैकनिलयस्सन्निहितो न वा ।
दीर्घ—कुमार! अधुना तावदस्य परमवयस्यो दाक्षा . . . . . ।

---

## R. No. 3214.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 26. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of Śrīramatīrtham Library, Rāmatīrtham.

(a) த்ரைவித்யப்ரபந்தப்ரஸங்கம்.

TRAIVIDYAPRABHANDHAPRASAṄGAḤ.

Foll. 1a—24b.

See the Tamil Part of the IV Vol. of the Triennial Catalogue.

---

(b) सुदर्शनस्तोत्रम्.

SUDARŚANASTOTRAM.

Foll. 24b—25b. Fol. 26 is left blank.

A eulogy addressed to Sudarśana, the discus of Lord Viṣṇu: by Rāmadēśika of Vādhūlagōtra, son of Śriraṅgacārya and grandson of Rāmānujacārya.

Complete.

**Beginning:**

श्रीमन्नारायणं देवं ब्रह्मरुद्रादिवन्दितम् ।
सर्वलोकनियन्तारं नमामि पुरुषोत्तमम् ॥
श्रीमद्रामानुजाचार्यपौत्रस्तत्पादसंश्रितः ।
श्रीरङ्गार्यगुरोः पुत्रः श्रीरामाह्वयदेशिकः ॥
श्रीवाधूलकुलोद्भूतस्तत्तच्चक्रविधायकम् ।
स्तोत्रं सौदर्शनश्चक्रे वेदवेदान्तगोचरम् ॥

* * * * *

इत्येवं तत्तचक्रस्य धारणं श्रुतिचोदितम् ।
तस्मात्सर्वप्रयत्नेन धार्यं मोक्षफलेप्सुभिः ॥

**End:**

विष्णोस्सुदर्शनं धार्यं वेदवेदान्तगोचरम् ।
इति सौदर्शनं स्तोत्रमकरोद्रामदेशिकः ॥

**Colophon:**

इति सुदर्शनस्तोत्रं सम्पूर्णम् ॥

---

R. No. **3215.**

Paper. 10¾ × 9¼ inches. Foll. 28. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Pāliyattu Valiya Acchan, Cennamangalam, Parur, (via) Ernakulam.

**मालविकाग्निमित्रव्याख्या—तात्पर्यप्रकाशिका.**

**MĀLAVIKĀGNIMITRAVYĀKHYĀ: TĀTPARYA-PRAKĀŚIKĀ.**

Foll. 1a—26b. Foll. 27 and 28 are left blank.

A commentary on the Mālavikāgnimitra of Kālidāsa, which work has been described under No. 12605 of the D.C.S. MSS., Vol. XXI.

Contains the first Aṅka only.

**Beginning:**

अभिनेयार्थकाव्यविशेषमारब्धः कविरविघ्नपरिसमाप्तये तदारम्भोचित-
नान्दीद्वारेण "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इत्युक्तेषु

प्रथमोक्तामाशिषं तावत्करोति । एकैश्वर्य इत्यादिना—

**End:**

अपि च सिद्धिपथमवतरत इति पदाभ्यां मनोरथस्य रथौपम्यं गम्यते। नेन चानुपहतगतिप्रसरता प्रतीयते। शब्दमधुरता साधारणधर्मः रथस्वनस्यापि रमणीयत्वं प्रसिद्धम्। यथायमेव कविरुक्तवान्—"श्रोत्राभिरामध्वनिना रथेन। रथस्वनोत्कर्णमृग" इति च। अयमुत्तराङ्कार्यबिन्दूपक्षेपः॥

**Colophon:**

इति मालविकाग्निमित्रव्याख्यायां तात्पर्यप्रकाशिकायां प्रथमोऽङ्कः॥

---

## R. No. 3216.

Paper. 10⅝ × 9⅞ inches. Foll. 36. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of Naḍuvil-maṭham, Trichur.

सनत्कुमारीयम् (मन्त्रपटलः).

SANATKUMĀRĪYAM (MANTRAPAṬALAḤ).

Foll. 1a—35b.

A treatise in Mantraśāstra containing all kinds of Mantras relating to Lord Gōpāla, as explained by Sanatkumāra to Nārada.

Contains one to five Paṭalas.

**Beginning:**

सनत्कुमारं योगीन्द्रं सिद्धाश्रमनिवासिनम्।
ब्रह्मनिष्ठं मुनिं शान्तं प्रसन्नादित्यवर्चसम्॥
विनयेनोपसङ्गम्य शिरसा प्रणिपत्य च।
नारदः परिपप्रच्छ देवर्षिस्सर्वकालवित्॥

* * *

गोपालविषया मन्त्रास्त्रयस्त्रिंशत्प्रभेदिनः।
तेषु सर्वेषु मन्त्रेषु मन्त्रराजमिमं शृणु॥

* * *

अष्टादशाक्षरं मन्त्रं शृणु वक्ष्यामि नारद।
समाहितमना भूत्वा दुर्लभं भुवनत्रये॥

**End:**

अनेन सदृशो मन्त्रो नास्त्यन्यो भुवनत्रये।
शीघ्रसिद्धिकरो नृणामिति ब्रह्मानुशासनम्॥

उक्ता अष्टादशार्णेयाः क्रिया मन्त्रान्तरेष्वपि ।
अमुनैव विधेयास्ता मनुना मनुवित्तमैः ॥
नारदायोपदिश्यैवं गोपालकमहामनून् ।
सनत्कुमारो योगीन्द्रो ययौ सिद्धाश्रमाद्दिवम् ॥

**Colophon:**

इति सनत्कुलमारीये पञ्चमः पटलः ॥

---

R. No. 3217.

Paper. 10¾ × 9¾ inches. Foll. 22. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Rāmagōvinda Śastrigaru of Narsapur.

स्वत्ववादः.

SVATVAVĀDAḤ.

Foll. 1a—22b.

A discussion on the Hindu law of inheritance and the different kinds of property that are divisible among the heirs.

Incomplete.

**Beginning:**

स्वत्वस्वामित्वस्वरूपनिर्वचनम् । चैत्रस्यानु(स्य धन)मित्यादौ षष्ठ्यर्थनिवचनश्चेति ।

तत्र स्वत्वं क्रयप्रतिग्रहादिवत्पित्रादीनां मरणपातितःपुत्र(स्यप्रव्र)ज्योपेक्षाभ्यश्च स्वत्वनाशे न स्वद्या(ध्य)वधानेनैव पुत्रादीनां स्वत्वोत्पादस्य वाचनिकत्वात् । उपेक्षा च न ममेदमिति सङ्कल्प[ः] विशेषः । अत एव जीवत्पितृकविभज्यमाने धने पुत्रस्य न स्वत्वानुपपत्तिः । तत्र पितुर(रु)पेक्षायाः पितुः स्वत्वनाशकत्वात । अथ पातित्यप्रव्रज्ययोरपि स्वपूर्ववृत्तिस्वत्वनाशकत्वे तदनन्तरं प्रायश्चित्तानुष्ठानेऽपि पूर्वार्जितधने क्रयणादिकं विनाधिकारो न स्यात् । स्वत्वोत्पादकाभावात् ।

* * * *

**Colophon:**

इति पितृमरणादेः स्वत्वप्रयोजकत्ववादः ॥

स्वत्वविशेषं प्रति पितृमरणादिवत् स्वत्वसामान्यं प्रति स्वामिजीवनमपेक्षितमिति प्राञ्चः ।

**End :**

तानि च स्वत्वानि न विभागनाश्यानि किन्तु विभागप्राक्कालावच्छेदेनैव सर्वत्र पितृधने च वर्तते न तु तदुत्तरकालावच्छेदेन विभागोत्तरकाले यस्य योंऽशः तत्रैव तत्स्वत्वस्य वृत्तिः । यथा न्यायनये नित्योऽपि घटात्यन्ताभावः घटवति भूतले घटापसारणदशायामेव वर्तते न घटस्व(स)त्त्वदशायाम् . . .
. . . . . . . . . . . . . . .

---

## R. No. 3218.

Paper. 10¾ × 9¾ inches. Foll. 10. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Harikṛṣṇarāja guru of Gangapuraśāsanam, Aska taluk, Ganjam district.

**मृगयाचम्पुः.**

**MṚGAYĀCAMPŪḤ.**

Foll. 1a—10b.

A work in prose and verse describing the hunting expedition of a king named Vicitravikrama who ruled in Kōlati, probably the Ganjam district: by Kavirāja.

Complete.

**Beginning :**

अञ्जनाभमखिलव्रजवामारञ्जनाय कृतरासविलासम् ।
तं जनामयदमम्बुजनेत्रं कञ्जनाभमहमन्वहमीडे ।

जना जगति नायके कति विनायके सेवकाः
भजन्ति भवि(वु)काय केचन चिराय कंसद्विषम् ।
वयं तु बहुमन्महे भुवनजन्महेतुं जटाः
शिरोभुवि वहन्महेश्वरसमाह्वयं तन्महः ॥

* * * *

अभिचारकतुर्दुश्शीरतस्य विचित्रविक्रमो नाम बभूव भूपः ।

**End :**

किं च बभूव भूपते महाननर्थः ।

एतत्फलाशनसगर्वतुपर्वहीन-
निर्वैशसंस्थितिविशालकलाकलापः ।
स्वर्भानुनिर्भरनिगीर्णगलार्गलान्त-
र्लग्नो विमोक्ष्यति कथं नु निशीथिनीशः ॥

**Colophon:**

इति कविराजकृता मृगया समाप्ता ॥

---

R. No. 3219.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 33. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920-21 from a MS. of Tippan Nambūdirippād, Ponnūrkotta-mana, Travancore State.

रसहृदयम्.

RASAHṚDAYAM.

Foll. 1a—33b.

A treatise on the preparation of certain medicines from mercury and other substances, and on the treatments of diseases: by Gōvindabhagavatpāda, son of Maṅgalaviṣṇu. The work is divided into 18 Paṭalas, while the same work printed in the Bombay Āyurvēdagranthamālā series is divided into 19 Avabōdhas. The headings of the chapters as given in the MS. differ from the division as found in the printed edition.

Contains the following Paṭalas:—

१. रसप्रतिकर्मविधिः.
२. रसशोधनविधिः.
३. अभ्रकजारणविधिः.
४. अभ्रकसत्त्वजारणविधिः.
५. गर्भद्रुत्यधिकारः.
६. जारणाधिकारः.
७. जीर्णाभ्रकवर्णकथनम्.
८. सत्त्वपातनाधिकारः.
९. बीजनिर्वापणाधिकारः.
१०. द्वन्द्वाधिकारः.
११. सङ्करबीजाधिकारः.
१२. बीजाधिकारः.
१३. बाह्यद्रुत्यधिकारः.
१४. सारणाधिकारः.
१५. क्रामणाधिकारः.
१६. वेधविधानम्.
१७. घनसत्त्वक्रियायोगः.
१८. रसायनविधिः.

Complete in 18 Paṭalas.

**Beginning:**

जयति स दैन्यगदाकुलमिदमखिलं पश्यतो जगद्यस्य ।
हृदयस्यैव गलित्वा जाता रसरूपिणी करुणा ॥
पीताम्बरोऽथ बलजिन्नागक्षयबलहलरागगरुडचरः ।
स जयति हरिरिव हरजो विदलितभवदैन्यदुःखभरः ॥

मूर्छित्वा हरति रुजं बन्धनमनुभूय मुक्तिदो भवति ।
अमरीकरोति च मृतः कोऽन्यः करुणाकरात्सूतात् ॥

कोऽपि कथमन्यथाखिलावं(?)(विलासमात्रात् ।
शर्मं नयतीति रसबन्ध एव धन्यः प्रारम्भे ॥ (?)

**End:**

अघनष्टशरीरवर्णाः नागाङ्गुष्ठी नरः प्रागुलायस्याः ।?
हितं न सोमेश्वरस्तथा न सति पुनर्नवरङ्गैः ॥?
तस्मात्किरातः तपते रसकर्मोपदेशतो दृष्टा ।
रसहृदयं तत्राख्यत श्रीविरचितवा(गु)गोविन्दभट्टपत(दं)नत्वा ॥
मङ्गलविष्णुसुतेन रसाख्यनामो(मा)यम् ।
श्रीभगवद्गोविन्दे कृत्स्नं जगतां श्रेयसे भूयात् ॥
अष्टा(द)शसंस्काररसेन्द्रराजस्य दिव्यतनुं दृष्ट्वा ।
लिखितं पुंसा रसहृदयं समाप्तसकलम् ॥?

**Colophon:**

इति श्रीमद्गोविन्दभगवच्छ्रीपादविरचिते रसहृदये रसायनविधिर्नामाष्टादशः पटलः ॥

---

## R. No. 3220.

Paper. 10¾ × 9¾ inches. Foll. 34. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Mundali Nārāyaṇa-Nambiyar, Kainnūr village, Ollur post, Cochin State.

(*a*) रतिरहस्यम्.

RATIRAHASYAM.

Foll. 1*a*—29*b*.

Same work as that described under No. 3895 of the D.C.S. MSS., Vol. VIII. By Kokkōka.

---

(*b*) दत्तकसूत्रवृत्तिः.

DATTAKASŪTRAVṚTTIḤ.

Foll. 30*a*—33*a*. Foll. 33*b* and 34 are left blank.

A treatise explaining the distinguishing characteristics of good housewives and dancing girls.

Incomplete.

**Beginning:**

महेश्वरेन्द्राद्यमरेश्वरेभ्यो वक्ष्यामि कृत्वा शिरसा प्रणामम् ।
उक्तानि यान्येव हि दत्तकेन लिङ्गानि तानीह च कामिनीनाम् ॥
कक्षोरुनाभिस्तनविकासनं च निपीडनं पार्श्वपयोधराणाम् ।
संयम्य लीलाकरणं च भूयः कटाक्षविक्षेपविलासिनीनाम् ॥

* * * *

शम्भुं च सोमं च प्रणम्य मूर्ध्ना देवेन्द्रमन्द्राणमनङ्गराजम् ।
यद्दत्तकेन प्रमदानुवृत्तं कान्तानुवृत्तं कथितं स्वतन्त्रे ॥
तस्मात्समाहृत्य समस्तमद्य वेश्याङ्गनावृत्तमहं प्रवक्ष्ये ।
वपुर्विशिष्टा सुवयास्सुशीला सद्भावभावा सहधैर्यलज्जा ॥
स्यादिङ्गितज्ञाक्षरविस्कलाज्ञा प्रियंवदा वेशवधूः प्रशस्ता ॥

**End:**

दर्शनं स्पर्शनं तासां हासस्सम्भाषणं तथा ।
एतत्कामरसं प्रोक्तं शेषं व्यायामलक्षणम् ॥

**Colophon:**

इति शयनोपचारः ॥

---

R. No. **3221.**

Paper. $10\frac{3}{8} \times 9\frac{1}{2}$ inches. Foll. 198. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920–21 from a MS. of the Samsthānam Library, Bobbili, Vizagapatam district.

आह्निकभास्करः.

ĀHNIKABHĀSKARAḤ.

This is the further portion of the work described under R. No. 1697 ante, wherein see for the beginning: by Indragaṇṭi Sūryanārāyaṇa.

Deals with the following topics:—

माध्याह्निकस्नानम्.
ब्रह्मयज्ञः.
देवर्षिपितृतर्पणम्.
यमतर्पणम्.
भीष्मतर्पणम्.
देवपूजा.
वैश्वदेवनिर्णयः.
नवद्रव्यनिर्णयः.

मण्डलनिर्णयः.
पीठनिर्णयः.
शाकादिनिर्णयः.
पर्युषितनिर्णयः.
निन्दिताश्रादिः.
भोजनविधिः.
ताम्बूलचर्वणम्.
पुराणश्रवणम्.
सायं सन्ध्या.
सायं भोजनम्.
दीपस्थानम्.
शय्यानिर्णयः.
ऋतुकालः.
गर्भिणीधर्माः.
गर्भिणीपतिधर्माः.
प्रथमार्तवविषयः.
रजोदर्शने प्रथमदिनम्.
स्नात्वा पुनरपि रजोदर्शने दिनसंख्या.
देवताप्रतिष्ठाकालः.
शिवविष्णुनैवेद्यम्.
शिवकेशवोत्सवनिर्णयः.
राजगृहे वृक्षारोपणविधिः.

**End:**

सर्वे वै पुष्पवृक्षाश्च गृहारामेषु राजभिः ।
रोपितव्याः प्रयत्नेन मालतीमल्लिकादयः ॥

इति ।

व्यासः—

यद्गृहं रक्षते नित्यं रङ्गवल्ल्यनुलेपनैः ।
तद्गृहे वसते लक्ष्मीर्नित्यं पूर्णकलान्विता ॥ इति ।

**Colophon:**

इति श्रीइन्द्रगण्टिसूर्यनारायणविरचिते आह्निकभास्करे राजगृहे वृक्षारोपणविधिः समाप्तः ॥

---

## R. No. 3222.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 32. Lines, 29 in a page. Dēvanāgari. Good.

Transcribed in 1920-21 from a MS. of Pallipuram Pālūr-mana, Malabar district.

नलाभ्युदयम्.
**NALĀBHYUDAYAM.**

Foll. 1*a*—32*b*.

A drama having for its plot the story of the marriage of Damayanti with king Nala.

Complete in eight Aṅkas.

**Beginning:**

नान्द्यन्ते ततः प्रविशति सूत्रधारः ।

सूत्रधारः—

वामां वामार्धभागे शिरसि शशिकलां फालदेशे कृशानुं
कण्ठे क्ष्वेलं कराग्रे मृगपरशुकपालाग्यङ्गमङ्गे भुजङ्गान् ।
बिभ्रत्स्वव्योमवात(ताग्निजल)वसुमतीपुष्पवन्मूर्तिराति
निघ्नन्विघ्नेशतातः प्रदिशतु भवतां शाश्वतं शर्म शम्भुः ॥

अलमनयैवाशिषा । अतः सामाजिकानुग्रहमनुमानयिष्यामि । (परिक्रम्य नेपथ्याभिमुखमवलोक्य) मारिष इतस्तावत् ।

* * * *

सूत्र—अस्ति ? नलाभ्युदयसंज्ञं नाटकं नयनामृतम् ।
यतः कुतश्चिदायातमस्मदङ्के निषीदति ।

पारि—केन खलु विरचितमेतत् ।

सूत्र—नायं मन्त्रः श्रोतुं विचारयितुम् ।

पारि—सत्यमेतत् । किं तु अनेकनाटकपारङ्गतस्य भावस्य बहुमानपदमिदमासीत् इत्येव विरचयितृविचारः कृतः ।

सूत्र—प्रातः प्रातः कीर्तयंस्तच्चरित्रं कश्चिद्भक्तो भक्तलाभाभिलाषी ।
तृप्तस्तिष्ठन्निर्ममे निर्ममेहः तत्सेवार्थी नाटकं नाटकीयः ॥

**End:**

ब्रह्मा—भद्र—

मत्सृष्टावीदृशः कश्चिदस्ति वा नास्ति वा नरः ।
इति ज्ञातुं प्रपन्नोऽस्मि त्वां दृष्ट्वा हृष्टमानसः ॥

ततो यदा तवास्यां स्थितावलम्भावस्तदास्मल्लोकमवाप्स्यसि ।

राजा—अनुगृहीतोऽस्मि ।

ब्रह्मा—किं ते भूयः प्रियमुपहरामि ।

राजा—यदि मे भगवान्प्रसन्नः किमतः परमिच्छामि । तथाप्येतावदस्तु—

सन्तः सन्तापहीनाः समुचितसमयव्याप्तृताः सन्तु जन्तू-
न्सर्वान्दुर्वारवीर्यः समवतु समुदाचारवान्सार्वभौमः ।
वर्षन्तः कर्षयन्तु क्षितिमपि च घनाः सान्द्रसस्यां यथासौ
हंसः सोऽहं तथास्यां तव पदकमलोपाङ्गरङ्गोपजीवः ॥

(निष्क्रान्ताः सर्वे) ॥

**Colophon :**

इत्यष्टमोऽङ्कः । नलाभ्युदयं समाप्तम् ॥

---

## R. No. 3223.

Paper. 10⅞ × 9⅞ inches. Foll. 37. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920-21 from a MS. of Tippan Nambūdirippad of Ponnūrkotta-mana, Travancore State.

(*a*) मृडानीतन्त्रम्.

MṚḌĀNĪTANTRAM.

Foll. 1*a*—25*a*.

A treatise in medicine chiefly describing the methods of preparing powders and electuaries.

Deals with the following subjects :—

१. रसगुलिकाविधानम्.
२. गन्धकविद्याविधिः.
३. लोहभस्मविनियोगविधिः.
४. सूतसारविद्यावर्णनम्.
५. Do. Different.
६. भुजङ्गरञ्जनविधानम्.
७. विशिष्टसारस्वासनवर्णनम्.
८. तुत्थसारोत्तरवर्णनम्.
९. मदमत्तानिदानकथनम्.
१०. रसबन्धनविधिः.

Complete.

**Beginning :**

कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
एकान्ते देवमासीनमपृच्छन्मृडमम्बिका ॥
देवदेव महादेव भवनाशन भैरव ।
भक्तानामनुरक्तानां भवद्यजनसाधनम् ॥
दारिद्र्यनाशनं ब्रूहि रसबन्धं कृपालय ।
साधु साधु त्वया पृष्टं तुष्टोऽस्मि सुभगे तव ॥

वक्ष्यामि सूतवेधं ते पियक्षूणां परं हितम् ।
दारिद्र्यविषवृक्षस्य महाशनिरुदाहृतम् ॥
रसायनं परं दिव्यं प्रकाश्यं तु सुदुर्लभम् ।
सूततुल्यौ सुरेशानि प्रत्येकं दशनिष्ककौ ॥
संचूर्ण्य मर्दयेदेतद्द्वयं यामद्वयं ततः ।
* * * *

**Colophon:**

इति श्रीमृडानीतन्त्रे रसपाशे प्रथमः पटलः ॥

**End:**

गुलिका धार्यते येन सततं मेनकात्मजे ।
संपूज्यते सुरश्रेष्ठैः लोकपालैश्च सर्वदा ॥
येनास्ये धार्यते चैषा गुलिका मेनकात्मजे ।
तस्य देहं परित्यज्य दोषादिव्यत्वमाप्नुयात् ॥

**Colophon:**

इति समाप्तं शास्त्रम् ॥

---

(*b*) रहस्यसंहिता.

RAHASYASAMHITĀ.

Foll. 25*a*—37*b*.

Similar to the work described above.

Deals with the following topics:—

१. रसज्ञानरसाङ्कुशनिर्वचनम्.
२. गोमारीबन्धनिरूपणम्.
३. अष्टबन्धादिनिरूपणम्.
४. तीक्ष्णबन्धादिनिरूपणम्.
५. मूलतादिबन्धनिरूपणम्.
६. रसबन्धादिनिरूपणम्.

Complete in six Paṭalas.

**Beginning:**

देव्युवाच—

रसज्ञानं शिवज्ञानं भुक्तिमुक्तिप्रदायिनौ(नी) ।
साङ्गेन चामरत्वं च खेचरत्वं भवेत्सह ॥
इन्द्रियाणां विना भावैः शिवज्ञानं च साधितम् ।
इन्द्रियैरपि साध्यस्तु(ध्यं तु) सूतज्ञानं विशेषतः ॥
* * * *

**Colophon:**

इति रहस्यसंहितायां रसाङ्कुशे प्रथमः पटल ॥

**End:**

मारार्धाङ्गारधाम्यास्तु हेमं भवति सद्गुण ।
एतद्वन्धेऽपि शुक्राद्यैः पञ्चमं षोडशास्तथा ॥
जीर्णमस्तु तदेकाभ्रं तन्नागाचतुःषष्टिकम् ।
कृत्वा वेधकमाप्नोति तत्पराच परा सकृत ॥

**Colophon:**

इति रहस्यसंहितायां रसाङ्कुशे षष्ठः पटलः ॥

---

## R. No. 3224.

Paper. 10½ × 9½ inches. Foll. 128. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of the Naḍuvil-Maṭham, Trichur, Cochin State.

पञ्चपादिकाव्याख्या.

PAÑCAPĀDIKĀVYĀKHYĀ.

Similar to the work described under No. 4607 of the D.C.S. MSS., Vol. IX.

Wants the beginning and end.

**Beginning:**

किमर्थक्रियापि पिशाचायमानैव तथाचेत् किं नश्छिन्नम् । दृश्यमानास्त्वनुभूतावसितपरस्परव्यावृत्तक्रमयौगपद्यरूपप्रकारद्वयसमालिङ्गितशरीरा अर्थक्रिया न प्रकारान्तरा भवितुमीशते ।

**End:**

ननु यद्यचेतनं कारणं कथं तदैक्षतेति ईक्षतिशब्दः । तत्र परिहरति । गौणो भविष्यति गुण . . . . पिपतिषतीतिवत् । कथं तर्ह्यचेतने स आत्मेत्यात्मशब्दः । तत्राह—तादर्थ्यादात्मार्थत्वात्तच्छब्दभाग्भविष्यति ।

---

## R. No. 3225.

Paper. 10½ × 9½ inches. Foll 125. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of Nārāyaṇa-Bhārati-Kappiyār Svāmigaḷ, Muppil Sthalam, Naḍuvil-Maṭham, Trichur, Cochin State.

पञ्चपादिकाव्याख्या—प्रबोधपरिशोधिनी.

PAÑCAPĀDIKĀVYĀKHYĀ : PRABŌDHAPARIŚŌDHINĪ.

Similar to the work described under No. 4667 of the D.C.S. MSS., Vol. II ; by Ātmasvarūpa disciple of Narasiṁhasvarūpa.

**Beginning :**

पुण्येन स्वार्जितेन स्वमतफलवपुः स्वार्च्यमानः किलासी-
द्विष्णुर्नः शङ्करोऽसौ विधिरजनि निजं वेदमावेदयिष्यन् ।
इत्थं निर्णीतमार्यैः प्रणतिषु पटुना मौलिना वीतसंख्या-
न्वारानाराधयामो दिनमनु भगवद्विश्वराजप्रभावम् ॥

सारस्वतं हि यज्ज्योतिर्व्यासशङ्करसंज्ञितम् ।
तन्नमामि सदानन्दप्रत्यग्ब्रह्मपदोदितम् ।
ध्यानादानालजाग्रद्धृदयसरसिजज्ञानमैरेयधारा-
स्वादज्ञस्वात्मतृप्तं यतिवरपरिषत्पूज्यपूज्यं यतीन्द्रम् ।
भूयो भूयो नमस्यापरिचयपटुना मौलिना वीतसंख्या-
न्वारानाराधयामो दिशि दिशि भगवच्छ्रीनृसिंहस्वरूपम् ॥

प्रणम्य परमानन्दं प्रणतार्तिहरं हरिम् ।
पृथक् प्रबोधसिद्ध्यर्थं विभजे पञ्चपादिकाम् ।

वक्तृश्रोत्रोः सम्यक्छब्दार्थपरिस्फूर्त्यविघ्नपरिसमाप्तिप्रचयगमनाशिष्टाचारपरिपालनप्रभृतयेऽभिमतदेवतानमनमङ्गलच्छलेनाशेषस्य भाष्यस्य ब्रह्मात्मैकत्वे तात्पर्यमाह—अनाद्यानन्देति ।

* * * *

**Colophon :**

इति श्रीनरसिंहस्वरूपपूज्यपादशिष्यस्य आत्मस्वरूपभगवतः कृतौ पञ्चपादिकाव्याख्याने प्रथमसूत्रम् ॥

**End :**

तदेवं ब्रह्मज्ञानात्प्रमात्रादिसाधनैः महाशेषानर्थोज्झित्यानतिशयानन्दाव्यो नामनस्य(मग्नस्य) साधनप्रयोजनयोरभावेन पुनः कर्तव्यताभावाद्वेदान्तानां मानान्तरानधिगतकेवलसिद्धबोधने शक्तितात्पर्याभाव . . . . . . . गम्यं सच्चिदानन्दप्रत्यग्भूतं ब्रह्मेति सिद्धमित्यधिकरणार्थोपसंहारः ॥

श्रीनृसिंहस्वरूपस्य शिष्येणेयं मयेरिता ।
आत्मस्वरूपनाम्ना हि प्रबोधपरिशोधिनी ॥

सेव्यतां सर्वदा सर्वैः सद्भिः सन्न्यायवित्तमैः ।
सदानन्दोऽपरोक्षाय सतां सन्तोषसाधनी ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीनृसिंहस्वरूपपूज्यपादशिष्यस्यात्मस्वरूपभगवतः कृतौ पञ्चपादिकाव्याख्याने समन्वयसूत्रम् ॥

---

R. No. 3226.

Paper. 10⅝ × 9⅜ inches. Foll. 151. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa-Nambūdirippāḍ of Kūṭalūr-mana, Narori, Tritala, Malabar district.

सेतुबन्धव्याख्या.

SĒTUBANDHAVYĀKHYĀ.

Similar to the work described under R. No. 2772 ante. By Kṛṣṇa. The text is called Rāvaṇavadha

Complete.

Name of the scribe: Paśupati.

**Beginning:**

कर अल कबली अम्मरलीमणहरगी असजणि अमुपण्णाणन्दम् ।
पणमह माआगोपं पणयपरं पसविलासिनीपरिवारम् ।

(कवेः) प्रवरसेनस्य निधानं यशसो महत् ।
काव्यं सेतुरिति ख्यातं व्याख्यातुं प्रयतामहे ॥
सूरयो बहवो ह्यस्य व्याख्यानानि प्रचक्रिरे ।
न तैरप्यखिलैरस्य सम्यगर्थः प्रकाशितः ॥
भावः प्रवरसेनस्य निगूढो न हि शक्यते ।
प्राज्ञैरपि परिज्ञातुं मन्दैः किमुत मादृशैः ॥
किन्तु श्रीकृष्णपादाब्जप्रसादबलबृंहितः ।
बालिशोऽपि प्रवर्तिष्ये सेतोर्व्याख्यानसाहसे ॥
इदं प्रवरसेनेन रामायणकथाश्रयम् ।
कृतं प्राकृतरूपत्वात्स्कन्धकाह्वयमद्भुतम् ॥
प्राकृतं स्कन्धकादीति दण्डिना प्रतिपादितम् ।
अनुरागाङ्कमाश्वाससमाप्तावनुरागतः ।

अथ कविसार्वभौमः प्रवरसेनः काव्यादौ काव्यमुखालङ्काराणामाशीर्नमस्क्रिया . . . . . न्यतममिष्टदेवताप्रणामं प्रथममाचरति—पणमह अवविह्लअतुङ्गमित्यादिना--

नमत अ(ता)वर्धिततुङ्गं . . . . . . . . . वनतगर्भारम् ।
अप्रलघु परिरक्षणं अज्ञातपरमार्थप्रकट मधुमथनम् ।
एवंभूतं मधुमथनं नमत । कथंभूतमवर्धिततुङ्गं केनचिदवर्धितमपि तुङ्गम् ।

**End :**

अत्र समाप्यत एतत्स्त्रीलाभेन जनितहृदयाभ्युदयम् ।
रावणवध इति काव्यमनुरागाङ्कं सतृष्णसुखनिर्वेशम् ॥

* * * *

सतृष्णानां सुखं सुखकरः निर्वेशः अनुभवो यस्य । निर्वेशः संमूर्छने स्यात्कर्ममृत्यूपभोगयोरिति वैजयन्ती । रावणवध इत्येतत्काव्यमत्रैव समाप्यते नातः परं वक्ष्यत इत्यर्थः ॥

**Colophon :**

इति श्रीकृष्णविप्रप्रणीते सेतुविवरणे षोडशः आश्वासः समाप्तः ॥

प्रसिद्धगुणगौरवं प्रवरसेनकाव्यं मह-
यथामतिबलं मया प्रकटिताभिधेयाशयम् ।
निरूढिमनया दिशा भजतु बालवर्गः सुखं
परिश्रमविदः . . . . . . . . . . . न माम् ॥

The Scribe of the original palm-leaf MS. adds—

शुद्धस्फटिकसङ्काशं त्रिणेत्रं चन्द्रशेखरम् ।
इन्दुमण्डलमध्यस्थं वन्दे देवं सदाशिवम् ॥
तस्मै नमो यशोदाया दायादायास्तु तेजसे ।
यद्धि रामामुखाम्भोजं भोजंभोजं व्यवर्धत ॥
धेनुपालदयितास्तनस्थलीधन्यकुङ्कुमसनाथकान्तये ।
वेणुगीतगतिमूलवेधसे तेजसे तदिदमोन्नमो नमः ॥
पशुपतिना लिखितमिदं व्याख्यानम् ॥

---

R. No. 3227.

Paper. 10⅛ × 9¼ inches. Foll. 79. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Payyurpattōri, Kannankulam post.

बृहदारण्यकोपनिषद्भाष्यवार्त्तिकव्याख्यानम्—न्यायतत्त्वविवरणम्.

BṚHADĀRAṆYAKŌPANIṢADBHĀṢYAVĀRTTIKAVYĀKHYĀNAM : NYĀYATATTVAVIVARAṆAM.

A commentary on the Bṛhadāraṇyōpaniṣadbhāṣyavārttika of Surēśvara, which itself is a commentary on the Bṛhadārṇyabhāṣya of Śrī-Śaṅkara, described under No. 644 of the D.C.S. MSS., Vol. I, Part III: by Nṛsiṁhaprajña who salutes Śaṅkarācārya, Surēśvara and the place called Kulaśēkharapurī, the preceptor of the author.

Incomplete.

**Beginning :**

यदज्ञानाज्जगद्भाति यद्ज्ञानान्नैव भाति च ।
वन्दे तं सच्चिदानन्दं प्रत्यगात्मानमीश्वरम् ॥
तस्मै नमो महेशाय वटद्रुमनिवासिने ।
अजस्रं यत्पदाम्भोजं ध्यायंध्यायं परं मुहु(मह): ॥
वन्दामहे परं ज्योतिः गजवक्त्रं चतुर्भुजम् ।
निःसीमै(श्वर्यमचलं क्षिप्रं) कृत्स्नफलप्रदम् ॥
यानुभूतिः स्वयंज्योतिरादित्येशानविग्रहा ।
शङ्कराख्या च तां नौमि सुरेश्वरपदास्पदम् ।
कुलशेखरपुर्याख्यास्त्रमस्यामि मुनीनहम् ।
यत्कटाक्षेक्षणादासमखण्डानन्दचिद्घनः ॥
न प्रियङ्करणी बुद्धिः न चाब्बङ्करणं श्रुतम् ।
(तथापि) वार्तिके गूढे न्यायतत्त्वं विवृण्महे ॥
नृसिंहप्रज्ञयतिना सर्वेहास्यास्पदात्मना ।
यत्किञ्चिदुच्यते तत्र क्षन्तुमर्हन्ति साधवः ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां "मङ्गलाचारयुक्तानां विनिपातो न विद्यत" इति स्मृतिशिष्टाचारानुदि(मि)तशून्या(श्रुत्य)र्थानुष्ठानाय चाभीष्टदेवतावन्दनमनुष्ठेयं शास्त्रस्य च तत्प्रतिपाद्यप्रयोजनम् अपास्ताशेषद्वैतदुःखानतिशयानन्दपूर्णप्रत्यगात्मबोधः श्रोतृप्रवृत्तिसिद्धये वक्तव्यमिति तदुभयं श्रुत्यर्थाभ्यां दर्शयति—साविद्येति—यं व्याकृताव्याकृतजडसाक्षिणमात्मानं जगज्जीवेश्वरभावेन भागशो मन्यते तं विभुं चिदाचिदात्मना विविधं भवन्तं पूर्णानन्दचिद्घनं भक्त्या वन्द इति सम्बन्धः ।

**End :**

यद्वा वचनेनैव कर्माणि मुक्तिसाधनानि प्रापयिष्यन्ते । कथं पुनर्वाचनिकस्य प्रति . . . . यापि प्रापकस्योपपत्तेः प्रतिषेधस्यागतिकत्वात् ।

कथं पुनः शास्त्रे साक्षान्मोक्षसाधनानि कर्माणि प्रापयति प्रतिषेधः । अथ नाज्ञसा प्रापयति तथापि.

---

R. No. 3228.

Paper. $10\frac{3}{8} \times 9\frac{1}{4}$ inches. Foll. 147. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of Śrīmān Nīlamaṇi Parikṣa of Rasikaranjana Mutt, Parlakimedi, Ganjam district.

Fol. 146*b* is left blank. Fol. 147 gives the contents of this work.

अद्भुतामृतम्.

ADBHUTĀMṚTAM.

A treatise on prognostication and prediction based upon the occurrence of certain abnormal events.

Dealing with the following Adbhutas :—

I. दिव्याद्भुतामृतम्.

१. सूर्याद्भुतरसः.
२. चन्द्राद्भुतरसः.
३. ग्रहणाद्भुतरसः.
४. Do.
५. कुजाद्भुतरसः.
६. बुधाद्भुतरसः.
७. गुरुचाररसः.
८. शुक्राद्भुतरसः.
९. मन्दाद्भुतरसः.
१०. केत्वद्भुतरसः.
११. अगस्त्यादिसप्तर्षिध्रुवाद्भुतरसः.
१२. ग्रहयुद्धाद्भुतरसः.
१३. ग्रहयोगाद्भुतरसः.
१४. सूर्यादिवर्षाधिपाद्भुतरसः.
१५. द्रव्याश्रयाद्भुतरसः.

II. आन्तरिक्षाद्भुतामृतम्.

१. प्रतिसूर्याद्भुतरसः.
२. परिवेषाद्भुतरसः.
३. इन्द्रधनुरद्भुतरसः.
४. गन्धर्वनगराद्भुतरसः.
५. निर्घाताद्भुतरसः.
६. सन्ध्याद्भुतरसः.
७. सान्ध्यसूर्यकिरणाद्भुतरसः.
८. दिग्दाहाद्भुतरसः.
९. छायाद्भुतरसः.
१०. तमोधूमरजोनीहाराद्भुतरसः.
११. उल्काद्यद्भुतरसः.
१२. विद्युद्द्भुतरसः.
१३. वाताद्भुतरसः.
१४. मेघाद्भुतरसः.
१५. अतिवृष्ट्यद्भुतरसः.
१६. कबन्धाद्भुतरसः.

III. भौमाद्भुतामृतम्.

१. भूकम्पाद्भुतरसः.
२. जलाद्भुतरसः.
३. अग्न्यद्भुतरसः.
४. प्रदीपाद्भुतरसः.

| | |
|---|---|
| ५. प्रतिमाद्भुतरसः. | ११. शस्त्राद्यद्भुतरसः. |
| ६. इन्द्रध्वजाद्भुतरसः. | १२. पुराद्यद्भुतरसः. |
| ७. वृक्षलताद्यद्भुतरसः. | १३. दिव्यस्त्रीपुरुषदर्शनाद्भुतरसः. |
| ८. गृहाद्भुतरसः. | १४. मानुषाद्भुतरसः. |
| ९. वातजोपस्काराद्भुतरसः. | १५. गजाद्भुतरसः. |
| १०. वस्त्राद्यद्भुतरसः. | १६. अश्वाद्भुतरसः. |

Contains the Divyādbhutāmṛta and Āntarikṣādbhutāmṛta complete and breaks off in the 16th Rasa of Bhaumadbhutāmṛta.

**Beginning :**

नैगमे वचसि नैपुणं विधेः सार्वभौमपदलाभिधं महः ।
जीर्णत(प)र्वतरुयौ(व)नौषधं नौमि नेजयति इद्रमं महः ॥

अथाद्भुतनिरूपणम् । वृद्धगर्गः—

स(अ)भूतपूर्वं यत्पूर्वं जायते यत्तदन्यथा ।
तदद्भुतमिति प्रोक्तं नैमित्तं स्यान्निमित्तजम् ॥

* * * *

स चोत्पातो दिव्यान्तरिक्षभौमभेदात्त्रिविधः । तत्र तारादिग्रहनक्षत्राश्रितं दिव्यम् । उल्कापातदिग्दाहपवनमेघाश्रितमन्तरिक्षमात्रसम्बद्धमान्तरिक्षम् । सर्वमन्यद्भौमम् ।

तत्र भौमान्यरिष्टानि निवर्तन्ते प्रजागुणैः ।
सत्त्वाद्ब्राह्मणा . . . . पर्जन्यस्य च वर्षणात् ॥

* * * *

**Colophon :**

इत्यद्भुतामृते दिव्यभागे आदित्याद्भुतं नाम प्रथमो रसः ॥

**End :**

शालां प्रदक्षिणीकृत्य कुञ्जरो म्रियते यदि ।
धन्यं यशस्यमायुष्यं राज्ञां च विजयावहम् ॥

अत्रानुक्तविशेषशान्तिषु सावित्रीमन्त्रकलक्षहोमादिसामान्यशान्तिर्मृगपालिविकारविहिता वा शान्तिरौत्पातिकगुरुलाघवमनुरुध्य कर्तव्या ॥

**Colophon :**

इत्यद्भुतामृते भौमे गजाद्भुतं नाम (पञ्चदशो) रसः समाप्तः ॥

अथाश्वाद्भुतम् । तत्र शुभलक्षणम्, वराहः—

भूपपानखलिनाभिनन्दिनः पत्युरौपयिकनन्दिनोऽथवा ।
सव्यपार्श्वगतदृष्टयोऽथ वा वाञ्छितार्थफलदास्तुरङ्गमाः ॥

* * * *

सा च कण्ठश्रीपतिविहितसूर्यदा कृष्णेनेति मन्त्रो ग्राह्यः । अपर्व-ग्रहणविचित्रदिवोल्कापातेषु मयूरचित्रे तृतीया शान्तिर्विहिता । सा पर्वग्रहणे लिखितव्येति ।

---

R. No. 3229.

Paper. 10¾ × 9½ inches. Foll. 18. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920-21 from a MS. of the Raja of Chirakkal, Malabar district.

Foll. 17*b* and 18 are left blank.

बोधायनश्रौतसूत्रम्.

BŌDHĀYANAŚRAUTASŪTRAM.

The aphorisms of Bōdhāyana dealing with the sacrificial ceremonies such as Atirātra, etc.

Contains the portion of Karmāntasūtra, which breaks off in the second Praśna ; but wants the beginning.

**Beginning :**

पचत येन कल्पमपेक्षेत छन्दसा ब्राह्मणेन प्रत्ययेन [त्यायेन] संस्था-वशेनेति छन्दसेति यदवोचो यथाम्नायं प्रणयतीदं पूर्वमिदमुत्तरमित्यथापि मन्त्रत एव स्वाध्यायं प्रब्रूते कर्मानुवादि भवति यथैतद्भवति ।

**End :**

अथ चेदुदयनीयेऽतिरात्रे न इष्टैतैकाहिको वानुबन्ध्यस्योपालम्भं कुर्युरप्युदवासायैवैतेन पशुना यजेरन्निति न्वा इमे काम्याः पशवो व्याख्याताः ॥

**Colophon :**

कर्मान्ते प्रथमः प्रश्नः समाप्तः ॥

* * * *

एष एव स द्वादशस्तोमो भवति द्वादश स्तोत्राणि भवन्ति यथा एतदौपमन्यवस्य कल्पं वेदयन्ते । पुरस्तादेवैतद्वैविध्यगतेषु देवयजनमध्यव-स्येद्विज्ञायते सा वा इयं सर्वैव वेदिरिति ।

## R. No. 3230.

Paper. $10\frac{3}{8} \times 9\frac{1}{2}$ inches. Foll. 47. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Harikṛṣṇarājaguru of Gangapurasāsanam, Dharakota, Ganjam district.

Foll. 46*b* and 47 are left blank.

मथुरानिरुद्धनाटकम्.

MATHURĀNIRUDDHANĀṬAKAM.

A drama in eight acts, having for its plot the story of the celebration of the marriage of Uṣā, the daughter of Bāṇāsura, with Aniruddha, the grandson of Śrī-Kṛṣṇa: by Candraśēkhararājaguru, son of Gōpinātharājaguru of Vatsa family. The author lived in the country ruled by king Rāmacandra. The drama is said to have been staged on the occasion of the annual festival of God Candraśēkhara.

Complete.

**Beginning:**

भद्राय स्मितकौमुदीमधुरिमास्येन्दुं दधद्वासुके-
रालोकादिव लीयमानपवनादालीढनासापुटम् ।
तेजः किंचिदमन्दसैन्धवमहःसन्दोहनिष्यन्दना-
वस्कन्दादिव जातनिद्रनयनानव्याम्बुजं जाग्रताम् ॥

अपि च—

प्रव्यक्तरक्तगलक्तनवातपश्रीविश्रान्तितो नखमयूखमरन्दगर्भम् ।
वन्दे पुरन्दरवधूकबरीनितम्बरोलम्बचारुचरणाम्बुजमम्बिकायाः ॥

नान्द्यन्ते सूत्रधारः—अलमतिविस्तरेण । भो भोः सभासदः । जटापटलकैतवोदितनिटिलनेत्रदहनार्चिरुदञ्चितस्य सकलकलुषकरिबलदलनसार्थकीकृतपञ्चवदनाभिधानस्य गाढालिङ्गनलग्नगौरीकुचकस्तूरिकापङ्कानिकरायमाणनीलिमरमणीयकण्ठस्य भगवतो हरिणाङ्कचूडामणेर्यात्रायामुपस्थानीयान्वो विज्ञापयामि ।

* * * *

तदाज्ञापयत किंनाम रूपकमभिनेतव्यमिति ।

(आकाशे कर्णं दत्वा) किमाज्ञापयन्ति भवन्तः । मथुरानिरुद्धं नाम रूपकमभिनेतव्यमिति ।

सूत्र—(सवैलक्ष्यम्) कतमः पुनरस्य प्रबन्धस्य रचयितेति न स्मरामि । (पुनराकाशे).

देवोऽजायत रामचन्द्रचरणिभर्तुः स मर्त्योत्तमा-
न्मोत्तोत्सा(त्पा)दनकर्मणि प्रथमतः कल्किप्रथां बिभ्रतः ।
क्षोणीभृद्गणमौलिदत्तचरणः कृत्वा जनैकस्थितिं
धीरः स्वात्मनि वीरकेसरिपदं यः सान्वयं मन्यते ॥
तद्देशनित्यवास्तव्यः स्तव्यः सत्कविकोविदैः ।
अस्य कर्ता प्रबन्धस्य चयनी चन्द्रशेखरः ॥

सूत्र—(स्मृत्वा सशिरःकम्पम्) तात्किल रूपकं सकलकोविदावतंस-वत्सान्वयपद्माकरदिनकरसप्तसोमयाजिवाजपेयगोपीनाथरायगुरुद्वितीयतनयस्य चयनचन्द्रशेखररायगुरोरनन्यसाधारणः सरस्वतीनिर्यासः ।

* * * *

(ततः प्रविशति यथानिर्दिष्टो नारदः)—

नारदः—भवति बलवतः किं दुष्करं माधवस्य इति पठित्वा कथं च बाणः पिनाकपाणिवरदानसम्प्रदानं गरुडध्वजेन जेतव्य इति संशयानस्य ममेयमेवोपश्रुतिः ।

**End:**

पार्वती—वत्सानिरुद्ध ज्वालामुखीमूर्त्या प्रागनुगृहीतोऽसि । किमद्य भूयोऽपि कामयसे ।

अनिरुद्धः—(अञ्जलिं बध्वा) भगवति निष्पन्नमनोरथाः । तथापी-दमस्तु ।

आरभ्यैरावतेभव्रणितगिरिनदीरोध आधावदम्भो-
धाराजम्बालजिह्वायमपथमचलं यावदस्ताद्रिपादम् ।
पृथ्वीशाः पालयन्तः स्वमरवतरणप्रीयमाणां धरित्री-
मर्थिप्रत्यर्थिसार्थोभयविगतविमुखीभावमाविर्भवन्तु ॥

अपि च—

यावत्कैरवरोहिणीरमणयोर्यावच्च पङ्केरुह-
च्छायानायकयोरुद(स्थि)त मिथः प्रेमानुबन्धप्रथा ।
यावत्स्थावरजङ्गमात्मकतया द्वैतं च लोकत्रये
तावद्भागवतीर्वधूरिव कवेर्वाचो जनः श्लाघताम् ॥

पार्वती—तदेवमेवास्तु । (इति निष्क्रान्ताः सर्वे) ।

अनिरुद्धानन्दो नामाष्टमोऽङ्कः ॥

**Colophon:**

इति श्रीकविकोविदावतंसचयनिचन्द्रशेखरराजगुरुविरचितं मधुरानिरुद्धं नाम नाटकं समाप्तम् ॥

R. No. **3231.**

Paper. 10⅜ × 9⅜ inches. Foll. 125. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of Raja of Chirakkal, Malabar district.

अवधूतगीता, सव्याख्या.

AVADHŪTAGĪTĀ WITH COMMENTARY.

The text has been described under No. 4543 of the D.C.S. MSS., Vol. IX; the commentary is by Paramānandatīrtha disciple of Bhāratītīrtha.

Complete.

**Beginning:**

अत्रेः पुत्राय हरये अनसूयासुताय च ।
दत्तात्रेयाय गुरवे अवधूताय ते नमः ॥

* * * *

गोरक्षकस्य माहात्म्यं दत्तात्रेयस्य वैभवम् ।
संवादमुभयोरेव अ(म)द्भुतं ब्रह्मनिर्णयम् ॥
तस्य पट्टाभिषेकं च अखण्डरससाधनम् ।
प्रश्नोत्तराभ्यां प्रथमं खण्डानां सप्तमेन वै ॥
प्रथमं वाक्यसन्दर्भैर्नानावृत्तिश्च संक्रमैः ।
अनिर्देश्यमतीतं च वस्तु तत्र निरूप्यते ॥

अत्र दत्तात्रेयसंहितायां कथासन्दर्भः—

अत्रिश्च भगवान्पूर्वमनपत्यस्तपश्चरन् ।
अतीतं रूपमुद्दिश्य पुत्रार्थं भार्यया सह ॥

संवत्सरशतस्यान्ते ब्रह्मादयस्तस्य वरदानायागताः । ततो ब्रह्मनिष्ठं पुत्रं प्रार्थयामास । ते च तथैव दत्वा पूजिताः सन्तो यथास्थानं ययुः । ततो दिनत्रयेण भगवान्विष्णुरेव पुत्ररूपेणाभवत् ।

* * * *

एवं द्रष्टव्यस्यान्तराभावात्प्रथममद्वैतवासनातिदुर्लभेति श्लाघते ।

अवधूतः—

ईश्वरानुग्रहादेव पुंसामद्वैतवासना ।
महाभयकृतत्राणा द्वित्राणामुपजायते ॥

अस्यार्थः—ईश्वरानुग्रहात्, अत्रेश्वरो गुरुः। गुरुर्ब्रह्मेति वचनात्, स च ज्ञानप्रदगुरुरेव नान्यः।

* * * *

**Colophon:**

इत्यवधूतगीताव्याख्याने दत्तात्रेयगोरक्षकसंवादे प्रथमप्रकरणे नित्यरूपदर्शनं नाम प्रथमं प्रकरणम् ॥

**End:**

एवं पूर्वश्लोके दशश्लोक्या अखण्डरसमात्रं सर्वमित्युद्दिश्येदानीमपि गुरुशिष्यभेदमात्मनि वक्ष्यमाणः तव गुरुरवधूतः अखण्डरससागरनिमग्नः सन् तदाकारोऽभूदित्याह—

विन्दति विन्दति नहि नहि त(म)न्त्रं नहि नहि छन्दोलक्षणतन्त्रम्।
समरसमग्नो भावितपूतः प्रलपितमेतत्कथमवधूतः ॥

अस्यार्थः—हे गोरक्षक एकरसः अवधूतः सद्गुरुरस्ति मम तिष्ठति अहं तस्य शिष्यः कृतार्थः।

* * * *

एतदेवाह—कथमवधूतस्तिष्ठति समरसमयत्वात्। तन्मय इत्यभावात्। मग्नो निमग्न इत्यर्थः ॥

**Colophon:**

इत्यवधूतग्रन्थे दत्तात्रेयगोरक्षकसंवादे स्वात्मसंयुक्त्युपदेशो नाम द्वितीये तृतीयं प्रकरणम् ॥

श्रीभारतीतीर्थशिष्यपरमानन्दतीर्थविरचिता अवधूतगीताटीका समाप्ता ॥

---

R. No. **3232.**

**Paper.** 10¾ × 9¼ inches. Foll. 89. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of Śrī Raja K. C. Valiyarāja of Kottakal, Malabar district.

Fol. 89 is left blank.

रघुनाथभूपालीयव्याख्यानम्—साहित्यसाम्राज्यम्.

RAGHUNĀTHABHŪPĀLĪYAVYĀKHYĀNAM: SĀHITYA-SĀMRĀJYAM.

A commentary on the Raghunāthabhūpāliya of Kṛṣṇayajvan, which work has been described under R. No. 659(d) ante: by Sudhīndrayati, pupil of Vijayīndratīrtha.

Contains the seventh Vilāsa (Alaṅkāra portion) and eighth Vilāsa (Guṇanirūpaṇa) only.

In the Catalogue of Lewis Rice, the author's name is given as सुमतीन्द्र.

**Beginning:**

एवं शब्दचित्रं निरूप्यार्थचित्रं नि(रु)रूपयिषुर्मध्ये कृतिनायकाभीष्टमार्थनारूपं मङ्गलमाचरति—दत्तामिति । इदानीमिति शब्दालङ्कारनिरूपणानन्तरमर्थालङ्काराः परस्परव्यावृत्तधर्मवत्तया प्रतिपाद्यन्त इत्यर्थः ।

ते चोपमा ततः पश्चादुपमेयोपमा मता ।
अनन्वयो रूपकं च परिणामः प्रतीपकम् ॥

* * * *

एतेषूपमैव प्रधानभूता । तस्या एव भूमिकाभेदेनानेकालङ्काररूपता पर्यवसानात् । तदुक्तं सर्वस्वचक्रवर्तिना । मुखं चन्द्र इवेत्युपमा । मुखं मुखमिवेत्यनन्वयः ।

* * * *

**Colophon:**

इत्यलङ्कारविलासः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्रश्रीमद्विजयीन्द्रतीर्थपूज्यचरणशिष्येण श्रीसुधीन्द्रयतिना विरचितायां साहित्यसाम्राज्यसमाख्यायां रघुनाथभूपालीयव्याख्यायां सप्तमो विलासः ॥

**End:**

नन्वाक्षेपकाणामनभिज्ञत्वे त्वदीयप्रबन्धगतातिशयं को वा जानीत इत्याशङ्क्याह—जानीत इति । नायकः सरस्वती च जानीतः । मङ्गलादीनि मङ्गलान्तानि मङ्गलमध्यानि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि चेति भगवत्पतञ्जलिवचनं प्रमाणयन् रघुनाथभूपालस्याभीष्टं प्रार्थयते—आचन्द्रमिति—आचन्द्रविधौ अत्र कीर्तिप्रतापौदार्याणां चन्द्रसूर्यकल्पकवृक्षसाम्यं ध्वन्यते ॥

इति गुणनिरूपणम् ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्रश्रीमद्विजयीन्द्रतीर्थपूज्यचरणशिष्येण श्रीसुधीन्द्रयतिना विरचितायां साहित्यसाम्राज्यसमाख्यायां रघुनाथभूपालीयव्याख्यायामष्टमो विलासः ॥

### R. No. 3233.

Paper. 10⅝ × 9¼ inches. Foll. 310. Lines, 20 in a page. Dêvanâgarî. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Payyûr Paṭṭêri of Kunnangolam, Cochin State.

## श्लोकवार्त्तिकव्याख्या—काशिका.

## ŚLÔKAVÂRTTIKAVYÂKHYÂ : KÂŚIKÂ.

Bound in two volumes.

Foll. 117*a* and 309*a* contain the contents of the first volume and the second volume, respectively. Foll. 117*b*, 118, 308, 309*b* and 310 are left blank.

Same work as that described under No. 4465 of the D.C.S. MSS., Vol. IX, and R. Nos. 2818 and 3056 ante.

Contains the following portions in continuation after the end of Śûnyavâda found in fol. 61 of the MS. described under R. No. 3056 :—

१. अनुमानपरिच्छेदः.
२. शब्दपरिच्छेदः.
३. उपमानपरिच्छेदः.
४. अर्थापत्तिपरिच्छेदः.
५. अभाववादः.
६. चित्राक्षेपवादः.
७. संबन्धाक्षेपवादः.
८. स्फोटवादः
९. आकृतिवादः.
१०. वनवादः.
११. संबन्धाक्षेपपरिहारः.

**Colophon :**

इत्युपाध्यायसुचरितमिश्रकृतौ काशिकाटीकायामनुमानपरिच्छेदः समाप्तः॥

**Colophon :**

इत्युपाध्यायसुचरितमिश्रकृतौ काशिकाटीकायां सम्बन्धाक्षेपपरिहारः समाप्तः ॥

---

### R. No. 3234.

Paper. 10⅝ × 9¼ inches. Foll. 56. Lines, 20 in a page. Dêvanâgarî. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Śrîmân Bṛndâvanacandra Pâṇigrâhi, Parlakimedi, Ganjam district.

## सङ्गीतनारायणम्.

## SAṄGÎTANÂRÂYAṆAM.

Foll. 1*a*—56*b*. Foll. 55 and 56*a* give the contents of this work. Fol. 56*b* is left blank.

A treatise on the details connected with singing, instrumental music and dancing which three are said to form the elements of

Saṅgita: by Nārāyaṇabhūpāla, son of Padmanābhabhūpāla of the Gaṅga race and the king of Khimuṇḍi (Parlakimedi). The author quotes from the following works or authors;—Saṅgitasāra of Vidyāraṇya, Saṅgitaratnamālā of Mammaṭa, Saṅgitacandrikā of Mādhava (the early dynasty of Vizianagar), Pañcamasārasaṁhitā of Nārada, Gītagōvindaṭīkā of Lakṣmaṇabhaṭṭa, Rāmacandrōdaya of Puruṣōttamamiśra, Kōhaliya, Cūḍāmaṇi, Darpaṇa, (by Dāmōdara), Vācaspati, Gīta-prakāśa, Kaumudī, Chandōratnākara, and Gōpagōvinda.

Breaks off in the second Paricchēda (Rudravīṇādhyāya).

**Beginning:**

नीलाद्रिकन्दरानन्दि मन्दरालयवन्दितम् ।
वन्दे वन्दारुमन्दारमिन्दिरामन्दिरं महः ॥

प्रवृत्ततालं करतालिकाभिराभीरिकाणां कलवेणुगीतम् ।
नृत्यन्तमत्यन्तमुदीतहासं रासं भजन्तं हरिमन्तरीडे ॥

प्रालेयशैलतनयाकुचकोटिमुच्चैर्निष्चूष्य षण्मुखमुखैरतिपीतमुक्ताम् ।
तर्षाकुलस्य लिहतः शुभमादिशन्तु लम्बोदरस्य दरपुष्करधूननानि ॥

बालामालापताकाचैर्लालयन्तं हरेर्मनः ।
चतुर्भुजभुजाश्लिष्टामिष्टां लक्ष्मीः सुतां भजे ॥

आसन्द्वीपानुरूपा अधिधरणि नृपा गङ्गवंशावतंसाः
कंसध्वंसांशभाजो निजभुजविजितक्षोणिचक्रारिचक्राः ।
यैराक्रम्य क्रमेणोद्भटसुभटघटाटोपकर्णाटलाट-
क्षोणीशात्तोभदीक्षाक्षमकलबलको दारकः सारभाजाम् ॥

* * * *

तेषां भूखण्डभूषा खिमुडिरिति सुरक्षोणिविश्वो(श्रो)भि राज्यं(?)
तत्राभूत्पद्मनाभो नृपतिरतिबलः कालकल्पोऽरिवर्गे ।
वीरस्तस्मादकस्मान्मिलदमलगुणो धातृसङ्गीतवन्द्यः
कुन्दत्कीर्तिर्मुकुन्दस्मृतिकृतिसुकृती भूपनारायणोऽभूत् ॥

तेनाथ नानामुनिभिः समीक्ष्य ग्रन्थान्कृतांश्चाधुनिकैः कवीन्द्रैः ।
सङ्गीतनारायणपुस्तमेतत्तौर्यत्रिकाणां क्रियते हिताय ॥

गीतं कैश्चिन्नर्तनं वापि कैश्चिद्वाद्यं कैश्चित्तद्द्वयं कैश्चिदुक्तम् ।
स्वल्पेऽप्यस्मिन्दृश्यतां सर्वमेतद्राज्ञः सैन्यं काचमित्तेरिवान्तः ॥

* * * *

अथ संगीतोत्पत्तिमाह—

पुरा चतुर्णां वेदानां सारमाकृष्य पद्मभूः ।
तदन्तपञ्चमं वेदं सङ्गीतं समकल्पयत् ॥

कस्मात्तत्किं जातमित्याह—

ऋग्भ्यः पाठ्यमभूद्गीतं सामभ्यः समपद्यत ।
यजुर्भ्योऽभिनया जाताः रसाश्चाथर्वणः स्मृताः ॥

**End:**

यथामति मया ग्रन्थात्पुराणाच्चाधुनातनात् ।
यद्देशरीतेश्चालेखि शोध्यं गीते बुधैस्तु तत् ॥

**Colophon:**

इति श्रीमन्नीलान्वयायोचुङ्गगङ्गवंशावतंसाशेषगुणसद्मपद्मनामभूमीपति-तनुजन्मनो महाराजाधिराजस्य साहित्यसङ्गीतार्णवकर्णधारकमर्णेगजपतिवीर-श्री(ना)रायणदेवस्य कृतौ सङ्गीतनारायणे गीतनिर्णयो नाम प्रथमः परिच्छेदः समाप्तः ॥

अथ क्रमप्राप्तं वाद्यमाह—

न वाद्येन विना यस्माद्गीतं तालं च शोभते ।
तस्मान्मङ्गल्यमस्माभिर्वाद्यं तत्र निगद्यते ॥

* * * *

मदनस्य च सिक्थस्य योगेन सुदृढीकृताः ।
सर्वासां लोहकलिका मस्तके सुश्च यन्त्रिताः ॥
एकाङ्गुलोच्चाः क्षुद्राः स्युरिति सारविनिर्णयः ।
एवं विनिर्मिता रुद्रवीणा जनमनोहरा ॥

---

R. No. **3235.**

Paper. $10\frac{5}{8} \times 1\frac{5}{8}$ inches. Foll. 74. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Damera Cinabucci-veṅkaṭa Rao Garu, Palteru, Vizagapatam district.

रहस्यत्रयाधिकारसंग्रहः, सव्याख्यः

RAHASYATRAYĀDHIKĀRASAṄGRAHAḤ WITH COMMENTARY.

Fol. 74*b* is left blank.

Similar to the work described under No. 5345 of the D.C.S. MSS., Vol. XI.

Incomplete.

**Beginning:**

वन्दे श्रीदेवराजार्यसूनुं वरगुणाकरम् ।
श्रीनिवासगुरुं श्रीमद्वाधूलान्वयभूषणम् ॥
भारद्वाजकुलाब्धीन्दुं भाष्याख्यामृतपूरितम् ।
द्रमिडोपनिषद्रूपं श्रीनिवासगुरुं भजे ॥

श्रीमान्वेङ्कटनाथार्यः परमकारुणिको रहस्यत्रयार्थतत्त्वं रहस्यत्रयसाराख्यप्रबन्धेन स्त्रीशूद्रादीनां सुग्रहत्वाय प्रकाशयामास । तत्रत्यतत्तदधिकारान्तयोस्तत्तदधिकारार्थानेकैकश्लोकेन संगृह्य प्रदर्श्य तानेव श्लोकानधिकारसंग्रहाख्यप्रबन्धत्वेन च चकार । तथैव ते श्लोकाः सारप्रकाशिकायां व्याख्याता अपि भावप्रकाशिन्याख्यप्रबन्धेन विशिष्य व्याख्यास्यन्ते ।

* * * *

अत्रापि रहस्यत्रयार्थानामनुसन्धानादेतत्प्रबन्धस्यादौ गुरुपरम्परामनुसन्दधानः तदनुसन्धानस्य—

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

इत्युक्तं तत्त्वज्ञानं फलमित्यभिप्रायेणाह—प्रपदनमय इत्यादिना –

प्रपदनमये विद्याभेदे प्रतिष्ठितचेतसः
प्रतिपदमिह प्रज्ञादायं दिशन्तु दयाधनाः ।
शठरिपुशुकव्यासप्राचेतसादिनिबन्धन-
क्रमपरिणतश्रद्धाशुद्धाशया मम देशिकाः ॥

व्या—प्रपदनमये विद्याभेदे प्रतिष्ठितचेतसो दयाधनाः शठरिपुशुकव्यासप्राचेतसादिनिबन्धनक्रमपरिणतश्रद्धाशुद्धाशया देशिका इह मम प्रतिपदं प्रज्ञादायं दिशन्तु इति क्रियाकारकसंबन्धः ।

**End:**

ननु अयोध्यादीनां तुरुष्काद्युपहतत्वेऽपि भागवतैरपि तत्रैव स्थातुं युक्तम् । सप्तैता मुक्तिदायिका इति भगवता विशेषेण मोक्षहेतुत्वोक्तेरित्यत्र

यत्र यत्र हि नीतिः स्याद्वैष्णवी विष्णुसंयुता ।
तत्र तत्र वसेन्नित्यं नान्यत्रेति मतिर्मम ॥

इत्यादिप्रमाणानुगुण्येन परमभागवतपरिग्रहे सत्येव तासां परिग्रहो नान्यथेत्याह—

सा काशीति न चाकशीति भुवि सायोध्येति नाध्यास्यते
सावन्तीति न कल्मषादवति सा काञ्चीति नोदञ्चति ।
धत्ते सा मधुरेति नाग्रिमधुरां मान्यापि नान्या पुरी
या वैकुण्ठकथासुधारसभुजां रोचेत नो चेतसे ॥

* * * *

एवं चायोध्यादिमधुरामायादिनगरीणामयोध्यात्वमधुरात्वादिना न मुमुक्षुग्राह्यत्वं किं तु भगवद्भागवतपरिग्रहातिशयेनैवेतीदानीं भगवद्भागवतपरिग्रहातिशयवतां श्रीरङ्गवेङ्कटाद्रिकाञ्च्यादीनामेवात्यन्तपरिग्राह्यत्वमिति भावः ॥

---

R. No 3236.

Paper. 10¾ × 9¾ inches. Foll. 114. Lines, 20 in a page. Grantha Good.

Transcribed in 1920-21 from a MS. of M.R.Ry N. Kṛṣṇacakravartyācārya, Ketandipatti, North Arcot district.

(a) विशिष्टाद्वैतसंग्रहः.

VIŚIṢṬĀDVAITASAṄGRAHAḤ.

Foll. 1a—22a.

A treatise briefly laying down the principles of the Viśiṣṭādvaita-Vēdānta as explained by Rāmānuja: by Rāmakṛṣṇa.

Complete in four Paricchēdas.

| | |
|---|---|
| १. समन्वयपरिच्छेदः. | ३. साधनपरिच्छेदः. |
| २. अविरोधपरिच्छेदः. | ४. फलपरिच्छेदः. |

**Beginning:**

अथ तत्र प्रथमतो विशिष्टाद्वैतसंग्रह आरभ्यते—

शिवं विष्णुं गणपतिं नत्वा वाणीं गुरूनपि ।
रामकृष्णो वितनुते विशिष्टाद्वैतसंग्रहम् ॥

तत्राक्षरपर्यन्ताध्ययनविधिविहितसाङ्गाध्ययनसंस्कृताद्वेदरूपाक्षर(राशेः) शब्दस्वभावाद्व्याख्यानचिकीर्षायां वेदव्याख्यानरूपमेकं विंशत्यध्यायशास्त्रं प्रवृत्तम् । तत्र कर्मकाण्डव्याख्या जैमिनिना द्वादशलक्षणी पूर्वोत्तरषट्कवती कृता । व्यासेन देवताकाण्डव्याख्यानं संकर्षणाख्यं चतुर्लक्षण्या

कृतम् । ब्रह्मकाण्डं च चतुर्लक्षण्या कृतम् । तस्य शास्त्रस्य सिद्धोपायो-पेयात्मकं ब्रह्म विषयः ।

* * * *

**Colophon:**

इति प्रथमसमन्वयपरिच्छेदः ॥

**End:**

ब्रह्मसाम्यं तु ब्रह्मयाथात्म्यानुभवरूपभोगमात्रविषयम् । ततस्तल्लीलो-पकरणभूतब्रह्मलोकाधीनमप्यनुभवति । निर्विकारं ब्रह्माप्यनुभवान्निवृत्तकर्म-संबन्धत्वान्न पुनरावर्तते । न वा भगवांस्तं पुनरावर्तयति ॥

**Colophon:**

इति श्रीरामकृष्णविरचिते विशिष्टाद्वैतसंग्रहे फलपरिच्छेदस्तुरीयः ॥

(b) विशिष्टाद्वैतभञ्जनम्.

VIŚIṢṬADVAITABHAÑJANAM.

Foll. 27a—114b.

An unfavourable criticism of the Viśiṣṭadvaita-Vēdānta. It is written in support of the Advaita-Vēdānta; by Rāmakṛṣṇa.

Incomplete.

अथ विशिष्टाद्वैतभञ्जनमारभ्यते—

गौरीमुमापतिं ध्यात्वा पुरुषं कृष्णपिङ्गलम् ।
रामकृष्णो वितनुते विशिष्टाद्वैतभञ्जनम् ॥

ब्रह्म स्वप्रतिबिम्बभङ्गमुपधिग्रासेन संवादय-
त्वा कर्मफलं निजाद्वयधिया मुक्तिं दधत्क्रीडते ।
श्रौतं न्याय्यमिदं द्विषन्त्यपसदा दुःखादिहेयान्वयं
विष्णोस्तत्पुरुषस्य सत्त्वमुखतस्तान्धिकुरुध्वं बुधाः ॥

इह खलु नित्यनिरतिशयसत्यज्ञानानन्दरूपं ब्रह्म स्वसंबन्धादेव सत्यां स्वशक्तिरूपां मायां प्रकृत्यविद्यातमःप्रधानादिशब्दवाच्यां नामरूपादि-जगदाकारेण परिणमय्य तदधिष्ठानविवर्तोपादानतया सत्तास्फूर्तिप्रियत्वाकारेण स्वयमप्यनुप्रविश्य

* * *

अधुना पुनर्वैदिकवेषेणैव जगद्वञ्चयितुं कुदृष्टिकल्पनया वेदान्तानां विशिष्टा-द्वैतपरत्वं ब्रुवाणानां यामुनलक्ष्मणप्रभृतीनां तद्विप्रलम्भप्रमुष्टविवेकानां वेङ्कट-नाथवरदराजादीनां च ग्रन्थानालोच्य तदुदीरितप्रमाणतदनुकूलन्यायानां

पूर्वापरविरोधान्प्रमाणान्तरविरोधाश्चोद्धाव्य तदभिमतविशिष्टाद्वैतभञ्जनाय प्रयतामहे ।

**End:**

सर्वा चोपनिषत्सर्वज्ञत्वसत्यसंकल्पत्वजगदुपादानत्वादिगुणविशिष्टमेव ब्रह्म प्रतिपादयतीति सगुणमेव ब्रह्मोक्तम् । निर्गुणश्रुतयस्तु हेयगुणराहित्यपरा इति.

---

R. No. **3237.**

Paper. 10⅞ × 9¼ inches. Foll. 16. Lines, 20 in a page. **Dēvanāgari.** Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Śukumaran Nambūdirippād, Kattil-mana, Shoranur, Malabar district

**प्रकरणपञ्चिकाव्याख्या.**

PRAKARAṆAPAÑCIKĀVYĀKHYĀ.

Fol. 16*b* is left blank.

A commentary on the Prakaraṇapañcikā of Śālikanātha which is a treatise in the Pūrvamīmāṁsā in accordance with the Prabhākara school.

Incomplete.

**Beginning:**

हरते सर्वविघ्नानि कर्मसिद्धिविधायिने ।
तुभ्यमभ्यासवत्यस्तु महागणपते नतिः ॥

प्रकरणमारिप्सुः श्रोतृबुद्धिसमाधानार्थं सम्प्रदायाभिधेयप्रयोजनानि श्लोकेन दर्शयति—स्वाध्यायविधीति । अत्र पूर्वार्धेनाभिधेयो दर्शितः । उत्तरार्धेन प्रयोजनम् । प्रभाकरगुरोर्दृष्टेति सम्प्रदायो दर्शितः ।

* * * *

प्रकरणस्य संज्ञां प्रयोजनं चाह—शास्त्रमुखमिति । भावमभिप्रायमित्यर्थः ।

**Colophon:**

इति प्रथमं सूत्रम् ॥

**End:**

इति दोषाणां कार्यप्रतिबन्धृत्वमात्रस्योपपन्नत्वादभ्रान्तिर्भेदाग्रहनिबन्धनेति निगमयति—विद्यमानेति । अथ ग्रन्थकर्तुः प्रकरणस्य च संज्ञां प्रयोजनं चाह—विषयेति । निरमीयत . . . निर्मितेत्यर्थः ।

नयवीथी—

स्वमतेन तस्य निमित्तपरीष्टिरित्यादि . . . . . . दोषोपेतमपि चोदनाप्रामाण्योपयोग्यनेकार्थाभिधानादपेक्षितं परमतमिति मत्वा भगवता भाष्यकारेणोपन्यस्तं

* * * *

न च द्वाभ्यामारम्भः शङ्कनीयः। तथात्वे निरवयवत्वेन सर्वतः संश्लिष्टत्वात्परमाणुपरिमाणादधिकह्रस्वदीर्घत्वानुत्पत्तिप्रसङ्गात् । नापि त्रयाणामारम्भकत्वम्.

---

R. No. 3238.

Paper. 10¾ × 9⅜ inches. Foll. 83. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of the Holy Naduvil Maṭham, Trichur.

शाब्दनिर्णयव्याख्या—दीपिका.

ŚĀBDANIRṆAYAVYĀKHYĀ : DĪPIKĀ.

Foll. 1—82*a*. Foll. 82*b* and 83 are left blank.

A commentary on the Śābdanirṇaya of Prakāśātman, which work has been described under R. No. 2986 ante: by Ānandabōdha.

This is also called Nyāyadīpikā.

Complete.

**Beginning:**

यद्भासा निखिलं विभाति विषयो (यो) नः स्वयं ज्योतिषां
यस्याहुर्भुवनोद्भवस्थितिलयान्लीलामयान्सूरयः ।
यं चागोचरमामनन्ति मनसां वाचां च विश्वात्मने
तस्मै शुद्धसुखाद्वितीयवपुषे शश्वन्नमो विष्णवे ॥
श्रोतृमोहतिमिरापहारिणी शुद्धनीतिनिकुरुम्बदीधितिः ।
शाब्दनिर्णयसदर्थभासिका दीपिकेयममला विधीयते ॥

* * * *

तत्र शाब्दनिर्णयाख्यं प्रकरणमारिप्सुः प्रकरणकारः प्रथममाशीर्लक्षणं मङ्गलं सम्पादयति ।

यस्याः प्रसादमवलम्ब्य जगद्गुरूणामप्यस्खलद्दहृगुणाः प्रसरन्ति वाचः ।
सा वेदशास्त्रपरिनिर्मितवन्द्यदेहा भूयात्समग्रवरदैव सरस्वती वः ॥

सम्प्रत्यभिलषितार्थसिद्धये विघ्नराजानुकूल्यमाशास्ते—

विघ्नाभितापमपहृत्य मदीयकृत्यबीजं प्रवृद्धमदनुग्रहवर्षपातैः ।
सम्प्रार्थितः सिततरोऽपि गणेशमेघः सिञ्चन्नभीष्टफलमङ्कुरयत्वमोघम् ॥

**End:**

ततश्चैतत्सिद्धमित्याह—

ततो निःश्रेयसप्राप्तेस्तादर्थ्याच्छाब्दनिर्णयः ।
विशिष्टफलसंबन्धी श्रोतव्योऽयं बुभुत्सुना ॥

* * * *

गुरून्नमस्यति—

वन्दे तमात्मसंबुद्धस्फुरद्ब्रह्मात्मभावतः ।
अर्थतोऽपि न नाम्नैव योऽनन्यानुभवो गुरुः ॥

ग्रन्थस्य तत्कर्तुश्च संज्ञां तत्प्रणयनप्रयोजनं चाह—

प्रकाशात्मयतीन्द्रेण प्रणिपत्य जनार्दनम् ।
बालानां प्रतिबोधाय प्रणीतः शाब्दनिर्णयः ॥

स्पष्टाक्षरार्थाः श्लोकाः । क्षन्तव्यं किंचिदसमीक्षिताभिधानं सूरिभिरिति ॥

नाभीसरोजान्तरचञ्चरीकब्रह्मोपगीतोत्तमसामगीतः ।
प्र(।)बोधि कल्पान्तनिशावसाने यः सोऽवताद्वो भगवान्मुकुन्दः ॥
नमः सकलसंसारसागरोत्तारसेतवे ।
संश्रिताखिलसङ्कल्पकल्पवृक्षाय शम्भवे ॥
नमो निखिलवेदान्तकमलाकरभानवे ।
आत्मवासाभिधानाय गुरवे गुणवेश्मने ॥
दुस्तर्कध्वान्तपटलप्रपाटनपटीयसी ।
इयमानन्दबोधेन रचिता न्यायदीपिका ॥

---

R. No. **3239.**

Paper. 10⅜ × 9¼ inches. Foll. 154. Lines, 20 in a page. Dêvanâgarî. Good.

Transcribed in 1920-21 from a MS. of His Holiness Śrī-Śivānanda-yōgīśasvāmi Garu, Chicacole.

**हठसङ्केतचन्द्रिका.**

**HAṬHASAṄKĒTACANDRIKĀ.**

Foll. 1*a*—152*b*. Fol. 153 gives the contents of this work. **Fol. 154** is left blank.

Similar to the work described under No 4393 of the D.C.S. MSS., Vol. IX. By Sundaradēva, son of Gōvindadēva of Kāsyapagōtra and pupil of Viśvarūpatīrtha.

Complete in 12 Paricchēdas as found below :--

१. योगमाहात्म्यादिवर्णनम्
(wants the beginning).
२. हठविधिविवरणम्.
३ नाडीशोधनप्राणायामारम्भदशाप्राणायामविवेचनम्.
४. प्राणायामविधिः.
५. वायुजयनिरूपणम्.
६. षोडशाधारादिविवेचनम्.
७. सूक्ष्मशरीरादिविवेचनम्.
८. परिचयावस्था.
९. अमनस्कत्वराजयोगविवेचनम्
१०. नाडीशक्तिपदवायुविवेचनम्.
११. षट्चक्रनिरूपणम्.
१२. राजयोगहठयोगविवेचनम्.

**Beginning :**

ज्ञानं कुतो मनसि जीवितदुर्विकल्पे
प्राणोऽपि जीवति मनो म्रियते न यावत ।
प्राणो मनो द्वयमिदं न विलीयतेऽत्र
मोक्षं न गच्छति नरोऽत्र कथंचिदेव ॥

चित्तस्य हेतुद्वयशालिनोऽस्य प्राणो विलोलोऽथिदृढा कुवासना ।
तयोर्विनाशे परिनश्यतो द्वावेकत्र तौ सिद्धिरनुत्तमा भवेत् ॥

* * * *

सन्न्यस्य सर्वव्यवहारकर्म व्रजन्समाधिं समुपस्थितो यः ।
सदा मुदा योगविधानतोऽन्तर्योगी स सन्न्यास्युदितो न वेषैः ॥

इति योगमाहात्म्यम् ।

स्वाध्यायकर्माचरणादहिंसेज्याचारदानेभ्य उदात्तसंज्ञः[स्यात्] ।
दयास्वधर्मादयमुत्तमोऽत्र यदात्मसन्दर्शनमीडचयोगात् ॥

इति योगपूर्वाङ्गानि ।

* * * *

**Colophon :**

इति गोविन्ददेवसुतसुन्दरदेवविरचितायां हठसङ्केतचन्द्रिकायां योगसाधनयोगोपक्रमविवेचनम् ॥

* * * *

**Colophon:**

इति गोविन्ददेवसुतकाश्यपगोत्रपवित्रकाशीस्थवैद्यविद्याविशारदसुन्दरदेववैद्य-विरचितायां हठसङ्केतचन्द्रिकायामारम्भावस्थादिप्राणायामविवेचनं नामोपदेशः ॥

इति वायुजयपरिच्छेदः पञ्चमः ॥

* * * *

इति श्रीपादपूज्यविश्वरूपतीर्थशिष्यसुन्दरदेवविरचिते योगशरीरवि-वेचनम् ॥

**End:**

हठं विना राजयोगो राजयोगं विना हठः ।
न सिध्यति ततो युग्ममानिष्पत्तेस्समभ्यसेत् ॥
तस्मात्प्रवर्तते योगी हठे सद्गुरुमार्गतः ।
यामज्ञानत(ज)वैराग्यमृते स्थैर्यं न चेतसः ॥
बोधेन प्राणरोधेन वैराग्येण जितं मनः ।
अखण्डराजयोगे स्यात् स्थिरं निर्वातदीपवत् ॥

**Colophon:**

इति गोविन्ददेवसुतसुन्दरदेवविरचिते (राज)योगहृद(हठ)योगविवेचने द्वादशपरिच्छेदः समाप्तः ॥

---

R. No. **3240.**

Paper. 10⅜ × 9¼ inches. Foll. 183. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Sāmavēdanārāyaṇa Śāstrulugāru, Bobbili.

द्वादशाहप्रयोगः.
DVĀDAŚĀHAPRAYŌGAḤ.

Foll. 164 and 183*b* are left blank.

Similar to the work described under R. No. 2635(*b*) ante. The procedure herein laid down is intended for Sāmavēdins.

Almost complete.

**Beginning:**

निवारयन्तं मधुपान् कर्णतालविघट्टनैः ।
महागणपतिं वन्दे वरदं शक्तिसंयुतम् ॥

अथ द्वादशाह उच्यते ।

कल्पकार एवमाह—द्वादशाहस्य षोडशिमन्तावतिरात्राविति द्वादशाहस्य विशेषमुक्तवान् । अथ त्रयोदशरात्रादिसत्राणामपेक्षितत्वात्तदनन्तरं गवामयने वक्तव्ये सति तस्यापेक्षितो द्वादशाह उच्यते; द्वादशाहप्रकृतिकत्वाद्गवामयनस्य । द्वादशाहः द्विप्रकारः— सत्रात्मकः अहीनात्मकश्च । सत्रात्मको द्विप्रकारः — व्यूढरूपतया समूढरूपतया च । तथैवाहीनात्मकोऽपि समूढः प्रकृतः वि(व्यू)ढो विकृतः । तदुक्तं निधनकारेण ।

**End:**

औ हो वा हो मा (इ) डा अ २ जुहिरवासुतां २१ सो १ मा २ १ म १ दाम २ । सि १ मा २३ हो २ हिं २ माद्द २१२ । स २ मर्परा २ ज्ये २ बा १ जा अ १ भि १२ । पा १ वा २३ उवा २ । माद्द २ ना । प्रा २३ गा २ हा ३ सा १ औ हो वा हो इडा ॥ वाङ्निधनसा हविषस्य हि प २ येंपारि.

---

### R. No. 3241.

Paper. 10¾ × 9¼ inches. Foll. 14. Lines, 20 in a page. Dêvanâgarî. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Harikṛṣṇarâjaguru, Gaṅgapuraśâsanam, Dharakota, Ganjam district.

कविराजस्तुतिः.

KAVIRÂJASTUTIḤ.

Foll. 1a—13a. Foll. 13b and 14 are left blank.

A work in praise of Lord Śrî-Kṛṣṇa: by Kavirâja. The work is not in the Campû form as stated in the beginning and in the colophon at the end of the MS.

Complete.

**Beginning:**

अथ कविराजकृता चम्पूः (स्तुतिः) प्रारभ्यते—

विलोचनकदम्बकं यदुपलभ्य लुभ्यत्किमा-
लिलेह न हि किं पपौ न हि ममज्ज किं वा न हि ।
परन्तु किमिवाभवन्नवतमालल्क्ष्मीतिर-
स्क्रियानिगमसाम्प्रदायिकमुपास्महे तन्महः ॥

* * * *

अरे हृदय यत्सुधारसनिधानवेणुध्वनिं
वनेजनयनाशयातनुत राधिकारङ्गदम् ।
तमीक्षणनटं सकृचटवतीशतीरस्थली
वनेजनयनाशयातनुतराधिकारङ्गदम् ॥

**End:**

समारसम्पङ्कजभूरमासमासपाजसौभाग्यकलानिवासमा
समापयन्तं शुभकर्मभिः समासमाकुलं कर्म सद्य शंस मा ॥

**Colophon:**

इति श्रीकविराजकृता चम्पूः (स्तुतिः) समाप्ता ॥

---

R. No. **3242.**

Paper. 10¾ × 9¼ inches. Foll. 90. Lines, 20 in a page. Grantha and Malayalam. Good.

Transcribed in 1920-21 from a MS. of Naduvilmatham, Trichur, Cochin State.

नारायणीयव्याख्या—मलयालभाषासहिता.

NĀRĀYAṆĪYAVYĀKHYĀ: WITH MEANING IN MALAYALAM.

A commentary on the Nārāyaṇīya also called Viṣanārāyaṇīya which is a treatise laying down the curative medicines and mantras for poisons due to snake-bite and other causes. The work is accompanied with meaning in Malayālam.

Incomplete.

**Beginning:**

श्रीवल्लभं (महादीप्तं) प्रणम्य शिरसा गुरून् ।
वन्दे श्रीवल्लभं लक्ष्मीपतिं विष्णुं (च विहगप्रभुम्) ॥

महांश्चासौ दीप्तश्चेति । महादेवं तं विहगाः देवाः तेषां प्रभुम् । अथ वा महादेवं प्रणम्य गुरून् वन्दे शोभानाथं देवानामधिपतिम् । अथ वा विहगानां प्रभुः पक्ष्यधिपतिः गरुडः सर्वं तद्विशेषणम् । अथ वा त्रीन् प्रणम्य श्रीरित्याशीः प्रणम्येत्यनेन नमस्क्रिया, विहगानां प्रभुमित्यनेन गारुडादिविषनाशनमन्त्रः प्रतिपाद्यत इति वस्तुनिर्देशः । प्रतिपाद्य(वं) वस्तु विषयः गारुडादिमन्त्राः प्रतिपाद्याः ।

* * * *

तर्हि किमत्र लिपिरित्याशङ्क्याह—विषहा लिपिरिति । लिपिसाधनाः

सर्वे मन्त्राः कथं साधितास्स्युरित्याकाङ्क्षायामाह—तया लिप्या साधु न साध्यते यत्तत्कर्मास्ति किं समस्तमन्त्रयोस्स्यात् ।

**Colophon:**

इति नारयणीयव्याख्यायां प्रथमः पटलः ॥

**End:**

काल इति मण्डूकः साध्यार्णान्तरितमेतं मन्त्रं पत्रे लिखित्वा भेकानने न्यस्य तस्य (मण्डू) कस्यास्यं बद्ध्वा जलपूरिते विषवृक्षपात्रे तं मण्डूकं न्यस्य विषवृक्षेणैव विनिर्मिते विधानेन विधानं च कृत्वा तस्मिन् पात्रे स्थित्वा ! विलेपनाद्यलङ्कारं कुर्यात् ।

* * * *

**Colophon:**

इति नारायणीयव्याख्यायां द्वात्रिंशत्पटलः समाप्तः ॥

मेष इति ओं नमो नारायणाय कुद्धोल्काय स्वाहा—हृदयाय नमः, महोल्काय स्वाहा—शिरसे स्वाहा, पीनोल्काय स्वाहा ।

* * * *

धर्माय नमः, ज्ञानाय नमः, वैराग्याय नमः, ऐश्वर्याय नमः, अधर्माय नमः, अज्ञानाय नमः, अवैराग्याय नमः, अनैश्वर्याय नमः, अं सूर्यमण्डलाय नमः, उं सोममण्डलाय नमः, मं वह्निमण्डलाय नमः.

---

## R. No. 3243.

Paper. 10⅝ × 9¼ inches. Foll. 106. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Tiru-Śrinivāsavarada Tātāchāriyar of Villiyambakam, Chingleput district.

Fol. 106b is left blank.

परतत्त्वप्रकाशिका

PARATATTVAPRAKĀŚIKĀ.

A treatise explaining in accordance with Viśiṣṭādvaita Vedānta the supreme nature of God Viṣṇu; by Śrīnivāsadāsa, son of Ghanaguru a mahācārya of Hārita family.

Complete.

**Beginning :**

श्रीनिधिरार्यकटाक्षश्रितवर्गं श्राचयत्वपारकृपः ।
पद्माकान्तदयापि प्रतीक्षते यस्य भावुकावसरम् ॥
प्राचामाचार्याणां प्रपद्य सिद्धान्तपद्धतिं कृतिषु ।
प्रणयामः परतत्त्वप्रकाशिकाख्यां कृतिं मुदे विदुषाम् ॥
वैदिकतदितरबहुमतविवरणपूर्वं श्रुतिस्मृतिप्रथितैः ।
इतिहासपुराणागमसिद्धैर्वचनैश्च संमितं तत्त्वम् ॥
ब्रह्म समाधिकरहितं प्रतिपाद्यमिह प्रबन्धपरिपाट्याम् ।
अपवर्गः फलमुदितो जिज्ञासूनां च संशयापगमः ॥

श्रीपतावपरिमितोदारगुणसागरे परमकारुणिके सर्वेश्वरे केवलया स्वकीयया कृपया स्वजनितचराचरभूतसङ्घसंरक्षणे जाग्रति सति गुरुकृपापरिपक्वमात्मगुणभूषणभूषितः कोऽपि शिष्योत्तमः

* * * *

इदमेव जिज्ञास्यं ब्रह्मैतदेव परमवैदिकं मतमस्मादेव परमपुरुषार्थसिद्धिरिति निर्धार्योपदिश्य स्वामिभिरनुग्राह्योऽयं जन इति । एवंव्यवसायनिष्ठमन्तेवासिनं प्रत्याचार्यः प्रब्रूते—अङ्ग शिष्योत्तम भवता कृतोऽयं प्रश्नः सकलसत्पुरुषसंमतः परतत्त्वनिर्णायको मुक्तिसाधनभूतश्च ।

**End :**

देशिकोत्तमेन समादिष्टश्शिष्योत्तमः प्राह—स्वामिन् गुरुवरेण्य भवदीयनिर्हेतुकपरमकृपाकटाक्षवैभवेन परमवैदिकसिद्धान्तपद्धतिः द्रढिष्ठा जाता। रजस्तमोगुणौ दूरतो निराकृतौ ।

* * * *

नारायणचरणनलिनयुगलमिलनकन्दलितनिरर्गलनिरतिशयानन्दहृदयारविन्दस्सुखमुवास ॥

हरितकुलश्रीधनगुरुतनयश्रीवासदास[वि]रचितेयम् ।
जयतुतरां परतत्त्वप्रकाशिका प्राज्ञसन्तोष्या ॥
(परम)पुरुषहृद्या रम्यसन्दर्भपद्या तरलहृद-
विभेद्या त्वङ्कजोदोऽनुमोद्या । (?)
सदनुगुण(सु)धीरा कापि वाप्रीतिसारा
शिवकृदमृतभोग्या कापिवत्यत्युदारा ? ॥

**Colophon:**

परतत्त्वप्रकाशिका सम्पूर्णा ॥

---

R. No. 3244.

Paper. 10¾ × 9¼ inches. Foll. 80. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Mānavikrama-Anujan-Kuññaṇṇi, Raja of Paḍiññāre—Kōvilakam (III Prince of Calicut), Malabar district.

खण्डनमण्डनव्याख्या.

KHAṆḌANAMAṆḌANAVYĀKHYĀ.

Foll. 1*a*—79*b*. Fol. 80*a* gives the contents of this work. Fol. 80*b* is left blank.

A commentary on the Khaṇḍanamaṇḍana of Varadarājapaṇḍita, pupil of Vidyānandapaṇḍita, which work is described under R. No. 2980 ante.

Contains the Pratyakṣakhaṇḍa, Anumānakhaṇḍa, Upamānakhaṇḍa complete and Śabdakhaṇḍa incomplete.

**Beginning:**

तत्र हेतुः प्रतिपन्नेति । प्रतिपन्नश्शास्त्रकारासमावो येन शिष्येण स तथोक्तः । दूषयति—तदपीति । योऽसौ वाच्यवाचकभावस्समयापरपर्यायो लक्षणवाक्यरूपशास्त्रसाध्य उक्तः । अयं शास्त्रान्तरसाध्यो न त्वच्छास्त्रसा-ध्यतामर्हति । तदेव शास्त्रान्तरमाह—अस्तीति ।

* * * *

अन्याभिप्रायानुसारेणोपपद्यमाने यावत्तदालोचनेन सामान्यतोऽप्यस्मदुक्तार्थ-रतयाप्युपपद्यमानमेव इतिशब्दः ॥

**Colophon:**

प्रत्यक्षलक्षणखण्डनं परिसमाप्तम् ॥

प्रत्यक्षलक्षणविचक्षणवादिवृन्ददुर्दन्तिदन्तदलनानि विलासमात्रम् ।

येषां जयन्ति त इमे जगति प्रतीताः श्रीहर्षसिंहनररूपकरप्रहाराः ॥

**End:**

ततस्तथेति । असम्भवत्प्रवृत्तिनिमित्तान्तरस्याश्वोक्तगोसदृशसामानाधि-करण्यमनुपपत्तिर्विपक्षबाधिका ।

सम्प्रत्यवसरप्राप्तं शब्दप्रमाणं खण्डयितुं पृच्छति—शब्दोऽपीति ।

परमतमाशङ्कयाह—आप्तेति । आप्तपदमङ्कुल्यग्रादिवाक्यव्युदासार्थम् । वाक्येति पदापोहाय ।

* * * *

एवं तर्हि यथाप्रमाणेति विशेषणं क्रियत इत्यत आह—यथेति । यथा प्रमाणदृष्टं तथावादी सः अतो नातिव्याप्तिः । अंशे तथाभूतवादी यथाप्रमाणदृष्टवादी अंशान्तरे च यथा.

---

R. No. **3245.**

Paper. 10⅜ × 9½ inches. Foll. 18. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920-21 from a MS. of the Samsthanam Library, Bobbili.

(*a*) उत्तरकालामृतम्.

UTTARAKĀLĀMṚTAM.

Foll. 1*a*—11*b*. Fol. 12 is left blank.

Similar to the work described under R. No. 1977 ante. By Kālidāsa. Contains the second Kaṇḍa only complete.

**Beginning :**

लक्षण्यां स्त्रियमुद्वहेदवितथस्वब्रह्मचर्यो मनः-
कान्तामन्यपरिग्रहत्वसवयस्सापिण्ड्यरुग्वर्जिताम् ।
गोत्रादि[ष]प्रवरेषु साम्यरहितां कुष्ठाद्यमर्यादिनीं
गौरीत्वानधिकां मनोनयनयोरानन्दिनीं सुन्दरीम् ॥

* * * *

भाविविरुद्धसम्बन्धानाह—

नोद्वाह्या स्वपितृव्यपत्निसहजासापत्न्यमातृष्वसा-
तत्पुत्र्यौ च न सोदरस्य गृहिणीसोदर्यपि स्वात्मसूः ।
स्वोपाध्यायतनूभवा सुतसुता नोद्वाहयोग्या भवेत्
पै(पि)त्र्यस्यैव विचिन्तयेत् प्रवरभिन्नत्वं न मातुर्भवेत् ॥

**End :**

दशान्तं बिन्दुसंयुक्तं दशादशहतं तथा ।
द्विषष्टिभाजितं शेषं दिनलब्धं च मासि च ॥

**Colophon :**

श्रीकालिदासस्य कृतावुत्तरकालामृते द्वितीयकाण्डः ॥

(6) दीक्षाविधानम्, आन्ध्रटीकासहितम्.

DĪKṢĀVIDHĀNAM WITH TELUGU MEANING.

Foll. 13a—17b. Fol. 18 is left blank.

On the ceremonial initiation necessary for temple priests to become eligible to conduct the worship of God Viṣṇu. The procedure herein laid down is taken from the Uttarakhaṇḍa of the Pādmapurāṇa. Each stanza is accompanied by its metrical rendering in Telugu.

Incomplete.

**Beginning:**

देवदीक्षाविधिं वक्ष्ये विष्णुनोक्तं पुरानघ ।
उषःकाले समुत्थाय शौचादिभिरतन्द्रितः ॥

* * * *

स्नानसन्ध्यादिकं कृत्वा कृत्यं कर्म यथाविधि ।
भार्यया नियतस्सार्धं शुभ्रवस्त्रधरश्शुचिः ॥

* * * *

गुरुभिस्साकमागत्य देवतायतनं प्रति ।
कृत्वा प्रदक्षिणं देवमनादिनिधनं हरिम् ॥

**End:**

पुनरुत्सवबेरं तं पूर्वोत्सवविधानतः ।
एतदागारमासाद्य स्थापयेद्ध्रुवसन्निधौ ॥

* * * *

एवं करोति यो धर्मान् स चाप्नोति रमाधवम् ।

* * * *

---

R. No. **3246**.

Paper. 10¾ × 9¼ inches. Foll. 72. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920-21 from a MS. of the Sarasvati Club, Vijayarayi.

रामानुजशतकान्तादिः, सव्याख्यः.

RĀMĀNUJAŚATAKĀNTĀDIḤ WITH COMMENTARY.

The text is called Rāmānujanūṟṟantādi or Prapannagāyattri, which is a eulogy in Tamil by Tiruvaraṅgattamudanār on Rāmānuja, the well-known propounder of the Viśiṣṭādvaita-Vēdānta. It is followed by a commentary in Sanskrit.

Complete.

**Beginning:**

श्रीशैलेशदयापात्रव्याख्यारीत्या च संस्कृतम् ।
श्रीमत्प्रपन्नगायत्र्याः स्वार्थो वै वर्ण्यते मुदा ॥
ऋचो यजूंषि सामानि तथैवाथर्वणानि च ।
सर्वमष्टाक्षरान्तस्थं यच्चान्यदपि वाङ्मयम् ॥

इत्युक्तमन्त्रराजतात्पर्यभूतं भगवदाकस्मिककृपालब्धज्ञानश्रीमत्पराङ्कुशपरकालादिप्रणीतदिव्यप्रबन्धसारभूतं श्रीमधुरकव्युक्त्यनुष्ठानप्रकटितं श्रीमत्पराङ्कुशमुनिना योगदशायां श्रीमन्नाथमुनिभ्यस्साक्षादुपदिष्टं तदारभ्य गुरुपरम्पराप्राप्तम्

* * * *

श्रीमद्रामानुजमुनिकृपया श्रीवत्सचिह्नमिश्रेभ्यो लब्धं

न चेद्रामानुजेत्येषा चतुरा चतुरक्षरी ।
कामवस्थां प्रपद्यन्ते जन्तवो हन्त मादृशाः ॥

इति स्वानुभवरूपस्वसिद्धान्तं परमकृपया सकलचेतनोज्जिजीवि(वयि)षया श्रीवैष्णवानां नित्यानुजप्यतया चाष्टोत्तरशतसङ्ख्यया प्रपन्नगायत्रीं श्रीरङ्गामृताचार्याः स्वकलान्तरस्थितानामस्माकमप्यनुभवितुमन्तादिरूपगाथाबद्धप्रबन्धं प्रसादयामासुः ।

* * * *

श्रीरामानुजमुनेः चरणारविन्दं समाश्रित्योज्जीवितुं तन्नामान्येव वदाम इति स्वचित्तमनुशास्ति प्रथमगाथायाम्—

पूमन्नुमादुपोरुन्दियमार्पन् ( . . . ) मवन्नामङ्गळे ॥
पू तामरसे मन्न नित्याधिष्ठितायाः मादु स्त्रियाः पद्मालयाया इत्यर्थः.

**End:**

उपक्रमोपसंहारगाथाद्वयार्थविचारेण प्राप्यरुच्यभिवृद्धिश्च प्राप्यसिद्धिश्च श्रीलक्ष्मीकटाक्षणे सिध्यतीति च अत्र परत्र चापि ।

नित्यं यदीयचरणौ शरणं मदीयमित्याचार्यचरणारविन्दमेवोपायोपेयमित्यध्यवसायश्च सिध्यतीति सिद्धान्तितम् ॥

जयतु जयतु श्रीमान् जानकीजानिराद्यः
जयतु जयतु श्रीमान् कारिसूनुश्शठारिः ।

जयतु जयतु श्रीमान् भाष्यकारो यतीन्द्रः
जयतु जयतु श्रीमान् रम्यजामातृयोगी ॥

**Colophon:**

श्रीमदप्पय्यगायत्रीसंस्कृतव्याख्या सम्पूर्णा ॥

---

## R. No. 3247.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 50. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920-21 from a MS. of Naduvil-maṭham of Trichur, Cochin State.

न्यायसारपदपञ्जिका.

NYĀYASĀRAPADAPAÑJIKĀ.

A commentary on the Nyāyasāra of Bhāsarvajña, which is a treatise on the Nyāya philosophy. The text has been printed in the Nirnayasagara Press at Bombay. By Vāsudēvasūri, son of Sūryasūri of Kashmir.

Contains the Pratyakṣaparicchēda, Anumānaparicchēda and Āgamaparicchēda.

**Beginning:**

देवदेवमभिवन्द्य शाश्वतं योगिवृन्दहृदयैकमन्दिरम् ।
वासुदेवविदुषा विरच्यते न्यायसारपदपञ्जिका परम् ॥

तत्र तावच्चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणायाभिमतदेवताप्रणतिपुरस्सरं श्रोतृजनमनस्समाधानार्थं सप्रयोजनमभिधेयं प्रतिजानीते—

प्रणम्य शम्भुं जगतः पतिं परं समस्ततत्त्वार्थविदं स्वभावतः ।
शिशुप्रबोधाय मयाभिधास्यते प्रमाणतद्भेदतदन्यलक्षणम् ॥ इति ।

शं सुखं भवत्यस्मादिति शम्भुस्तम् । किंविशिष्टम्? जगतस्त्रैलोक्यस्य पतिं स्वामिनं देवेन्द्रादीनामपि जगत्पतित्वमस्तीति तद्व्यवच्छेदायाह—परमिति । उत्कृष्टमनन्यप्रेर्यमित्यर्थः ।

* * * *

प्रथमोद्दिष्टस्य प्रमाणस्य सामान्यलक्षणमाह—सम्यगनुभवसाधनं प्रमाणमिति । सम्यक् चासावसम्भ(नुभ)वश्चेति सम्यगसम्भ(नुभ)वः तस्य साधनं करणं प्रमाणम् ।

* * * *

**Colophon :**

इति काश्मीरसूर्यसूरिसूनुश्रीवासुदेवसूरिविरचितायां न्यायसारलघुवृत्तिपदपञ्चि(ञ्जि)कायां प्रत्यक्षपरिच्छेदः ॥

**End :**

उपसंहरति—तस्मात्कृतकत्वेऽपि नित्यसुखसंवेदनसम्बन्धस्य विनाशकारणाभावान्नित्यत्वं स्थितम् । तत्सिद्धमेतन्नित्यं(त्य)संवेद्यमानसुखेन विशिष्टात्यन्तिकी दुःखनिवृत्तिः पुरुषस्य मोक्ष इति ॥

**Colophon :**

इति काश्मीरसूर्यसूरिसूनुश्रीवासुदेवसूरिविरचितायां न्यायसारपदपञ्जिकायामागमपरिच्छेदः ॥

न्यायभूषणमहाम्बुधौ बुधा येऽलसा विचरितुं न जानते ।
तत्कृते कृतिरियं मया कृता न्यायसारपदपञ्जिकाभिधा ॥

---

R. No. 3248.

Paper. 10¾ × 9½ inches. Foll. 20. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920-21 from a MS. from the Library of Raja of Gōdavaram (12th Prince), Cranganore, Cochin State.

Fol. 20 is left blank.

ललिताविलासचम्पूः.
LALITĀVILĀSACAMPŪḤ.

A treatise in verse and prose describing the marriage of Lalitā, a manifestation of the goddess Pārvatī with God Śiva; as found in the Śivapurāṇa.

Breaks off in the third Ullāsa.

**Beginning :**

यस्य श्रीमदपाङ्गवीक्षणशरज्ज्योत्स्नाविधूतान्तरा
विघ्नध्वान्तगणाः प्रयान्ति विलयं यच्छ्रेयसामाकरः ।
श्रीकामेश्वरसुन्दरीस्मितरुचिक्षीराब्धिजेन्दुं विभुं
हैरम्बं हिमरश्मिकोटिमकुटं तं नौमि शश्वच्छ्रिये ॥

यो विद्वज्जनमौलिहीरकमणिर्यत्पादपद्मोल्लस-
द्रेणुर्निर्मलमातनोति हृदयादर्शं सदा मामकम् ।
सोऽयं देशिक एव निर्भररसालङ्कारहृद्यान्तरां
सूक्तिं चम्पुनिबन्धनप्रणयिनीं पुष्णातु चित्ते वसन् ॥

* * * *

नेमं वित्ततया सभासु न सतां प्राशस्त्यलब्ध्याशया
नैवान्यस्त्वजिगृक्षया न कविताचातुर्यवत्ताबलात् ।
भक्त्या श्रीपुरनायिकापदसरोजेन्दिन्दिरभिल्यर्थीः
कुर्वे श्रीललिताविलासममलात्मानः क्षमन्तां बुधाः ॥

काशीपुरेऽथ कलशोद्भवतापसस्य दृष्ट्वा तपश्चिरमनः करुणार्द्रचेताः ।
सच्चिन्मयस्तुरगकन्धरमूर्तिरेत्य कच्चित्सुखं तव वदन्निति तत्पुरोऽभूत् ॥

* * * *

अस्ति खलु समस्तसुरासुरवृन्दवन्दितचरणारविन्दस्य पुरन्दरस्य निरन्तरलक्ष्मीविलासाधिष्ठानमविष्ठानममरावती नाम ।

* * * *

साकूतैर्वचनैः प्रलोभ्य दनुजान् योऽपाययन्निर्जरान्
श्रीकान्तोऽमृतमात्तमोहनवपुर्वृन्दारुचिन्तामणिः ।
सत्स्वन्येष्वपि संश्रितेषु करुणापाथोधिराद्यः पुमान्
उल्लासं प्रथमं विभावयतु मे चिन्मात्ररूपो हरिः ॥

**Colophon:**

इति श्रीललिताविलासे चम्पुकाव्ये प्रथमोल्लासः ॥

**End:**

परामवाप्य निर्वृतिं परातिसन्धानपरास्ते विरोधिभुजपञ्जराकुलितां दुरापामप्यमरावतीं निजकरान्तरागतां निरीक्षन्वन् ॥

तां देवीं तर्पयन्तीं शिशिरतरकृपापूर्णापाङ्गधारा-
सम्पातैर्विश्वमेतत् स्फुटकुटजहसां निन्य(द्दु)तेन्द्वर्कभासम् ।
आलोक्यैते मयूरा इव जलदघटां जिष्णुचापाभिरामा-
मुल्लासं प्रापुरुच्चैर्हृषिततनुरुहाह्वितमानन्दलक्ष्म्याः ॥

**Colophon:**

इति श्रीललिताविलासे चम्पुकाव्ये द्वितीयोल्लासः ॥

लोकेश्वकेशवशिवाखिजगत्प्रसूतिं देवर्षयोऽपि दिविषद्वनितास्त(त)स्ताम् ।
आजग्मुरम्बरचरैरभितः प्रकीर्णा मन्त्राक्षयीमिव निजाश्रयभूमिमेनाम् ॥

* * *

कुमारस्तन्वङ्गीं कुटिलकवरीभारललितां
कुरङ्गाक्षीं पश्यन् कुतुकजलधीन्दुद्युतिमयीम् ।
कुचन्मुग्धामोदप्रियककलिकाङ्गीं मुदमसौ
कुचानम्रामातः कुसुमविशिखाद्वैतजननीम् ॥

---

R. No. 3249.

Paper. 10¼ × 6¼ inches. Foll. 256. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Ampalakat Karuṇākara Menon Avargal, B.A., B.L., Chalapuram, Calicut.

पालकाप्यम् (हस्त्यायुर्वेदः).

PĀLAKĀPYAM (HASTYĀYURVEDAḤ).

Foll. 1a—255a. Fol. 255b gives the contents of this work. Fol. 256 is left blank.

Similar to the work described under No. 13324 of the D.C.S. MSS., Vol. XXIII. The work is also called after the name of the author, i.e., Pālakāpyamuni.

Deals with the following subjects:—

१. वनानुचरितम्.
२. गन्धहस्तिसम्भवः.
३. वननिर्देशः.
४. गर्तप्रकरणम्.
५. गजबलवर्धनम्.
६. गजजातिलक्षणम्.
७. गजस्वरलक्षणम्.
८. गजबृंहितलक्षणम्.
९. गजप्रदेशलक्षणम्.
१०. गजदशाभेदलक्षणम्.
११. गजायुर्लक्षणम्.
१२. गजवयोलक्षणम्.
गजमूल्यविवरणम्.
१३. दन्तकल्पनादिनिरूपणम्.
१४. छेदाकारफलम्.
१५. शालालक्षणम्.
१६. रसाहारनिरूपणम्.
१७. वस्तिविधिः.
१८. गजाञ्जनविधिः.

Incomplete.

**Beginning:**

अङ्गानामधिपः श्रेष्ठः श्रीमानिन्द्रसमद्युतिः ।
येनेयं पृथिवी सर्वा सशैलवनकानना ॥
चतुस्सागरपर्यन्ता भुक्ता ह्यमिततेजसा ।
स रोमपादो नृपतिः चक्रवर्ती महायशाः ॥
रोमेति नाम पद्मस्य विख्यातं पूर्वसूरिभिः ।
तेनैवाङ्कितपादत्वाद्रोमपाद इति स्मृतः ॥

*   *   *   *

ततः कैश्चिज्जनपदे हस्तिपीडां महत्तराम् ।
विज्ञतो भूमिपालस्तु किं कर्तव्येत्यचिन्तयत् ॥

*   *   *   *   *

ततस्तु वदतां श्रेष्ठस्सामात्यस्सपुरोहितः ।
न्यायकारान् गुणश्रेष्ठानभिवाद्येदमब्रवीत् ॥
अहं जिघृक्षुर्द्विरदान् वन्यान् धर्मविशारदाः ।
दर्शनेन यथोक्तेन भेद्यन्तां वनचारिणः ॥

*   *   *   *

अचिरात्समनुप्राप्तस्तं देशं यत्र ते गजाः ।
सतां श्रापवशप्राप्तान् गजान् जग्राह पार्थिवः ॥
तस्मिन् काले यथाख्याते यूथं बद्धं नृपेण तत् ।
चम्पासमीपमानीय प्रतिपूज्याभिवाद्य च ॥

*   *   *   *

कल्पे कल्पे गजानेष ह्यमितौजा महायशाः ।
पालयिष्यति धर्मात्मा रोगार्तान् भृशदुःखितान् ॥
पालनाद्गजयूथस्य काप्यो गोत्रेण येन च ।
पालकाप्य इति श्रीमन्नामधेयं च कुर्वति ॥
एवं दिव्यवचः श्रुत्वा श्रीमतस्तस्य धीमतः ।
पालकाप्य इति श्रीमन्नामधेयं चकार सः ॥

*   *   *   *

**Colophon:**

इति पालकाप्ये महापाठे वृद्धोपदेशीये महारोगस्थाने वनानुचरितं नाम प्रथमोऽध्यायः ॥

**End:**

चुचुन्दरी च संपेष्य नकुलत्वकविश्रया ।
लेपयेदश्वगन्धायाः परनागप्रभेदनम् ॥
अश्वगन्धां च शुण्ठीं च पशुगन्धां पलण्डुकम् ।
पेषयित्वा गजं लिम्पेत्प्रच्छाद्यैव च वाससा ॥
नागकेसरपुष्पाणि जज्झूर्णा च वचां तथा ।
पिष्ट्वा तेन गजं लिम्पेत् . . . . . . . . ॥

**Colophon:**

इति पालकाप्ये गजाञ्जनविधिः ॥

---

R. No. 3250.

Paper. 10¾ × 9¼ inches. Foll. 78. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from MS. of M.R.Ry. Payyūr Paṭṭāri, Kaṇṇangoḷam, Malabar district.

ब्रह्मसिद्धिः.

BRAHMASIDDHIḤ.

Foll. 1a—77b. Fol. 78a gives the contents of this work.

A treatise on the Advaita-Vēdānta; by Maṇḍanamiśra, author of Bhāvanāvivēka, Vidhivivēka, Vibhramavivēka and Sphōṭasiddhi. A critical edition of this work is being brought out in the Madras Oriental Manuscripts Series.

Contains the Brahmakāṇḍa and the Tarkakāṇḍa complete and the Niyōgakāṇḍa incomplete.

**Beginning:**

आनन्दमेकममृतमजं विज्ञानमक्षरम् ।
असर्वं सर्वमभयं नमस्यामः प्रजापतिम् ॥

वेदान्तेषु विप्रतिपद्यन्ते विपश्चितः केचिदप्रामाण्यं मन्यन्ते, आत्मनः प्रमाणान्तरसिद्धत्वे तेषामनुवादकत्वात्, असिद्धत्वे सम्बन्धाग्रहात्, अपदार्थत्वे वाक्यस्याविषयत्वात्, प्रवृत्तिनिवृत्त्यनुपदेशे चापुरुषार्थत्वात् । अन्ये तु प्रतिपत्तिकर्तव्यताप्रामाण्यव्याजेनाप्रामाण्यमेवाहुः । अन्ये तु कर्मविधिविरोधात् प्रत्यक्षादिविरोधाच्च श्रुतार्थपरिग्रहे उपचरितार्था(र्थता)मन्यन्ते । तन्नि-

रासायेदमारभ्यते—आनन्दमिति । परां च देवतां गुणाभिधानलक्षणया स्तुत्या कायवाङ्मनःप्रह्वतालक्षणया च प्रणत्या पूजयति प्रकरणार्थं चोपक्षिपति विप्रतिपत्तिनिराकरणमुखेन वेदान्तानामेवंभूतेऽर्थे प्रामाण्यप्रतिपादनाद्यतो भवत्येषोऽपि प्रकरणार्थः ।

* * * *

अथाभाव एव साध्यो विशेषैरेवास्य निर्विशेषैर्व्यभिचार इति ॥

**Colophon:**

इत्याचार्यमण्डनमिश्रकृतौ (ब्रह्मसिद्धौ) ब्रह्मकाण्डः समाप्तः ॥

ननु प्रत्यक्षादिभिर्व्यावृत्तानां भावस्वभावानामवगमान्नैकस्मिन्नद्वये शब्दः प्रमाणं, प्रत्यक्षादिविरोधात् (ग्रावप्ल)वनार्थवचनोवत् । उच्यते—

आहु विधातृ प्रत्यक्षं न निषेद्धृ विपश्चितः ।
नैकत्व आगमस्तेन प्रत्यक्षेण विरुध्यते ॥

**End:**

यथानुवृत्तं व्यवहारसिद्धं यथावभासं कथयन्ति बाह्याः ।
तथैव भेदव्यवहारयोगं वदन्ति वेदान्तविवेकभाजः ॥

**Colophon:**

इति श्रीमण्डनमिश्रविरचितायां ब्रह्मसिद्धौ तर्ककाण्डः समाप्तः ॥

एवं प्रत्यक्षादिविरोधात्कर्मविधिविरोधाच्च श्रुतार्थपरिग्रहे ये मन्यन्ते वेदान्तानामुपचरितार्थत्वं, तत्प्रबोधनाय विहितः प्रयत्नः ।

* * * *

संप्रयुक्त एव प्रवर्तते नेतरस्मिन् । तत्रापीदं विचार्यं विवेकग्रहणस्य ।

---

## R. No. 3251.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 212. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of the Naḍuvil-Maṭham, Trichur, Cochin State.

Bound in two volumes.

ब्रह्मसिद्धिटीका.
BRAHMASIDDHIṬĪKĀ.

A commentary on the Brahmasiddhi of Maṇḍana, which work has been described under the previous number: by Śaṅkhapāṇi.

Complete.

**Beginning:**

यदधीनं सुरेन्द्राणामप्यारम्भसमापनम् ।
गणाधिपतिसंज्ञं तद्वस्तु मेऽस्त्विष्टकृत्सदा ॥

प्रकरणारम्भे विघ्ननिवृत्तये परामत्र च प्रतिपाद्यतयाभिमतां देवतास्तुतिपुरस्सरं नमस्यति—आनन्दमिति । कार्यारम्भे नमस्कारक्रियायामविगीतसदाचारः प्रमाणम् ।

* * * *

इदानीं प्राथम्यादानन्दादिपदं व्याख्यातुकामस्तत्पूर्वपक्षं तावत्करोति—अत्रेति । आहुरित्यध्याहार्यं मन्यत इति वा व्यवहितमप्यपेक्षयानुषञ्जनीयः । ततः किमित्याह—रागेति । इतिशब्दो हेत्वर्थः रागनिबन्धनायाश्च प्रवृत्तेः संसारहेतुत्वम् ।

* * * *

**Colophon:**

इति श्रीब्रह्मसिद्धिव्याख्याने ब्रह्मकाण्डव्याख्यानं शङ्खपाणिना कृतम् ।

**End:**

पुरुषार्थं आप्तो भवतीति दुःखोपशमसुखे प्रत्येकमसम्पूर्णावन्यत्र पुरुषार्थाविह तु उभयमपि । अतः पूर्ण इत्युक्तम् । परस्यामुत्तरकालया हानादिप्रवृत्तौ अङ्गत्वात्प्रत्यक्षादीनां नानङ्गत्वमिति चेत् एवं तर्हि शब्दात्प्रमिते ब्रह्मणि तत्साक्षात्करणायोपासनादिप्रवृत्तेर्वेदान्तजज्ञानस्य तदङ्गत्वेऽप्यताम् अपुरुषार्थानां वेदान्तानां प्रामाण्यमिति भावः । इतिः ग्रन्थप्रकरणपरिसमाप्तौ ॥

**Colophon:**

इति श्रीशङ्खपाणिकृतौ ब्रह्मसिद्धिटीका प(रिसमाप्ता) ॥

---

R. No. **3252.**

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 996. Lines, 20 in a page. Dēvanāgarī. Good.

Bound in four volumes.

The first 4 Prakāśas were transcribed in 1921–22 from a MS. of the Librarian, Sanskrit College, Tiruppapattura, Cochin State.

Prakāśas 5 and 6 were transcribed from a MS. of M.R.Ry. K. C. Valiayarāja Avargaḷ, Kōṭṭakkai, Malabar district (in 1920-21). Prakāśas 7—12 were transcribed from a MS. of M.R.Ry. Ā. Karuṇākara Menon Avargaḷ, B.A., B.L., Chalapuram, Calicut (in 1920-21). Prakāśas 13—36 were transcribed from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Palliperambulūr-mana of Kaniyanūr village, Tiruppaṇattura, Cochin State.

(a) शृङ्गारप्रकाशः.

ŚṚṄGĀRAPRAKĀŚAḤ.

Foll. 1a—155a, 157a—220a, 253a—529a, 535a—738b, 745a—995b. Foll. 221a—251b contain the Mantrakāṇḍa belonging to the Mantraśāstra. Foll. 739 and 996a give the contents of this work. Foll. 155b—156b, 252, 529—531b, 740—744 and 996b are left blank.

An extensive work in 36 Prakāśas on poetics. The verses given as examples are taken from a large number of works several of which are now either rare or are not traceable. By Bhōjadēva.

The subjects dealt with herein are apparent from the headings of the Prakāśas given below:—

१. प्रकृत्यादिप्रकाशः.
२. प्रातिपदिकप्रकाशः.
३. प्रकृत्यादिशब्दप्रकाशः.
४. क्रियाद्यर्थचतुष्टयप्रकाशः.
५. उपाध्यर्थचतुष्टयप्रकाशः.
६. विभक्त्यर्थादिचतुष्टयप्रकाशः.
७. केवलशब्दसम्बन्धशक्तिप्रकाशः.
८. सापेक्षशब्दशक्तिप्रकाशः.
९. दोषहानगुणोपादानप्रकाशः.
१०. उभयालङ्कारप्रकाशः.
११. रसवियोगप्रकाशः.
१२. प्रबन्धाङ्गचतुष्षष्टिचतुष्टयप्रकाशः.
१३. रतिप्रकाशः (wants the beginning).
१४. हर्षादिभावपञ्चकप्रकाशः.
१५. रत्यालम्बनविभावप्रकाशः.
१६. रत्युद्दीपनविभावप्रकाशः.
१७. अनुभावप्रकाशः.
१८. धर्मशृङ्गारप्रकाशः.
१९. अर्थशृङ्गारप्रकाशः.
२०. कामशृङ्गारप्रकाशः.
२१. मोक्षशृङ्गारप्रकाशः.
२२. अनुरागस्थापनप्रकाशः.
२३. विप्रलम्भसम्भोगप्रकाशः.
२४. विप्रलम्भान्वर्थप्रकाशः.
२५. विप्रलम्भसाधर्म्यवैधर्म्यप्रकाशः.
२६. Nil.
२७. अभियोगविधिप्रकाशः
२८. दूतविशेषदूतकर्मप्रकाशः.
२९. दूतसम्प्रेषणादिलक्षणविचारः.

३०. मानप्रकाशः.
३१. प्रवासोपवर्णनम्.
३२. करुणरसविनिर्णयः.
३३. सम्भोगशब्दार्थप्रकाशः.
३४. प्रथमानुरागप्रकाशः.
३५. मानान्तरादिप्रकाशनम्.
३६. सम्भोगावस्थाप्रकाशः.

**Beginning :**

अच्छिन्नमेखलमलब्धदृढोपगूढ-
मप्रा)प्तचुम्बनमवीक्षितवक्त्रकान्ति ।
कान्ताविमिश्रवपुषः कृतविप्रलम्भ-
सम्भोगसख्यमिव पा(तु)वपुः पुरारेः ॥
यत्पादपङ्कजरजःपरिमार्जितेषु
चेतस्सु दर्पणतलामलतां गतेषु ।
शब्दार्थसम्पद उदारतरास्स्फुरन्ति
विघ्नच्छिदेऽस्तु भगवान् स गणाधिनाथः ॥
आत्मस्थितं गुणविशेषमहंकृतस्य
शृङ्गारमाहुरिह जीवितमात्मयोनेः ।
तस्यात्मशक्तिरसनीयतया रसत्वं
युक्तस्य येन रसिकोऽयमिति प्रवादः ॥
सत्त्वात्मनाममलधर्मविशेषजन्मा
जन्मान्तरानुभवनिर्मितवासनोत्थः
सर्वात्मसम्पदुदयातिशयैकहेतु-
र्जागर्ति कोऽपि हृदि मानवतो(मयो)विकारः ॥
तात्पर्यमेव वचसि ध्वनिवे(रेव)काव्ये
सौभाग्यमेव गुणसम्पदि वल्लभस्य ।
लाव(ण्यमेव)वपुषि स्वदतेऽङ्गनाया-
श्शृङ्गार(ए)व हृदि म(मानव)तो जनस्य ॥
शृङ्गारवीरकरुणाद्भुतरौद्रहास्य-
बीभत्सवत्सलभयानकशान्तनाम्नः ।
आम्नासिषुर्दश रसान् सुधियो वयं तु
शृङ्गारमेव रसनाद्रसमामनामः ॥

वीराद्भुतादिषु च येह रसप्रसिद्धि-
स्सिद्धा कुतोऽपि वटयक्षवदाविभाति ।
लोके गतानुगतिकत्ववशादुपेतामेतां
निवर्तयितुमेव परिश्रमो नः ॥

* * * *

रत्यादयो यदि रसास्स्युरतिप्रकर्षे
हर्षादिभिः किमपराधं(द्ध)मतद्भिरिन्नैः ।
अस्थायिनस्त इति चेद्भयहासशोक-
क्रोधादयो वद कियच्चिरमुल्लसन्ति ॥
स्थायित्वमत्र विषयातिशयान्मतं चे-
च्चिन्तादयः कुत उत प्रकृतेर्वशेन ।
तुल्यैव सात्मनि भवेदथ वासनाया-
स्सन्दीपनात्तदुभयत्र समानमेव ॥

अतस्सिद्धमेतत् रत्यादयश्शृङ्गारप्रभवा इति । एकोनपञ्चाशद्भावाः वीरादयो मिथ्यारसप्रवादाः शृङ्गार एवैकश्चतुर्वर्गैककारणं रस इति ।

* * * *

प्रकृतिप्रत्ययावेवमुपस्कारश्च दर्शितः ।
क्रमादुपपदस्यापि स्वरूपमुपवर्जितम् ॥
अव्ययानि निपाताश्च गतयश्च निरूपिताः ।
कर्मप्रवचनीयाश्च सोपसर्गाः प्रकाशिताः ॥
न केवलेह प्रकृतिः प्रयुज्यते न केवलास्सुप्तिङ्ञण्क्यजादयः ।
भवत्युपस्कार इहापृथग्द्वयोः द्वयार्थमेवोपपदं प्रयुज्यते ॥

**Colophon:**

इति महाराजाधिराजश्रीभोजदेवविरचिते शृङ्गारप्रकाशे प्रकृत्यादिप्रकाशो नाम प्रथमः प्रकाशस्समाप्तः ॥

**End:**

तदेतत्कामसर्वस्वं तदेतत्काव्यजीवितम् ।
य एष द्विप्रकारोऽपि रसः शृङ्गारसंज्ञकः ॥
. . . . . . . . . . . . . . . तारका ॥
अविदग्धा यथा गोष्ठी निःशृङ्गारा(यथाङ्गना) ।
धांशुमाली पीतांशुः यथार्चिर्हुताशनः ॥

यथाऽप्रतापो नृपतिरशृङ्गारस्तथा पुमान् ।
यथेन्दुना निशा भाति निशाभिश्च(यथोडुराट्) ।
(तथाङ्गनाभिः शृङ्गारः) शृङ्गारेण तथाङ्गना ॥
यथा तठिदनम्भोदा पयोदस्त(ठिदुज्झितः) ॥
(अहङ्कृतिरशृङ्गारः) शृङ्गाराचा(रश्चा)नहङ्कृतिः ।
रसः शृङ्गार एवैकः भावा रत्यादयो मताः ॥
प्रकर्षगामिनोऽपीह प्रेमग्लानिश्रमादिवत् ।
इति निगदितमङ्ग्याःनङ्गसर्वस्वमेतत्
विविधम . . . . . . . वयन्तोऽस्य भेदम् ।
तदनुभवसमुत्थानन्दसम्मीलिताक्षाः
परिषदि परितोषं हन्त सन्तः प्रयान्तु ॥
यावन्मूर्ध्नि हिमांशुकन्दलवती स्वर्वाहिनी धूर्जटेः
यावद्वक्षसि कौस्तुभस्तबकिते पद्मा मुरद्वेषिणः ।
यावच्चित्तभुवस्त्रिलोकविजयप्रौढं धनुः कौसुमं
भूयात्तावदियं कृतिः कृतधियां कर्णावतंसोत्पलम् ॥

**Colophon:**

इति श्रीमहाराजाधिराजश्रीभोजदेवविरचिते शृङ्गारप्रकाशे संभोगावस्थाप्रकाशो नाम षट्त्रिंशः प्रकाशस्समाप्तिमगमत् ॥

---

Transcribed in Telugu character in 1921-22 from a MS. obtained from the Maharaja's Library, Vizianagram.

(*b*) मन्त्रकाण्डः, सव्याख्यः.

MANTRAKAṆḌAḤ WITH COMMENTARY.

Foll. 221*a*—251*b*.

A treatise in Mantraśāstra containing several Mantras as well as diagrams.

Incomplete.

**Beginning:**

अतः परं प्रवक्ष्यामि मन्त्रयन्त्रादिकौतुकम् ।
यस्य प्रभावतो युद्धे दुर्बलस्य बलं भवेत् ॥

अत इति । अतः परं भूबलकथनानन्तरं मन्त्रयन्त्रादिकं बलं वक्ष्यामि । यस्य मन्त्रयन्त्रादिरूपबलस्य प्रभावेण दुर्बलस्य युद्धे बलं शत्रुजयसामर्थ्यं भवेत् ।

चतुरश्रं चतुर्द्वारं त्रिरेखापद्मगर्भितम् ।
हस्तत्रयप्रमाणं तु तण्डुलैर्मण्डलं लिखेत् ॥
मध्ये पद्मं लिखेदेकं चतुष्षष्टिदलात्मकम् ।
एकैकं पद्मपत्रेषु वसुसङ्ख्यान्वितेषु च ॥

**End:**

यत एतद्यन्त्रकृता रक्षा त्रैलोक्यमपि वशमानयेत् । उद्याने चेति । कार्ये च वृत्ते सत्युद्याने वने नदीतीरे शुभे देशे भूभागे शुभे दिने रिक्तान्यतिथौ रविशशिकुजान्यवारे शान्त्युत्तरकाले तच्छिद्रं भुवि निक्षिपेत् ॥

**Colophon:**

इति मृत्युञ्जययन्त्रविवरणम् ॥

---

R. No. **3253.**

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 58. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Śrī-Kumaran Nambūddiri, Kathil-mana, Shoranur, Cochin State.

Foll. 57*b* and 58 are left blank.

मीमांसानयविवेकः.

MĪMĀṂSĀNAYAVIVĒKAḤ.

Same work as that described under No. 4457 of the D.C.S. MSS., Vol. IX. By Bhavanātha-Miśra.

Contains the first Pāda of the first Adhyāya only.

**Beginning:**

गणाधिपं ग्रहान् वन्दे हरिं हरमुमां गुरुम् ।
(वाग्दे)वीं स्वर्धुनीं विप्रान् कर्तुं गुरुनये कृतिम् ॥
विहाय विस्तरं शब्दसौन्दर्यपरनिन्दने ।
व्यज्यते भवदेवेन तत्त्वं नयविवेकतः ॥
महता प्रणिधानेन शक्यमेव विधान्तरम् ।
लोकानुमतमित्येव शालिकोक्तं प्रसाध्यते ॥

ग्रन्थेऽस्मिन् विस्मयो भावी न वा किं तस्य दुष्करम् ।
यो ददाति हि सर्वस्वं सहस्रोत्पत्तिशासनम् ॥

अथातो धर्मजिज्ञासा ।

ओं देवगुरुपूजास्तुतिनमस्कारादिरूपं मङ्गलमुच्यते ।

मङ्गलाचारयुक्तानां विनिपातो न विद्यते । इत्यादिस्मृतेश्चाभिमतविनिपातोऽस्य फलं, ग्रन्थारम्भे च लक्षण(या)विघ्नहेतुपापक्षयापेक्षया मङ्गलं युक्तं, तन्निवेशनं च ग्रन्थे युक्तं महापुरुषकृतस्तुत्याद्यनुकीर्तनाच्छिष्याणां मङ्गलार्थं तदिह न सूत्रभाष्यटीकासु न निवेशितम् । तद्दृष्ट्वा न कृतमित्यपि भाति । नैवम्—नित्यं मङ्गलाचारयुक्तत्वात् सूत्रकारादीनां सूत्रे चाथादिपदं तत्कालमङ्गलमपि सूत्रकृतः तन्निवेशितानुकीर्तनाच्छिष्याणां भाष्यकारादीनां मङ्गलं सिद्धम् । विषयप्रयोजनपरमिदं सूत्रमिति परमतम् ।

**End:**

प्रावाहणिरित्यादावन्यार्थे गुणवादार्थे लक्षणोक्तकृदिकारादिस्वीकारो वक्ष्यतेऽर्थवादे यद्भाष्ये वक्ष्यमाणं व्याहतं वक्ष्याम इत्येवं नोक्तं तदसम्बन्धार्थमेवमाद्युन्मत्तकवाक्यतुल्यमस्त्वित्युपन्यस्य निरस्यमिति गुणवादव्याहतिः । अपि च अपि प्रगीतः सुहृदुपदेश इत्यादिभाष्यं तत्सर्वमननाविपर्ययाच्चोदनाप्रामाण्यदार्ढ्यार्थम् ॥

**Colophon:**

इति महोपाध्यायश्रीभवनाथमिश्रकृतौ नयविवेके प्रथमस्याध्यायस्य प्रथमः पादः ॥

---

R. No. **3254.**

Paper. 10⅛ × 9¼ inches. Foll. 84. Lines, 20 in a page. Grantha Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Nārāyaṇa-Nambūddiri, Kūṭalūr-mana, Narōri, Tritala, Malabar district.

व्यवहारपदन्यासः.

VYAVAHĀRAPADANYĀSAḤ.

A treatise on Hindu Law dealing with the following subjects:—

१. व्यवहारावलोकनधर्मः.
२. प्राड्विवाकधर्मः.
३. सभालक्षणम्.
४. सभ्यलक्षणम्.
५. सभ्योपदेशः.
६. व्यवहारस्वरूपम्.
७. विचारविधिः.
८. भाषानिरूपणम्.

Breaks off in the Bhāṣānirūpaṇa.

**Beginning :**

मन्वादिमुनिमुख्यानां प्रणम्य चरणाम्बुजम् ।
व्यवहारपदन्यासः क्रियते न्यायवर्त्मना ॥

अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्मः । तच्च दुष्टनिग्रहमन्तरेण न सम्भवति । दुष्टपरिज्ञानं च व्यवहारदर्शनेन विनेति व्यवहारदर्शनमहरहः कर्तव्यमिति ह्यभ्युपगमः । तच्च न कर्तव्यं व्यवहाराणामभावात् । तथाहि तदुक्तं नारदेन—

मनुः प्रजापतिर्यस्मिन् काले राज्यमभु(भु)ञ्जत् ।
धर्मैकतानाःपुरुषास्तदासन् सत्यवादिनः ॥
तदा न व्यवहारोऽभून्न द्वेषो नापि मत्सरः । इति ।

यस्मिन् काले स्वायम्भुवादितत्तन्मनुः प्रजानां पतिरासीत् । स तस्मिन् काले षड्भागमेव गृहीतवान् न तु दण्डरूपेणार्थं गृहीतवान् दण्ड्यानामभावादित्यर्थः ।

* * * *

**Colophon :**

इति व्यवहारावलोकनधर्मः ॥

अथ प्राड्विवाकधर्मः ।

अपश्यता कार्यवशाद्व्यवहारान्नृ(पे)ण तु ।
सभ्यैस्सह नियोक्तव्यो ब्राह्मणस्सर्वविदिति(त्तमः ॥ इति) ॥

**End :**

इति विचारविधिः ॥

अथ भाषा—

अहंपूर्विकया याता(तौ)यथि प्रत्यर्थिनौ यदा ।
पादो वर्णानुपूर्व्येण ग्राह्यः पीडामवेद्य च ॥ इति ।

* * * *

यथाह नारदः—

आधिक्रियत इत्याधिस्स तु ज्ञेयो द्विलक्षणः ।
कृतकालोपनेयश्च यावद्देयोद्यतस्तथा ॥
स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च । इति ।

कृते काले अमुष्मिन् दीपोत्सवादौ मयायमाधिर्मोक्तव्यः । अन्यथा तवैवाधिर्भविष्यतीत्येवं निरूपिते कालदीपोत्सवादिका ॥

## R. No. 3255.

Paper. 10⅞ × 9¼ inches. Foll. 102. Lines, 20 in a page. Grantha Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Subrahmanya Rajah of Edapalli, Travancore State.

मुक्ताफलटीका—कैवल्यदीपिका.

MUKTĀPHALAṬĪKĀ : KAIVALYADĪPIKĀ.

Foll. 1a—101a. Fol. 101b gives the contents of this work. Fol. 102 is left blank.

A commentary on the Muktāphala of Bōpadōva which work has been described under No. 5807 of the D.C.S. MSS., Vol. XI, as Sacbhāgavata-śuktimuktāphala: by Hēmādri, minister of king Rāmarāja. Same commentary as that described under No. 1466 of the R. L. Mitra's Catalogue, Vol. IV.

Complete in the following Prakaraṇas :—

१. विष्णुभेदलक्षणम्.
२. शुद्धसत्त्वविष्णुरूपाणि.
३. विष्ण्ववतारनिरूपणम्.
४. विष्ण्वधिष्ठानवर्णनम्.
५. भक्तिलक्षणभेदकथनम्.
६. भक्तिप्रकरणम्.
७. भक्त्यङ्गलक्षणभेदः.
८. विष्णुभक्त्यङ्गलक्षणम्.
९. विष्णुभक्तलक्षणम्.
१०. शृङ्गारादिरसनिरूपणम्.
११. विष्णुभक्तिप्रकरणम्.

**Beginning** :

यज्ज्योतिरुन्मिषति चेतसि धर्ममेघ-
मातस्थुषामिह वशे परिकर्ममुख्यैः ।
तच्छुद्धसत्त्वमुकुरप्रतिबिम्बभावात्
कृष्णाभिधामुपगतं भुवि भावयेम ॥

समूलघातं प्रणिप(ह)त्य योऽन्धं मृणालिनी चेतयते मनीषाम् ।
दत्त्वादसङ्गाज्जगती कृतार्था गुरुं विवस्वन्तमिवानुपेतम् ॥
श्रीबोपदेवस्य निबेर्गुणानां जयन्ति ते ते भुवि वाग्विलासाः ।
विकुण्ठ्य येषु स्वयमीश्वरोऽपि सर्वज्ञशब्दं स्वमवैति गु(रू)ढम् ॥
अस्मिन् समस्मिन्नपि वाङ्मयाब्धावपारपारीणमनीषयोच्चैः ।
विवृण्वतश्चिज्जडवस्तुभेदं गुणा गु(ग)ण्या भुवि नास्य कैः कैः ॥
अमुष्य वैदग्ध्यनिधेर्हृदिस्पृशो मुदं ददत्यत्र न कस्य सूक्तयः ।
मुक्त्वा मृषाद्वेषिमनांस्यनारतं वियोगिहृद्दीपकलाः कलानिधेः ॥

तने मुक्ताफलं तेने यल्लोकमनुगृह्णता ।
तत्र टीकां यथाबुद्धि कुर्वे कैवल्यदीपिकाम् ॥
सृष्टां त्रिलोकगुरुणार्थमिवेन्दुलेखां
सुभ्रूभ्रमण्डनकरीमकलङ्कशङ्काम् ।
टीकां श्रियां परमहंसजनस्य दृष्ट्वा
कुर्वामिमां तदिह यान्तु बुधाः प्रसादम् ॥

इह मुमुक्षूपकाराय रुचिरप्रकारेण विकीर्षुराचार्यस्तत्परिसमाप्तिप्रचयपरिपन्थिविघ्नविघाताय शिष्टाचारपालनाय च समुचितेष्टदेवतां वन्दमानस्तत्प्रतिपाद्यमर्थं श्रोतृप्रवृत्त्यङ्गतया संक्षिप्याह—विष्णुमित्यादि । पञ्च आत्मान उपाधिभिन्नानि स्वरूपाणि यस्य स तथा पञ्चस्वपि विष्णुशब्दो व्याप्तिविवक्षया मङ्गलार्थत्वाच्च प्रागुक्तः । तं वन्दे नमस्कुर्वे । भक्त्येति । अष्टादशभेदया भक्त्या । भक्तेराश्रितमित्युत्तरेणान्वयः । साङ्गेति ।

* * * *

तदेवमुपास्यसाधनोपास्तिरुपासकश्चेति त्रयं प्रकरणार्थ इत्युक्तम् । अयमेव पादचतुष्टयार्थः क्रमात् प्रकरणचतुष्केणाभिधास्यते । एतावानेव भागवतेऽभिधेयोऽर्थः फलं तत्रैवोक्तमिति न पृथग्दर्शितः । महाप्रयोजनादयस्तु धर्मः प्रोज्झित इत्यत्र टीकायामुक्ता इहानुसन्धेयाः । तत्र कैवल्यलाभः प्रयोजनं भक्तियोगोऽभिधेयः ।

* * * *

**Colophon:**

इति कैवल्यदीपिकायां विष्णोर्लक्षणभेदाश्च ॥

**End:**

यो नित्यशुद्धसुखबोधवपुर्नितान्तं
जागर्ति चोमिति पदं यमिहानुवादि ।
यो योगिनां हृदि चकास्ति विधूतपङ्के
सोऽस्माकमस्तु शरणं पुरुषः पुराणः ॥
यत्किंचिदत्र(त्र) भवतः खलु बोपदेव-
सूरेः कृतिः निजधिया परिचर्चते मे ।
उद्दिश्य कोविदजनोपकृतिं तदेत-
दाराधनं भगवतः परमेश्वरस्य ॥

छायावतीममृतदामपि नैकचित्रां
पुण्यप्रपामिव भुवि प्रथितां तदीयाम् ।
टीकां परं परमहंसजनस्य दृष्ट्वा
ग्रन्थः कृतोऽत्र कृतिनां हृदुदेत(हि मुदे त्व)दोषम् ॥
अतत्त्वे तत्त्वधीर्येषां तत्त्वे चातत्त्वधीर्नृणाम् ।
नतानां नन्दयत्स्ये(न्त्वे)ता बोप्पदेवस्य सूक्तयः ॥
यस्य व्याकरणे वरेण्यघटनास्फीताः प्रबन्धा दश
प्रख्याता नववैद्यकेऽथ तिथिनिर्णयार्थमेकोऽद्भुतः ।
साहित्ये त्रय एव भागवततत्त्वोक्तौ त्रयस्तस्य मु-
न्यन्तर्वाणिशिरोमणेरिह गुणाः के के न लोकोत्तराः ॥
टीकां मुक्ताफलस्येमां नाम्ना कैवल्यदीपिकाम् ।
हेमाद्रिः कटके चक्रे रामराजस्य वेश्मनि ॥

**Colophon:**

इति हेमाद्रिदेवकृतायां मुक्ताफलटीकायां कैवल्यदीपिकायां विष्णुभक्ति प्रकरणम् ॥

समाप्तोऽयं ग्रन्थः ॥

---

R. No. 3256.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 32. Lines, 20 in a page. Grantha Good.

Transcribed in 1920-21 from a MS. of Śrīmān Bhīmasēna Pāṇigrāhi Paṭṭōri, Parlakimedi post.

जातकरत्नाकरः, सव्याख्यः.

JĀTAKARATNĀKARAḤ WITH COMMENTARY.

A treatise in 12 Taraṅgas explaining with reference to a horoscope the significance of each of the 12 houses representing the 12 Rāśis, as calculated from the Lagna, and also relates how the future of a person is influenced in different ways according to the relative position of the planets. The work is followed by a commentary, called Taraṇiprakāśikā. By Bhōnasēkharadāsa, author of the text as well as of the commentary.

Complete.

**Beginning:**

निर्विघ्नं विघ्नराजं सकलवरददां शारदां सर्वदाहं
विश्वेशं व्योमकेशं गिरिवरतनयालिङ्गितादक्षपार्श्वम् ।

सर्वेषां खेचराणां मतमतिकरुणं भास्करं लोकनेत्रं
पद्माभं पद्महस्तं सुरनरदनुजैर्वन्दिताङ्घ्रिं स्तवीमि ॥
सुवर्णवर्णं धृतवालवाम्बरं प्रलम्बबाहुर्नवकञ्जलोचनः ।
जितेन्दुपुष्पाङ्कितलो चलाधरो हृदि प्रकाशः कृपयास्तु मे हरिः ॥

अथ ज्योतिर्वित्कलानन्दकच्छन्दोऽलङ्कृतिकाव्यनाटककलादिनिपुणो भेनशेखरकविः श्रीमच्छ्रीशङ्करभास्वज्जातकानुरोधि श्रीजातकरत्नाकरनामकग्रन्थं चिकीर्षुस्तदादौ निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारक्रमागतं भगवद्विभूतिभूत-विघ्नराजशारदाव्योमकेशभास्करवन्दनात्मकं मङ्गलमाचरत्येकेन स्रग्धरावृत्तेन —निर्विघ्नमिति । निर्विघ्नं निष्प्रत्यूहं यथा तथा । विघ्नोऽन्तरायः प्रत्यूह इत्यमरः ।

* * * *

**Colophon:**

इति श्रीभेनशेखरदासविरचिते जातकरत्नाकरे तनुभावफलतरङ्गः प्रथमः ॥

सम्बन्ध इति । वपुरधिपः लग्नाधिपः सौम्यखेटैः शुभखगैः । सम्बन्धः यदि तदानीं सुन्दरत्वं वक्तव्यम् । तस्य लग्नाधिपस्य

* * * *

**Colophon:**

इति श्रीभेनशेखरदासविरचितायां तरणिप्रकाशिकाख्यायां जातकरत्नाकरटीकायां प्रथमभावफलं समाप्तम् ॥

**End:**

कर्मस्थे सौम्यदृष्टे सगुरुतदधिपे नाक आप्तो नराणां
चायो तत्र स्थिताश्चेत् गुरुबुधकवयो वाहनं लभ्यते च ।
स्वोच्चस्थो भावनाथश्शुभखगसहितो दिव्यपर्यङ्कलाभ-
श्चायो श्रेष्ठोच्चसंस्थश्शुभखचरयुताश्चित्रमवादिलाभः ॥

**Colophon:**

इति श्रीभेनशेखरदासविरचिते जातकरत्नाकरे व्ययभावफलतरङ्गो द्वादशः ॥

कर्मस्थ इति । सजीवकर्मेशे सौम्यदृष्टे शुभदृष्टे कर्मस्थे सति नराणां नाकः स्वर्गः आप्तः अथो गुरुबुधकवयः तत्र कर्मस्थिताश्चेद्वाहनं लभ्यम् ।

एवं जनैरिति शेषः। भावनाथः व्ययाधिपः शुभखगसहितः स्वोच्चस्थश्चेत् दिव्यपर्यङ्कलाभः। अथो भावनाथः शुभखचरयुतः श्रेष्ठांशतंस्थः परमोच्चस्थश्चेत् चित्रमञ्चादिलाभस्स्यात् ॥

Colophon:

इति श्रीभिनशेखरदासविरचितायां तरणिप्रकाशिकाख्यायां जातकरत्नाकरटीकायां व्ययभावफलं समाप्तम् ॥

समाप्तोऽयं ग्रन्थः ॥

---

R. No. 3257.

Paper. 10⅜ × 9½ inches. Foll. 220. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920-21 from a MS. of the Samsthanam Library, Bobbili.

पाञ्चरात्रागमः.

PĀÑCARĀTRĀGAMAḤ.

Foll. 1a—218a. Foll. 218b—220b are left blank.

A collection of extracts taken from various Saṁhitās dealing with the conduct of the worship of, and the performance of festivals to, God Viṣṇu in temples :

| Foll. | Saṁhitās. | | Adhyāya, etc. | | Subject- dealt with. |
|---|---|---|---|---|---|
| 1a—2a | अहिर्बुध्न्यम् | .. | Adhyāya 28. | | आराधनविधिः. |
| 2a—16b | सात्त्वतम् | .. | Paricchēdas 6, 7 | | द्रव्ययागात्मयागविधिः. |
| 16b—17a | जयसंहिता | .. | Paṭala 15 | .. | अग्निकार्यविधिः. |
| 17a—20b | पाद्मम् | .. | Adhyāya 4 | .. | Do. |
| 21a—24b | विश्वामित्रम् | .. | „ 11 | .. | Do. |
| 25a—27a | अनिरुद्धम् | .. | „ 18 | .. | Do. |
| 27b—33b | विष्वक्सेनम् | .. | „ 15 | .. | होमविधिः. |
| 33b—35b | मार्कण्डेयम् | .. | „ 16 | .. | अग्निकार्यविधिः. |
| 35b—37b | खगेन्द्रम् | .. | „ 18 | .. | सुदर्शनहोमार्चनम्. |
| 37b—40a | कपिञ्जलम् | .. | „ 16 | .. | अग्निकार्यविधिः. |
| 40a—45a | पाद्मतन्त्रम् | .. | „ 15 | .. | नित्योत्सवविधिः. |
| 45a—48a | विश्वामित्रम् | .. | „ 12 | .. | Do |
| 48a—49b | मार्कण्डेयम् | .. | „ 17 | .. | Do. |

| Foll. | Samhitās. | Adhyāya, etc. | Subjects dealt with. |
|---|---|---|---|
| 50a—51a | कपिञ्जलम् | .. Adhyāya 17 | .. नित्योत्सवविधिः. |
| 51b—55a | विष्णुसंहिता | .. „ 12 | .. बलिकर्मविधिः. |
| 55b—57a | वसिष्ठम् | .. Paṭala 4 | .. बलिप्रदानम्. |
| 57b—65b | ऋषिरात्रम् | .. Adhyāya 6 | .. Do. |
| 66a—85a | विश्वामित्रम् | .. „ 19, 20 | .. अभिषेकविधिः. |
| 85a—92a | जयाख्यम् | .. Paṭala 8 | .. मुद्राबन्धः. |
| 92a—95b | पाद्मतन्त्रम् | .. Adhyāya 22 | .. Do. |
| 96a—101a | विश्वामित्रम् | .. „ 13 | .. Do. |
| 101a—102b | कपिञ्जलम् | .. „ 27 | .. Do. |
| 103a—107a | पञ्चरात्रम् | .. „ 34 | .. Do. |
| 107a—110a | नारदीयम् | .. „ 6 | .. Do. |
| 110a—111b | विष्वक्सेनम् | .. „ 19 | .. Do. |
| 111b—114b | मार्कण्डेयम् | .. „ 31 | .. Do. |
| 114b—117a | अगस्त्यम् | .. „ 18 | .. मुद्रालक्षणम्. |
| 117a—121b | ऋषिरात्रम् | .. „ 2 | .. Do. |
| 122a—124b | विष्णु | .. मुद्रापटलः. | |
| 125a—131a | मन्त्रदेवताप्रकाशिका | Paṭala 6 | .. Do. |
| 131b—137b | पाद्मम् | .. Adhyāya 7 | .. मण्डलाराधनम्. |
| 137b—141b | विश्वामित्रम् | .. „ 15 | .. Do. |
| 141b—144b | अनिरुद्धम् | .. „ 5 | .. यन्त्रविधिः. |
| 144b—151b | जयाख्यम् | .. Paṭala 18 | .. अभिषेकविधिः. |
| 151b—169b | Do | .. „ 16 | .. दीक्षाविधिः. |
| 170a—174b | पाद्मम् | .. Adhyāya 2 | .. Do. |
| 174b—179a | विश्वामित्रम् | .. „ 9 | .. Do. |
| 179b—182b | लक्ष्मीतन्त्रम् | .. „ 41 | .. Do. |
| 183a—184b | मार्कण्डेयम् | .. „ 12 | .. Do. |
| 184b—190a | विष्णु | . „ 29 | .. समयाचारलक्षणम्. |
| 190a—194b | Do | .. Paṭala 30 | .. योगविधिः. |

| Foll. | Saṁhitās. | Adhyāya, etc. | Subjects dealt with. |
|---|---|---|---|
| 194b—201a | विष्णुतन्त्रम् | .. Adhyāya 13 | .. समयाचारकीर्तनम्. |
| 201a—206b | लक्ष्मीतन्त्रम् | .. „ 27, 28 | .. सदाचारप्रकाशः. |
| 207a—209b | नारदीयम् | .. .... | महालक्ष्मीबीजानि. |
| 209b, 210a | सात्वतम् | .. Paricchēda 21 | .. समयविधिः. |
| 210b—215b | पाद्मतन्त्रम् | .. Adhyāya 18 | - पञ्चकालविधिः, स्नानविधिः. |
| 215b—218a | जयाख्यम् | .. Paṭala 9 | .. स्नानविधिः. |

Wants the beginning.

**Beginning:**

ओमर्घ्यं कल्पयामीति जपेत् स्पृष्ट्वार्घ्यमादितः ।
पाद्यपात्रादिकेष्वेवं ब्रूयात्सुरमुने क्रमात् ॥
गन्धतोयेन सम्पूर्य पात्राण्येतानि सर्वशः ।
अर्घ्यात् किञ्चित्समुद्धृत्य जलं पात्रान्तरेण तु ॥
देवस्य दक्षिणे पाणौ मूलमन्त्रेण विन्यसेत् ।
पुष्पं दत्वाथ पाद्येन पादौ देवस्य सेचयेत् ॥

* * * *

**Colophon:**

इति श्रीपाञ्चरात्रे अहिर्बुध्न्यसंहितायामाराधनविधिर्नामाष्टाविंशोऽध्यायः ॥

**End:**

तस्मात्स्नानं पुरा कुर्याच्च उच्चैश्श्रेय आत्मनः ।
स्नानेन विह्वला(लो) जन्तुः कृतमन्त्रेण जायते ॥
द्विजेन निर्विवेकात्मा किंपुनर्यः क्रियापरः ।
वर्णाचरक्रमोपेतः साधुमार्गव्यवस्थितम् ॥

**Colophon:**

इति श्रीपाञ्चरात्रे जयाख्यसंहितायां स्नानविधिर्नाम नवमः पटलः ॥

---

R. No. 3258.

Paper. 10¾ × 6¼ inches. Foll. 178. Lines, 10 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of the Sanskrit College Library, Tiruppaṇṇttura, Cochin State.

बार्हस्पत्यसंहिता.

BĀRHASPATYASAMHITĀ.

This is a portion of the work described under No. 13817 of the D.C.S. MSS., Vol XXIV, wherein see the Nimittakāṇḍa portion of this work.

An astrological treatise dealing with the following subjects.

१. निर्दोषकालनिश्चयक्रमः.
२. गुणरूपकथनम्.
३. दोषलक्षणविधानम्.
४. दोषापवादलक्षणम्.
५. मङ्गलाङ्कुरावापः.
६. गर्भाधानकालविचारः.
७. पुंसवनरक्षाविधानम्.
८. सीमन्तकर्मकालविधानम्.
९. जातकर्मक्रियाविधानम्.
१०. नामकरणविधानम्.
११. कर्णवेधनादिशुभकालविधानम्.
१२. उपनिष्क्रमणक्रियाविधानम्.
१३. अन्नप्राशनकालक्रियाविधानम्.
१४. चूडाकर्मकालविधानम्.
१५. उपनयनकालविधानम्.
१६. विद्यारम्भादिकालविधानम्.
१७. व्रतस्नानकालक्रियाविधानम्.
१८. विवाहकालक्रियाविधानम्.
१९. गृहप्रवेशनकालक्रियाविधानम्.
२०. उपसंवेशनादिकालक्रियाविधानम्.
२१. यात्राकालक्रियाविधानम्.
२२. स्वामिदर्शनकालक्रियाविधानम्.
२३. देवताप्रतिष्ठाविधानम्.
२४. राजाभिषेककालक्रियाविधानम्.
२५. देवोत्सवतीर्थनक्षत्रपुण्यकालनिरूपणम्.
२६. पवित्रारोहणादिदेवतापूजाकालविधानम्.
२७. मातृशान्तिकालक्रियाविधानम्.
२८. प्रकीर्णकाध्यायः.
२९. प्रेतादिश्राद्धक्रियाविधानम्.
३०. अध्यायोद्धारः.

Contains the Muhūrtavidhāna portion complete.

**Beginning:**

समूचुर्यावनाश्शास्त्रं यथाहेन्द्राय तद्गुरुः ।
पृष्टोऽनेनैव निर्दोषगुणाजिज्ञासुना स्वयम् ॥
बृहस्पतिमुवाचेन्द्रो जिज्ञासुर्गुणकर्मणाम् ।
गुरुः कालः कथं प्राप्तो निर्दोषः कथ्यतामिति ॥
उवाच गुरुरिन्द्रेण सम्पृष्टश्शुभकालताम् ।
स्वभावादेव कालोऽयं शुभाशुभसमन्वितः ॥

अनादिनिधनस्सर्वो न निर्दोषो न निर्गुणः ।
तस्यां(स्मात्) निर्दोषकालार्थी मुहूर्तं नाधिगच्छति ॥
मुहूर्ताभावतो दैवैः क्रियाष्षोडशकादिकाः ।
नोपलभ्याश्शुभास्सर्वा नृप्वर्थेकोऽपि वा परैः ॥
* * * *

**Colophon:**

इति बार्हस्पत्ये मुहूर्तविधाने निर्दोषकालनिश्चयक्रमाप्रकारो नाम प्रथमोऽध्यायः ॥ एकानत्रिंशच्छ्लोकः ॥

**End:**

एवं चेच्छास्त्रसिद्धान्तस्त्रिविधो बाडयाबुधीः ? ।
प्रविशेन्नरके नैव दैवज्ञस्स्वर्गमाप्नुयात् ॥
एवं गुणानां दोषाणां ज्ञात्वा लक्षणमीरितम् ।
अपवादैस्तु दोषाणां योगैर्दोषहरैरपि ॥
हरहालहलादीनां योगे बलवता तथा ।
गुणदोषबलैश्चैव सुविचार्यैव तत्त्वा·त् ॥
सुमुहूर्तान् स दैवज्ञो योऽसौ स्वर्गमवाप्नुयात् ।
लोकानां च शुभं कृत्वा वरं ब्रह्मपदं मजेत् ॥

**Colophon:**

इति बार्हस्पत्ये मुहूर्तविधाने अध्यायोद्धारो नाम त्रिंशद(शोऽ)ध्यायः विंशतिश्लोकैरुक्तः ॥

इति बार्हस्पत्यं समाप्तम् ॥

---

R. No. 3259.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 98. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Paravastu Govindacaryulugaru, Dōvāḍa, Singavarapukota taluk, Vizagapatam district.

Fol. 98 is left blank.

## सौन्दर्यलहरीव्याख्या—अरुणामोदिनी.
## SAUNDARYALAHARĪVYĀKHYĀ : ARUṆĀMŌDINĪ.

A commentary on the Saundaryalaharī of Śrī-Śaṅkarācārya, which work has been described under No. 48 of M. Seshagiri Sastri's Report

No. 2: by Kāmēśvara, who lived in the village Kottalaṅka belonging to the Kōnasīma country, south of Rajahmundry. The author belonged to the Kauṇḍinyagōtra :

In the Kodamarti family—

Mallikārjuna

|

Rāmēśvara, Purushōttama, Narasiṁha, Vēṅkata, Padmanābha, Brahma and two others.

|

Mallēśvara.

|

Gaṅgādhara

(wife Kāmāmbā, parents of the author)

|

Kāmēśvara

(author of the commentary)

who wrote this work at the instance of king Padmanābha, son of Narasiṁha. It is also stated that Veṅkaṭēśvara was the maternal uncle of the commentator.

The text is called Ānandalahari and commentary is called Aruṇāmōdini.

Contains the first Kallōla called Ānandalahari.

**Beginning :**

श्रीश्रीपतिप्रमुखदैवतवृन्दवन्द्यतद्वेष्टदानचणदिव्यपदाम्बुजाय ।
तस्मै नमस्समुदितारुणसन्निधा(मा)य सिद्धेन्दिरासहचराय गणेश्वराय ॥

* * * *

स्फटिकमणिविशुद्धं मौलिबद्धेन्दुरेखं
शबलितमिव देवं कुर्वती कम्रकान्त्या ।
तरुणतरणिशोणा तारणी दारुणेभ्यः
करुणयतु कटाक्षान् कापि नित्यारुणा नः ॥

यो लोकोपकृतिप्रविष्टहृदयो जित्वातिवाद्यं मतं
श्रीमच्छङ्करशब्दपूर्वभगवत्पादाभिधानं गतम् ।
सद्वेदान्तरहस्यवस्तुकृतिवान् गोप्यं रहो मानवं
तं वन्दे भगवन्तमन्तकरिपुं सर्वान्तरायच्छिदम् ॥

अस्त्यस्मिन् विषयेऽन्ध्रसंज्ञिनि महच्छ्रीगौतमीरोधसि
श्रीमद्राजमहेन्द्रनाम नगरं दुर्गं दुरारोहणम् ।
पूर्णा वन्दि(पण्डि)तमण्डलीभिरनिशं यद् दक्षिणादिक्स्थगून्
विख्याता बहुधा जगत्सु वसुधा श्रीकोनसीमाभिधा ॥

तस्यां सीमनि वृद्धगौतमतनूजातावृतस्सर्वतः
संपूर्णो निगमादि(शास्त्र)निपुणैस्सद्ब्राह्मणैस्सन्ततम् ।
श्रीमहेशकृपाकटाक्षकलनाकान्तोऽग्रहारोऽभव-
त्पेरूर्वादिमहाग्रहारविदितः श्रीकोत्तलङ्काभिधः ॥

तस्मिन्विश्वजनीनवृत्तिरभवत्संश्लाघितस्सज्जनै-
स्सङ्ख्यावद्भिरधिष्ठितः प्रविलसद्विख्यातवाग्वैभवैः ।
भव्यश्रीकोडमर्तिनाम विदितः कौण्डिन्यगोत्रोदितः
वंशः प्रांशुरनारतं प्रविलसद्विद्वत्प्ररोहाश्रयः ॥

तत्र श्रीमति मल्लिकार्जुनबुधः प्रापोदयं भानुव-
त्सङ्ख्यावत्सरनी(सी)रुहाणि विकचं प्रापुर्यतः प्रत्यहम् ।
प्रापाष्टावमपत्यसङ्घमनघं षड्दर्शनव्रातवत्
श्रीमत्पाणिनिमुख्यमौनिसदृशः शम्भौ परं भक्तिमान् ॥

षट्च्छास्त्राध्ययनप्रचारणसमायातप्रतिष्ठाभुवः
संसेव्याखिललोकमात्रविभवाः प्रादुर्बभूवुस्ततः ।
श्रीरामेश्वरपुरुषोत्तमबुधश्रीनारसिंहाभिध-
श्रीमद्वेङ्कटपद्मनाभविबुधब्रह्माभिधानास्सुताः ॥

तत्र स्वतन्त्रबुधयूथनुतप्रभावः श्रीमद्गिरीशपदपद्महितस्वभावः ।
वाचामधीश इव दिग्विदितात्मकीर्तिः ब्रह्माह्वयस्समभवन्महितेषु तेषु ॥

भट्टं भट्टमते गुरुं गुरुमते श्रीशङ्करं शाङ्करे
शेषं शेषकृतेऽक्षपात्कणभुजाव्याख्यानतन्निर्मितौ ।
काव्यं काव्यकलासु नीतिकुशलं नीतौ नये सर्वथा
प्राहुर्ज्ञास्सकलागमेषु कुशला यं ब्रह्मविद्वन्मणिम् ॥

सूनुस्सूनृतवाग्बृहस्पतिरिव प्राचीनजन्मार्जिता-
त्पुण्याद्गुण्यनुमोदितस्वचरितः शान्तिप्रधानश्रियः ।
श्रीगौरीपतिपादपद्ममकरन्दास्वादलुब्धान्तर-
स्तस्य प्राप्तयशःप्रशस्तिरमितो मल्लेश्वराख्योऽजनि ॥

सूनुस्तस्य च साम्प्रदायिकबुधश्रेणीसमासादितः
श्रीमद्गौतमकृष्णजैमिनिफणिग्रन्थाब्धिपारं गतः ।

श्रीमद्रामपदाम्बुजन्मनिहितप्रज्ञः प्रवीक्षाधितः
श्रीमान्सार्वजनीनवृत्तिरतुलो गङ्गाधराख्योऽजनि ॥
तद्गङ्गाधरधीरवर्यतनुभूर्विद्वत्स्वरूपागोचरः
श्रीविघ्नेश्वरपादपद्मभजनात्संप्राप्तविद्यस्सुधीः ।
श्रीआनन्दलहर्यभिख्यभगवत्पादीयदेवीस्तुते-
र्व्याख्यानं विदुषां प्रहर्षणकृते निर्माति कामेश्वरः ॥
कामदेवकविर्व्याख्यां करोति विदुषां मुदे ।
अरुणामोदिनीनाम्नीमानन्दलहरीस्तुतेः ॥

* * * *

व्याख्यानान्यस्य लक्ष्मीधरमुखविबुधैरागमाध्वप्रवीणैः
प्राचीनैः कल्पितान्यप्यतिकुशलहते खंदिताख्यातृमन्नि
फल्गून्याचार्यसूक्तोपमपदविवृतौ वाङ्मुखैर्दुर्मुखानी-
त्येवं देवीकटाक्षैर्विवृतिषु यतते प्रेरिता भारती मे ॥

* * * *

दीनजनावनदीक्षितवीक्षावन्तो भगवन्तो भगवत्पादाचार्यास्तत्रभवतीं विचित्रविष्टप(वि)परिणमनातिकौशलवतीं भजद्भक्तजनव्यसन(स)मुत्तारणकरुणाततिम्

* * * *

अभ्यर्थयन्तस्तदीयश्रीनिरतिशयप्रसादसमासादितस्वभावितकार्तार्थ्यं प्रार्थयन्तस्तदभिमुखीकरणायादौ विशिष्टेष्टदेवतारूपतलणाममाशंसते—शिव इत्यादि । वैशिष्ट्यं चेह देवतायास्सकलागमसंप्रतिपाद्यतया विष्ण्वादिसर्वदेवतोपास्यत्वात् । इष्टत्वं च कृत्स्नाभीप्सितप्रापणप्रवीणनिरीक्षणत्वात् ।

End:

इत्यागमात्रूपसाम्यं प्रसिद्धमेव । नवात्मानमित्यनेन रूपसाम्यं, समयेत्यनेन नामसाम्यमुच्यत इत्युभयोस्समयाभिधेयत्वं स्पष्टमेव किं दीपक्रमे शिवशक्तिसंमेलनेन जगदुत्पत्तिवादिभिः दृढीकरणायोपसंहारं तत्परामृष्टमिति सर्वं रमणीयम् ॥

Colophon:

इति श्रीमत्समस्तार्थिजनकृतार्थीकरणचातुरीधुरीणप्राज्यसाम्राज्यधुरन्धरनित्यान्नदाननियमवित्रासितसुत्रामकीर्तिप्रशस्तेरतिकरुणारसालवालविलोचनली-

लाविलोकनानन्दिताश्रितजनरक्षणदीक्षाविशिक्षितामरवृक्षस्तोमस्य सत्यवाग्वदन-चातुरीचतुराननस्य श्रीमदुपद्रष्टृकुलजलधिराकासुधानिधेः वाक्चातुर्यवशंवदीकृताखिलराजसिंहस्य नृसिंहतनूजन्मनः पद्मनाभप्रभुधुरन्धरस्य निदेशा[द]-नुवर्तिना श्रीमदखिलविद्यासम्प्रदायप्रवर्तकसाहित्यपदसार्वभौमश्रीमत्कोड-मतिवंशरत्नाकरसुधाकरव्रह्मान्तर्वाणिवर्यतनूभवस्य विश्वजनीनविद्यावैशारद्यस्य विद्वन्मणेः महेश्वरपण्डितस्य सूनेर्गङ्गाधरधीरधुरन्धरस्य तनूभवेन समस्त-भज्जन्मनोरथपन्थान(ती)समवहितश्रीविश्वेश्वरकृपाकटाक्षनिरीक्षणलब्धविद्यावै-शद्येन कामाम्बागर्भरत्नाकरराकासुधानिधिना वेङ्कटेश्वरभागिनेयेन कामेश्वर-सूरिणा विरचितासु कृतिषु आचार्यभगवत्पादकृतदेवीस्तुतिव्याख्यायामरुणामो-दिनीसमाख्यायामानन्दवर्णनापरानन्दलहरीसमाख्यः प्रथमः कल्लोलः ॥

सत्साहित्यप्रवीणस्त्रिभुवनविदिते कोडमर्त्यान्ववाये
धीरो गङ्गाधराख्यस्समुदभवदसौ मल्लिनाथात्कवेर्यः ।
तस्य श्रीसूनुकामेश्वरकविरचिताचार्यदेवीस्तुतीय-
व्याख्यानेऽत्रादिमे यस्समजनि लहरी साऽरुणामोदिनीव्यं ॥

* * * *

अरुणामोदिनीनाम्नी व्याख्येयमतिशोभना ।
तरुणारुणनीकाशं भजता गणनायकम् ॥
कामेश्वराख्यविदुषा निर्मितातिमनोहरा ।
आमोदिताऽरुणादेव्या राजराजेश्वराख्यया ॥

* * * *

मयि प्रसादं विबुधाः पश्यताऽरुणया कृतम् ॥
येनातिकठिनग्रन्थव्याख्यानोत्सुकतामगाम् ॥

---

R. No. 3260.

Paper. 10¾ × 9¼ inches. Foll. 128. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R Ry. Tippan Nambūdirippād, Ponnurkoṭṭa-mana, Perumbavore post, Travancore State.

Fol. 128*b* is left blank.

याज्ञवल्क्यस्मृतिव्याख्या—बालक्रीडा.

YĀJÑAVALKYASMṚTIVYĀKHYĀ : BĀLAKRĪḌĀ.

Same commentary as that described under R No. 2826 ante. By Viśvarūpa.

Contains the first Adhyāya only.

**Beginning:**

यो बिभर्ति नमस्तस्मै चन्द्रस्य कलशः(ये) कलाम् ।
गौरीगण्डस्थलद्व्योरक्षानिष्यन्दगलितामिव ॥
प्रसक्तचिन्त्यद्युतिमण्डलात्मसामर्ग्ज्युभिस्तपनात्तयामिः ? ।
ज्वलयतो येन विधातृधाम्नो दजूंषि शुका(क्रा)नि समाहृतानि ॥
सु(वि)शिष्टवेदमूलः पावनशाखो महाध्वरस्कन्धः ।
हारित्रिवर्गकुसुमो मोक्षफलो जयति विध्यर्थः ॥

* * * *

प्रणम्यार्कमहानागं तिलकस्वामिनं तथा ।
विनायकं च सद्वृत्तिभिः स्मृतिरुद्द्योत्यते मया ॥

योगीश्वरमित्यादि । याज्ञवल्क्यमिदं धर्मशास्त्रं व्याचिख्यासया प्रस्तूयते । हेतुत्वाच्च हेतौ च वस्तुनि महाप्रयोजनत्वाद्व्याख्यानादिप्रयासस्य । तथा चाम्नायः प्रिये स्वाध्यायप्रवचनेन भवतः । युक्तमना भवत्यहरहरपराधीनोऽर्थान् सा(धु)ताधयते सुखं स्वपिति ।

* * * *

धर्मादयश्शास्त्रस्य विषया इति तेषां तु लक्षणं वाच्यमित्यत आह—

देशे काल उपायेन द्रव्यं श्रद्धासमन्वितैः ।
पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणम् ॥

देशस्सामान्यविशेषार्यकत्वेन द्विविधः । सामान्यतः कृष्णोपलक्षितः ।

**End:**

ज्ञात्वापराध(न्) देशञ्जकालं बलमथापि च ।
वयः कर्म च वित्तं च ज्ञात्वा दण्डं प्रकल्पयेत् ॥

अपराधपुनर्वचनं दृष्टान्तार्थं यथैवापराधं ज्ञात्वा तदपेक्षया दण्डप्रकल्पनं, तथैव च देशकालाद्यपेक्षयापीत्यभिप्रायः । ज्ञात्वेति पुनर्वचनं निश्चितेऽपि व्यवहारे धर्मानुसारेण पुनः व्यवहरणोद्धरणार्थम् । स्पष्टमन्यत् ।

इति सम्भृतमण्डलस्सुधामा पुरुरुचिरो रमणः प्रतापशीलः ।
रविरिव नृपतिस्समः प्रजानां जगदखिलं व्यवहारतो बिभर्ति ॥

23641

ग्रन्थातिरेकभीत्या यन्न निबद्धं मया च सद्वस्तु ।
व्याख्यातृभिर्विविक्तं तल्लभ्यं सम्प्रदायेभ्यः ॥

**Colophon:**

इति याज्ञवल्कीये(य) धर्मशास्त्रे (स्वव्याख्यायां) विश्वरूपकृतबालक्रीडायां प्रथमोऽध्यायस्समाप्तः ॥

---

R. No. 3261.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 162. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of the Naḍuvil Maṭham, Trichur, Cochin State.

शिवज्ञानदीपिका.

ŚIVAJÑĀNADĪPIKĀ.

Foll. 1a—161a. Foll. 161b and 162 give the contents of this work.

Same work as that described under No. 5108 of the D.C.S. MSS., Vol. X, wherein see for the beginning.

Contains the Khaṇḍas one and two complete.

**End:**

कारुण्यमदनिष्यन्दकैवल्यवनचारिणम् ।
कालाम्बुदश्यामलाङ्गं कलभाननमाश्रये ॥

आदिनाथः—

आरुरुक्षोः परं योगं कर्मठस्यापि देहिनः ।
प्रोच्यते हठकापथ्यं शृणुध्वं योगसाधनम् ॥

* * * *

यश्शिवो नामरूपाभ्यां या देवी सर्वमङ्गला ।
तयोस्संस्मरणात्पुंसां सर्वतो जयमङ्गलम् ॥

**Colophon:**

इति श्रीशिवज्ञानदीपिकायां द्वितीयखण्डे योगसाधने कर्मज्ञानविभागे हठाद्यष्टाङ्गयोगानुवर्णनं नाम पञ्चविंशः पटलः ॥ द्वितीयखण्डस्समाप्तः ॥

---

R. No. 3262.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 262. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920-21 from a MS. of the Naḍuvil Maṭham, Trichur, Cochin State.

Fol. 262*b* is left blank.

न्यायसारव्याख्या—न्यायमुक्तावली.

NYĀYASĀRAVYĀKHYĀ : NYĀYAMUKTĀVALĪ.

A commentary on the Nyāyasāra of Bhāsarvajña which is a treatise in the Nyāya philosophy: by king Aparārkadēva.

Complete.

**Beginning :**

जयति भुवनजन्मस्थानसंहारहेतुः
जननिधनशून्यं शाम्भवं धाम शान्तम् ।
स्फुरति निरवशेषं वस्तु यत्रास्तमोहं
करकमलतलान्तस्स्थायिधात्रीफलाभम् ॥

* * * *

अपरादित्यदेवस्य जगदानन्दिनो गुणाः ।
जयन्ति वेधसः कर्णे यैः कुन्दकुसुमायितम् ॥
कीर्त्तिर्यस्य दिगङ्गनाङ्गनिकरे श्रीकण्ठ(खण्ड)पङ्कायते
चञ्चद्वन्दिचकोरवृन्दवदने चन्द्रांशुपुञ्जायते ।
धत्ते वारिधितीरभूपरिगता हंसावलीविभ्रमं
तस्येयं रचनापरार्कनृपतेः सन्न्यायमुक्तावली ॥

ग्रन्थारम्भे सदाचारपरम्परापरिप्रापितकर्तव्यभावं परदेवतास्तुतिनमस्काररूपं मङ्गलं परिसम्पादयितुमधिकारिप्रयोजनाभिधेयसम्बन्धप्रतिपादनायाह[म्]—

प्रणम्य शम्भुं जगतः पतिं परं समस्ततत्त्वार्थविदं स्वभावतः ।
शिशुप्रबोधाय मयाभिधास्यते प्रमाणतद्भेदतदन्यलक्षणम् ॥ इति ।

अत्र नमस्कारस्य भक्तिश्रद्धातिशयरूपप्रकर्षप्रतिपादनाय प्रशब्दोपादानम् । तथाभूतो हि परमेश्वरनमस्कारो धर्मं जनयन्नधर्मनिरसनप्रणाड्या तन्निबन्धनान्तरायान् प्रोत्सारयितुं पारयते ।

* * * *

प्रमाणसाधारणलक्षणोक्तेरनन्तरं तस्य भिदां निरूप्य ।
प्रत्यक्षमालक्ष्य विशेषचिन्तां चकार तस्याप्यविकल्पकान्ताम् ॥

**Colophon:**

इति महाराजाधिराजश्रीमदपरादित्यदेवविरचितायां न्यायमुक्तावल्यां न्यायसारवृत्तौ प्रथमः परिच्छेदः ॥

एवं प्रमाणप्रवरे प्रत्यक्षे परिलक्षिते ।
वदत्यवसरप्राप्तमनुमानस्य लक्षणम् ॥

**End:**

तस्मात्परमानन्दे नित्ये तद्वै(?)देवि संसिद्धे ।
संसृतिमोक्षावस्याभेदः सिद्धो यथोक्तया नीत्या ॥
इहागमे मानतया निरूपिते प्रमाणसङ्ख्यानियतिः परीक्षिता ।
प्रमेयजातश्च निरूपितस्ततो विमुक्तिरानन्दमयी निरूपिता ॥
उदधेरिव गम्भीराच्छास्त्रात्सारं समादाय ।
व्या(व्यद)धादपरादित्यो विवृतिमिमां न्यायसारस्य ॥
वितारयन्ती दुस्तर्कतिमिरं तिमिरोपमम् ।
न्यायमुक्तावली जीयादियमाचन्द्रतारकम् ॥
यशसा व्याकोशेन व्याप्तं भुवनं यदीयेन ।
अधरयति सौधलक्ष्मीं जीयादपरार्कदेवोऽसौ ॥

**Colophon:**

इति महाराजाधिराजश्रीमदपरादित्यदेवविरचितायां न्यायमुक्तावल्यां न्यायसारविवृतौ तृतीयः परिच्छेदः ॥

---

R. No **3263.**

Paper. 10⅜ × 9¼ inches. Foll. 84. Lines, 20 in a page. Dēvanāgari Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Agadācarya of Mandasa, Ganjam district.

हरिभक्तिसुधाकरः, सटीकः.

HARIBHAKTISUDHĀKARAḤ: WITH MEANING.

Foll. 1a—83a. Foll. 83b and 84a are left blank. Fol. 84b gives the colophon of this work.

Similar to the work described under R. No. 1429(*f*) ante. The author, whose name is not given, states that he based this work on the Śrī-Bhāgavata. This work was written in the Śaka year 1610, (expired) in 1688 A.D.

Complete in 16 Kalas dealing with the following subjects :—

| | |
|---|---|
| १. पुराणादिप्रशंसा. | ९. भगवदङ्घ्रिकमलसेवा. |
| २. विरागादिविबोधनम्. | १०. भगवदर्चनानिरूपणम्. |
| ३. सत्सङ्गफलकथनम्. | ११. भगवद्वन्दनाकथनम्. |
| ४. श्रीकृष्णोत्कर्षवर्णनम्. | १२. दास्यानुवर्णनम्. |
| ५. भगवद्भक्तिप्रशंसा. | १३. सख्यानुवर्णनम्. |
| ६. भक्तिभेदकथनम्. | १४. आत्मनिवेदना. |
| ७. श्रवणकीर्तनवर्णनम्. | १५. भक्तिप्रेमानुवर्णनम्. |
| ८. भगवत्स्मरणवर्णनम्. | १६. निजार्तिज्ञापना. |

**Beginning :**

कस्मै येन विभाषितोऽयमतुलो ज्ञानप्रदीपः पुरा
तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणे ।
योगीन्द्राय तदात्मना च भगवद्राताय कारुण्यतः
तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥

प्रारिप्सितनिर्विघ्नपरिसमाप्तिकामः ग्रन्थकारः श्रीभागवतसम्प्रदायप्रवर्तकरूपेण भगवद्ध्यानलक्षणं मङ्गलमाचरति—श्रीभागवतपद्येनैव द्वादशे त्रयोदशेऽध्याये सूतवाक्येन । तत् परं सत्यं श्रीकृष्णाख्यं धीमहि ध्यायतेर्लिङ् छान्दसम् । ध्यायेमेत्यर्थः । बहुवचनं शिष्याभिप्रायम् । येन पुरा कल्पादौ अतुलः असमः अयं भागवतरूपो ज्ञानप्रदीपः कस्मै ब्रह्मणे ।

• • • •

असतामिन्द्रियाणां पथि विषयमार्गे तीव्रेण व्रतेन विरक्त्या च तीव्रया तावतैव सर्वानर्थनिवृत्तिरीश्वरस्फूर्तिश्चेति भावः ॥

इति भागवताब्ध्युत्थे हरिभक्तिसुधाकरे ।
पुराणादिप्रशंसाख्या सम्पूर्णा प्रथमा कला ॥

**Colophon :**

इति प्रथमा कला ॥

**End :**

स्मर्तव्यः सततं विष्णुरित्यादि । अत्रासम्भावनां परिहरति—

यूयं तावद्विमृशत चिरं सन्तु दूरे गिरो मे
कामक्रोधादिभिररिवरैर्बाध्यमानेन नित्यम् ।
ग्रामं ग्रामं त्रुटितपरमायुर्भरेणात्र पुंसा
सेव्यो वा स्यान्न हि बहुविधक्लेशहारी मुरारिः ॥

यूयं तावत्साकल्येन विमृशत विचारयत ।

रम्यं भक्तिसुधाकरं समलिखं भूरिप्रयत्नादमुं

बोधायासतमस्समूहदमनीं टीकां च सत्कौमुदीम् ।

अत्र स्वामिकृतौ कृतं यदधिकं नू(न्यू)नं च पूर्वापर-

श्लोकैक्यप्रतिपत्तये सुकृतिभिस्तत् क्षम्यतां साधुभिः ॥

अच्छकौत्सकुललब्धजन्मना कृष्णभक्तिरतदीनबन्धुना ।

ग्रन्थ एष रचितोऽस्तु सन्ततं कृष्णदासहृदयप्रमोददः ॥

कृष्णदासानां वैष्णवानां कृष्णदासस्य स्वशिष्यस्य च हृदयप्रमोददोऽस्तु ।

इह क्षितौ सर्वगुणैरुपेतस्सङ्गीतविद्भूरियशाः सुशान्तः ।

धोरासिविद्यार्णवकर्णधारो विभाति नारायणमन्त्रराजः ॥

विप्रप्रियो विष्णुरतो वदान्यो वाग्मी विवेकी विनयी बलिष्ठः ।

विचारविद्बुद्धजनानुवर्ती विनिर्मितो यो विधिना विशिष्य ॥

महानदीदक्षिणभूप्रदेशे देशे त्वदीये वसता शकाब्दे ।

गते नभश्चन्द्ररसेन्दुसङ्ख्ये विनिर्मितो भक्तिसुधाकरोऽयम् ॥ (१६१०)

विष्णुर्यावत्कलयति तनुं दारवीं नीलशैले

तस्य क्रोडं जलनिधिसुता यावदङ्गीकरोति ।

यावच्चास्याः परिजनकृतौ चित्तवृत्तिर्दयार्द्रा

तावद्ग्रन्थोऽयमपि तनुतां संमदं सज्जनानाम् ॥

**Colophon:**

इति भागवताब्ध्युत्थे हरिभक्तिसुधाकरे ।

निजार्तिज्ञापना नाम संपूर्णा षोडशी कला ॥

इति षोडशी कला ॥

श्रीकृष्ण केशव कृपार्णव कञ्जनाभ कन्दर्पकोटिकमनीयकलानिधान ।

कालीयमर्दन कदम्बवनीनिकेत केलिं कदा कलयसीश हृदम्बुजे मे ॥

* * * *

गोष्ठेन्द्रनन्दन गदाग्रज गोपिकेश गोविन्द गोकुलमणे गुरुगोत्रधारिन् ।

गोपालगेयगुणपुञ्ज गदावरेह गुञ्जावतंस वद को गतिदस्त्वदन्यः ॥

**Colophon:**

इति हरिभक्तिसुधाकरः सम्पूर्णः ॥

## R. No. 3264.

Paper. 10⅜ × 9¼ inches. Foll. 38. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of Śrīmān Bhīmasēna Pāṇigrāhi, Rattini, Parlākimedi post.

जातकालङ्कारः, सटीकः.

**JĀTAKĀLAṄKĀRAḤ: WITH MEANING.**

A treatise in horoscopy dealing with the following topics:—

१. संज्ञाध्यायः.
२. भावफलाध्यायः.
३. योगाध्यायः.
४. विषकन्यायोगाध्यायः.
५. आयुर्दायाध्यायः.
६. भावाध्यायः.
७. वंशाध्यायः.

The author is Gaṇēśadaivajña, whose genealogy is given below:—

An astrologer (name not stated) of Bhāradvājagōtra

Sūrya | Gōpāla | Rāmakṛṣṇa

Gōpāla — Gaṇēśa

Date of the composition of the work—Lunar month Bhādrapada in the Śaka year 1535. Place—Brahmapura.

Complete.

**Beginning:**

सानन्दं प्रणिपत्य सिद्धिसदनं लम्बोदरं भारतीं
सूर्यादिग्रहमण्डलं निजगुरुं भक्त्या हृदब्जे स्थितम् ।
येषामङ्घ्रिसरोरुहस्मरणतो नानाविधाः सिद्धयः
सिद्धिं यान्ति लघु प्रयान्ति विलयं प्रत्यूहशैलव्रजाः ॥
सानन्दमानन्दमयस्वरूपं सौन्दर्यमाधुर्यगुणाकरस्य ।
नन्दस्य सूनोश्चरणारविन्दं वन्दे सदा सन्मुनिवृन्दवन्द्यम् ॥

सानन्दमिति । सिद्धिसदनं सिद्धिः कार्यसिद्धिः तस्याः सदनमाधारभूतम् । लम्बोदरं श्रीगणेशं भारतीं श्रीसरस्वतीदेवीम् ।

* * * *

यत्पूर्वं परमं शुकास्यगलितं सज्जातकं फक्किका-
रूपं गूढं (दतमं) तदेव विशदं कुर्वे गणेशोऽस्म्यहम् ।

दैवज्ञस्सुतरां यशस्सुखमतिश्रीहर्षदं स्रग्धरा-
वृत्तैश्चारु नृणां शुभानयपदं श्रीमच्छिवानुज्ञया ॥
यदिति । पूर्वं पुरा परममुत्कष्टं शुकास्यगलितं शुकमुखोद्गतम् ।

* * * *

हृद्यैः पद्यैर्गुम्फिते सूरितोषेऽलङ्काराख्ये जातके मञ्जुलेऽस्मिन् ।
संज्ञाध्यायः श्रीगणेशेन वर्यैः दिग्भिर्वृत्तैस्संयुतोऽयं प्रणीतः ॥

* * * *

**Colophon:**

इति श्रीगणेशदैवज्ञाचार्यविरचिते संज्ञाध्यायः प्रथमः ॥

**End:**

अभूदवनिमण्डले गणकमण्डलाखण्डलः
श्रुतिस्मृतिविहारभूर्विबुधमण्डलीमण्डनः ।
प्रचण्डगुण(घू)र्जराधिपसभाप्रभातप्रभा(भः)
कवीन्द्रकुलभूषणं जगति कोविदो वेद(दैव)वित् ।

* * * *

अभूदिति ।

भारद्वाजकुले बभूव परमं तस्यात्मजानां त्रयं
ज्यायांस्तत्रभवान् ग्रहज्ञतिलकं श्रीसूर्यसूरिस्सुधीः ।
भूयान् सर्वकलानिधिस्तदनुजो गोपालनामाभवत्
श्रीमद्दैवविदां वरस्तदनुजः श्रीरामकृष्णोऽभवत् ॥

* * * *

शाके मार्गणरामसायकधरा(१५३५)तुल्ये नभस्ये तथा
मासे ब्रह्मपुरे सुजातकमिदं चक्रे गणेशस्सुधीः ।
छन्दोऽलङ्कृतिकाव्यनाटककलाभिज्ञः शिवाध्यापकः
तत्र श्रीशिववित्प्रमुदे गणितभूर्गोपालसूनुः स्वयम् ॥

* * * *

ये पठिष्यन्ति दैवज्ञाः तेषामायुश्चिरं सुखम् ।
भूयात्कैरवकूलाभा सुकीर्तिस्सर्वतो दिशि ॥
हृद्यैः पद्यैर्गुम्भिते सूरितोषेऽलङ्काराख्ये मञ्जुले जातकेऽस्मिन् ।
वंशाध्यायः श्रीगणेशेन वर्यैर्वंर्वैर्युक्तस्संप्रणीतः सुवृत्तैः ॥

* * * *

वंशाध्याय: श्रीगणेशेन संप्रणीत: ॥

**Colophon:**

इति श्रीजातकालङ्कारे वंशाध्यायस्सप्तमः ॥

---

R. No. 3265.

Paper. 10¾ × 8½ inches. Foll. 148. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Khandavilli Narasimhacaryulugaru of Vizagapatam.

(a) विष्णुप्रतिष्ठाविधिदर्पणम्.

VIṢṆUPRATIṢṬHĀVIDHIDARPAṆAM.

Foll. 1a—95b.

A treatise on the details connected with consecration of divine images of God Viṣṇu: by Narasimha Sōmayājin, son of Madhavācārya of the Madhava family.

Deals with the following subjects:—

१. शिलापरीक्षा.
२. मूर्त्तिलक्षणम्.
३. प्रतिमालक्षणम्.
४. पुंस्त्रीप्रमाणम्.
५. दशावतारलक्षणम्.
६. परिवारदेवताविधिः.
७. विमानविचारः.
८. बालालयस्थापना.
९. यागादिगृहाग्निशालानिर्माणम्.
१०. अग्निकुण्डविधिः.
११. प्रतिमादियागद्रव्योपकरणादिलक्षणम्.
१२. भूपरीक्षागर्भप्रतिष्ठादिलक्षणम्.
१३. पीठसङ्कल्यानगन्धाधिवासकुम्भपूजाविधिः.
१४. शान्तिप्रधानध्रुवबरन्यासमहाप्रतिष्ठा.
१५. दशावतारादिप्रतिष्ठागृहार्चाप्रतिष्ठाविधिः.
१६. महोत्सवपुष्पयागविधिः.

Scribe—Kēśavācārya, son of Kṛṣṇācārya.

Date—Saturday, the 10th day of the dark fortnight of the lunar month Caitra in the year Pramādica.

**Beginning:**

अथ वैखानसप्रतिष्ठाविधिरारभ्यते । विष्णुप्रतिष्ठाविधिदर्पणम्—

शुकं भागवतं(ते)व्यासं वेदे तथ्ये च तद्गुरुम् ।
तत्पितामहमाचार्यं वन्दे श्रीकृष्णदेशिकम् ॥

* * * *

प्रणम्य विष्णुं परमेष्ठिनं च वैखानसं तं भृगुकश्यपात्रीन् ।
मरीचिमस्मद्गुरुनागमज्ञान् श्रीमाधवार्यान्विघ्नमाधवार्यान् ॥
तेषां प्रसादान्नरसिंहयज्वा महाग्निचित् सन् कृतवाजपेयः ।
विष्णुप्रतिष्ठाद्यखिलं च कर्म वक्ष्ये यथाबुद्धि यथागमोक्तम् ॥
त्रिधोदितं वैष्णवमत्र पञ्चरात्रं तथा भागवतं च शास्त्रम् ।
वैखानसं तत्क्रमशोऽभिधानं मिश्रं च शुद्धं खलु सौम्यमेतत् ॥

* * * *

एतानि संवीक्ष्य मरीचिमार्गान् सर्वप्रतिष्ठाविधिदर्पणाख्यम् ।
प्रयोगसौकर्यनिदानभूतं प्रावीक्ष्य (प्रवक्ष्य)हं सर्वमिहाङ्कुराद्यम् ॥
आचार्यमादौ वृणुयात्सदारं सपुत्रशिष्यावनुलक्षणं च ।
वैखानसं वेदविदं विधिज्ञं तन्मन्त्रकल्पोक्तमथागमज्ञम् ॥

* * * *

श्रीवाजपेयक्रतुदीक्षितेन नृसिंहनाम्नाग्निचिता प्रणीते ।
विष्णुप्रतिष्ठाविधिदर्पणेऽस्मिन् पुंस्त्रीप्रमाणं गदितं द्वितीयम् ॥

पुंस्त्रीप्रमाणं सम्पूर्णम् ॥

**Colophon:**

इति श्रीमाधवाचार्यसूनुना सर्ववेदसाग्निचिता नरसिंहसोमयाजिना प्रणीते सकलागमसारसङ्ग्रहे वैखानसीये प्रतिष्ठाविधिदर्पणेऽस्मिन् अङ्गुलिलक्षणदेवतानां प्रमाणध्रुवकौतुकस्नपनोत्सवबलिबेरादिप्रमाण(नि)यतावनारोत्सवचित्रार्धनित्रा(त्या)भासकाम्यादिब्राह्मणादिकृतयुगादिवर्णलक्षणं नवतालादिपुंस्त्रीप्रतिमादिलक्षणं नाम द्वितीयप्रकरणं समाप्तम् ॥

**End**

एवं हरेरुत्सवमाचरेद्यः सर्वक्रतूनां च फलानि लब्ध्वा ।
भुक्त्वेन्द्रभोगांश्चिरकालमन्ते सह व्रजेद्विष्णुजगत्सवंशः ॥

**Colophon:**

श्रीमाधवाचार्यजवाजपेयकृदग्निचित्सन्नरसिंहयज्वना ।
कृते प्रतिष्ठाविधिदर्पणाख्ये स्यादुत्सवयागविधिस्त्रयोदशः ॥
विष्णुप्रतिष्ठाविधिदर्पणाख्यग्रन्थं लिलेखाच्युतभक्तियुक्तः ।
श्रीकेशवाचार्यकनामधेयः श्रीकृष्णमाचार्यसुपुत्रवर्यः ॥

The scribe adds:—

श्रीमत्प्रमादीचसुवत्सरे शुभे चैत्राख्यमासे च ऋतौ वसन्ते ।
पक्षे च कृष्णे तु तिथौ दशम्यां वारे च मन्दे च लिलेख केशवः ॥
आरम्य वैखानसग्रन्थतह्वयमापुष्पयागान्तर एष पद्यम् ।
लिलेख सुव्यक्तमुदारधीहरौ श्रीकेशवाचार्यसुधीवरेण्यः ॥
कृष्णं कमलपत्राक्षं पुण्यश्रवणकीर्तनम् ।
वासुदेवं जगद्योनिं नौमि नारायणं हरिम् ॥
श्रीपुष्पयागस्समाप्तः ॥

---

(b) वैखानससकलागमसारसङ्ग्रहः.
VAIKHĀNASASAKALĀGAMASĀRASAṄGRAHAḤ.

Foll. 95b—147b. Fol. 148 is left blank.
Same work as that described under R. No. 3006 ante.
Breaks off in the third Śataka.

---

R. No. **3266.**

Paper. 10¾ × 9¼ inches. Foll. 57. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of the Raja of Chirakkal, Malabar district.

अष्टाङ्गहृदयव्याख्या —वाक्यप्रदीपिका.
AṢṬĀṄGAHṚDAYAVYĀKHYĀ: VĀKYAPRADĪPIKĀ.

Foll. 1a—56a. Fol. 56b is left blank. Fol. 57 gives the contents of this work.

Similar to the work described under R. No. 2898 ante. By Paramēśvara, who lived in the village of Aśvattha, situated on the bank of the river Nilā.

Contains the Nidānasthāna only complete.

**Beginning:**

आयुराम्नायत(त्वा)र्थमाचार्यो वेत्ति वाहटः ।
नृसिंहनाथस्त्वधुना सवर्णकुलचन्द्रमाः ॥

सूत्रस्थाने स्वस्थवृत्तित्वमुक्तम्, आतुरवृत्तित्वं तु बहुभिधेयत्वात्स्थगितम् । तस्य चातुरवृत्तित्वस्य स्वस्थवृत्तित्वस्य च शरीरपरायत्तत्वाज्जन्मनः प्रभृति शरीरगृद्धी(ही)तम् । अधुना तु व्याधेर्निर्णयस्यावसरः । तेषां च व्याधि-

निर्णयक्रमे निर्दि(र्दे)ष्टव्ये प्रथमं तेषां कारणं प्रदर्शितव्यं तदनु लक्षणम् । एतावता चाधिगत[ा]स्वरूपविशेषाणां यथास्वं प्रतीकारः । अतो निदानलक्षणपरिज्ञानार्थं तृतीयस्थानस्यारम्भः । तथा च मुनिः—रोगमादौ परीक्षेतेति ।

चिकित्सितत्वं तु बहुवक्तव्यत्वात् चतुर्थस्थाने वक्ष्यते । निदानप्रधानत्वान्निदानस्थानव्यपदेशकत्वम् । निदानं च द्विविधम्—किञ्चित्सकलरोगाश्रयं, किञ्चिद्विशिष्टरोगाश्रयं चेति । तत्तु प्रत्यध्यायं निर्दिश(श्य)ते । सकलरोगपरिज्ञानव्यापकनिदानपरिज्ञानं प्रथमाध्याय(ये)नारभ्यते—अथ पूर्वस्थानादनन्तरम् । सर्व एव रोगाः सर्वरोगाः तेषां निदानं सर्वरोगनिदानं निश्चयेन व्याधिरनेन दधी(दीय)त इति निदानं तमध्यायमधीयते तस्मिन्नभिमतोऽर्थ इत्यध्यायः । तं व्याख्यास्यामः वर्णयिष्यामः शेषं पूर्ववत् । रोग इत्यादि ।

* * * *

**Colophon:**

इति अष्टाङ्गहृदयवाक्यप्रदीपिकायां निदाने प्रथमोऽध्यायः ॥

**End:**

आवृता इति । आवृता वायवः अज्ञाता ज्ञाता वा वत्सरं स्थिता जाता अपि अनुपक्रमाः संवत्सरं स्थिता वा, ते प्रयत्नेनापि दुस्साध्या भवेयुः । वाशब्दश्चार्थे द्रष्टव्यः । विद्रधी आवृतानामुपेक्षणात् अनुपक्रमात् विद्रध्यादय उपद्रवा भवन्ति । तस्मादुपक्रम(मे) यतितव्यमित्यर्थः ॥

द्विजोत्तमस्य वैद्यस्य शिष्येण सहचारिणा ।
निदानस्थानमित्येवं व्याख्यातं वाहटोदितम् ॥

**Colophon:**

इति नीलातीरगताश्वत्थग्रामवासिना परमेश्वरद्विजोत्तमेन कृतायामष्टाङ्गहृदयव्याख्यायां वाक्यप्रदीपिकायां निदानस्थाने षोडशोऽध्यायः समाप्तः ॥

दैत्येन्द्रोद्दामरोरस्त्रुठनपटुनखैः क्रोडसक्तास्त्रपूरैः
क्रूरैर्नेत्रस्फुलिङ्गैरपि सकलजगत् त्रासयन्नट्टहासैः ।
प्रह्लादाह्लादकारी प्रतिहतसुजनापत्तिरक्षीणधामा
पायादस्मानपायात्सुरपुरवसतिस्सर्ववन्द्यो नृसिंहः ॥

निदानस्थानव्याख्यानं समाप्तम् ॥

## R. No. 3267.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 28. Lines, 20 in a page. Dêvanâgarî. Good.

Transcribed in 1920-21 from a MS. of Śrîmân Jugulakiśôra Paṇigrahi, B.A., College Lecturer, Parlâkimedi.

मुक्तिचिन्तामणिः.

MUKTICINTAMAṆIH.

Similar to the work described under No. 2476 of the D.C.S. MSS., Vol. IV, Part II. By Mahâmahôpâdhyâya Jagannâthadâsa of the Oriya country.

Complete.

**Beginning:**

अष्टादशपुराणानि कथ्यन्ते । पुराणकारः प्रमाणमाह—

ब्राह्मं पाद्मं वैष्णवं च शैवं (वायुं) भागवतं तथा ।
तथान्यन्नारदीयं च मार्कण्डेयं च सप्तमम् ॥
आग्नेयमष्टमं चैव भविष्यन्नवमं स्मृतम् ।
दशमं ब्रह्मकैवर्तं लैङ्गमेकादशं स्मृतम् ॥

* * * *

अथ जगन्नाथस्य माहात्म्यं कथ्यते—

नीलाद्रौ तत्तदर्थिभ्यो दातुमर्थचतुष्टयम् ।
अशरीरीव व्यक्तयं श्रीरूपस्तु हरिर्नृप ॥

* * * *

वाक्यानि यानि विलिखानि विमुक्तयेऽहं
सन्तस्तदर्थमनिशं परिपालयन्तु ॥
विनाप्यष्टाङ्गयोगेन विनाष(प्य)नादि(श)नादिना ।
मुक्तिचिन्तामणिस्त्वेष मोक्षदः सर्वदेहिनाम् ॥

तत्र दर्शनकीर्तननिर्माल्यभक्षणान्यन्तरङ्गबहिरङ्गभावेन मोक्षसाधनानि । तत्रादौ तावन्मोक्षस्य परम्परया साधनीभूतक्षेत्रब्रह्मपुराणादिषु प्रमाणमाह । तद्यथा ब्रह्मपुराणे—

वेदे पुराणे वेदान्ते परमात्मेति गीयते ।
आस्ते विश्वोपकाराय क्षेत्रे श्रीपुरुषोत्तमे ॥

* * * *

बृहद्विष्णुपुराणे दुर्वासःकपिलसंवादे दुर्वाससं प्रति वेदव्यास उवाच—

नीलाद्रौ चोत्कले देशे क्षेत्रे श्रीपुरुषोत्तमः ।
दारुण्यास चिदानन्दो जगन्नाथाख्यमूर्तिमान् ॥
तथा च मुक्तिस्थानं च कथने पदार्थदर्शनेऽपि च ।

**End:**

यदन्नं पाचयेल्लक्ष्मीर्भोक्ता च मधुसूदनः ।
स्पृष्टास्पृष्टं न मन्तव्यं यथा विष्णुस्तथा हि तत् ॥

**Colophon:**

इति श्रीचो(लो)त्कलदेशीयमहामहोपाध्यायजगन्नाथदासेन कृतं श्रीमुक्तिचिन्तामणौ श्रीपुरुषोत्तमक्षेत्रमाहात्म्यं श्रीमहाप्रसादमाहात्म्यं श्रीजगन्नाथमाहात्म्यं किंचित् किंचित् कथितम् ॥

---

R. No. 3268.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 40. Lines, 20 in a page. Dêvanâgarî. Good.

Transcribed in 1920-21 from a MS. of the Naduvil Matham, Trichur, Cochin State.

Foll. 39 and 40 are left blank.

प्रमाणरत्नमालाव्याख्यानम्—निबन्धनम्.

PRAMÂṆARATNAMÂLÂVYÂKHYÂNAM: NIBANDHANAM.

A commentary on the Pramâṇaratnamâlâ, of Ânandabôdha which is a treatise in the Advaita philosophy: by Anubhûtisvarûpa.

Same work as that described under No. 2369 of R. L. Mitra's Catalogue, Vol. VIII.

Complete.

**Beginning:**

भूतानां भ्रान्तिभूतिस्थितिहतिभजनं स्याद्यतो भूतयोनेः
आराध्येन्द्रोऽध्वरैर्यं सुरपुररमणं सुन्दरं राज्यमाप ।
गन्धर्वैस्सिद्धसाध्यैस्सुरनरनिकरैः किन्नरैरर्च्यमानो
नृत्ताद्यैश्चित्तरम्यैस्तुरगतनुधरस्सोऽयमव्यान्मुरारिः ॥
श्रीमदानन्दबोधस्य विबुधानन्ददायिनः ।
प्रमाणरत्नमालाया निबन्धः क्रियते मया ॥

(तत्र) प्रमाणमालाख्यं प्रकरणं चिकीर्षुराचार्यश्चिकीर्षितप्रकरणस्याविघ्नेन परिसमाप्तिप्रचयपरिपन्थिकल्मषनिवृत्तये विशि(ष्टे)ष्टदेवताप्रणतिलक्षणमङ्गलाचरणच्छलेन प्रकरणप्रतिपाद्यमर्थं सङ्क्षेपतो दर्शयति- -आनन्दमात्मानमिति । शास्त्रीयं चेदं प्रकरणमिति तदीयैरेवाधिकार्यादिभिस्तद्वत्तासिद्धिः न तानि पृथग्वर्ण्यन्ते । अवान्तरप्रयोजनं च यान्यनेकत्रास्पष्टानि सूचितानि प्रमाणानि तानीहैकत्र स्पष्टीकृत्य लिख्यन्ते ।

**End :**

फलेन मोक्षेणेत्याशङ्क्याह—अश्वेन जिगमिषतीतिवदिति । तत्राप्यश्वस्येष्यमाणगमनक्रियासाधनत्वमेव न तु ग्रामप्राप्तिसाधनत्वं, गमनस्यैव तत्र निरपेक्षकारणत्वात् । तथेहापीष्यमाणज्ञानसाधनत्वमेव यज्ञादीनां, न तु मोक्षसाधनता श्रुतेर्भङ्गप्रसङ्गादिति । ग्रन्थशेषस्त्वतिरोहितार्थः ॥

अवताद्वो हयग्रीवः कमलाकर ईश्वरः ।
सुरासुरनराकारमधुपापीतपङ्कजः ॥
अनुभूतिस्वरूपाख्यो यतिश्चक्रे निबन्धनम् ।
प्रमाणरत्नमालाया विद्वदानन्ददायकम् ॥

---

R. No. **3269.**

Paper. 10⅜ × 9¼ inches. Foll. 120. Lines, 2? in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Ranganātha Miśra, Changundi, Parlakimedi.

(a) गणेशाचारचन्द्रिका.

GAṆEŚĀCĀRACANDRIKĀ.

Foll. 1a–35b.

A Tantric work dealing with the procedure and other details to be observed in connection with the worship of God Gaṇapati: by Dāmōdara.

Deals with the following subjects in eight Paṭalas :—

| | |
|---|---|
| १. सन्ध्याविधिः. | ५. गणेशयन्त्रपूजादिविधिः. |
| २. गणेशमानसपूजा. | ६. स्तम्भनादिविधिः. |
| ३. गणेशबाह्यपूजा. | ७. सर्वमन्त्रसामान्यविशेषविधिः. |
| ४. गणेशमन्त्रजपादिविधिः. | ८. होमविधिः. |

**Beginning:**

गुरुं सर्वेश्वरं मूर्ध्ना प्रणिपत्य प्रकाश्यते ।
दामोदरेण कृतिना गणेशाचारचन्द्रिका ॥
ब्राह्मे मुहूर्ते चोत्थाय ध्यायेन्मन्त्री मनोर्गुरुम् ।
शिरश्श्वेताम्बुजान्तस्स्थं द्विनेत्रं द्विभुजं सितम् ॥
वराभयकरं ज्ञानानलैर्मु(षि)तमानसम् ।
बामाङ्कस्थितया रक्तशक्त्याश्लिष्टं महेश्वरम् ॥
मानसैरुपचारैश्च संपूज्य प्रणमेत्ततः ।

* * * *

मूलमुच्चार्य वक्रतुण्डाय अर्घो(र्घ्यं) नमः ।
प्रजपेन्नियतो मन्त्रं गायत्रीं शक्तितोऽन्वहम् ॥
ओं तण्डुरूपाय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ।
एषा गणेशगायत्री सर्वपापविमोचनी ।
उपस्थानं ततः कुर्याद्गणानां त्वा गणेत्यृचा ॥

* * * *

**Colophon:**

इति श्रीगणेशाचारचन्द्रिकायां सन्ध्याविधिः प्रथमः पटलः ॥

**End:**

तद्वाह्ये मेखला कार्या यथोक्तक्रमतो बुधैः ॥
शतार्धशतहोमे च सहस्रे ह्ययुते तथा ।
लक्षे च दशलक्षे च कोटिहोमे त(य)थाक्रमम् ॥
मुष्टरत्निमिते कुण्डे हस्तमात्रे द्विहस्तके ।
चतुर्हस्तं रसकरं कुण्डं वसुकरं तथा ॥

* * * *

अन्यथा वर्णयन्त्येके स्थण्डिलं हस्तमात्रके ।
चतुरङ्गुलमुत्सेधं वालुकाभिस्सुशोभनम् ॥

**Colophon:**

इति श्रीगणेशाचारचन्द्रिकायामष्टमः पटलः ॥

(*b*) गणेश्वरकल्पः.

GAṆEŚVARAKALPAḤ.

Foll. 36*a*—120*a*. Fol. 120*b* gives the colophon of the Gaṇeśācāracandrikā and this Kalpa.

Similar to the work described under No. 7803 of the D.C.S. MSS., Vol. XV.

Complete.

**Beginning :**

अथ यन्त्रप्रतिष्ठाविधिः—

यथाकामं कल्पोक्तद्रव्येण यन्त्रं विलिख्य पट्टसूत्रादिना संवेष्ट्य प्रथमं पञ्चगव्येन ततः पञ्चामृतेन ततो गन्धोदकेन प्रक्षाल्य यन्त्रराजाय विद्महे महायन्त्राय धीमहि । तन्नो यन्त्र(राजः) प्रचोदयात् । इति गायत्रीं जपन् दशवारं यन्त्रदेवतापीठत्वेन यन्त्रं ध्यायेत् ।

* * * *

सूत उवाच—

वक्ष्यामि परमं गुह्यं कलौ सिद्धिकरं नृणाम् ।
वैनायकं महामन्त्रं यथा व्यासाच्छ्रुतं मया ॥
पुरा कलियुगे विप्राः कल्पे वै मेघवाहने ।

* * * *

**Colophon :**

इति ब्रह्मवैवर्ते श्वेतपर्णीतायां वक्रतुण्डकल्पस्समाप्तः ॥

* * * *

इति श्रीशाम्बरीतन्त्रे महारहस्ये देवदेवीसंवादे गणेशप्रकरणोपाख्याने गणेशविग्रहकवचं सम्पूर्णम् ॥

**End :**

गणाधिपसमो देवो न भूतो न भविष्यति ।
तथैव स्तोत्रतुल्यं हि न भूतं न भविष्यति ॥
अहं पुनः पुनर्ब्रूयान्न देयं कस्य चित्पुनः ।
यदि कश्चित्प्रयच्छेत स्वपचोऽत्र हि यो नरः ॥

**Colophon :**

इति गणेश्वरतन्त्रे गौरीगणेशसंवादे गणेशकथितं स्वनामसहस्रस्तोत्रम् ॥

R. No. 3270.

Paper. 10¾ × 9¼ inches. Foll. 194. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Kañcibhaṭla Umāmahēśvara Śāstrulugāru, Pithapuram.

Foll. 184, 193ᵇ, and 194 are left blank.

काव्यप्रकाशव्याख्या.

KĀVYAPRAKĀŚAVYĀKHYĀ.

Foll. 1a—193b. Fol. 193a gives the contents of the chapters of this work.

A commentary on the Kāvyaprakāśa of Mammaṭa, which work has been described under Nos. 12816—12818 of the D.C.S. MSS., Vol. XXII: by Kamalākarabhaṭṭa, son of Umā and Rāmakṛṣṇa and grandson of Nārāyaṇa, who was the son of Rāmēśvarabhaṭṭa.

Complete.

**Beginning:**

नत्वा गणेशं वाग्देवीं साम्बं शम्भुं च राघवम् ।
श्रीरामकृष्णपितरं नत्वोमाख्यां च मातरम् ॥
नारायणात्मजश्रीमद्रामकृष्णात्मजः कृती ।
काव्यप्रकाशगां व्याख्यां तनोति कमलाकरः ॥
काव्यप्रकाशे टिप्पण्यः सहस्रं सन्ति यद्यपि ।
ताभ्यस्त्वस्या विशेषो यः पण्डितैस्सोऽवधार्यताम् ॥

स्वकृतकारिका व्याचिख्यासुराद्यश्लोकस्यावतारिकामाह—ग्रन्थेति । एकार्थको वाक्यसन्दर्भो ग्रन्थः । परमानन्दस्तु सम्बन्धप्रयोजनज्ञानाहितशुश्रूषाजन्यश्रुतिविषयः शब्दसन्दर्भो ग्रन्थः ; सम्बन्धो वाच्यवाचकभावादिः ; तस्य प्रयोजनस्य च ज्ञानेन शुश्रूषा ततो ग्रन्थश्रवणमित्याह । तन्न ; घटमानयेत्यादिवाक्येऽतिव्याप्तेः ।

* * * *

**Colophon:**

इति श्रीमन्महामहोपाध्यायरामेश्वरभट्टसूरिसूनुनारायणभट्टात्मजरामकृष्णभट्टसूनुकमलाकरकृते काव्यप्रकाशव्याख्याने प्रथम उल्लासः ॥

**End:**

ननु पूर्वग्रन्थेषु सत्सु किमनेनात आह—इतीति । विदुषां ध्वनिकृद्वामनादीनां भिन्नोऽपि मार्गः अविरोधेन यत्सङ्गृहीतः यत्प्रतिभासते । तत्र चित्रं यद्यस्मादमुत्र ग्रन्थे सङ्घटनासङ्ग्रहणं सन्दर्भ एव हेतुः कृता सर्वसङ्ग्रहार्थोऽयं ग्रन्थः । अतो न तैस्सिद्धिरित्यर्थः ।

गुणिनोऽनन्तपुत्रस्य विनोदाय सतां मुदे ।
कमलाकरसंज्ञेन श्रम एष विनिर्मितः ॥

• • • •

येनाकारि प्रौढ्टा वार्त्तिकस्य टीका चान्या विंशतिग्रन्थमाला ।
श्रीरामाङ्घ्योरर्पिता निर्णयेषु सिन्धुः शास्त्रे तत्त्वकौतूहले च ॥

श्रीमन्नारायणाख्यात्समजनि विबुधो रामकृष्णाभिधानः
तत्सूनुः सर्वविद्याम्बुधिनिजचुलकीकारतः कुम्भजन्मा ।
टीकां काव्यप्रकाशे कमलपदपरस्त्वाकरोऽरीरचद्यः
श्रीपित्रोः पादपद्मे रघुपतिपदयोः स्वं श्रमं प्रार्पयच्च ॥
रामकृष्णतनूजेन कमलाकरशर्मणा ।
योऽत्र श्रमः कृतस्तेन प्रीयतां रावणान्तकः ॥

**Colophon:**

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणजगद्गुरुश्रीमद्रामेश्वरभट्टसूरिसूनुनारायणभट्टसुतविद्वन्मुकुटहीराङ्कुरश्रीरामकृष्णभट्टसुतमहामहोपाध्यायश्रीकमलाकरभट्टकृतायां काव्यप्रकाशव्याख्यायां दशमोल्लासः ॥

(वाराणसीप्रसादस्य नियोगेन तु यत्नतः ।
काशीसंस्कृतमुद्रायामङ्कितोऽयं विचक्षणैः ॥
माघे मासि सिते पक्षे पूर्णायां चन्द्रवासरे ।
महादेवेन भट्टेन लिखित्वा च समापितः ॥
तर्कव्याकृतिमीमांसापरिशीलनशालिना ।
पापाशास्त्रीति ख्यातेन विदुषा परिशोधितः ॥

श्रीयुतबाबुसाहबबातूफतहनारायणसिंहजीत्यभिधायुजो निकेतने त्रिपुरभैरवीसन्निधौ काशीसंस्कृतमुद्रायन्त्रेऽङ्कितोऽयम् ॥)

(सु)दर्शनाह्वयेन कारुविद्याविशारदेन मुद्रितोऽयम् ॥

B. No. 3271.

Paper. 10¾ × 9¼ inches. Foll. 58. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of Naḍuvil Maṭham, Trichur, Cochin State.

नैष्कर्म्यसिद्धिटीका—भावतत्त्वप्रकाशिका.

NAIṢKARMYASIDDHIṬĪKĀ: BHĀVATATTVA-PRAKĀŚIKĀ.

A commentary on the Naiṣkarmyasiddhi of Surēśvara, which work has been described under No. 4610 of the D.C.S. MSS., Vol. IX: by Citsukha, pupil of Jñānōttama.

Complete.

**Beginning:**

यत्साक्षात्सच्चिदानन्दं प्रत्यगद्वयमक्रियम् ।
तन्नमामि नृसिंहस्य योगिगम्यं परं पदम् ॥
ज्योतिर्यद्दक्षिणामूर्ति व्यासशङ्करशब्दितम् ।
ज्ञानोत्तमाख्यं तद्वन्दे सत्यानन्दपदोदितम् ॥
संसारगरसन्तापनिर्वापणसुधापगाम् ।
नैष्कर्म्यसिद्धिं यश्चक्रे तं नमामि सुरेश्वरम् ॥
नैष्कर्म्यसिद्धेः क्रियते पूर्वाचार्यवचोऽनुगा ।
मुनिना चित्सुखाख्येन भावतत्त्वप्रकाशिका ॥

व्याचिख्यासितायाः श्लोकसन्दर्भरूपायाः नैष्कर्म्यसिद्धेः अधिकारिप्रयोजनतत्साधनसम्बन्धविषयाणामभावादनारम्भमाशङ्क्य सम्बन्धोक्तिकारः प्रकरणारम्भसिद्धये क्रमेण तानुपपादयति—आब्रह्मस्तम्भपर्यन्तैरित्यादिना प्रकरणमारभ्यत इत्यन्तेन ग्रन्थेन । तत्राधिकारिणमुपपादयति—तन्निवृत्त्यर्था प्रवृत्तिस्स्वरसत एवेत्यन्तेन ग्रन्थेन ।

* * * *

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्यचित्सुखमुनिविरचितायां नैष्कर्म्यसिद्धिभावतत्त्वप्रकाशिकायां प्रथमोऽध्यायस्समाप्तः ॥

**End:**

एवं गुरुसम्प्रदायप्राप्तप्रकरणस्य परानुग्रह एव गुरुभक्तेर्विद्यां प्रत्यन्तरङ्गसाधनत्वं दर्शयितुं प्रकरणारम्भ इव प्रकरणसमाप्तावपि गुरुनमस्कारं

करोति—वेदान्तेति । तस्मै पूज्याय नम इति सम्बन्धः । नैष्कर्म्यसिद्धेर्व्याख्यानक्षमतापर्यन्तपरिज्ञाने किं कारणमित्याकाङ्क्षायां सम्बन्धोक्तिरेवेत्याह—सम्बन्धोक्तिरिति ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमज्ज्ञानोत्तमपूज्यपादशिष्यश्रीचित्सुखमुनिविरचितायां नैष्कर्म्यसिद्धिटीकायां चतुर्थोऽध्यायः समाप्तः ॥

The scribe adds:

श्रीकण्ठनाम्ना लिखिते पुंसास्मिन् पुस्तकोत्तमे ।
असौन्दर्यादिदोषौघान् क्षन्तुमर्हति सज्जनः ॥

---

## R. No. 3272.

Paper. 10¾ × 9¼ inches. Foll. 18. Lines, 20 in a page. Telugu. Good.

Transcribed in 1919-21 from a MS. of M.R.Ry. Girimalla Annapūrnayya Pantulu Gāru, Gannavaram post.

सन्ध्यावन्दनभाष्यम्.

SANDHYĀVANDANABHĀṢYAM.

Foll. 1a–17b.

Similar to the work described under R. No. 162 ante. By Hanūmat. Complete.

**Beginning:**

शिवं शिवाश्लिष्टतनुं शिवेतरनिवा(रा)सकम् ।
शिवासक्तं जपे सेवे शिवतातिशिवैषिणम् ॥
गुरुभाष्याणि सङ्गृह्य सन्ध्यावन्दनपद्धतेः ।
हनूमद्विदुषा बालबोधाय हितमुच्यते ॥

सङ्क्षेपेण भाष्यं लिख्यते—सन्ध्यावन्दनं नित्यम्; अहरहस्सन्ध्यामुपासीतेति श्रुतौ वीप्साश्रवणात्, सन्ध्यावन्दनाकरणे बहुप्रत्यवायश्रवणाच्च । तथाह गोभिलः—

सन्ध्या येन न विज्ञाता सन्ध्या येनानुपासिता ।
जीवमानो भवेच्छूद्रो मृतः श्वानोऽभिजायते ॥

* * * *

अथ सन्ध्याकालो विचार्यते—

अहोरात्रस्य यस्सन्धिस्सूर्यनक्षत्रवर्जितः ।
तत्र सन्ध्यामुपासीत सायंप्रातस्समाहितः ॥

सूर्यबिम्बास्तमयादूर्ध्वं नक्षत्रोदयात् पूर्वं सायं सन्धिकालः, सकलनक्षत्रास्तंगमनादूर्ध्वं सूर्योदयात्प्राक् प्रातस्सन्ध्याकालः तत्र भवा सन्ध्या तामुपासीतेति वाक्यार्थः ।

**End:**

प्रवरान्वितस्य नामकीर्तनपुरस्सरं सन्ध्यां प्रणमति । चतुरित्युपलक्षणम् । सप्तसागर इति तन्मध्यस्थितगोब्राह्मणेभ्यश्शुभं भवतु । भो इति सम्बोधनम्—भोः सन्ध्ये त्वामभिवादये नमस्कुर्वे—इत्यात्मानं हि स्पृशेत् ।

व्याख्यातं हनुमद्बुधेन सकलं राजेन्द्रवंश्येन तत्
सन्ध्याभाष्यमशेषपण्डितमनोरम्यं सुबोधं लघु ।
सन्ध्यावन्दनसक्तमानसबुधा ये सन्ति भूमण्डले
तेषां तोषकरं सदा निवसतामाचन्द्रतारार्यमम् ॥

---

R. No. **3273.**

Paper. $10\frac{3}{8} \times 9\frac{1}{4}$ inches. Foll. 24. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920-21 from a MS. of Naḍuvil Maṭham, Trichur, Cochin State.

प्रमाणरत्नमालाव्याख्या.

PRAMĀṆARATNAMĀLĀVYĀKHYĀ.

Similar to the commentary described under R. No. 3268 ante. By Citsukha, pupil of Jñānōttamapūjyapāda.

This work is also called as Sambandhōkti.

Complete.

**Beginning:**

प्रमाणनखनिर्भिन्नमहामोहामरारये ।
नमोऽस्तु नरसिंहाय सिंहाचलनिवासिने ॥
ज्योतिर्यद्दक्षिणामूर्तं व्यासशङ्करशब्दितम् ।
ज्ञानोत्तमाख्यं तद्वन्दे सत्यानन्दपदोदितम् ॥

चिकीर्षितस्य ग्रन्थस्याविघ्नेन परिसमाप्तये प्रचयगमनाय शिष्टाचारपरिपालनाय च मुखतस्स्वेष्टदेवतानमस्कारलक्षणं मङ्गलाचरणं संपादयन्नर्थात्प्रकरणस्य विषयसम्बन्धप्रयोजनानि सूचयन् प्रकरणारम्भं प्रतिजानीते—आनन्दमात्मानमिति । ननु कथमानन्दो मुकुन्दः तस्य दुःखाभावत्वादित्याशङ्क्याह—आनन्द इति । आनन्दशब्दवाच्यत्वं दुःखाभाववृत्ति न भवतीत्यर्थः । अन्यथानन्दशब्देन दुःखाभावपक्षीकरणे व्याघातापातात् अतिरिक्तपक्षीकारेण(करणे)चाश्रयासिद्धेः । तदनिरूप्यत्वादिति यावत् ।

**End:**

नन्वस्मिन्नपि कल्पेऽन्यानन्यत्वादिविकल्पास्सम्भवन्तीति तत्राह—यथायमिति । भेदाभेदप्रकाराणामपि सदादिप्रकारेष्वदृष्टत्वान्न पञ्चमप्रकारायामविद्यानिवृत्तावनुप्रवेश इति भावः ॥

पान्तु (विनोदविदारितदैत्योरःकुलिशपञ्जरास्त्रिजर(ग)त् ।
वज्रोपमापवादादधोमुखा नरहरेर्न[न]खराः ॥
सेयं प्रमाणमालायास्सम्बन्धोक्तिरविस्तरा ।
चित्सुखाख्येन यतिना रचिता खचिता गुणैः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्यश्रीचित्सुखमुनिना प्रमाणमालातात्पर्यटीका समाप्ता ॥

---

R. No. **3274.**

Paper. 10¾ × 9¼ inches. Foll. 6. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Kōṭihōmamūrti Śāstrulugāru, Potanpurī, Vaddādi post.

Foll. 5b and 6 are left blank.

रसकलिका।

RASAKALIKĀ.

This forms the previous portion of the work described under R. No. 2241 ante, wherein see for the end

Incomplete.

**Beginning:**

शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः ।
बीभत्साद्भुतशान्ताश्च रसाः पूर्वैरुदाहृताः ॥
एके तु निर्विकारत्वान्न शान्तं मेनिरे रसम् ।
प्रेमा वा यस्तु पूर्वोक्तरसेभ्यो न पृथङ्मतः ॥

रसलक्षणं तु—

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
आनीयमानः स्वादुत्वं स्थायीभावो रसः स्मृतः ॥

एतच्चोपरि व्याहरिष्यामः । रसनिरूपणक्रमस्तु—

आश्रयस्तत्सहायाश्च भावास्तेषां क्रमा अपि ।
रसानां सङ्करश्चैव तेषां सञ्चरणक्रमः ॥

तत्राश्रयो द्विधा—नायको नायिका चेति ।

---

R. No. **3275.**

Paper. 10¼ × 9¼ inches. Foll. 10. Lines, 20 in a page. Dêvanâgari. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Ranganâtha Misra Gâru, Changundi, Parlâkimedi.

शान्तिशतकम्.

ŚĀNTIŚATAKAM.

An anthological work in 100 stanzas dealing with the following subjects; by Simhaṇadêva.

१. तापोपशमः.
२. विवेकोदयः.
३. विवेकोपदेशः.
४. शान्तिः.

Complete.

**Beginning:**

सन्तोषसन्ततिकरं विदुषां कवीनां सांसारिकाप्रतिमदुःखविनाशहेतुम् ।
यत्नेन शान्तिशतकं विदधे विवेकी श्रीसिंहणः प्रकृतिसुन्दरशुद्धबुद्धिः ॥

आत्मज्ञानविवेकनिर्मलधियः कुर्वन्त्यहो दुष्करं
यन्मुञ्चन्त्युपभोगभाञ्ज्यपि धनान्येकान्ततो निस्स्पृहाः ।

न प्राप्तानि पुरागतानि न च तत्प्राप्तौ दृढप्रत्यया
वाञ्छामात्रपरिग्रहाण्यपि वयं त्यक्तुं न तानि क्षमाः ॥

* * * *

समाक्षिप्यात्युच्चैः पिशितघनपिण्डं स्तनधिया
मुखं लालापूर्णं पिबति चषकं सासवमिव ।
अमेध्यक्लेदार्द्रे पथि च रमते स्पर्शरसिको
महामोहान्धानां किमिह कमनीयं न भवति ॥

**Colophon:**

इति शान्तिशतके तापोपशमो नाम प्रथमः परिच्छेदः ॥

**End:**

भार्या मे पुत्रो मे वित्तं मे बन्धुवर्गो मे ।
इति मे मे निगदन्तं पशुमिव मृत्युर्नरं नयति ॥

**Colophon:**

इति सिह्रणदेवविरचितं शान्तिशतकं सम्पूर्णम् ॥

---

R. No. **3276.**

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 52. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Vadhyar S. K. Kulaikkada Ayyangar, son of M.R.Ry. Venkatacala Ayyangar, Tentirupperai, Tinnevelly district.

श्राद्धकालनिर्णयः.

ŚRĀDDHAKĀLANIRṆAYAḤ.

Similar to the work described under No. 3078 of the D.C.S. MSS., Vol. VI.

Deals with the following subjects:—

१. कुतपकालनिर्णयः.
२. श्राद्धतिथिनिर्णयः.
३. ग्रहणे श्राद्धकर्तव्यता.
४. प्रथमाब्दिकतर्पणनिषेधः.
५. मलमासश्राद्धादिविषयः.
६. मलमासगुरुशुक्रमौढ्यवर्जनीयविषयः.
७. दर्शश्राद्धादिविषयः.
८. दर्शश्राद्धकालः.
९. अष्टकामहालयादिनिर्णयः.
१०. वृद्धिश्राद्धविषयः.
११. श्राद्धदेशनिर्णयः.
१२. तीर्थश्राद्धनिर्णयः.

Incomplete.

**Beginning :**

वागीशाद्याः (. . .) गजाननम् ॥ श्राद्धोपक्रमसुख्यकालः भविष्यपुराणे—

प्रविश्य भानुः स्वच्छायां श(च)क्रवपु(द्य)त्र तिष्ठति ।
स कालः कुतपो नाम मन्दीभूतस्य संज्ञया ॥ इति ।

नारदः—

सन्त्यज्य सप्तमं भागमष्टमं क्रमते यदा ।
स कालः कुतपो ज्ञेयो मन्दीभूतस्य संज्ञया ॥ इति ।

* * * *

स्मृत्यन्तरे—

अमा भौमेन सोमेन गुरुणा(वा)युता यदि ।
सा तिथिः पुष्कला नाम सूर्यग्रहणसन्निभा ॥

**Colophon :**

इत्यमावास्यानिर्णयः ॥

**End :**

ईशानविष्णुकमलासनकार्त्तिकेय-
वह्नित्रयार्करजनीशगणेश्वराणाम् ।
क्रौञ्चामरेन्द्रकलशोद्भवकाश्यपानां
पादान्नमामि सततं पितृमुक्तिहेतोः ॥

महाभारते—

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रीन् लोकान् व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ॥ इति ।

अनन्त(र)कृत्यमाह यमः—अन्नहीनमिति.

---

R. No. **3277.**

Paper. 10¾ × 8¼ inches. Foll. 65. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Śri Kumaran Nambūdiri, Kaṭṭil-mana, Shoranur.

Fol. 65*a* gives the contents of this work. Fol. 65*b* is left blank.

नयतत्त्वसङ्ग्रहः.

NAYATATTVASAṄGRAHAḤ.

Foll. 1a—56b. Foll 56b—64b contain a small portion on the phenomenal nature of the universe according to the Advaita-Vedânta,

A treatise in the Pūrvamīmāṁsā in accordance with the views of Prabhākara: by Bhaṭṭa-Viṣṇu.

Complete.

**Beginning:**

सत्यानन्दप्रकाशः श्रुतिशिरसि लसद्व्याप्यनाद्यो हि विष्णुः
यस्य श्रीः स्वप्रकाशप्रकटितमहिमा वाह्यबोधार्थशक्तिः ।
मायाद्युत्पत्तिशक्तिः प्रकृतिरथ महान् निश्चयो योऽभिमानः
साहङ्कारा यदंशाः सकलनरभिदा विष्णुमेनं नमामि ॥

अरूपमपि यद्रूपं नीलोत्पलदलच्छवि ।
विभाति व्योमवत्तस्मै परस्मै विष्णवे नमः ॥

अथातो धर्मजिज्ञासा ।

स्तुतिरूपोपकारार्थमर्थवादातिदेशनात् ।
भावयेत्तद्गतं चेष्टं वेदाध्ययनभावना ॥
तस्मात्स्वर्गस्य भाव्यत्वं पूर्वपक्षे न सम्भवि ।
राद्धान्ते त्वर्थबोधस्य भाव्यत्वे तद्विधिर्द्वया ॥

ननु नियमार्थत्वान्न विध्यानर्थक्यं न मानान्तरविरोधपौनरुक्त्याभ्यां स्वरूपनियमसम्भवः । नाप्यवघातस्य यथापूर्वसाधनत्वस्याप्राप्तस्य विधाने नियमः फलं भवति, तथा क्रतौ नियमस्सम्भवति क्रत्वर्थत्वादध्ययनस्य ।

* * * *

तस्मादर्थज्ञानस्य मीमांसाधीनत्वात्तच्छास्त्रमारम्भणीयमिति सिद्धमिति ।

सामान्यशीललब्धस्य व्यक्तिमानस्य कस्यचित् ।
विशेषनिष्ठता या तु सा पर्यवसितिर्भवेत् ॥

इति प्रथमसूत्रं समाप्तम् ॥

* * * *

तत्सम्बन्धाक्षजातं श्रुतिगतविषये विद्यमानोपलम्भात्
प्रत्यक्षं न प्रमाणं प्रमितिरनुभवस्तं स्मृतेरन्यमाहुः ।
ज्ञातज्ञानस्वभावा स्वनिरथ नियतं लक्ष्म साक्षात्प्रतीतिः
प्रत्यक्षं सा स्वरूपप्रमितिरियमथ ग्राहके सर्वधीषु ॥

भवनाथविविक्तस्य नयतत्त्वस्य सङ्ग्रहः ।
यथामति यथाभ्यासं वर्ण्यते भट्टविष्णुना ॥

अनुभूतिः प्रमाणम् । अत्रापरे ब्रुवते प्रमासाधनं प्रमाणं प्रमा च तत्त्वविज्ञानं तत्त्वशब्देन संशयविपर्ययौ व्यावर्त्येते । विज्ञानशब्देन स्मृतिर्व्यावर्त्यते ।

* * * * *

**Colophon:**

इति भट्टविष्णुकृतौ नयतत्त्वसङ्ग्रहे प्रत्यक्षसूत्रं समाप्तम् ॥

**End:**

प्रयोगश्चात्र भवति—वेदा न पौरुषेयाः मानान्तरायोग्यार्थत्वात् न यदुक्तसाध्यं न तदुक्तसाध्यं यथा भारतादि । यावतीभ्य इनपरिवृत्तिभ्यः पूर्वक्षणो जगदादिरित्युच्यते स कालो वेदाध्ययनशून्यो न भवति कालत्वादधुनातनकालवत् । तस्माद्वेदवाक्यान्यपौरुषेयाणीति सिद्धम् ॥

**Colophon:**

इति नयतत्त्वसङ्ग्रहे भट्टविष्णुविरचिते वेदाधिकरणं समाप्तम् ॥

बाधार्होऽयं प्रपञ्चस्तु दृश्यत्वाच्छुक्तिरूप्यवत् ।
नास्ति प्रत्यक्षबाधोऽस्य प्रत्यक्षागोचरत्वतः ॥

प्रपञ्चो मिथ्यो दृश्यत्वात् शुक्तिरजतवत् नायं हेतुरसिद्धः ।

* * * *

तस्मान्नाखण्डवाक्यार्थत्वं संभवति ज्ञानानन्दवाक्यस्य । एवं च तत्त्वमसि वाक्यं प्रसिद्धभेदत्वात्तद्धर्मपरं नाखण्डपरमिति सिद्धम् ॥

**Colophon:**

इति नयतत्त्वसङ्ग्रहस्समाप्तः ॥

---

R. No. **3278.**

Paper. 10¾ × 9¼ inches. Foll. 258. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. *Payyūr Paṭṭeri*, Porkolam, Malabar district.

Bound in two volumes.

Foll. 249*b* and 250*a* give the contents of this work. Foll. 250*b*, 257 and 258 are left blank.

अजिताव्याख्या—विजया.

AJITĀVYĀKHYĀ: VIJAYĀ.

A commentary on the Ajitā of Paritōṣamiśra, which work has been described under R. No. 1329 ante; by Anantanārāyaṇa alias Ajitācārya.

Contains from the second Pāda of the first Adhyāya to the end of the first Pāda of the second Adhyāya complete. The second Pāda of the second Adhyāya is incomplete.

**Beginning:**

ओङ्कारसंज्ञं सर्वज्ञं सर्वकल्याणसंश्रयम् ।
सर्वं सर्वाधिगम्यं (च) चैतन्यं परमं महः ॥

अथ बुद्धिमतां कृतेऽजितां परितोषार्यकृतिं निगीष्ताम् ।
विजयाख्यमिदं विधास्यते निपुणग्राह्यगुणं निबन्धनम् ॥

अत्र सिद्धप्रमाणभावस्येत्यादिवार्त्तिकस्य वृत्तवर्तिष्यमाणकथनरूपस्य तावन्मात्रपर्यवसानं मन्दप्रयोजनत्वादयुक्तं मन्यमानः सङ्गतिपरतामाह—वृत्तेति । यद्यपि वर्तिष्यमाणकथने विधेः प्रथममुपादानात् विध्यादिविचारस्येति वक्तव्यम्, तथापि विधेरनुपयोगाशङ्काभावेन साक्षाद्विचाराभावमभिप्रेत्यार्थवादादिविचारस्येत्युक्तम् । तेनायमर्थः—वेदस्य प्रमाणाभावः प्रथमे पादे सिद्धः । अतस्तदवयवानामिदानीमनुपयोगशङ्कयाक्षिप्तप्रमाणभावानामुपयोगाभिधानं तेन सङ्गच्छत इत्येतत्प्रदर्शनपरमिदमिति ।

* * * *

**Colophon:**

इति श्रीमन्महोपाध्यायस्याजिताचार्यापरनामधेयस्य अनन्तनारायणार्यस्य कृतावजितानिबन्धने विजयाख्ये प्रथमस्याध्यायस्य तृतीयः पादः समाप्तः ॥

**End:**

अनुशयोऽनभिमतिः यद्यनुसन्धातव्यः किमायातं विचारकर्तव्यत्वस्यात आह—अनुसन्धानस्येऽपीति । अनुसन्धानस्ये विशेष इत्यर्थः ॥

**Colophon:**

इति श्रीमहोपाध्यायस्याजिताचार्यापरनामधेयस्य अनन्तनारायणार्यस्य कृतावजितानिबन्धने विजयाख्ये द्वितीयस्याध्यायस्य प्रथमः पादस्समाप्तः ॥

शब्दान्तरे कर्मभेदः ।

विस्पष्टत्वस्य प्रथमाभिधानहेतुत्वं दर्शयति—यस्मादिति । प्रथमं स्थूलमवगाहन्ते पश्चात्सूक्ष्ममिति । सकलवेदार्थैकत्वं पूर्वपक्षयतां वार्त्तिकयोजनां दर्शयति—एकेनानेकेन वेति ।

* * * *

उत्तरेषु क्षणेष्विति । प्रथमक्षणे सत्त्वुत्तरेषु क्षणेष्वात्मनस्सत्तां ततः पूर्वक्षण सत्तावाप्त्या करणरूपायाः करोतीत्येवं पूर्वोत्तरक्षणसत्तारूपेण क्रमवैपरीत्येन प्रयोज्यप्रयोजकव्यापारतया उभयसामान्यज्ञानपूर्वापरीभावश्चेति व्यापारो भावनेती.

---

R. No. 3279.

Paper. 10¼ × 9¼ inches. Foll. 62. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. K. C. Valiyarāja of Kottakal, Malabar district.

Foll. 61*b* and 62 are left blank.

सरस्वतीकण्ठाभरणम्.

SARASVATĪKAṆṬHĀBHARAṆAM.

A grammatical work: by Bhōjadēva. The author has improved on the work of Pāṇini, modified many of his Sūtras, added the whole of Vārttikapāṭha and given several quotations from the Mahābhāṣya of Patañjali and completely revised the Gaṇapāṭha.

Complete.

**Beginning:**

प्रणम्यैकात्मतां यातौ प्रकृतिप्रत्ययाविव ।
श्रेयः पदमुमेशानौ पदलक्ष्म प्रचक्ष्महे ॥

अइउण् ऋलृक् एओङ् ऐऔच् हयवरट् लण् ञमङणनम् झभञ् घढधष् जबगडदश् खफछठथचटतव् कपय् शषसर् हल् । सिद्धिः क्रियादेर्लोकात् । भूवादिः क्रियावचनो धातुः । जुचुलुम्पादिश्च । सनाद्यन्तश्चाणिङः । अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ।

* * * *

**Colophon:**

इति सरस्वतीकण्ठाभरणनाम्नि व्याकरणे प्रथमस्याध्यायस्य प्रथमपादस्समाप्तः ॥

आदिरितान्त्येन समध्यः । उता सवर्गः । तात्तत्कालः । अविधीयमानोऽण् सवर्णः ॥

**End:**

नलोपः पूर्वत्रासिद्धिः । प्लुत उदात्तः । प्रश्नान्ताभिपूजितविदार्त्तीस्वनुदात्तः । असूयासम्मतिकोपकुत्सनक्रियाशीः । प्रैषा(षे)ख्याख्ये(ख्या)नेषु स्वरितः । उदात्तादनुदात्तः । उदात्तस्वरितपरश्च वा यणः एकादे . . अपादादौ पादा(दि)के वाक्ये । स्वरितस्यैकश्रुतौ सिद्धिः ॥

**Colophon:**

इति महाराजाधिराजपरमेश्वरभोजदेवविरचिते सरस्वतीकण्ठाभरणनाम्नि व्याकरणेऽष्टमोऽध्यायस्समाप्तः ॥

---

R. No. **3280.**

Paper. 10⅝ × 9¼ inches. Foll. 48. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of the Naḍuvil Maṭham, Trichur, Cochin State.

विष्णुपूजाक्रमः.
VIṢṆUPŪJĀKRAMAḤ.

Similar to the work described under No. 8695 of the D.C.S. MSS., Vol. XVI.

Deals with the following topics :—

१. पूजाप्रकारः.
२. बीजाङ्कुरार्पणप्रकारः.
३. बलिपीठप्रतिष्ठाप्रकारः.
४. उत्सवप्रकारः.
५. उद्वासनविधिः.
६. तीर्थस्नानविधिः.
७. अष्टबन्धप्रकारः.

Complete.

**Beginning:**

विष्णुं दुर्गाशिवस्कन्दविघ्नशास्तृहराच्युतान् ।
नत्वा(त्र) पूजनादीनि लिख्यन्ते शास्त्रलेशतः ॥

तत्र प्रथमं विष्णोः पूजाक्रमः सङ्क्षेपेण प्रदर्श्यते—प्राङ्मुखः स्वासन उपविश्य गुरुगणपरिवन्दनापूर्वकं ओं ह्रीं श्री अस्मत्परमगुरुभ्यो नम इति शिरसि नत्वा नारदादिपूर्वसिद्धेभ्यो नम इति मूलाधारे

* * * *

प्रणवेन व्याप्य रक्षां कुर्यात् । स्वात्मनिलयाङ्गं कृत्वा रक्षां विधाय मण्डपे दण्डवत्प्रणमेत् । सर्वत्रैवं पूजाप्रकारः ।

**End:**

भारतकथाः श्रावयित्वा संपूज्य निवेद्य पूजां समापयेत् । ततो होमकलशैस्संस्नाप्य संपूज्य द्रव्यकलशैरभिषिच्य संपूज्य रक्षां कुर्यात् । दिनत्रयं सार्वजन्यमन्नं दत्वा दक्षिणाभिस्सर्वांस्तोषयेत् । आचार्याय दक्षिणां दद्यात् ॥

**Colophon:**

श्रीवैष्णवं (पूजाक्रमविधानं) समाप्तम् ॥

---

## R. No. 3281.

Paper. 10¾ × 9¼ inches. Foll. 10. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Danyamraju Sūryabhagavānudu Pantulugāru, Vizianagram, Vizagapatam district.

Foll. 1*a*—9*b*. Fol. 10*a* contains the name of the owner of the original MS. Fol. 10*b* is left blank.

स्वरूपप्रकाशिका—सव्याख्या.

SVARŪPAPRAKĀŚIKĀ: WITH COMMENTARY.

Same work as that described under R. No. 2159 ante.

Complete.

---

## R. No. 3282.

Paper. 10¾ × 9¼ inches. Foll. 264. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippād, Kūṭalūr-mana, Nareri, Tritala post, Malabar district.

Bound in two volumes.

भामतीतिलकम्.

BHĀMATĪTILAKAM.

A commentary on the Bhāmatī of Vācaspatimiśra, which work has been described under Nos. 4672—4676 of the D.C.S. MSS., Vol. IX: by Allāla, son of Nāgamāmbā and Trivikramācārya. The author salutes Vyāsa, Vācaspatimiśra, Vyāsāśramamuni and Prajñānāraṇya.

Breaks off in the second Pāda of the second Adhyāya.

**Beginning:**

वन्दामहे चिदानन्दवपुषं रघुनन्दनम् ।
अद्वितीयस्य यस्यामी विवर्ता वियदादयः ॥

* * * *

विष्णवे व्यासरूपाय ब्रह्मसूत्रकृते नमः ।
महेशाय च तद्भाष्यकृते शङ्कररूपिणे [नमः] ॥
यद्ग्रन्थकवचयोगात् पक्षो व्यासस्य विजयते जगति ।
विद्रुतविरोधिवर्गो वाचस्पतये नमस्तस्मै ॥
अक्षुण्णायामरण्यान्यां भामत्यां पक्षयोर्ग्यथान् ।
सुगमं प्रणमामस्तं व्यासाश्रममुनीश्वरम् ॥
व्यक्तः सद्वृत्तकृतः शुद्धः प्रथितार्जवः समर्यादः ।
भामत्यास्तिलकोऽयं विशेषविलोकनीयोऽस्तु ॥
नैव पदानां पदवीं विद्मो नैव प्रमेयपरिपाटीम् ।
सन्तः क्षान्तिविभूषाः साहसमेतत् क्षमन्तां नः ॥

श्रीमच्छारीरकभाष्यव्याख्यानस्याभिमतस्यान्तरायप्र(शमनोपा)यत्र शासनश्लिष्टैरिष्टं शास्त्रप्रतिपाद्यदेवताप्रणामरूपं मङ्गलमाचरन् विज(ष)यप्रयोजने शास्त्रस्य सूचयति--अनिर्वाच्येति । तद्ब्रह्म नमाम इति सम्बन्धः । तस्यासम्भवमाशङ्कय कार्यद्वारेण सम्भावयति ।

* * * *

गुणमात्रभेदेन विधातृत्वोक्तेरसामञ्जस्यात् । तस्मादस्मदुक्त एव भाष्याभिप्राय इत्याहेति--सर्वमिति ।

**Colophon:**

इति त्रिविक्रमाचार्यसूनुनाल्लालसूरिणा ।
आद्येऽध्यायेऽग्रिमः पादो भामत्या विवृतः स्फुटम् ॥

* * * *

व्याचष्टाल्लालनामैवं नागमाम्बासुतः सुधीः ।
भामत्याः प्रथमेऽध्याये द्वितीयं पादमादरात् ॥

**Colophon:**

इति श्रीमदल्लालसूरिविरचिते भामतीतिलके प्रथमाध्यायस्य द्वितीयः पादस्समाप्तः ॥

नमः श्रुतिशिरःक्लेशशङ्करक्लेशहारिणे ।
वेदान्तोदधिचन्द्राय प्रज्ञानारण्ययोगिने ॥

**End :**

लोकानुसारादिति शेषः। परस्तान्मायिकेष्वनुपपत्तेः अदोषत्वदर्शनादिति विशेषः ॥

. . . . अह्लालसूरी रघुनाथपदस्मृतिः ।
स्मृतिपादस्य भामत्या विवृतिं कृतवानिमाम् ॥

**Colophon :**

इति श्रीमदह्लालसूरिविरचिते भामतीतिलके द्वितीयस्याध्यायस्य प्रथमः पादः ॥

रचनानुपपत्तेश्च नानुमानम् ॥

यद्यपीति भाष्यानूदितशङ्काया दोषपर्यवसानं भाष्यानुक्तं दर्शयन्नवतारयति—स्यादिति । स्वतन्त्रा इत्यस्य व्याख्या वेदानपेक्षा इति ।

अयं भावः—अनपराधिनभानत्वं संविदः न स्वकर्मतासाधकमनन्यथासिद्धत्वात् । तथाहि—आत्मानन्दप्रकाशः ॥

---

R. No. 3283.

Paper. 10¾ × 8¼ inches. Foll. 140. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Hariharar̄ajaguru, Chochinajagannāthapuram, Kadala post, Ganjam district.

Fol. 140 is left blank.

(a) भुवनेश्वरीप्रकाशः.

BHUVANEŚVARĪPRAKĀŚAḤ.

Foll. 1a—133b.

Name of the scribe: Cāma who copied for king Divyasiṁha. Date of transcription: New moon day in the lunar month Āśvina in the year 1565 ?

A Tantric work relating to Śaktism dealing with the following subjects: by Vāsudēva born in the family of Kāśīnātha Ratho:—

१. पुरश्चर्याविधानम्.
२. अर्चनाविधानम्.
३. यन्त्रपूजाविधानम्.
४. दीक्षाक्रमः.
५. मन्त्रशोधनसंस्कारः.
६. वास्तुयागविधिः.

७. मण्डपघटनादिविधानम्. | १०. पार्वत्याग्निसंस्कारः.
८. कुण्डलक्षणानि. | ११. अनुष्ठानक्रमः.
९. स्रुक्स्रुवलक्षणम्. | १२. पूजाक्रमः.

Contains the Paṭalas one to three complete and the fourth incomplete.

**Beginning:**

भुवनेश्वरीं नमस्कृत्य तत्प्रमा(सा)दावलम्बनात् ।
तदाचारप्रकाशोऽयं तद्भक्तार्थं वितन्व(न्य)ते ॥
यस्याः प्रसादतोऽहं चतुर्दशविद्याटव्यां सिंहः ।
पश्चाहतः पश्चसमः ख्यातोऽहं वासुदेवाख्यः ॥
धर्मादिवर्गयुक्ताः प्रसिद्धयशसो विराजन्ते ।
विष्ण्विन्द्ररुद्रदिनकरब्रह्मादिसुरैरुपास्यमानाङ्घ्रिम् ॥
मूलप्रकृतिं वन्दे नित्यामाद्यां महामायाम् ।
शारदहिमकरवदनां विकसितपद्माभलोचनैराढ्याम् ॥

* * * *

तत्तत्पत्रजयादिकशक्त्यष्टकवेष्टितां महादेवीम् ।
भक्तैककल्पवल्लीं भुवनेशीं तामहं वन्दे ॥
प्रणयाच्च मे दिशन्तं सर्वागमसारसर्वस्वम् ।
दीक्षागुरुं प्रभावाधेयु पितृव्यं सदा वन्दे ॥
आलोक्यागमपुञ्जं तस्याश्रीकाण्डिमन्त्रवरम् ।
. . . . . मूलीकृत्य चचक्षे तस्यास्तु तद्विधानानि ॥

* * * *

एषा भूतलिपिः ।
काशीनाथरथो योऽभूत्पावकः पृथिवीतले ।
तज्जः कुलप्रदीपोऽयं प्रकाशस्तस्य शोभताम् ॥

**Colophon:**

इति श्रीवासुदेवीये भौवनेशप्रकाशके ।
पुरश्चर्याविधानाख्यः प्रथमः पटलो मह(ऽगम)त् ॥
अथ पूजाविधिं वक्ष्ये भुवनेश्यास्समाहितः ।
यत्कृत्वा सर्वसिद्धीनामीश्वरो जायते ध्रुवम् ॥

**End:**

काशीनाथस्यो योऽभूत्पावकः पृथिवीतले ।
तज्ज: कुलप्रदीपो यः प्रकाशस्तस्य शोभताम् ॥

**Colophon:**

इति श्रीवासुदेवीये भौवनेशप्रकाशके ।
यन्त्रपूजाविधानाख्यस्तृतीयः पटलोऽगमत् ॥

अथ दीक्षा—

दिव्यं ज्ञानं यतो दद्यात्कुर्यात्पापस्य संक्षयम् ॥
तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः ।

इति दीक्षायां फलार्थत्वम् । यत्तु

दीक्षिता ये न कुर्वन्ति जपपूजादिकाः क्रियाः ।
न भवन्ति च वै तेषां शिलायामुप्तबीजवत् ॥

* * * *

The scribe adds—

ऽँदर्थमैषे रामसेन दर्शे शराधिके दैवतज्ञीविताङ्गे ।
श्रींदिव्यसिंहस्य नृपस्य चेमां चेमासमाख्यो व्यलिखत्कुलेखः ॥

---

(6) कुण्डक्रमः.

KUṆḌAKRAMAḤ.

Foll. 133b—139b.

On the dimensions and other details of measurement required for the construction of different kinds of sacrificial altars.

Incomplete.

**Beginning:**

अष्टौनर्थशतांशहृत्तकचतुःकोणे पुरस्ताद्यदा(?)
त्वष्टत्रिंशतमेधयत्त्वथलवान् श्रोण्योरिमानर्धशः ।
अग्रात्सूत्रयुगे त्रिकोणमिति तच्छ्रोण्योस्तदर्धभ्रमा-
द्वृत्तार्धे बहिरालिखेदिति भवेत्कुण्डोत्तमं योनिवत् ॥

होमानुरोधाद्यावत्प्रमाणं कुण्डं चिकीर्षितं तावच्चतुरश्रं कृत्वा तस्य मध्यसूत्रस्य द्वानवत्यधिकशतमितानंशान् कृत्वा मध्यसूत्रौ पूर्वभागेऽष्टत्रिंशदंशैः स(न)चाह्निचिह्नं कृत्वा चतुरश्रश्रोण्योरपि पश्चिमतिर्यक्कृतमुभयतस्तानष्टत्रिंशदंशानर्धार्धतया वर्धयेत् ।

**End :**

एवमपरस्यापि १४-४-५-४. त्रयाणां योगे ५२६-१-४. ध्वजाय-सिद्धिश्च ॥

**Colophon :**

इत्यष्टाश्रकुण्डम् ॥

---

R. No. 3284.

Paper. 10⅝ × 9¼ inches. Foll. 18. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920–21 from a MS. of the Śrīrāmatīrtham library, Rāmatīrtham, Vizagapatam district.

Fol. 18*b* is left blank.

पदशक्तिबोधः.

PADAŚAKTIBŌDHAḤ.

A treatise in Advaita-Vēdānta stating that all words and expressions have reference to Brahman only.

Complete.

**Beginning :**

अणोरणीयांसमचिन्त्यरूपं स्रष्टारमीशं महतो महान्तम् ।
सिंहाद्रिनाथं जगदेकवन्द्यं प्रणम्य कुर्वे पदशक्तिबोधम् ॥

सर्वेषां साधूनां शब्दानां ब्रह्मणि शक्तिः । सा चाकृतिमुखेनव विज्ञायते न साक्षात्तस्य पर्यन्तनामरूपव्याकरणोपदेशात् । एवं वैदिकोपदेशेनाकृत्या पिण्डे, पिण्डेन जीवे, जीवेन परमात्मनि च ज्ञायते । लोकोपदेशेन तु यथायथं द्वारेषु सङ्कुचति अयमश्वो गर्दभो वेति जातिमात्रे

* * * *

ब्रह्मणो मुखमित्यादिना नामरूपयोस्तत्पर्यन्ततया प्रयोगाच्च असङ्कोचेन ब्रह्मणि विशिष्टपदशक्तिरिति निश्चीयते ननु जैमिनिना पदशक्तिरेवं न निर्णीता अन्यथा हि निर्णीता । तथाहि—प्रयोगचोदनाभावादर्थैकत्वमविभागात् । गवादिशब्दानां किमाकृतौ शक्तिरुत व्यक्तावाहोस्विदुभयत(त्र) इति विचार्यते ।

**End :**

अत एव प्रणवेनासंप्रज्ञातः व्याहृतिभिस्संप्रज्ञातश्चोपदिश्यते । प्रकृतिभूतप्रणवेन विकृतिभूतव्याहृतिभिश्च समाधिद्वयमन्योन्यमिथुनमुपदिश्यते ।

तं योगमिति मन्यन्ते स्थिरामिन्द्रियधारणा ।

अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति योगेन

ब्रह्मसाक्षात्कारान्मुक्तिरुपदिश्यत इति योग एव सद्विद्ययाप्युपदिश्यत इति विज्ञेयम् ॥

यदिच्छावेशविवशः स्वच्छन्दं प्रलपामि यत् ।
सिंहाद्रिनाथो भगवान् क्षमतां पुरुषोत्तमः ॥

**Colophon:**

इति पदशक्तिबोधस्संपूर्णः ॥

---

R. No. **3285.**

Paper. $10\frac{1}{4} \times 9\frac{1}{4}$ inches. Foll. 68. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Raṅganāthamiśragāru, Changudi, Parlākimedi.

Fol. 68 is left blank.

ज्योतिर्मुक्तावली.

JYOTIRMUKTĀVALĪ.

A treatise in astrology: by Mahōpadhyāya.

Deals with the following topics in Adhyāyas 1 to 14.

१. ग्रहादिनिघण्टुः.
२. पाददण्डनिर्णयः.
३. विवाहनिर्णयः.
४. सर्वकार्यारम्भः.
५. रजस्समयादिनिर्णयः.
६. मेघवर्षादिलक्षणम्.
७. स्तम्भारोपणादिसमयनिर्णयः.
८. प्रश्ननिरूपणम्.
९. पञ्चाशद्वर्णशुभाशुभलक्षणम्.
१०. नाक्षत्रिकदशावर्णनम्.
११. मासादिदशावर्णनम्.
१२. जलराश्यादिनिर्णयः.
१३. जातकभागः.
१४. फलभागः.

**Beginning:**

नमो नमो विघ्नविनाशनाय नमोऽस्तु सूर्याय नमो हराय ।
नमो नमश्चक्रधराय नित्यं नमः प्रकृति(त्या) सकलार्थदायी(यिने) ॥

इन्दीवरदलश्यामं पीताम्बरधरं हरिम् ।
नत्वा तु क्रियते यत्नाज्ज्योतिश्शास्त्रमनुत्तमम् ॥

अथ ग्रहाभिधानम्—

आदित्यस्सविता सूर्यो भास्करोऽर्को दिवाकरः ।
तिग्मांशुस्तपनो भानुस्सहस्रांशुः प्रभाकरः ॥

* * *

**Colophon:**

इति श्रीमहोपाध्यायविरचिते ज्योतिर्मुक्तावल्यां प्रथमोऽध्यायः ॥

**End:**

एकोऽपि शुक्रस्य(ज्ञ)बृहस्पतीनां लग्ने यदि स्यादथवापि केन्द्रे ।
विद्या(द्वां)श्चिरायुस्सुतवान् गरिष्ठः कुलप्रधानो धनवान् तपस्वी ॥
आरो वा सौरिर्वा द्वादशस्थो न हन्ति च ।
दक्षिणनयनं सौरिवा(र्वा)मनयनमङ्गारको हन्यात् ॥ काणयोगः ।
नवमे पञ्चमे वापि लग्ने वा द्वादशेस्त(शे त)था ।
भानुभौमार्कजं दृष्ट्वा पितृ हन्ति न संशयः ॥

**Colophon:**

इति श्रीमहोपाध्यायविरचिते ज्योतिर्मुक्तावल्यां चतुर्वि(र्द)शोऽध्यायः ॥

---

R. No. **3286.**

Paper. 10¾ × 9½ inches. Foll. 257. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920–21 from a MS. of the Saṁsthānam library, Bobbili.

Bound in two volumes.

Foll. 226*b*, 256 and 257 are left blank.

उत्सवसङ्ग्रहः.

UTSAVASAṄGRAHAḤ.

A treatise dealing with the celebration of various festivals of God Viṣṇu in the temples as laid down in the Pāñcarātrāgama. In the beginning of the work, the author, whose name is not given, salutes Kēśavācārya, Annayārya son, of Śrīraṅgācārya, Śrīraṅgarājabhaṭṭārya the worshipper of Rāmānuja, Gōvindabhaṭṭa of Śāṇḍilyagōtra and worshipper of Rāmānuja, Nārāyaṇabhaṭṭa, Dēvarājabhaṭṭa of Kauśikagōtra, Vāmanabhaṭṭa, and God Kēśava, worshipped at Pālāpurī in the Chingleput district.

Deals with the following subjects:—

१. नित्यसमाराधनादिकालनिर्णयः.
२. आवरणदेवताकल्पनम्.
३. नित्योत्सवकालभेदः.
४. अमावास्योत्सवविधानम्.

५. श्रीरामनवम्युत्सवनिर्णयः.
६. दमनारोपणोत्सवविधिः.
७. वसन्तजलक्रीडामहोत्सवविधिः
८. जयन्तीनिर्णयः.
९. पवित्रारोपणोत्सवविधिः.
१०. आशौचविधिः.
११. आचार्यर्त्विगादिवरणम्.
१२. पुष्पयागः, etc.

**Beginning:**

शुक्लाम्बरधरं विष्णुं (. . .) सर्वविघ्नोपशान्तये ॥
यस्य द्विरदवक्त्राद्याः (. . .) विष्वक्सेनं तमाश्रये ॥
भगवच्छास्त्रतत्त्वज्ञं कौशिकान्वयभूषणम् ।
केशवार्यगुरुं वन्दे केशवाराधने रतम् ॥
भगवच्छास्त्रतत्त्वज्ञं भागवतान्वयशेखरम् ।
श्रीरङ्गराजवं सौम्यमण्णयार्यगुरुं भजे ॥
भगवच्छास्त्रतत्त्वज्ञमौपगायनवंशजम् ।
श्रीरङ्गराजभट्टार्यं रामानुजपदार्चकम् ॥
शाण्डिल्यान्वयसंभूतं रामानुजपदाश्रयम् ।
वन्दे गोविन्दभट्टं तं रङ्गनाथपदार्चकम् ॥
भारद्वाजकुले जातं रामानुजमनःप्रियम् ।
श्रीमन्नारायणभट्टं[तं] वासुदेवपदार्चकम् ॥
देवराजाख्यभट्टं तं वरदराजपदार्चकम् ।
रामानुजप्रियं शान्तं कौशिकान्वयसम्भवम् ॥
मौद्गल्यायनान्वये जातं रामानुजपदार्चकम् ।
वन्दे वामनभट्टं तं श्रीमन्नारायणार्चकम् ॥
नमः केशवनाथाय नयनानन्दमूर्तये ।
पेलापुरीनिवासाय सत्यज्ञानाय विष्णवे ॥
वपापरिमलोल्लासवासिताधरपल्लवम् ।
मुखं वरदराजस्य मुग्धस्मितमुपास्महे ॥

* * * *

पारमेश्वरे—शाण्डिल्यः—

एवं कालत्रये कुर्यात्पूजनं मन्त्रवित्तमः ।
नवकालत्रयी देवं(व)पूजनं विहितं सदा ॥

प्रासादेषु स्वयंव्यक्तपूर्वेषु द्विजसत्तम ।
कालत्रयं प्रदानं स्यात्तदूर्ध्वं कर्तुमिच्छया ॥

* * * *

निर्वर्त्य नित्यकर्म प्राक् स्नानपूर्वं यथाविधि ।
सपादैकोत्तरा नाड्यः दश प्राभातिकेऽर्चने ॥

द्वादशकालार्चनादिषु नाडिकाभेदः—

ततो नाडीचतुष्कं तु भवेद्यागद्वयस्य तु ।
ततस्त्वर्धोत्तरा नाड्यः तिस्रस्स्युस्त्वाह्नि तस्य तु ॥

* * * *

**Colophon:**

इति पाञ्चरात्रे महोपनिषदि पारमेश्वरीक्रियाकाण्डे नित्यसमाराधनादिकालनिर्णयो नाम नवमोऽध्यायः ॥

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे क्रियापादे आवरणदेवताकल्पनं नाम दशमोऽध्यायः ॥

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे नित्योत्सवकालभेदो नाम पञ्चमोऽध्यायः ॥

इति श्रीपाञ्चरात्रे वासुदेवसंहितायामेकोनपञ्चाशदध्याये अमावास्यातिथिनिर्णयः ॥

इति श्रीपाञ्चरात्रे वासिष्ठसंहितायाममावास्योत्सवविधानं नाम अष्टादशः पटलः ॥

इति श्रीपाञ्चरात्रे ब्रह्मसंहितायां वसन्तजलक्रीडामहोत्सवविधिर्नाम त्रिंशोऽध्यायः ॥

इति श्रीपाञ्चरात्रे कपिञ्जलसंहितायां पवित्रारोहणं नाम द्वात्रिंशोऽध्यायः ॥

**End:**

पुष्पयागमिति प्रोक्तमुत्सवान्ते तु कारयेत् ।
प्रासादाग्रेऽथ वायास्ते(यव्ये) वारुणे सौम्यकेऽथवा ॥
पूर्वोक्तं मण्डपं कृत्वा मण्डपे तु समालिखेत् ।
विनोदमण्डपे वाथ यत्र वा रमते मतिः ॥

मण्डलं तु महाचक्रमनन्ताब्जं तथैव च ।
भद्रकं वापि विविवत्सूत्रपातं तथा भवेत् ॥

---

R. No. 3287.

Paper. 10¾ × 9¼ inches. Foll. 74. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920-21 from a MS. of the Samsthānam library, Bobbili.

Foll. 73 and 74 are left blank.

भागवतम्—तात्पर्यटिप्पणीसहितम्.

BHĀGAVATAM WITH THE COMMENTARY TĀTPARYA-ṬIPPAṆĪ.

A commentary on the Śrī-Bhāgavata, which work has been described under Nos. 2161—2168 of the D.C.S. MSS., Vol. IV, Part A: by Caṭṭi-Janārdana, son of Vēṅkaṭādri and pupil of Vēṅkaṭācārya. At the beginning of the work the commentator salutes the prior commentators (i.e.), Vijayadhvaja and Tilaka.

Breaks off in the tenth Adhyāya of the tenth Skandha (commencing with the words वारुणी वरुणा).

**Beginning:**

श्रीहरिं मध्वहृत्पद्मसंस्थितं सततं भजे ।
प्रत्यूहतिमिरप्रान्तो यं स्मृत्वा शान्तिमृच्छति ॥
वेङ्कटाचार्याभिधा(ना)न् वन्दे विद्यागुरूनिह ।
विजयध्वजतिलकादीन् गुरूनन्यांश्च भक्तितः ॥
चट्टीजनार्दनाख्येन वेङ्कटाद्रितनूम(भु)वा ।
दशमस्कन्धतात्पर्यटिप्पणी क्रियते मम(या) ॥
श्रीमद्भागवते सम्यग्विजयध्वजभानुना ।
प्रकाशते(ने) यदि(ति)ष्येऽहमपि खद्योतपोतवत् ॥
सज्जनात्स(स्स)त्कृपायुक्ता बालके कलभाषिणि ।
मयि प्रीतिं तु कुरुत युक्तायुक्तवचस्यपि ॥
कथितो वंशविस्तारो भवता सोमसूर्ययोः ।
राज्ञां चोभयवंश्यानां चरितं परमाद्भुतम् ॥

श्रीमत्कृष्णावतारचरितश्रवणामृतेनातिनिर्वृतः परिक्षिदुक्तानुवादेनौत्सुक्यात्पुनः पृच्छति—कथित इत्यादिना । तत्रापि विशेषमाह—

यदोश्च धर्मशीलस्य नितरां मुनिसत्तम ।
तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः ॥

यदोरिति । धारकत्वाद्धर्मनामेति वचनाद्धर्मो भगवान् तस्मिन् शीलं समाधिक्य(र्य)स्य यदोर्ययातिपुत्रस्य चरितं नितरामतिशयेन कथितम् । अधुना किमपेक्षितमिति तत्राह—तत्रेति । तत्र यदोर्वंशेऽवतीर्णस्य विष्णोः कृष्णस्य वीर्याणि पराक्रमान् नः शंस ।

* * * *

**Colophon:**

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीकृष्णावतारोपक्रमे प्रथमोऽध्यायः ॥

श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां यदुविद्यां(द्यायां) दशमस्कन्धतात्पर्यटिप्पण्यां चट्टिजनार्दनकृतायां प्रथमोऽध्यायः ॥

**End:**

पुरा नारदशापेन वृक्षतां प्रापितौ मदात् ।
नलकूबरमणिग्रीवाविति ख्यातौ श्रियान्वितौ ॥

शापनिमित्तमाह—मदादिति । किंनामानाविति तत्राह(—नलेति) मदकारणमाह—श्रियेति ॥

**Colophon:**

इति चट्टिजनार्दनाविरचिते(तायां) श्रीमद्भागवतदशमस्कन्धे(न्ध) टीकायां दश(नव)मोऽध्यायः ।

श्रीराजा—

कथ्यतां भगवन्नेतत्तयोः शापस्य कारणम् ।
यत्तद्विगर्हितं कर्म येन देवर्षिसत्तमः ॥

यद्विगर्हितं कर्म येन वा देवर्षि(र्षेः) भागवतोत्तमस्यापि तमः क्रोधः तदेतत् शापस्य कारणं कथ्यतामिति ।

श्रीशुकः—

रुद्रस्यानुचरौ भूत्वा सुदृप्तौ धनदात्मजौ ।
कैलासोपवने रम्ये मन्दाकिन्यां मदोत्कटौ ॥
वारुणीं वरुणा-

R. No. 3288.

Paper. 10¾ × 9½ inches. Foll. 11. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Pandit Gōpīnāthānandaśarmagāru of Parlākimedi.

गणितादर्शः.

GAṆITĀDARŚAḤ.

A treatise in astronomy: by Dharmapaṭhin of Bhāradvājagōtra. Complete in eight Adhikāras dealing with the following subjects:—

| | |
|---|---|
| १. मध्याधिकारः. | ५. उपकरणाधिकारः. |
| २. तिथ्यधिकारः. | ६. चन्द्रग्रहणाधिकारः. |
| ३. ग्रहस्फुटाधिकारः. | ७. सूर्यग्रहणाधिकारः. |
| ४. दिक्चक्रोदयास्ताधिकारः. | ८. परिवेषाधिकारः. |

Beginning:

प्रणम्य रविकाकृष्णौ तदाज्ञां शिरसा वहन् ।
करोमि गणितादर्शं सूर्यसिद्धान्तसंमतम् ॥
भारद्वाजसगोत्रेण सुधिया धर्मपाठिना ।
तन्यते गणितादर्शः प्रीत्यै सिद्धान्तसंविदाम् ॥
पुस्तके ग्रहचक्रस्य पदानि लिखितानि यत् ।
तस्मात्तत्कर्मनिर्वाहो भवेत्पुस्तकवीक्षया ॥
सूर्यसिद्धान्तभास्क(र)योर्वर्तते महदन्तरम् ।
भेदो गणितपीयूषे बाहुल्यं स्फुटवर्णने ॥
न सन्ति कालहोरेशा न क्रान्तिः कपिलार्थके ।
राजतां गणितादर्शः सूक्ष्मस्सर्वगुणैर्युतः ॥

* * * *

अब्दवृन्दान्महीभ्रोनुसायकैश्च(५१) विभाजितात् ।
लब्धैर्लिप्तादिभिर्युक्तं मन्दोच्चं स्यात्स्फुटं रवेः ॥

Colophon:

इति गणितादर्शे मध्याधिकारो नाम प्रथमोऽध्यायः ॥

End:

इष्टनाडीविनिहताद्रासास्थित्यर्धभाजितात् ।
लब्धानिष्टाङ्गुलादीनीन्द्वर्कयोरुदयास्तयोः ॥
ग्रन्थोऽयं गणितादर्शो निर्ममे धर्मपाठिना ।

सोऽयं श्रीकृष्णपादाब्जयुगे भूयात्समर्पितः ॥
गान्धर्वीनन्दपुत्रो मां दासीत्वेनस पादयोः ।
अङ्गीकुरुतमाहात्म्य युवां शक्नोमि न त्रुटि (?) ॥

**Colophon:**

इति गणितादर्शे परिलेशा(वेषा)धिकारो नामाष्टमोऽध्यायः समाप्तः ॥

---

### R. No. 3289.

Paper. 10¾ × 9¼ inches. Foll. 82. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Agadācārya of Mandasa.

Fol. 82 is left blank.

हरिभक्तिसारोद्धारः.

HARIBHAKTISĀRODDHĀRAḤ.

Similar to the work described under R. No. 1429(*f*) ante.

Deals with the following subjects:—

१. शङ्खचक्राद्यङ्कनभक्तिवर्णनम्.
२. ऊर्ध्वपुण्ड्रधारणभक्तिवर्णनम्.
३. द्वयमन्त्रपरिग्रहभक्तिवर्णनम्.
४. अर्चनभक्तिवर्णनम्.
५. जपभक्तिवर्णनम्.
६. ध्यानभक्तिवर्णनम्.
७. स्मरणभक्तिवर्णनम्.
८. कीर्तनभक्तिवर्णनम्.
९. नामश्रवणभक्तिवर्णनम्.
१०. वन्दनभक्तिवर्णनम्.
११. पादसेवनभक्तिवर्णनम्.
१२. पादोदकसेवाभक्तिवर्णनम्.
१३. नैवेद्यभक्षणभक्तिवर्णनम्.
१४. वैष्णवसेवाभक्तिवर्णनम्.
१५. एकादशीव्रतानुष्ठानभक्तिवर्णनम्.
१६. तुलस्यारोपणभक्तिवर्णनम्.

Complete.

**Beginning:**

नानापुराणेषु व्यासादिभिरुक्तां बहुविधामपि भक्तिमजानतां वैष्णवानामुपकाराय सुगमां षोडशधा भक्तिं निरूपयन्नादौ श्रीविष्णुभजनरूपं मङ्गलमारभति(ते)—

स्मृतेस्सकलकल्याणभाजनं यत्र जायते ।
पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥

श्रीपाद्मपुराणे उत्तरखण्डे पार्वत्युवाच—

देवदेव महादेव त्रिपुरघ्न सुरेश्वर ।
विष्णुभक्तिं ममाचक्ष्व मुक्तिदां सर्वदेहिनाम् ॥

* * * *

**Colophon:**

इति श्रीहरिभक्तिसारोद्धारे प्रथमं शङ्खचक्राद्यङ्कनामभक्तिनिरूपणम् ॥

**End:**

येन नारोपिता धात्रीतरोऽपीह च न द्रुमः ।
तथैव तुलसी येन तेन पापं न किं कृतम् ॥

**Colophon:**

इति श्रीहरिभक्तिसारोद्धारे षोडशं तुलस्यारोपणभक्तिनिरूपणम् ॥

The scribe adds—

नानापुराणभक्तिभ्यो भक्तिष्षोडशधोद्धृता ।
संक्षिप्य या मयालेखि साधवश्शीलयन्तु ताम् ॥

**Colophon:**

इति श्रीहरिभक्तिसारोद्धारे नानापुराणोद्धृतषोडशधाभक्तिनिरूपणम् ॥

---

## R. No. 3290.

Paper. 10⅞ × 9¼ inches. Foll. 144. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. acquired through M.R.Ry. Tātadēśika-Tātācāriyar of Villiyambākkam, Chingleput district.

### न्यायकुलिशम्.

### NYĀYAKULIŚAM.

Foll. 1a—142b. Fol. 143a gives the contents of this work. Foll. 143b and 144 are left blank.

Same work as that described under No. 4910 of the D.C.S. MSS., Vol. X.

Contains 1 to 12 Vadas.

---

## R. No. 3291.

Paper. 10⅞ × 9¼ inches. Foll. 146. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. obtained through Pandit Gōpināthānanda-Śarma Gāru of Parlākimedi.

Foll. 30b, 118b and 146b are left blank.

ग्रहार्चनचन्द्रिका.
GRAHĀRCANACANDRIKĀ.

Similar to the work described under No. 8039 of the D.C.S. MSS., Vol. XVI.

Deals with the following subjects :—

१. ग्रहदोषफलकथनम्.
२. ग्रहमण्डलदेवतास्थापनम्.
३. मृत्युञ्जयमण्डलकथनम्.
४. कुण्डनिर्णयकथनम्.
५. स्रुक्स्रुवादिनिर्णयः.
६. अग्निनिर्णयकथनम्.
७. ग्रहपूजादेवतापूजानिर्णयः.
८. मृत्युञ्जयपूजाग्रहप्रार्थनाबलिपूजानिर्णयः.
९. अग्निस्थापनतत्संस्कारग्रहरक्षादिविधिः.
१०. ग्रहामितदानोपादाननिरूपणम्.
११. अपमृत्युहरमहादानम्.

Contains the Paricchedas 1 to 11 complete.

**Beginning:**

नवीननीरदश्यामं वेणुवाद्यविशारदम् ।
पीताम्बरधरं कृष्णं राधारमणमाश्रये ॥

नत्वा सदाभीष्टदमम्बिकापतिं गणाधिपं लोकगुरुं सरस्वतीम् ॥
आदित्यचन्द्रारबुधेज्यभार्गवान् शनैश्चरादीनपि संस्मरेद्ग्रहान् ॥
श्रीयाज्ञवल्क्योक्तमतानुसारिणी समस्तशास्त्रागमतत्त्वरूपिणी ॥
ज्योतिर्विदां सद्विदुषां प्रहृष्टये नवग्रहाराधनचन्द्रिका कृता ॥

तत्रादौ नवग्रहयज्ञस्य नित्यत्वं कर्तुः फलदायकत्वमाह—ज्योतिश्शास्त्रे याज्ञवल्क्यः—

श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् ।
वृष्ट्यायुःपुष्टिकामो वा तथैवाभि(च)रन्नपि ॥
शान्तिकामो ग्रहानादौ तथा दुस्स्वप्नदर्शने ।
उत्पन्नव्याधिशमने अपमृत्युविनाशने ।
कारयेद्ग्रहयज्ञाख्यं परमायुर्विवृद्धये ।
विधिनानेन यः कुर्यात् ग्रहशान्तिं द्विजोत्तमः ॥

* * * *

ग्रहाणां लोकपालानां दिगीशानां पृथक् पृथक् ।
एवं लक्षणसंयुक्तान् कलशान् स्थापयेत् क्रमात् ॥

**Colophon:**

इति श्रीज्योतिश्शास्त्रोक्तयाज्ञवल्क्यादिसमस्तागमसारतत्त्वरूपिण्यां कर्मकाण्डानुसारिण्यां ग्रहार्चनचन्द्रिकायां ग्रहदोषफलकथनं नाम प्रथमः परिच्छेदः ॥

**End:**

इदं सालग्रामं गण्डकीनदीसमुद्भवं वज्रकीटनिर्मितं विष्णुचक्राङ्कितं विष्णुस्वरूपं विष्णुधर्मोत्तरोक्तं विष्णुदैवतमासमुद्रान्तपृथ्वीदानफलप्राप्त्यर्थमिति महादानपद्धतिः ॥

**Colophon:**

इति श्रीयाज्ञवल्क्यादिस(म)स्तागमसारतत्त्वरूपिण्यां कर्मकाण्डानुसारिण्यां ग्रहार्चनचन्द्रिकायामपमृत्युहरमहादानकथनं नामैकादशः परिच्छेदः ॥

---

R. No. 3292.

Paper. 10¾ × 9¼ inches. Foll. 64. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Tātadēśikāchariar of Villiambākkam, Chingleput district.

वज्रमकुटीविलासचम्पुः.

VAJRAMAKUṬĪVILĀSACAMPUH.

A treatise in prose and verse describing the festival, called Vairamuḍi, which is generally celebrated on the 11th day of the bright fortnight of the solar month Mīna (Paṅguni) in each year at Mēlkōṭe, one of the famous Śrī-Vaiṣṇava holy places: by Aḷaśiṅgabhaṭṭa, son of Yōgānandabhaṭṭa, who states that the above festival was celebrated for the first time, on the 7th day of the bright fortnight of the solar month Mīna in the year Hēvilambi of the Kṛtayuga. The author mentions Śrīkṛṣṇarāja, the king of Mysore, probably the grandfather of the present Mahārāja.

Complete.

**Beginning:**

श्रीमद्यादवशैलाग्रशेखरं सद्गुणाकरम् ।
योगानन्दनृसिंहाख्यं दैवतं पर्युपास्महे ॥

श्रीमान् यः पञ्चरात्रं विशदमुपदिशन् स्वात्मजाय प्रसन्नः
तेन स्वाधीनवाचा ह्यनयत चतुरास्येन शास्त्रं प्रसिद्धिम् ।
सर्वाभीष्टप्रदात्रीं मुहुरिह कलयन् दासवर्गे स दीक्षां
योगानन्दाभिधानः कलयतु कुशलं देवदेवो गुरुर्वा ॥

श्रीमान् हिरण्यमिह पुण्यजनैकसेव्यं
प्रह्लादहेतुमपि यस्तु तृणाय मेने ।
अर्च्योऽथवार्चक इहावतु नस्स योगा-
नन्दाख्यदेशिकमणिर्यदुशैलदीपः ॥

तत्सूनुरळशिङ्गाख्यभट्टोऽयं कविकेसरी ।
विधत्ते वक्त्रभ्रुकुटीविलासं चम्पुमुत्तमम् ॥

यदुद्भाभूत्नाथस्तवनविषयाश्चारुकृतयः
सहस्रं विद्यन्ते त्वमपि किमिहायास्यसि वृथा ।
इति त्वं मा वोचस्सरसिजभवाद्यर्चितपदो
रमानाथस्सोऽयं त्विति कविरसौ नार्चतु किमु ॥

इतिहासपुराणकीर्तितार्थान् बहवो (वा)कलयन् हि चम्पुकाव्यैः ।
अहमत्र तु पञ्चरात्रशास्त्रे प्रथितं (तं) कथयामि विष्णुयागम् ॥

कलिवर्षसहस्राणां द्विषष्टिन्यूनपञ्चके ।
गते कृतिरियं जज्ञे योगानन्दात्मजात् कवेः ॥

अस्ति प्रशस्तमहिमा यदुभूधरेन्द्रः
स्वस्तिप्रदो निजपदाश्रितमानवेभ्यः ।
यस्तिग्मरश्मिशतसन्निभवज्रमौलिः
स्वस्तिष्ठतामपि सुविस्मयकृद्विभाति ॥

तस्य खलु कमलभवभवनमङ्गलदीपस्य कनकमालिकाकरकिसलयोपलालितचरणराजीवस्य कंसदमनार्पितकनद्वज्रमकुटालङ्कृतस्य यवनेश्वरतनयाप्राणवल्लभस्य यदुगिरीशस्य यतिराजसम्पत्कुमारस्य महोत्सवसेवार्थमनेन कविकेसरिणा निरन्तरनिजहृदयगुहाविहरमाणविश्वत्रातृनृकेसरिणा निरवद्यसुविद्यहृद्यपद्यशतसंस्कृतश्रीभाष्यकारेण श्रीसात्वततन्त्रभाष्यकारेण मौद्गल्यायनकुलकलशजलनिधिसुधाकरनिजतातपादसमध्यापितभगवच्छास्त्रस्वतन्त्रेण व्याख्या-

तेश्वरतन्त्रेण निर्हेतुकभगवदनुग्रहपरिपूर्यमाणनिजकाङ्क्षितेन अळशिङ्गभट्ट-दीक्षितेन कृतयुगाविलम्बिहेत्रिलम्बिमीनशुक्लसप्तम्यां प्रदोषसमये जयभेरीताडन-पूर्वकं दिव्याभिर्गाथाभिः यथाक्रमं समाहूतास्सुदर्शनादयो नित्यसूरयः

* * * *

भगवन्तं संसेव्य यावदुत्सवान्तं यादवाचलेऽस्मिन् वसतेति भगवतानुज्ञापिता बभूवुः ।

* * * *

राजाधीनं मकुटं द्विजराजोऽयं वहन्निनाधीनम् ।
वहिरथ राजवीथ्यां बहुभिस्सैन्यव्रजैस्समायाति ॥

इन्द्रः—कस्य राज्ञोऽधीनं मकुटमिदम् ? नारदः—

यदुभूधरेन्द्रवंश्यो यदुभूभृत्पतिपदाब्जसंसक्तः ।
श्रीकृष्णनामधेयः कर्णाटमहीधराधिपो जयति ॥
तदधीनं मकुटमिदं बहुधा परिपाल्यते हि तेनैव ।
यत्कूटस्थः कृष्णः तस्मायच्छद्रमाप्रियायास्मै ॥

**End:**

वर्धन्तां सर्ववेदाः क्षितिविबुधगणास्तत्प्रकाशप्रवीणाः
वर्धन्तां तैः प्रकृता निखिलमखवरास्तद्भुजो निर्जरेन्द्राः ।
वर्धन्तां तैः नुतांङ्घ्रिर्यदुधरणिधराधीशितुर्वैभवौघाः
वर्धन्तां तद्वदेतत्कविवररचितास्सुप्रबन्धाश्च भूमौ ॥
वन्दारुवृन्दमखिलं मन्दार इवावनी गतोऽभीष्टैः ।
आनन्दघन्य इन्द्रे योगानन्दाय मङ्गलं भवतु ॥

**Colophon:**

इति श्रीमौद्गल्यायनकुलतिलकस्य यदुगिरीशचरणकमलार्चकस्य योगा-नन्दभट्टाचार्यतनयस्य अळशिङ्गभट्टस्य कृतिषु वज्रमकुटीविलासः समाप्तः ॥

---

R. No. 3293.

Paper. 10¾ × 9¼ inches. Foll. 56. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Payyūr Pattēri, Payyūr, Malabar district.

**बृहतीव्याख्या—ऋजुविमला.**

**BṚHATĪVYĀKHYĀ: ṚJUVIMALĀ.**

Same work as that described under R. No. 2682 ante.

Contains the first Adhyāya complete, but wants the beginning.

**Beginning:**

श्रुत्या सह स चाप्रामाण्यपरिहार उक्तः। तेन स्थिते चोदनायाः प्रामाण्याभिधानम्। यत एवं चाहष्टार्थं कृतावप्रमाणं तत उक्तं वैसज्ञनह्ये . . . . . . पायः . . त्वास्तित्व . . ति विचार्यते हानोपादानार्थम्। यदि विरोधोऽस्ति तदा हानं स्मृतेः कर्तव्यम्। अथ नास्ति तदोपादानम्। अत्र चोदयति विषयव्याप्ति . . . . यामिधानपरं ह्येतच्छास्त्रं न लक्ष्यनिष्ठम्।

* * * *

तस्मान्नाध्यवसायः--किं व्यक्तिरन्वयिनी उताकृतिरिति। कुत इत्याह—सामान्यप्रत्ययात् सामान्येनाकारेण प्रत्ययात् सामान्यस्यैव शब्दार्थत्वनियमात्॥

**Colophon:**

इति महोपाध्यायशालिकनाथमिश्रकृतायामृजुविमलायां पञ्जिकायां प्रथमस्याध्यायस्य तृतीयः पादः॥

उक्तं समाम्नायैदमर्थ्यम्। ननु नेदं प्रमाणलक्षणमस्मिन्नध्याये यथा- प्रमाणं शब्दस्तथोच्यते तस्य निमित्तपरीष्टिरिति प्रतिज्ञानात्।

**End:**

अध्यायार्थमुपसंहरति—अतो विध्यर्थवादमन्त्रस्मृतिनामधेयानुष्ठानतोऽनपेक्षा . . . कृत्वा स्थापितं चोदनायाः प्रामाण्यमित्युक्तं प्रामाण्यायत्तस्य निमित्तपरीष्टिरिति प्रतिज्ञातम्॥

**Colophon:**

इति महोपाध्यायशालिकनाथमिश्रकृतायामृजुविमलायां प्रथमोऽध्यायः॥

---

## R. No. 3294.

Paper. 10¾ × 9¼ inches. Foll. 176. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Tippan Nambūdirippād of Ponnūrkōṭṭa-mana, Perumbavore post, Travancore State.

Bound in two volumes.

बार्हस्पत्यसंहिता.

BĀRHASPATYASAMHITĀ.

Same work as that described under R. No. 3258 ante.

Complete.

---

R. No. 3295.

Paper. 10¾ × 9¼ inches. Foll. 102. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Tippan Nambūdirippād, Ponnūrkotta-mana, Perumbavore post, Travancore State.

Fol. 102 is left blank.

मुहूर्तरत्नम्.

MUHŪRTARATNAM.

Similar to the work described under R. No. 2547 ante. By Gōvinda.

Deals with the following subjects:—

१. दोषतदपवादगुणादिविषयवर्णनम्.

२. रजोनिर्गमनानुकूलादिग्रहशान्तिपर्यन्तविधानम्.

३. प्रकीर्णकाध्यायः (एकांशकत्र्यंशकादिच्छायाप्रकरणम्)

४. वर्षलक्षणतत्प्रश्नभूयिष्ठजललक्षणवास्तुस्त्रीपुंसलक्षणवर्णनम्.

Complete in four Adhyāyas.

**Beginning:**

यत्स्वतन्त्रकलाकालश्चिह्नवो ज्योतिषां गणः ।
चन्द्रभूषमदः पूर्णचिदानन्दमहश्श्रये ॥
सुवर्णचूतप्रमुखैर्ज्योतिश्शास्त्राब्धिचञ्चुभिः ।
गोपितापि मुहूर्तोक्तिर्दिङ्मात्रेणेह दृश्यते ॥
लाटवैधृतसूर्येन्दुग्रहसन्ध्याचतुष्टयम् ।
निर्घाताशनिभूकम्पकेतूल्का चन्द्रनष्टता ॥

* * * *

एतेषामुद्गमश्चापि यदा तत्र न शोभनः ।
मुहूर्तगोऽपि चारोऽपि दूरे तद्वाशुभक्रिया ॥
वेदेषुमुनिरन्ध्राद्यास्सार्पमूर्धैकमङ्गलम् ।
तिष्यृक्षनिम्नशून्यर्क्षमन्वर्क्षे दिनरुद्रमृती ॥

* * * *

सर्वर्क्षेष्वादितः पञ्च नाड्यो मेषर्क्षमीरितुम् ।
पुनः पञ्च वृषर्क्षं स्यात्पुनरेवमप्युन्नयेत् ॥

**Colophon:**

इति मुहूर्तरत्ने दोषतदपवादगुणादिविषयः प्रथमोऽध्यायः ॥

**End:**

यस्मिन् काले स्निग्धनिच्छिद्रपत्रास्सन्दृश्यन्ते वृक्षगुल्मा लताश्च ।
तस्मिन् वृष्टिश्शोभना सम्प्रदिष्टा रूक्षच्छिद्रैरल्पमम्भः प्रदिष्टम् (?)॥

**Colophon:**

इति मुहूर्तरत्ने प्रकीर्णकाध्यायस्तृतीयः समाप्तः ॥

वर्षलक्ष्म च तत्प्रश्नो भूमिष्ठजललक्षणम् ।
वास्तुस्त्रीपुंसलक्ष्मापि तुरीयाध्यायमाश्रितम् ॥

* * * *

लिप्तीकृत्य शशाङ्कात् खखवसुभिर्भाजितानि गतभानि ।
शेषं षष्ट्या हत्वा स्फुटभुक्त्या भाजिता गता नाड्यः ॥
एष्या नाड्यो ग्राह्यास्शेषविहीनैः खखाष्टभिर्भानुमपोह्य ।
शशिरविचन्द्रादितिमिङ्गिललोलज्यौतिषदुग्धमाहाम्बुधिमध्यात् ॥(?)
गोविन्देन मुहूर्तमहामणिरुद्धृत एष तु लोकहिताय ।

**Colophon:**

मुहूर्तरत्नं समाप्तम् ॥

---

## R. No. 3296.

Paper. 10⅞ × 9¼ inches. Foll. 45. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. obtained through Pandit Gōpīnāthānanda Śarmagāru, Senior Pandit, Rajah's College, Parlakimedi.

### गोपालार्चनविधिः.

### GŌPĀLĀRCANAVIDHIH.

Same work as that described under R. No. 3067 ante.

Complete.

Foll. 32*b*, 44*b*, and 45*b* are left blank

R. No. 3297.

Paper. 10⅞ × 9¼ inches. Foll. 186. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of Śrī Jugalakiśōra Pāṇigrāhi, B.A., Lecturer, Rajah's College, Parlakimedi.

Foll. 1*a*—186*a*. Fol. 186*b* is left blank.

ब्रह्मसूत्रभाष्यव्याख्यानम्—सूक्ष्मम्.

BRAHMASŪTRABHĀṢYAVYĀKHYĀNAM : SŪKṢMAM.

A commentary on the Brahmasūtrabhāṣya of Gōvindamuni alias Baladēvavidyābhūṣaṇa (a well-known sage of the Caitanya school), which work has been described under R. No. 2990 ante.

Complete, but wants the beginning.

**Beginning:**

वेदविदित इति श्रौतनिरुक्तेरर्थान्तरमप्यस्ति, तथापि महेन्द्रमदभित्पायान्न इन्द्रो गवामिति श्रीशुकोक्तेस्तथा व्याख्यातम् ।

* * * *

अथ सर्वेश्वरो भगवान् नन्दसूनुर्वज्रनाभप्रीत्यार्चावतारतयाविर्भूतोऽनन्तरं श्रीरूपेण चाभिषिक्तः, श्रीमद्वृन्दाटव्यधिदेवतात्वेन यश्चकास्ति, तन्निष्ठमना भाष्यकृच्चन्निर्देशेनैव ब्रह्मसूत्रार्थान् विवृण्वंस्तत्प्रणतिं मङ्गलमाचचार । विद्यारूपं भूषणं मे प्रदायेत्यादि । भाष्यपीठिकोक्तेरिति वदन्ति ; तत्पक्षे त्वेवं व्याख्येयम्—तं श्रीवृन्दावनाधिष्ठातृदेवत्वेन प्रसिद्धं गोविन्दं वयं नमस्यामः । कीदृशम् ? भजद्रूपं भजन् सेवमानः

* * * *

अर्चासाधारण्यं निवर्त्य साक्षाद्भगवत्तां वक्तुं विशेषणानि सत्यमित्यादीनि । सत्यादिरूपं यत्परं तत्त्वं तदेव भक्तानुग्रहवशादर्चारूपमित्यर्थः । ननु चित्सुखमूर्तेरर्चात्वं कथं तत्राह—अचिन्त्यमिति । तर्काविषयमित्यर्थः । हेतुमर्चकाद्यविद्यानिवारकम् ।

* * * *

अथात इति । अथेत्यानन्तर्ये, मङ्गलं तूपरिष्टात् । अत इति हेतौ । ब्रह्मजिज्ञासेति । अत्राहुः—कर्मणि षष्ठ्याः परिग्रहे प्रथमाध्यायार्थस्सूचितस्स्यात् । ब्रह्मविषयकज्ञानमात्रलाभात् । शेषे षष्ठ्याः परिग्रहे त्वध्याय-

चतुष्टयार्थास्सूचितास्स्युः ; ब्रह्मसम्बन्धित्वेन तदुक्तानां चतुर्विधानामर्थानां लाभात् । तस्मादन्त्यः पक्षः श्रेयानिति ।

**Colophon:**

इति श्रीगोविन्दभाष्यव्याख्याने सूक्ष्माभिधाने प्रथमाध्यायभाष्यस्य प्रथमः पादो व्याख्यातः ॥

**End:**

आस्थेयं दृढविश्वासेन ग्राह्यम् । सूत्राभ्यास इति । सूत्रैकदेशावृत्त्या शास्त्रैकदेशपूर्तिर्द्योत्यते । कृत्स्ने सूत्रावृत्त्या तु कृत्स्नशास्त्रपूर्तिरित्यर्थः । तदित्थमष्टसप्ततिसूत्रकत्रिचत्वारिंशदधिकरणकोऽयं चतुर्थोऽध्यायो व्याख्यातः ॥

ग्रहपक्षेषुभिस्सूत्रैः (५५९) न्यायैश्रेपुरवयुग्मकैः (२०५) ।
युक्तेयं ब्रह्ममीमांसा बोध्या गोविन्दभाष्यतः ॥

* * * *

तन्मङ्गलायैव करुणयैव तदिति गोविन्दनिरूपकत्वात् गोविन्देन प्रयोजकेन सिद्धत्वाच्च गोविन्दभाष्यमित्युक्तम् । तदाविर्भावकस्तु स एवेति पीठकादवगन्तव्यम् ॥

श्रीराधादिभिरात्मशक्तिनिकरैरुद्वीक्ष्यमाणक्षणः
श्रीरूपादिमधुव्रताश्रितपदद्वन्द्वारविन्दासवः ।
गोविन्दश्शरदिन्दुसुन्दरमुखस्तद्रक्षणैकव्रती
पूर्णब्रह्मतयोदितः श्रुतिगणैश्श्रीमान् स जीयात्प्रभुः ॥

श्रुत्यादिवाच्यमणिदीधितिदीप्यमानां
सद्युक्तिकाञ्चनरुचिच्छटया मनोज्ञाम् ।
वाणीश्वरोक्तिमनुचिन्त्य बुधास्सुधामां
गोविन्दभाष्यमसकृत्परिपाठयध्वम् ॥

**Colophon:**

इति श्रीमद्ब्रह्मसूत्रगोविन्दभाष्यव्याख्याने सूक्ष्माभिधाने चतुर्थाध्यायभाष्यस्य चतुर्थः पादो व्याख्यातः ॥

समाप्तश्च चतुर्थोऽध्यायः ॥

R. No. 3298.

Paper. 10⅞ × 9⅜ inches. Foll. 123. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. obtained through Pandit Gōpināthānanda-Śarmagāru of Parlakimedi, Ganjam district.

सङ्गीतसरणिः.

SAṄGĪTASARAṆIḤ.

Similar to the work described under R. No. 3234 ante. By Nārāyaṇa, son of Puruṣōttamamiśra of Śāṇḍilya family. The work is dedicated to God Nārāyaṇa.

Complete in four Pravēśas.

**Beginning :**

रासे गोपवधूनां करतालैर्मानमावहन् श्रीमान् ।
नृत्यन् मृदु मृदु गायन् कृष्णः पुष्णातु मे भव्यम् ॥

नारायणाख्यमिश्रेण कविरत्नेन यत्नतः ।
वितायते सतां प्रीत्यै सङ्गीतसरणिः स्फुटा ॥

यद्यप्यमुष्मिन् विषये प्रबन्धाः सन्त्येव नानाकविभिः प्रणीताः ।
तथापि गूढार्थविबोधनेन मम श्रमोऽयं सफलोऽस्तु लोके ॥

प्राचीनाधुनिकग्रन्थान् समालोच्य समन्ततः ।
क्रियतेऽयं मया ग्रन्थो महद्भिरनुगृह्यताम् ॥

नन्दन्तु किं वा निन्दन्तु खलाः खेलावचोभरैः ।
मत्कृतौ न विषीदामस्ते स्ववत्सविदूषकाः ॥

तत्रभवान् परमकारुणिको भगवान् भरतमुनिः परमपुरुषार्थाभिलाषिणो वेदान्तशास्त्राद्यभ्यासपरिश्रमेण क्लिश्यमानानवलोक्य तानुदिवा(द्दिधी)र्षुरनायासेन सकलपुरुषार्थप्राप्तिसाधनं गान्धर्वसङ्गीताख्यं पञ्चमवेदरूपं ब्रह्मणो मुखादधीत्य जगति प्रकाशयामास । तदुपजीवनेनान्य इति परम्परया शास्त्रमिदं समूलकमेवेति सर्वथा इदमभ्यसनीयम् ।

तथाच हरिनायके—

पुरा चतुर्णां वेदानां सारमाकृष्य पद्मभूः ।
इदं तु पञ्चमं वेदं सङ्गीताख्यमकल्पयत् ॥

* * * *

तत्र गीतस्य प्रथमोद्दिष्टत्वात् विष्णोरंशत्वेन प्रधानभूतत्वाच्च प्रथमं गीतलक्षणमाह—रञ्जकस्वरसन्दर्भो गीतमित्युच्यते बुधैः । जनानां मनोरञ्जकतया यत् स्वराणां षड्जादीनां सन्दर्भो मिलनं तद्गीतमित्युच्यत इत्यर्थः ।

* * * *

**Colophon:**

इति श्रीशाण्डिल्यवंशावतंसायितसकलशास्त्रकुशलसङ्गीतसाहित्यविद्यार्णवकर्णधारकविरत्नपुरुषोत्तममिश्रस्यात्मजेन कविरत्ननारायणमिश्रेण विरचितायां सङ्गीतसरणौ गीताभिधानं नाम प्रथमः प्रवेशस्समाप्तः ॥

**End:**

इदमत्राकूतम्—रसस्य मुख्यमयत्वेन तद्विरोधित्वं न ∗कपटतः ; किन्तु तद्विभा(वा)द्यविरोधात्तद्विरोध इति व्यवहारो गौणः ; न तु वास्तव इत्यलमधिकेन ॥

यावद्गङ्गातरङ्गावलिमिलितमिदं भूतलं भाति भूयो
यावन्नारायणाङ्के निवसति कमला पङ्कजस्था बशङ्का ।
दुर्गा भर्गाङ्गसंस्था विलसति सततं यावदेष प्रबन्धः
तावद्विज्ञातविज्ञाकलित इह जगत्यस्मदीयोऽस्तु नित्यम् ॥
नारायणश्रीचरणाम्बुजेऽयं समर्पितो वाक्कुसुमनोऽञ्जलिर्यत् ।
विशुद्धतामेत्य तदाद्यतोऽस्तु यथार्पितः कौपपयःप्रवाहः ॥

**Colophon:**

इति श्रीशाण्डिल्यवंशावतंसायितसकलशास्त्रकुशलसङ्गीतसाहित्यविद्यार्णवकर्णधारकविरत्नपुरुषोत्तममिश्रस्यात्मजेन कविरत्ननारायणमिश्रेण विरचितायां सङ्गीतसरणौ रसाभिधानं नाम चतुर्थप्रवेशः समाप्तः ॥

समाप्तोऽयं ग्रन्थः ॥

---

## R. No. 3299.

Paper. 10¾ × 9¼ inches. Foll. 54. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Subrahmanya Nambūdirippād, Paruthippalu-manakkal, Vallapparu, South Malabar.

(a) सकलसिद्धान्तसङ्ग्रहः.

SAKALASIDDHĀNTASAṄGRAHAḤ.

Foll. 1*a*—7*a*.

Similar to the work described under No. 4760 of the D.C.S. MSS., Vol. IX.

Complete.

**Beginning:**

सर्वानर्थकरादस्मात्संसारान्मुक्तिरिष्यते ।
सा त्वेषां तदुपायं हि कथ्यते बहुधा बुधैः ॥

चार्वाकैस्तु अप्रयत्नसाध्या मुक्तिरभिधीयते मरणात्मकत्वात् । न खलु मरणं प्रयत्नसाध्यम्; अवश्यभावित्वात् । ते हि अन्येषां दर्शनकारिणां विडम्बका नास्तिकाः बार्हस्पत्याः, लोकायतिकाः, चार्वाका इति संज्ञाभिः प्रख्याता भवन्ति । तेषां तावत्पृथिव्यप्तेजोवायव इति चत्वार्येव भूतानि, न त्वाकाशं मूर्तिद्रव्याभावरूपत्वात् । आत्मा च देहव्यतिरिक्तो नास्ति । अत एव नास्य परलोकः परमात्मा च परमेश्वरापरपर्यायो न भवति । स्वर्गनरकादिकं च न विद्यते । प्रत्यक्षमेकमेव प्रमाणम्; नानुमानादिकम्, आगमस्तु त्रयी धूर्तप्रलापः ।

**End:**

तस्मादेक एवात्मा देहाहङ्कारप्राणबुद्धीयंनो(व्यापन्नोऽ)प्यतिरिक्तः सकलदेहेषु निर्विकारो निरञ्जनोऽकर्ता नित्यस्स्वयंज्योतिर्भोगवर्जितो निर्गुणश्शुद्धो बोधमात्रवपुः । स तु अविद्योपाधिवशात् कर्ता भोक्ता च रागादिकलुषित(तः) च भवति । सा चाविद्या तत्त्वमस्यादि(महा)वाक्यार्थपरामर्शद्वारा ब्रह्माहमस्मीति भावनाबलात्क्रमेण निवर्तते । तस्यां निवृत्तायां मुक्तस्वरूप आत्मा केवलो विशुद्धस्वरूप आस्ते । स एव मोक्ष इति सिद्धम् ॥

**Colophon:**

इति सकलसिद्धान्तसङ्ग्रहस्समाप्तः ॥

भावस्य कस्यचित्पूर्वं भासमानस्य साम्प्रतम् ।
सोऽयमित्यनुसन्धानं प्रत्यभिज्ञानमुच्यते ॥

कस्याञ्चिदाश्रमबहिरङ्ग(ण)वेदिकायामाबद्धवासरुचिरागतमात्रतुष्टः ।
आचार्यवागमृतचर्वणमेव कुर्वन्नन्ते परं पदमनुत्तरमाप शिष्यः ॥

दारिद्र्यव्याधिसंस्पृष्टपुरुषस्य न चौषधम् ।
विना पादरजश्शम्भोरशेषाघनाशकम् ॥

---

(b) प्रभाकरविजयः.

PRABHĀKARAVIJAYAḤ.

Foll. 7b—53b. Fol. 51 is left blank.

A treatise explaining the principles of the Pūrvamīmāṁsā as expounded by Prabhākara: by Nandikēśvara.

Deals with the following topics:—

१. प्रयुक्तिनिर्णयः.
२. वक्तृज्ञानानुमानम्.
३. अख्यातिसमर्थनम्.
४. प्रकाशः.
५. प्राकट्यनिराकरणम्.
६. मनस्सद्भावाणुत्वकथनम्.
७. व्याप्तिसमर्थनम्.
८. क्रियानुमानम्.
९. शक्तिसमर्थनम्.
१०. परमाणुस्थापनम्.
११. कार्यव्युत्पत्तिसमर्थनम्.
१२. अर्थापत्त्यनुमानवैषम्यसमर्थनम्.
१३. अभावनिराकरणम्.
१४. सत्तासामान्यनिराकरणम्.
१५. वेदापौरुषेयत्वसमर्थनम्.
१६. स्वरूपभेदसमर्थनम्.
१७. ईश्वरनिराकरणम्.
१८. आत्मनिरूपणम्.
१९. भेदाभेदनिराकरणम्.

Complete.

**Beginning:**

यदाराधनतामेत्य कृतं कर्माधिकारिभिः ।
सफ . . . . . . . . . . विष्णुमव्ययम् ॥
विविधं वेदसिद्धान्ते विमन्यन्ते विपश्चितः ।
अतः प्रभाकरगुरोर्विजयः प्रति(पाद्यते) ॥
नाथद्वयात्तसारेऽस्मिन् शास्त्रे मम परिश्रमः ।
शुक्तिः श्रमायते सिन्धौ हरिणोद्धृतकौस्तुभे ॥

आचार्यकरणविधिप्रयुक्तमध्ययनमिति प्रतिपाद्यते । स्वविधेर्नियोज्याभावात् । अध्यापनविधिप्रयुक्तश्चोपपत्तेः । कः पुनराचार्यकरणविधिः ?

उपनीय तु यश्शिष्यं वेदमध्यापयेद्द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥

इति स्मृत्यनुमि . . . . . प्रसिद्धान्व्या(न्वा)ख्यानरूपत्वाच्छब्द-प्रयोगाच्च न विध्यनुमानमिति चेन्न ।

* * * *

**Colophon:**

इति नन्दिकेश्वरप्रभाकरविजये प्रयुक्तिनिर्णयाख्यं प्रकरणं समाप्तम् ॥

**End:**

किं चास्तु तावदेकाकारप्रतिभासः । अस्तु च तस्या भ्रान्तत्वम् । तथाप्याकारप्रतिभासो जातिः जातिभागस्य पिण्डभागस्य वा द्वितीयाव-भास एव स्यात् । न तु जातिजातिमतोरभेदावभासः । अथोच्येत न विलक्षणाकारेण वस्तुद्वयप्रतीतिरेव भेदप्रतीतिः ॥

**Colophon:**

नन्दीश्वरस्य प्रभाकरविजयः समाप्तिमगमत् ॥

---

## R. No. 3300.

Paper. 10⅞ × 9⅜ inches. Foll 126. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Nilakaṇṭha-Nambūdirippād, Karanjat-mana, Oorakam p. st.

Fol. 1*a* contains the name of the work. Fol. 1*b* is left blank. Fol. 2 gives the contents of this work.

### नीतितत्त्वाविर्भावः.
### NĪTITATTVĀVIRBHĀVAḤ.

Foll. 3*a*—125*b*. Fol. 126 is left blank.

A treatise in the Pūrvamīmāṁsā in accordance with the views of Kumārila: by Cidānanda, son of Śrīdharapaṇḍita.

It deals with the following topics:—

१. अध्ययनविधिवादः.
२. कार्यवादः.
३. स्वतःप्रामाण्यवादः.
४. कालप्रत्यक्षतावादः.
५. अन्यथाख्यातिवादः.
६. साक्षात्प्रतीतिनिरासवादः.

७. कल्पनापोढनिरासवादः.
८. योगरूढिवादः.
९. इन्द्रियवादः.
१०. मनोवैभववादः
११. अजसंयोगवादः.
१२. पठनाकाशप्रत्यक्षतावादः.
१३. कर्मप्रत्यक्षतावादः.
१४. विशेषनिराकरणवादः.
१५. समवायनिरासवादः.
१६. तादात्म्यवादः.
१७. अवयविवादः.
१८. परमाणुवादः.
१९. तमोवादः.
२०. गतिनिर्णयवादः.
२१. महासामान्यवादः.
२२. अवान्तरजातिवादः.
२३. भेदवादः.
२४. अद्वैतवादः.
२५. अनिर्वचनीयवादः.
२६. अविद्यावादः.
२७. मिथ्यात्ववादः.
२८. विज्ञानवादः.
२९. स्वयंप्रकाशवादः.
३०. ज्ञानप्रत्यक्षतानिरासवादः.
३१. प्राकट्यवादः.
३२. योगिप्रत्यक्षनिरासवादः.
३३. अनुमानपरीक्षावादः.
३४. शब्दपरीक्षावादः.
३५. उपमानपरीक्षावादः.
३६. अर्थापत्तिपरीक्षावादः.
३७. अभावपरीक्षावादः.
३८. स्फोटवादः.
३९. ईश्वरवादः
४०. शब्दानित्यत्ववादः.
४१. क्षणिकवादः.
४२. आत्मवादः.
४३. अन्विताभिधानवादः.
४४. वेदापौरुषेयत्ववादः.

Complete in 44 Vādas.

**Beginning:**

वन्दे कल्याणयोरेकमिन्दुचूडमुकुन्दयोः ।
अङ्गं कलिन्दहिमवत्कन्ययोरिव सङ्गमम् ॥

आचार्यकृतिप्रकृतेराविर्भावाय नीतितत्त्वानाम् ।
अयमिह यत्नः क्रियते सन्तः पुष्यन्तु सन्तोषम् ॥

विदुषामयं प्रबन्धो दुर्जनदूष्योऽपि जायते प्रीत्यै ।
किं शर्करा न मधुरा पित्तोपहतस्य तिक्तेति ॥

आदौ स्वाध्यायविध्यर्थनिर्णयाय यतामहे ।
शास्त्रारम्भस्य वैधत्वप्रतिपादन[ाय] सिद्धये ॥

यदि हि स्वाध्यायोऽध्येतव्य इति विधिरध्ययनस्य स्वाध्यायसंस्कारद्वारेणार्थज्ञानसाधनत्वं बोधयतीति न प्रतिपाद्येत, तर्ह्यर्थज्ञानस्यानुष्ठानस्य वैधत्वाभावात्तदङ्गभूतं मीमांसाश्रवणमपि न वैधं स्यात् ।

अवैधं च न वैधं स्थानमुत्कृष्टमर्हतीति नाध्ययनानन्तरं तद्धेतुका धर्मजिज्ञासा कर्तव्या भवेत् । अतो मीमांसाश्रवणस्य वैधत्वप्रतिपादनाय स्वाध्यायाध्ययनविधिरधीतेन स्वाध्यायेनार्थज्ञानं सम्पाद्यमिति बोधयति न वा इति चिन्त्यते ।

* * * *

**Colophon :**

इत्यध्ययनविधिवादः प्रथमस्समाप्तः ॥

**End :**

तेषामपि परस्परविरुद्धार्थतया प्रमाणान्तरप्रतिहततया चार्थवादत्वमेवेति, न पुनः स्वातन्त्र्यमिति निर्णयात् । काठकादिसमाख्यापि कस्य चिदेव कठादेः प्रकृष्टवचनमिति तेन प्रोक्तमिति प्रवचननिबन्धनैवेति सिद्धमपौरुषेया वेदा इति ॥

**Colophon :**

इति श्रीचिदानन्दपण्डितकृतौ (नीति)तत्त्वाविर्भावे वेदापौरुषेय(त्व)वादश्चतुश्चत्वारिंशः समाप्तः ॥

साकूतं गहनं कुमारिलमतं जिज्ञासुभिः पण्डितै-
रप्यस्मात्त्ववधीरणा यदि परं ग्रन्थोऽयमभ्यस्यताम् ।
नो चेदुद्धततर्कतार्किकसभामध्यास्थितानां भवेत्
तत्तन्मार्गविचक्षणत्वविरहादात्मैव नो वञ्चितः ॥

यो भूयस्सोमपायी श्रुतिसरणिमणिर्विश्वसाधारणश्रीः
विद्यानामेकमोकस्त्रिजगति विदितः श्रीधरो अध्वनिष्ठः
तत्सूनुस्सूक्तिभूमिर्जगदुपकृतये श्रीचिदानन्दनामा
तत्त्वाविर्भावमुच्चैर्व्यधित बुधसभारोहणो रौहिणेयः ॥

**Colophon :**

इति चिदानन्दपण्डितकृतिस्तत्त्वाविर्भावस्समाप्तः ॥

R. No. **3301.**

Paper. 10⅜ × 9⅝ inches. Foll. 84. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Mahāmahōpādhyāya Tata Subbarayadu-Śāstri Garu of Vizianagram, Vizagapatam district.

Foll. 29*a* and 84*b* are left blank.

प्रौढमनोरमाव्याख्यानम्—बृहच्छब्दरत्नम्.

**PRAUḌHAMANŌRAMĀVYĀKHYĀNAM : BṚHACCHABDARATNAM.**

A commentary on the Prauḍhamanōramā of Bhaṭṭōjidīkṣita, which work has been described under No. 1391 of the D.C.S. MSS., Vol. III: by Haridīkṣita, son of Vīrēśvara and grandson of Bhaṭṭōjidīkṣita, and pupil of Rāmāśrama. The author wrote another commentary entitled the Laghuśabdaratna.

Incomplete.

**Beginning:**

शेषविभूषणमीडे शेषाशेषार्थलाभाय ।
दातुं सकलमभीष्टं फलमीष्टे यत्कृपादृष्टिः ॥

गूढोक्तिग्रथितां पितामहकृतां विद्वत्प्रमोदप्रदां
भक्त्याधीत्य मनोरमां निरुपमाद्रामाश्रमात्सद्गुरोः ।
तत्त्वाज्ञानवशात्परेण कलितान् दोषान् समुन्मूलयन्
व्याचष्टे हरिरेष तां फणिमतं स्वालोच्य वैरी(रे)श्वरिः ॥

भट्टोजिदीक्षितमुखैः कृतिभिः कृतेषु
ग्रन्थेष्वमी किमु न सन्ति समीहितार्थाः ।
यत्सङ्कलय्य कथिता इह तावतैव
तुष्यन्तु मत्कृतिमिमामवलोक्य धीराः ॥

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षार्थं व्याख्यात्रादीनां मङ्गलार्थं च निबद्धं चिकीर्षितं प्रतिजानीते—ध्यायं ध्यायमित्यादि । संपूर्णस्वशाखाध्ययनमेकस्मादेव गुरोरिति बोधयितुं गुरोरित्येकवचनम् ।

* * * *

**Colophon:**

इति श्रीमट्टोजिदीक्षितपौत्रवीरेश्वरतनूजातहरिदीक्षितप्रणीते बृहच्छब्दरत्ने प्रौढमनोरमाव्याख्याने परिभाषाप्रकरणम् ॥

**End:**

द्वे इत्यस्य सङ्ख्येयपरत्वेन शब्दद्वयोच्चारणसाध्यत्वेन तद्बुद्ध्यारो-हस्यावश्यकत्वेनाप्यध्याहारेण तारत(म्य)वि-

---

R. No. **3302.**

Paper. 10¾ × 9½ inches. Foll. 39. Lines, 20 in a page. Dêvanâgari. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Tippan Nambûdirippad, Ponnurkoṭṭamana, Perumbavûr post, Travancore State.

स्यानन्दूरपुरचम्पुः.
SYÂNANDÛRAPURACAMPUḤ.

On the greatness and religious sanctity of Syânandûrapura (Trivandram) and God Anantapadmanâbha worshipped therein: by Râmavarman, (born in the Nakṣatra Svâti) son of Lakṣmî of Vañci family. The work is written in prose and verse; and deals with the following topics:—

१. बालक्रीडावर्णनम्.
२. Incomplete.
३. } Nil.
४. }
५. Wants the beginning.
तीर्थादिमाहात्म्यवर्णनम्.
६. उत्सवप्रशंसा.
७. मृगयावर्णनम्.
८. अभिषेकयात्रावर्णनम्.
९. तीर्थाभिषेकवर्णनम्.
१०. लक्षदीपश्लाघावर्णनम्.

Contains Stabakas one and five to ten complete. Stabaka two is incomplete. Stabakas three and four are wanting.

**Beginning:**

लक्ष्मीं दद्यादजस्रं जलनिधितनयादृक्चकोरप्रसन्न-
ज्योत्स्नाभूताखिलोन्मादनचणविलसन्मन्दहासो नितान्तम् ।
वाणीं चात्मीयलोकोत्तरचरितसुधाकीर्तने तत्परां मे
श्रीमानाशीविषाधीश्वरकृतशयनस्सत्वरं पद्मनाभः ॥

अस्तध्वस्तसुपर्वनायनगरश्रीगर्वभारं परं
दुग्धाम्भोनिधिकन्यकानवरतक्रीडार्थसौधायितम् ।
स्यानन्दूरमिति श्रुतं त्रिभुवने पुण्यस्थलं निस्तुलं
यत्रास्ते जगदीश्वरस्स भगवान् श्रीपद्मनाभो हरिः ॥

सोऽयं स्वीयपदारविन्दयुगलध्यानैकतानात्मनां
नृणां काममकामितानपि दिशन् भोगानिहान्ते पुनः ।
साचन्मोदमयीं निवृत्तिरहितां मुक्तिं ददाति स्वयं
श्रीमानत्र परां किमर्थमपरं लोके शुभं जन्तुभिः ॥

* * * *

तस्य तु लोकत्रयेशस्य विश्वजगत्कारणभूतस्य भगवतः परमात्मनो वासुदेवस्य एतत्स्यानन्दूरपुरकृतार्थीकरणहेतुभूतां परममङ्गलां गाथां वक्ष्यामि—

आसीद्दिवाकर इति प्रथितो हि पूर्वमानर्तसीम्नि विगतैहिकवस्तुसङ्गः ।
श्रीपद्मनाभचरणार्पितचित्तवृत्तिर्योगीश्वरः स्वमहसा तु यथार्थसंज्ञा ॥

* * * *

तस्याथ धन्यचरितस्य मुनेः कदाचित् स्थित्वा वशं करतले स ननर्त देवः ।
यत्पादपद्मयुगलं विधिशर्वलाल्यं हा हन्त लब्धममुना सकलार्तिहारी ॥

**Cloophon :**

इति स्यानन्दूरपुरवर्णनप्रबन्धे बालक्रीडा नाम प्रथमस्तबकः ॥

**End :**

एवममेयभक्तिभारपुरस्सरं भगवन्तं निखिलवेदान्तार्थसारभूतं संस्तुवामी महीसुराः परमानन्दभरितास्स्वकीयसदनान्युद्दिश्य यथागतं गच्छन्ति ।

जयतु जयतु सोऽयं पद्मनाभो मुकुन्दो
निजचरणनतानां पालने बद्धदीक्षः ।
अविकलमपि चायुश्श्रीसुखारोग्यकीर्ति(र्तीः)
प्रतिदिनमिह पुष्णन् स्वानुकम्पासुधाभिः ॥

एवं जगत्त्रयगुरोः कमलावरस्य सङ्कीर्तनं गुणगणाब्धिलवस्य किञ्चित् ।
देवस्य तस्य कृपयैव कृतं मयेदं सन्तो गृणन्तु रसिकाः किल सप्रमोदम् ॥

नाभीजाताब्जसंस्थद्रुहिणमुखगणोद्गीतवेदश्रुतो वै
नित्यं संसक्तचित्तोऽप्यमरवरमुनिश्रेष्ठसंकीर्तनेऽपि ।
लक्ष्म्या साकं विहारे रहसि कृतिमिमां यद्यसौ पद्मनाभः
स्वामी कर्णे दधाति क्षणमपि कृतकृत्योऽस्मि तेनेह लोके ॥

**Colophon:**

इति स्यानन्दूरपुरवर्णनप्रबन्धे लक्षदीपश्लाघा नाम दशमस्तबकः ॥
स्वातीजातेन चूडाधृतसरसिजनाभाङ्घ्रियुग्मेन
लक्ष्मीराज्ञीपुत्रेण वञ्चीश्वरकुलतनुषा रामवर्माभिधेन ।
भक्त्युद्रेकेण शश्वद्गुरुवरकृपया निर्मितं चम्पुकाव्यं
स्यानन्दूरेश्वरस्य प्रमितमुपहृतं शं सदालं निदध्यात् ॥

---

R. No. 3303.

Paper. 10¾ × 9¼ inches. Foll. 58. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Paramēśvara Nambūdiri of Konipayyur, Kunnamkulam post, Cochin State.

Fol. 58 is left blank.

ईशानगुरुदेवपद्धतिः.

ĪŚĀNAGURUDĒVAPADDHATIḤ.

Same work as that described under R. No. 3054 ante.

Contains as given below Paṭalas 23—30 complete; and breaks off in the 31st Paṭala as found in the Kriyāpāda of the Siddhāntasāra.

२३. मूलक्षणम्.
२४. शङ्कुच्छायाङ्गुलादिविधिः.
२५ पदविन्यासग्रामपुरीलक्षणम्.
२६. देशकालकर्षणशल्योद्धार-वास्तूपचितिविधिः.
२७. वास्तुपूजाप्रथमेष्टकागर्भ-न्यासः.
२८. विमानादिलक्षणम्.
२९. जातीतरजात्यलङ्कारविधिः.
३०. जात्यादिविमानविभागोपपीठविधिः.
३१. अधिष्ठानाद्यधिकारलक्षणम्.

**Beginning:**

अथ भूस्सर्ववर्णानामुपजीव्या यथाश्रया ।
प्रतिष्ठादिक्रियाचक्रं यतो यस्यां प्रवर्तते ॥
तस्मात्तल्लक्षणं सम्यक् संक्षेपादिह कथ्यते ।
पुण्यक्षेत्रनदीतीर्थपर्वताद्यपि(न्वि)ता मही ॥

प्रयच्छत्यधिकां सिद्धिं यतस्तामाश्रयेद्बुधः ।

* * * *

**Colophon:**

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे क्रियापादे भूलक्षणपटलस्त्रयोविंशस्समाप्तः ॥

**End:**

आर्ताधिष्ठानतुङ्गा द्विगुणमथ समं सार्धमर्धं त्रिपादं
पञ्चांशं व्यंशकं वानलसममिति द्व्येकमात्रोपपीठम् ।
स प्रत्यङ्गं समधन् तदपि च महता वा जनेनोपयुक्तं
सर्वेषां चाविशालां दृढमुचितमधो योजयेदूपपीठम् ॥ इति

**Colophon:**

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे क्रियापादे जात्यादिविमानविभागोपपीठविधिपटलस्त्रिंशस्समाप्तः ॥

अधिष्ठानं मयः प्राह चतुर्दशविधं पृथक् ।
पराशरोऽपि द्विविधं त्रिविधं त्वपरे जगुः ॥
पराशरोक्तं द्विविधं पादबन्धं प्रतिक्रमम् ।
एकैकं तच्चतुर्भेदं यतोऽष्टविधमुच्यते ॥

* * * *

संहाराख्यं कपाटं तत् भित्तिगूढं च पावनम् ।
देवद्विजनृपाणां तु युग्मायुग्मे च पूजिते ॥
अयुग्मा . . . .

---

## R. No. 3304.

Paper. 10¾ × 9½ inches. Foll. 138. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Yajñēśvaradīkṣitar Kalpathi, Palghat.

Fol. 138*b* is left blank.

क्रियाक्रमद्योतनिका.

KRIYĀKRAMADYŌTANIKĀ.

A treatise based on several Śaivāgama works and mostly dwelling on the conduct of certain religious rites to be performed in the temples dedicated to the worship of God Śiva: by Sadyōjatācārya alias Paramēśvara who salutes in the beginning Jñānaprakāśa of Kāñcipuram.

Deals with the following topics :—

१. वास्तुहोमः—क्रियादीपे.
२. सङ्कल्पविधिः— do.
३. पुण्याहविधिः—वातूलाख्ये.
४. अङ्कुरार्पणविधिः—सुप्रभेदे.
५. रक्षाबन्धनविधिः—कामिकादौ.
६. समयदीक्षा—शैवभूषणे.
७. संस्कारदीक्षा—कामिकादौ.
८. प्रतिष्ठाकलाशुद्धिः— do.
९. शान्तिकलाशुद्धिः— do.
१०. निर्वाणदीक्षाविधिः—स्वायम्भुवे.
११. षडध्वदीक्षाविधिः—मृगेन्द्रे.
१२. संक्षिप्तदीक्षाविधिः—अनन्तविजये.
१३. ज्ञानदीक्षाविधिः—कामिकादौ.
१४. आचार्याभिषेकविधिः—पौष्करादौ.
१५. आगमस्वरूपप्रामाण्यवर्णनम्—वायव्यसूतसंहितादौ.

**Beginning :**

गुरुज्ञानप्रकाशाख्यं देशिकं शैवशेखरम् ।
कलये हृदये नित्यं काञ्चीपुरनिवासिनम् ॥

वन्दे विश्वाधिकं शान्तमनादिनिधनं शिवम् ।
निष्कलं निष्कलङ्कं च शक्तिं ज्ञानक्रियात्मिकाम् ॥

गुरून् परावरान् नत्वा गुरुवंशक्रमागतान् ।
क्रियाक्रमद्योतिकाया नित्यादेः क्रियते स्फुटम् ॥

गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥

ज्योतिषरत्नाकरे—

अकृत्वा वास्तुपूजां यः प्रविशेन्नवमन्दिरम् ।
रोगान् नानाविधाः(न्) क्लेशानश्नुते सर्वसङ्कटम् ॥

षट्सहस्रिकायाम्—

दीक्षाभिषेकयोः पूर्वं प्रतिष्ठायां विशेषतः ।
वास्तुपूजाविधानेन वास्तुहोमं समाचरेत् ॥

* * * *

सिद्धान्तशेखरे—

मण्टपस्य तथाग्नेय्यां हस्तमात्रप्रविस्तरम् ।
षडङ्गुलं तदुच्छ्रायं स्थण्डिलं कारयेत् बुधः ॥

* * * *

**Colophon:**

इति क्रियादीपे वास्तुहोमो नाम षष्ठः ॥

**Colophon:**

इति परमेश्वरापरनामधेयश्रीसद्योजाताचार्यविरचितायां क्रियाक्रमद्योतिकायां वास्तुपूजाद्यभिषेकान्तविधिस्समाप्तः ॥

**End:**

किन्तु श्रुतिपथगलितानां मानुषाणां तु तन्त्रमित्यत्र तन्त्रं नादरूपं विनिष्क्रान्तं शास्त्रं सर्वमिति श्रुतेर्नादात्मना शिवकृतं वर्णपदवाक्यरचनात्मना शम्भुपदोपलक्षितश्रीश्वरप्रेरितमायारुद्रकृतं वामादितन्त्रमिति मतिमद्भिरूह्यम् । तदुक्तं कामिके—

वामं पाशुपतं चैव लाकु(वातु)लं चैव भरवम् ।
न सेव्यमेतत् कथितं वेदबाह्यं तथेतरत् ॥

इति सूतसंहितायां वृत्तौ च विद्यारण्यस्वामिभिश्शिवागमो.

---

## R. No. 3305.

Paper. 10¾ × 9⅜ inches. Foll. 24. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippād, Kūṭalūr-mana, Narori, Trittala, Malabar district.

(a) ब्रह्मसूत्राधिकरणसूत्रानुक्रमणिका.

BRAHMASŪTRĀDHIKARAṆASŪTRĀNUKRAMAṆIKĀ.

Fol. 1.

An index of the Sūtras in each of the Adhikaraṇas or topical subdivisions of the Uttaramīmāṁsā, as interpreted by Śaṅkara.

Complete.

**Beginning:**

शारीरकाधिकरणगतसूत्राण्यक्षरसङ्ख्यया लिख्यन्ते—

कायापाये सादरः कस्य भावः १, जारे रामा लोलश्रीः २, सौराज्येश गिरिराजमयी कविश्रीः ३, सलिले रागवादी स्यात् ४ ।

प्रपदपुटे सगरवरोरगस्य १, नियतो नामवैष्णवः २, सत्यापाये कपटः कायवान् सत्यरूपवान् ३, वरकपिभटगोलीला ४ ।

* * * *

नेति दश नान्तं मान्तदशाधिकम् । एकैकसूत्राधिकरणादि एकादशैकादशसूत्राधिकरणान्तमक्षरसङ्ख्ययोच्यते ।

गजतुङ्गो रुरुस्सौम्यरसर्वजन्माङ्गगोत्रकौ । चतुर्दशसप्तदशसूत्रकौ न्याय्यौ कौचित् स्त इत्यर्थः ।

**End:**

इति षोडशपादेषु न्यायसङ्ख्या समीरिता ।
अमृतकुम्भोत्थिता दुर्गा प्रलयोऽध्यायशास्त्रगा ॥

* * * *

स्वर्गयानं सोमपानां माहेयो हंसभूमणिः ।
इति क्रमात्सूत्रसङ्ख्या ज्ञेयाङ्कचध्यायशास्त्रगा ॥

---

(b) ब्रह्मसूत्राधिकरणन्यायानुक्रमणिका.

BRAHMASŪTRĀDHIKARAṆANYĀYĀNUKRAMAṆIKĀ.

Foll. 1b—3a.

An index of the recognised Nyāyas or reasonings adopted in the course of commenting upon the Adhikaraṇas of the Brahmasūtra.

Complete.

**Beginning:**

अथातो ब्रह्मजिज्ञासा जन्माद्यस्य यतः पुनः ।
पश्चात्तु शास्त्रयोनित्वाद्ब्रह्मतत्तु समन्वयात् ॥
ईक्षतेरानन्दमयो ह्यन्तराकाश इत्यतः ।
ज्योतिः प्राण इति सूत्रैराद्यपादः प्रकाशितः ॥

**End:**

सङ्कल्पादय चाभावं बादरिश्च प्रदीपवत् ।
जगद्व्यापारवर्जं च सप्तान्ते कीर्तिता नयाः ॥
अधिकरणादिग्रहणं त्वेवं कृष्णानुमतियतिवर्यैः ।
विरचितमन्तेवसतां संशयनुत्त्यै सुखावबोधाय ॥

(c) वेदान्तसिद्धान्तमुष्टिः.

VĒDĀNTASIDDHĀNTAMUṢṬIḤ.

Foll. 3b—6a.

A brief statement in Anuṣṭup stanzas of the leading principles of the Advaita-Vēdānta.

Complete.

**Beginning:**

नत्वा वाणीगणेशानौ व्यासशङ्करसद्गुरून् ।
वक्ष्ये वेदान्तसिद्धान्तमुष्टिमानुष्टुभाक्तिभिः ॥
विचार्यं ब्रह्म वेदान्तैर्जगत्कारणमस्ति तत् ।
वेदकर्तृ च सर्वज्ञं ब्रह्म वेदैकबोधितम् ॥
न कर्तृनिष्ठा वेदान्ता न च बोधविधायकाः ।
ईक्षणं न प्रधानस्य भोक्तानन्दमयो न तु ॥

* * * *

ज्योतिर्न कार्यं ब्रह्मैव प्राणोऽस्मीतीश्वरश्रुतिः ।
प्रथमस्यादिमे पादे न्याया एते चतुर्दश ॥

**End:**

आविर्भावस्स्वेन मुक्तौ तस्य ब्रह्माविभक्तता ।
तत्र मायामयैश्वर्यं सङ्कल्पादेव तत्कु(त्क्षु)तिः ॥
विकल्पोऽस्य शरीरादेस्तत्प्रवेशः प्रदीपवत् ।
सृष्ट्यादिवर्जमैश्वर्यं नयास्सप्तान्त्यपादिकाः ॥

---

(d) अधिकरणसङ्गतिः.

ADHIKARAṆASAṄGATIḤ.

Foll. 6b—19b.

Explains the inter-relation of the Adhikaraṇas of the Brahmasūtra: by Citsukhamuni, disciple of Jñānōttama.

Complete.

**Beginning:**

स्वाध्यायोऽध्येतव्य इति । नित्याध्ययनविधिनाधीतवेदान्तवाक्य एवापातदर्शनेनेदमवगच्छति—न वा अरे पत्युः कामायेत्युपक्रम्यात्मनस्तु कामाय सर्वं प्रियं भवतीत्युपसंहारात्सर्वतो विरक्तस्यात्मप्रेप्सोरेतावदरे खल्वमृतत्वमिति

वचनादमृतत्वसाधनमात्मदर्शनं द्रष्टव्य इत्यनूद्य श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवणं नामाङ्गि विधीयत इति ।

* * * *

**Colophon:**

इति प्रथमाध्यायस्य प्रथमः पादः ॥

**End:**

एवं योगिनो यदैश्वर्यं निरूपितं, तत् किं निरवग्रहमुत सावग्रहमिति निरूपयति—जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्चेति ॥

**Colophon:**

इति ज्ञानोत्तमपूज्यपादशिष्येण चित्सुखमुनिना विरचितायामधिकरणसङ्गतौ चतुर्थोऽध्यायः समाप्तः ॥

सुललितपदपङ्क्त्या भावगर्भैर्वचोभि-
र्हृदि मुदमनवद्यामादधाना बुधानाम् ।
अधिकरणमणीनां सङ्गतिस्संहतान्ध्या
प्रसरतु चिरमेषा मानिनी मानिनीव ॥

---

(e) अधिकरणमञ्जरी.

ADHIKARAṆAMAÑJARĪ.

Foll. 19b—24b.

An index of the Adhikaraṇas of the Brahmasūtra, as explained by Śaṅkara: by Citsukhamuni.

Complete.

**Beginning:**

प्रणम्य नरकारातिचरणाम्बुरुहद्वयम् ।
मुनिना चित्सुखाख्येन मञ्जरी चारुरुच्यते ॥
बन्धाध्यासौ गतार्थत्वं सम्भवोऽन्याधिकारिणः ।
विषयादेश्च सद्भावश्शास्त्रारम्भाय दर्शितः ॥
लक्षणद्वयमीशस्य सार्वज्ञ्यागममानते ।
सिद्धे वेदान्तमानत्वं विध्यस्पृष्टे परात्मनि ॥
ईक्षितुश्चाप्रधानत्वं पुच्छस्य स्वप्रधानता ।
ब्रह्मत्वं मण्डलस्थस्य हिरण्मयवपुर्भृतः ॥

* * * *

olophon:

इति श्रीमच्छारीरकाधिकरणमञ्जर्यां प्रथमः पादः ॥

End:

विकल्पोऽस्य शरीरादेः तत्प्रवेशः प्रदीपवत् ।
सृष्ट्यादिवर्जमैश्वर्यं न्यायाः सप्तान्त्यपादिकाः ॥
अष्टत्रिंशत्फलाध्याये न्याया एवमितीरिताः ।
रामग्रहेन्दुसङ्ख्याता न्यायाश्शारीरकाश्रयाः ॥

Colophon:

इति ज्ञानोत्तमपूज्यपादशिष्येण चित्सुखमुनिना विरचितायामधिकरण-मञ्जर्यां चतुर्थोऽध्यायस्समाप्तः ॥

सुललितपदपङ्क्त्या भावगर्भैर्वचोभिः
हृदि मुदमनवद्यामादधाना बुधानाम् ।
अधिकरणमणीनां मञ्जरी संहृतान्ध्या
प्रसरतु चिरमेषा मानिनी मानिनीव ॥

---

R. No. 3306.

Paper. 10⅜ × 9⅝ inches. Foll. 42. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇabhāratī of the Naḍuvil Maṭham, Trichur.

Foll. 41*b* and 42 are left blank.

श्रुतिसारसमुद्धरणम्, सव्याख्यानम्.
ŚRUTISĀRASAMUDDHARAṆAM WITH COMMENTARY.

Slightly different from the work described under R. No. 2518 ante: by Saccidānanda-yōgin, disciple of Pūrṇātmayōgīndra.

This commentary is called Tattvadīpikā.

Complete.

Beginning:

तं वन्दे मुनिवर्यं तोटकवृत्तं चका . . . . . . ।
प्रकरणमध्यात्मपरं प्रकटितपरमात्मतत्त्वमभ्यसताम् ॥
श्रीमत्पूर्णात्मकृष्णस्य पादपङ्कजपादुकाम् ।
प्रणम्य रचये व्याख्यां तोटकश्लोकगामिनीम् ॥

इह खलु निखिलोपनिषत्सारभूतं श्रुतिसारसमुद्धरणाख्यं प्रकरणमारभमाणस्तस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च विशिष्टेष्टदेवताप्रणतिलक्षणं मङ्गलाचरणं मुखतस्सम्पादयन् अस्य प्रकरणस्य शारीरकभाष्यार्थसङ्ग्रहत्वेन तत्प्रकरणत्वात्तदीयमेव विषयप्रयोजनादिकं सूचयति—

त्रैलोक्यनाथहरिमीड्यमुदारसत्त्वं शक्रेस्तनूजतनयं परमेष्ठिकल्पम् ।
जीमूतमुक्तविमलाम्बरचारुवर्णं वासिष्ठमुग्रतपसं प्रणतोऽस्मि नित्यम् ॥

त्रैलोक्यमित्याकाशादिप्रपञ्चो लक्ष्यते । तस्य त्रैलोक्यस्याकाशादिप्रपञ्चस्य नाथः कारणं स्वाज्ञानप्रतिबिम्बितकूटस्थपरमात्मा । त्रैलोक्यकारणत्वान्नियन्तृत्वाच्च त्रैलोक्यनाथ इत्युच्यते ।

End:

रंरम्यते अतिशयेन रमते तं त्रिभुवनवपुषमीशं
नियन्तारं सहस्रशीर्षेत्यादिश्रुतिसिद्धं विष्णुं मुहुर्मुहुर्नमामि ॥
अतिमन्दमुमुक्षूणां तत्त्वबोधप्रसिद्धये ।
तोटकश्लोकटीकेयं रचिता तत्त्वदीपिका ॥

Colophon:

इति श्रीमत्पूर्णात्मयोगीन्द्रशिष्येण (सच्)चिदानन्दयोगिना रचिता तत्त्वदीपिका समाप्ता ॥

The scribe adds—

रामेण लिखितमिदं पुस्तकम् ॥

---

R. No. 3307.

Paper. 10⅜ × 9⅝ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇan Nambiśan, Vaḍakapaṭṭath, Iriññālakuda, Cochin State.

रसरत्नाकरभाणः.

RASARATNĀKARABHĀṆAḤ.

A kind of amatory drama known as Bhāṇa: by Jayanta, son of Nārāyaṇa. Herein the author says that he wrote this work at the instance of king Vañcibhūpāla of Travancore.

Complete.

**Beginning:**

विश्वोद्यप्रभावस्त्रिभुवनभवनं भूरिकारुण्यशाली
पद्मासद्माभिराम: करकलितगदाशङ्खचक्राक्षमाल: ।
बालार्कप्रोज्ज्वलद्धाटकमकुटतटीकॢप्तमाणिक्यरत्न
श्रीमा[न्] सान्द्रप्रमोदा[]नानन्दसौख्यं दिशतु सुजनतासङ्गमे सङ्गमेशः ॥

* * * *

नान्द्यन्ते ततः प्रविशति सूत्रधारः (सूत्रधारः)—

अणीयस्या यस्य प्रसवमयकोदण्डकल्या
पुरारातिर्नीतः परमनरनारीश्वरमिषात् ।
प्रतीकारं कर्तुं प्रकृतिमिह निन्द्यामतितरां
तृतीयांसस्साक्षात् प्रतिदिनमनङ्गो विजयते ॥ *

* * * *

सकलशास्त्रपरम्परासारपारावारपारंगतस्य सर्वेशपरिकल्पिततल्पाकल्पभूतपद्मनाभपादपद्मसमर्पितानल्पगुणग्रामसद्मभूतात्मनः स्वल्पेतरसम्प्रदानाल्पीकृतकल्पपादपस्याकल्पसञ्चितसदञ्चितकीर्त्तिसञ्चयसञ्छादितविरिञ्चप्रपञ्चस्य वञ्चिमहाराजस्य राजराजस्यादेशात् श्रीसङ्गमेशकरुणापाङ्गभृङ्गनिकर विहरणोद्यानभूतस्य सुमनोहरचरितस्य नानागमपरिचयाश्चर्यहृदयनिबद्धसकलाभिधानस्य नारायणाभिधानस्य कस्यचिद्विदुषः पुत्रेण सन्ततसन्तोषितगुरुचरणान्तसेविना जयन्तकविना निबद्धमभिनवं सकलरसभाण्डभूतं रसरत्नाकरं नाम कमपि भाणमस्यां सभायामभिनेतुमभिलषामि । तमपि सादरमेव प्रतिगृह्णन्तु भवन्तः । (नेपथ्याभिमुखमवलोक्य) आर्ये इतस्तावत् (प्रविश्य नटी) अं अ इ अं हि । सूत्रधारः—आर्ये सम्प्रति प्रभूतविद्वज्जनमण्डितायामस्यां सभायां कालिदासप्रमुखमहाकविसङ्घविरचितशाकुन्तलादिनाटकवदस्माभिरभिनवोऽयं भाणः नटनीयः ।

* * * *

ततः प्रविशति सुप्तोत्थितो विटः—नयनसंमर्दनं कुर्वाणस्सर्वतो विलोक्य अये नयनपरमानन्दकरोऽयं महदारम्भः । तथाहि—

एकेनाक्ष्णा विरहविधुरा साम्प्रतं चक्रवाकी
सैषा सेव्यं मुहुरपि सुधाभानुमस्वादि(द्रि)तंस्यम् ।

अन्येनार्कं सरस्समुदयद्भानुमालोकयन्ती
मन्दं मन्दं प्रियतममुपावर्तते नर्तकीव ॥

**End:**

किं किं नैतद् केतुद्वयम् । पश्य—
लक्ष्मीराधाधिपत्योः प्रचुरतरकृपासा(शी)धुपूर्णप्ररोहौ
वर्धिशस्य प्रतापानलविशदयशोरूपरम्याङ्कुराग्रौ ।
आपातालान्तमूलौ रमसतरमहंपूर्विकाक्रान्तनाकौ
राजेते तप्तजाम्बूनदरजतमहत्केतुराजच्छलेन ॥

**Colophon:**

इति समाप्तोऽयं ग्रन्थः ॥

---

R. No. 3308.

Paper. 10½ × 9¾ inches. Foll. 44. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920-21 from a MS. of Kambhampati M. R. Sitārāma Śāstrlu of Bāpatla.

(a) बदरीनाथकल्पः.

BADARĪNĀTHAKALPAH.

Foll. 1a—34a.

A treatise on Yōgaśāstra. The subjects dealt with herein are apparent from the headings of the Adhyayas given below.

Contains the following Adhyāyas:—

१. सर्वयोगसारमन्त्रयोगः.
२. सर्वयोगसारयमयोगः.
३. सर्वयोगसारनियमयोगः.
४. सर्वयोगसारासनयोगः.
५. सर्वयोगसारप्राणायामयोगः.
६. सर्वयोगसारप्रत्याहारयोगः.
७. सर्वयोगसारधारणयोगः.
८. सर्वयोगसारध्यानयोगः.
९. सर्वयोगसारसमाधियोगः.
१०. सर्वयोगसारराजयोगः.

**Beginning:**

नारद उवाच—
भगवन् श्रोतुमिच्छामि योगशास्त्रकथां विभो ।
त्वत्तः कमलपत्राक्ष सङ्क्षेपाद्वक्तुमर्हसि ॥

श्रीभगवानुवाच—

साधु पृष्टं त्वया साधो वक्ष्ये तच्छृणु सादरम् ।
मार्गास्त्रयो मया प्रोक्ताः पुरा मोक्षार्थसाधकाः ॥
प्रथमं मन्त्रयोगश्च हठयोगो द्वितीयकः ।
तृतीयो राजयोगश्च गुह्यमेतदुदाहृतम् ॥
मन्त्रयोगं प्रवक्ष्यामि भक्तियोगसमन्वितम् ।
आदौ गुरुप्रसादेन शैवो वा वैष्णवोऽथ वा ॥
गायत्र्या वाथ तारं वा मन्त्रं लब्ध्वाथ भक्तितः ।
सिद्धक्षेत्रं ततो गत्वा एकान्ते निरुपद्रवे ॥
प्रातस्स्नानादिकं कृत्वा आसनं परिकल्पयेत् ।
तत्रोपविश्य शुद्धात्मा प्राङ्मुखोदङ्मुखोऽपि वा ॥
आचम्य प्राणं संयम्य सङ्कल्पं च ततः परम् ।
स्वगुरुं प्रणमेत्पश्चात् देवतां च ततः परम् ॥

* * * *

गुरुभक्ताय शिष्याय मन्त्रयोग(ः) प्रदीयताम् ॥

**Colophon:**

इति श्रीबदरीनाथकल्पे उत्तरखण्डे नारायणनारदसंवादे सर्वयोगसार-मन्त्रयोगो नाम प्रथमोऽध्यायः ॥

**End:**

अहर्नास्ति निशा नास्ति तत्त्वं नास्ति गुरूदितम् ।
केवलं ब्रह्ममात्रत्वं राजयोग इति स्मृतः ॥
इति ते कथितं राजयोगं च मुनिपुङ्गव ।
यः शृणोति सदा मर्त्यस्स्वयं ब्रह्मैव केवलम् ॥

* * * *

इति योगत्रयं प्रोक्तं मया देवमुनीश्वर ।
न देयं यस्य कस्यापि सत्यं सत्यं न संशयः ॥

**Colophon:**

इति श्रीबदरीनाथकल्पे उत्तरखण्डे नारायणनारदसंवादे सर्वयोगसार-राजयोगो नाम दशमोऽध्यायः ॥

(*b*) योगतारावली.

YŌGATĀRĀVALĪ.

Foll. 34*b*—37*b*.

Slightly different from the work described under No. 4356 of the D.C.S. MSS., Vol. IX, and with the colophon. By Nandikēśvara.

Contains the three Paricchēdas dealing with Layayōga, Haṭhayōga and Rājayōga, respectively.

**Beginning:**

अथ कथ्यते लययोगः—

लययोगो नाम मनोनिलयसाधनं निरन्तरनिश्चलं यत्किञ्चित्सगुणध्यानः(म्) ।

सदाशिवोक्तानि सपादलक्षलयावधानानि लसन्तु भूम्यौ(मौ) ।
नादानुसन्धानसमाधिमेकं म[ा]न्यामहे मा(ना)न्यतमं लयानाम् ॥

* * * *

**Colophon:**

इति लयपरिच्छेदः ॥

**End:**

प्रकाशमाने परमात्ममानौ गच्छन्त्य(त्य)विद्यातिमिरे समस्ते ।
अहो बुधा निर्मलदृष्टयोऽपि किञ्चिन्न पश्यन्ति जगत्प्रपञ्चम् ॥
सिद्धं तथाविधमनोविलयं समाधौ
श्रीशैलशृङ्गकुहरेषु तदानप्स्ये(थोपलप्स्ये) ।
गात्रं यथा विमलता परिवेष्टयन्त(?)
कर्णौ यथा विरचल(य)न्ति खगाश्च निद्राम् ॥
विरच(हर)तु मतिरेषा निर्विकल्पे समाधि(धौ)
कुचकलशयुगे वा कृष्णसारेक्षणानाम् ।
चरतु जपवतां सञ्जल्पमल्पं समंवा-
मति(मन्तावधि)कृतगुणदोषा मां विभुं न स्पृशन्ति ॥

**Colophon:**

इति श्रीनन्दिकेश्वरविरचिता[वी] योगतारावली समाप्ता ॥

---

(*c*) बिम्बदृष्टिः.

BIMBADṚṢṬIḤ.

Foll. 38*a*—42*b*. Foll. 43 and 44 are left blank.

Contains 88 stanzas only.

Same work as that described under R No. 2903 ante, but without Telugu commentary.

---

## R. No. 3309.

Paper. 10¾ × 9¼ inches. Foll. 252. Lines, 20 in a page. Dêvanâgarî. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa-Bhārati Kappiyar-Svāmigaḷ, Mūppil-Sthānam, Naḍuvil-Maṭham, Trichur, Cochin State.

Foll. 251 and 252 are left blank.

पुरुषार्थप्रबोधः.

PURUṢĀRTHAPRABŌDHAḤ.

A treatise on Saivism: by Brahmānandasarasvati, disciple of Rāmarājasarasvati. At the beginning of the work the author states that he undertook this work at the instance of God Sāmbaśiva, and that the subjects dealt with herein are not found in prior works written by Śaṅkara, Vidyaśaṅkara, Vidyāraṇya and Bhāratītīrtha. The work is dedicated to God Śiva, worshipped at Kāḷahasti.

Contains the following Adhyāyas:—

I. प्रथमांशस्थाः.

| | |
|---|---|
| १. वेदोत्कर्षोपदेशः. | ३. परमशिवोत्कर्षः. |
| २. परमाद्वैतवेदार्थोपदेशः. | ४. परमशिवसाधारणमूर्त्युत्कर्षः. |

II. द्वितीयांशस्थाः.

| | |
|---|---|
| १. शिवादिनाममाहात्म्यम्. | ४. शिवपूजाविधानम्. |
| २. शिवक्षेत्रोत्कर्षोपदेशः. | ५. महादेवपरिचर्याविधानम्. |
| ३. शिवपूजामाहात्म्यम्. | ६. शिवप्रसादमाहात्म्यम्. |

III. तृतीयांशस्थाः.

| | |
|---|---|
| १. गुणिरुद्रोत्कर्षोपदेशः. | ४. भस्मधारणविधानम्. |
| २. भस्मधारणमाहात्म्यम्. | ५. रुद्राक्षमाहात्म्यधारणविधाने |
| ३. भस्मधारणनित्यत्ववर्णनम्. | ६. सर्वमार्गप्रामाण्यनिर्णयः. |

Complete in three Aṁśas.

**Beginning:**

वेदैकवेद्यं भक्तेष्टदायिनं प्रत्यगद्वयम् ।
सत्यादिलक्षणं साम्बं सम्भजे सर्वकारणम् ॥

वेदसाम्बेशभस्मादिवैभवं यत्प्रसादतः ।
अविदं तं भजे श्रीमद्रामराजसरस्वतीम् ॥
श्रुत्याचार्यादिवाक्यौघरसायननिषेवणात् ।
सिद्धवाङ्मोहतत्कार्यवलीपलितवर्जितः ॥
क्षणे क्षणे कलेर्द्वन्द्वैस्साक्षिणाहं पिनाकिना ।
भक्त्या च परितो वक्ष्ये पुरुषार्थप्रबोधकम् ॥

* * * *

शुद्धवैदिक इत्येकः परस्तान्त्रिकवैदिकः ।
शुद्धतान्त्रिक इत्यन्योऽपरो वैदिकतान्त्रिकः ॥
एते चत्वार आत्मज्ञाः स्वस्वकर्मानुसारतः ।
मार्गाधिकारिणः प्रोक्ताः शिवेन परमात्मना ॥

* * * *

वेदोत्कर्षं च वेदार्थं शिवोत्कर्षं तथैव च ।
तन्मूर्तिनामस्थानार्चाप्रसादानां च वैभवम् ॥
गुणिरुद्रस्य चोत्कर्षं भस्मरुद्राक्षवैभवम् ।
प्रामाण्यं सर्वमार्गाणां वक्ष्येऽत्र शिवचोदितः ॥
श्रीमद्भिर्भगवत्पादैश्श्रीविद्याशङ्करेश्वरैः ।
श्रीविद्यारण्यसंज्ञैश्श्रीभारतीतीर्थदेशिकैः ॥
अन्यैरप्यखिलाचार्यैस्सर्वज्ञैर्वैदिकोत्तमैः ।
करुणासागरैर्लोकानुग्रहार्थात्तविग्रहैः ॥
अनुक्तभस्मरुद्राक्षरुद्रोत्कर्षादिवर्णनम् ।
विद्वद्भिर्न परिग्राह्यमिति चेद्वैदिकोत्तमैः ॥

* * * *

षण्मुनीन्द्रकृताद्युग्रशापपापामयौषधे ।
ग्रन्थेऽस्मिन् प्रथमांशेऽयं प्रथमोऽध्याय ईरितः ॥
श्रीकालहस्तिनाथाय शिवाय परमात्मने ।
मोचकायेममध्यायमर्पयाम्यन्तरात्मने ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामराजसरस्वतीमुनिवर्यचरणारविन्दसम्भवमहोदयमकरन्दलोलुपमधुव्रतश्रीसाम्बमहादेवप्रेरितब्रह्मानन्दसरस्वती -

मुनिविरचिते वेदार्थसारसङ्ग्रहे वैदिकोत्तमविद्वज्जनमनोहरे मन्दबुद्ध्यास्तिकभाग-धेये पुरुषार्थप्रबोधके प्रथमांशे वेदोक्तकर्मोपदेशो नाम प्रथमाध्यायस्समाप्तः ॥

**End:**

कैवल्यपदसोपानं कामिनां कल्पशाखिनम् ।
ऋग्यजुस्सामादिसंज्ञावेदरत्नकरण्डकम् ॥
मन्दबुद्ध्यास्तिकध्वा(स्ता)न्तपद्मषण्डदिवाकरम् ।
वेदमार्गैकनिष्ठ . . . . . . . . मनोहरम् ॥
पुरुषार्थप्रबोधं सत्पुरुषाः पुरुषार्थिनः ।
धीदोषगन्धरहितास्सर्वज्ञास्सारभागिनः ॥
आकल्पमालोकयन्तस्सन्तुष्टास्सन्तु सन्ततम् ।
पुरुषार्थप्रबोधाख्यं यद्ब्रह्मानन्दसरस्वती ॥
ग्रन्थं चकार शुद्धात्मा वैदिकग्रामशुद्धये ।
स प्रबोधामृताख्येनाङ्गीकृतोऽयं मयाधुना ॥
श्रीबादरायणपतञ्जलिजैमिनीष्ट-
ख्यातोऽत्र यो विबुधराजसरस्वतीति ।
सोऽहं गिरा च शिरसा मनसादि(द्रि)येऽस्य
ग्रन्थं त्विमं श्रुतितदन्तपरार्थनिष्ठम् ॥
जानन्ति सर्वमार्गाणां विवक्षा(?)शिवयोगिनः ।
यत्प्रसादेन मद्रूपं तं भजे साम्बमीश्वरम् ॥
षण्मुनीन्द्रकृतात्युग्रशापपापामयौषधे ।
अस्मिन् ग्रन्थे तृतीयांशे षष्ठोऽध्याय(इती)रितः ॥
अविमुक्ताधीश्वराय शिवाय परमात्मने ।
मोचकायेममध्यायमर्पयाम्यन्तरात्मने ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामराजसरस्वतीमुनिवर्यचरणारवि-न्दसम्भवमहोदयमकरन्दलोलुपमधुव्रतश्रीसाम्बशिवमहादेवप्रेरितब्रह्मानन्दभारती-मुनिविरचिते वेदार्थसारसङ्ग्रहे वैदिकोत्तमविद्वज्जनमनोहरे मन्दबुद्ध्यास्तिकभाग-धेये पुरुषार्थप्रबोधे तृतीयांशे सर्वमार्गप्रामाण्यनिर्णयो नाम षष्ठोऽध्याय-स्समाप्तः ॥ तृतीयांशश्च समाप्तः ॥

नमश्शिवाय गुरवे सिद्धान्ताय नमो नमः ।
त्रयाणामात्मनश्चैक्यं यः पश्यति स पश्यति ॥

---

R. No. 3310.

Paper. 10¾ × 9¾ inches. Foll. 8. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Rāmakṛṣṇa Rājaguru, Dhārakōṭa, Ganjam district.

Fol. 8a is left blank.

श्रीरत्नदीपिका.

ŚRĪRATNADĪPIKĀ.

Similar to the work described under R. No. 2912 ante.

Complete.

Contains the following subjects:—

१. वज्रशुभाशुभकथनम्.
२. मुक्तालक्षणकथनम्.
३. नीलगुणकथनम्.
४. मरकतलक्षणकथनम्.
५. गोमेदकलक्षणकथनम्.
६. मणिगुणकथनम्.
७. वैडूर्यपुष्परागगुणकथनम्.
८. प्रवाललक्षणकथनम्.

**Beginning:**

अथ रत्नानां परीक्षामाह—

वज्राणि चिह्नभूतानि वृथा कुर्वन्ति चाधमाः ।
परीक्षयेत शास्त्रज्ञैश्शाणघर्षणलेखनैः ॥
लोहानि यानि रत्नानि सर्वरत्नानि यानि च ।
तानि वज्रेण लेख्यानि तैर्वज्रं च न लिख्यते ॥

रसायने भवेद्विप्रः शुभसिद्ध्यर्थदायकः ।
क्षत्रियो मृत्युजिद्रक्तो वलीपलितरोगहा ॥
भद्रकारी भवेद्वैश्यः पीतो देहस्य रोगकृत् ।
कृष्णः शूद्रो रुजं हन्ति वीर्यस्तम्भं करोति च ॥

* * * *

पाण्डुरोगं पार्श्वपीडां किल सन्दाहसन्ततिः ।
रोगादिकं गुरुत्वं च धत्ते वज्रमशोधितम् ॥

**Colophon:**

इति श्रीरत्नदीपिकायां वज्राणां शुभाशुभकथनं नाम प्रथमज्योतिः ॥

**End:**

तस्य दोषाः—

पाण्डुरं सर्वरूक्षत्वं वक्रं लघु च नेष्यते ।
क्षयपित्ताम्लवातघ्नं विषघ्नं पाचकं लघु ॥
विद्रुमं निर्मलं स्निग्धं सर्वदोषरुजापहम् ।

**Colophon:**

इति श्रीरत्नदीपिकायां प्रवाललक्षणकथनं नाम अष्टमज्योतिः ॥
समाप्तेयं श्रीरत्नदीपिका ॥ इति श्रीरत्नदीपिका समाप्ता ॥

---

R. No. **3311.**

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 34. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. S. Ayyā Śāstri Avargal of Nallapalli, Cochin State.

Fol. 34 is left blank.

**मेघसन्देशटिप्पणी.**

MĒGHASANDĒŚATIPPAṆĪ.

A brief commentary on the Mēghasandēśa of Kālidāsa, which work has been described under Nos. 11869—11877 of the D.C.S. MSS., Vol. XX.

Breaks off in the 47th stanza of the Uttarasandēśa.

**Beginning:**

कश्चिदिति । कश्चिद्यक्षः रामगिर्याश्रमेषु वसतिं चक्रे । इतिहासः पुराणाप्रसिद्धत्वात् कश्चिद्ग्रहणम् । यक्षो देवयोनिः । रामगिर्याश्रमेषु रामस्य गिरिश्चित्रकूटः तस्याश्रमाः स्थानानि तेषु वसतिं चक्रे । कः कीदृशो यक्षः स्वाधिकारात्प्रमत्त इति पाठः । समासः ऊच्चूलम्य(:) । जुगुप्साविराम-प्रमादार्थानामित्यपादाने पञ्चमी । स्वस्य अधिकारः पुष्पग्रहणादिः । तस्मात् प्रमत्तः अनवहितः; प्रमादोऽनवधानता—इत्यमरः ।

**End:**

सस्तगङ्गादुकूलामलकां दृष्ट्वा पुनर्न ज्ञास्यते यावत्काले उच्चैर्विमान॰

सलिलोद्गारमभ्रवृन्दं मुक्ताजालग्रथितमलकाकामिनीव हसितां न ज्ञास्यसे ॥

**Colophon:**

इति पूर्वसन्देशस्समाप्तः ॥

अथाप(र)सन्देशः—

विद्युत्वन्तमिति । यत्रालकायां प्रासादास्सौधाः तैस्तैर्विशेषैः त्वां तुलयितुं तुलां कर्तुं सदृशीकर्तुमलं पर्याप्तिः; अलं भूषणपर्याप्तिः—इत्यमरः । विशे(ष)णकथनद्वारा तान्(नि) विशेषणाना(न्या)ह—किंविधं त्वां विद्युत्वन्तं तटित्वन्तं पुनः, सेन्द्रचापं धनुषा सहितम् ।

* * * *

तस्य एवमुक्तप्रकारेण ते तव क्षणमपि विद्युता तटिता विप्रयोगो मा भूत् । अनेन वार्ताकथनलक्षणकार्यनिमित्तमित्यभिप्रायः । हे ज(लद)!

---

R. No. 3312.

Paper. 10¾ × 9¾ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Paliyattu-Valiya Accan, Sennamaṅgalam, Parur post, Cochin State.

Foll. 19 and 20 are left blank.

चम्पूरामायणम्.

CAMPŪRĀMĀYAṆAM.

Similar to the work described under No. 12256 of the D.C.S. MSS., Vol. XXI: by Ekāmranātha, son of Sōmanātha of Muḷḷaṇḍram, who wrote the Yuddhakāṇḍa and thus completed Bhōja's Campurāmāyaṇa. The author refers to Lakṣmaṇa who also wrote the Yuddhakāṇḍa.

**Beginning:**

यस्य सम्पर्कपुण्येन नारीरत्नमभूच्छिला ।
यदुपास्यं सुमनसां तद्वस्तुद्वन्द्वमाश्रये ॥
दृष्टे यत्र यदृच्छयापि वचसां देवी पुरो वर्तते
सारस्यं महदभ्युपैति सदसि प्रागल्भ्यमुज्जृम्भते ।
जायन्ते सकलाः कला अपि नृणां जागर्ति कीर्तिर्भृशा
चेतस्स्निह्यति तत्र देशिकपदाम्भोजे च भोजे मम ॥
भोजेन तेन रचितामपि पूरयिष्य-
न्नल्पीयसापि वचसा कृतिमत्युदाराम् ।

न व्रीडितोऽहमधुना नवरत्नहार-
सङ्गेन किं तु हृदि धार्यत एव तन्तुः ॥
मुद्रामुद्रितजीवितां जनकजां मोहाकुलं राघवं
चूडारत्नविलोकनेन सुचिरं निध्याय निध्याय च ।
प्रारेभे हृदि लक्ष्मणः कलयितुं पौलस्त्यविध्वंसनं
धीरः पूरयितुं कथां च विमलामेकेन काण्डेन सः ॥
आनन्दमन्थरमनन्तरमाञ्जनेया-
दाकर्ण्य वृत्तिमनघां जनकात्मजायाः ।
दृष्टिर्दशाननरुषा परुषायमाणा
बाणासनोपरि दधे प्रभुणा रघूणाम् ॥

अथ सुग्रीवोऽपि दशग्रीवकुपितराघवावलोकनद्विगुणरणोत्साहः साहाय्यसमयमनुपालयन्नम्बुमिव सिन्धुमवधार्य धैर्यावगाढमतिरधिरूढत्रिकूटशृङ्गां लङ्कामभिगन्तुमङ्गदकुमुदनलनीलप्रमुखमपि समनीयद(ता)खिलमनीकम् ।

**End :**

अयोध्यामाजगाम रामचन्द्रः ।
साकेतं समुपेयिवान् सविनयैरासेवितो भ्रातृभिः
सुग्रीवप्रमुखानपि प्रियसखान् स्वे स्वे पदे स्थापयन् ।
स्वच्छन्दस्सुचिरं सुखान्यनुभवन् देव्या तया सतिया
रामः पालयतिस्म कीर्तिविभवैरामोदिनीं मेदिनीम् ॥
मूलाण्डाख्यमहाग्रहारमहितावासेन सङ्ख्यावतां
मूर्धन्येन विशारदेन विधुना श्रीसोमनाथोदधेः ।
प्राग्भोजोदितपञ्चकाण्डमहितानन्दे प्रबन्धे पुनः
काण्डो निर्मित एकचूतपतिना षष्ठोऽवि(पि) जीयाच्चिरम् ॥

**Colophon :**

इति भोजराजस्य चम्पुरामायणे एकाम्रनाथकविना पूरितं युद्धकाण्ड समाप्तम् ॥

---

R. No. 3313.

Paper. $10\frac{3}{4} \times 9\frac{3}{8}$ inches. Foll. 26. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Rāmakṛṣṇa Rājaguru, Dhārakōṭa, Ganjam district.

Fol. 26*a* is left blank.

शिवज्ञानविद्या.
ŚIVAJÑĀNAVIDYĀ.

A treatise on Śaivism dealing with the following subjects :—

१. मन्त्रप्रकाशनम्.
२. न्यायविधिक्रमः.
३. मन्त्रपरिग्रहः.
४. सदाचारव्रतम्.
५. मन्त्रविनियोगः.
६. प्रायश्चित्तानुष्ठानम्.
७. यजनविधानम्.
८. मन्त्रसिद्ध्यपायादिसाधारणोक्तिः.

Complete.

**Beginning :**

कैलासशिखरारूढं देवदेवं त्रिलोचनम् ।
प्रणिपत्याह गिरिजा विकसन्मुखपङ्कजा ॥
भगवन् देवदेवेश सर्वलोकमहेश्वर ।
पञ्चाक्षरस्य माहात्म्यं वक्तुमर्हस्यशेषतः ॥
इति तद्वचनं श्रुत्वा भगवान् स सदाशिवः ।
प्रोवाच भावगम्भीरं स्मितं कृत्वा महेश्वरीम् ॥

* * * *

यकारस्थं वियत्तस्मात्पञ्चभूतात्मको मनुः ।
पञ्चभूतात्मकं सर्वं जगत्स्थावरजङ्गमम् ॥
तस्माद्भूतपतिः प्रोक्तः शिवो विश्वस्य कारणम् ।
शिवज्ञानमिदं देवि ज्ञात्वा निर्वाणमृच्छति ॥

**Colophon :**

इति श्रीशिवज्ञानविद्यायां स्वप्रणीतायां मन्त्रप्रकाशनं नाम प्रथमोऽध्यायः ॥

**End :**

शिवपञ्चाक्षरज्ञानाज्ज्ञानवान् पुरुषो भवेत् ।
एषा शिवज्ञानविद्या विद्यानां परमा मता ॥
त्वत्प्रश्नतो मया प्रोक्ता न देया यस्य कस्यचित् ।
गोपनीयतमा विद्या विद्या सर्वमयी शिवा ॥

* * * *

इत्युक्त्वा विरराघासौ भगवान् भूतभावनः ।
सा सुस्मितमुखी तस्थौ तत्पादार्पितलोचना ॥

**Colophon:**

इति श्रीशिवज्ञानविद्यायां स्वप्रणीतायां साधारणोक्तिर्नाम अष्टमोऽध्यायः ॥ समाप्तश्चायं ग्रन्थः ॥

इति श्रीशिवज्ञानविद्या समाप्ता ॥

---

R. No. 3314.

Paper. 10⅝ × 9⅜ inches. Foll. 12. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Tirunārāyaṇa Rajah of Kōṭṭakkal, Malabar district.

Fol. 12 is left blank.

ब्रह्माद्वैतप्रकाशिका.

BRAHMĀDVAITAPRAKĀŚIKĀ.

A treatise narrating the leading principles of the Advaita-Vēdānta. By Bhāvavāgīśvara.

Complete.

**Beginning:**

निरवधिसुखसंविन्नित्यनिर्लेपमेकं
कृतकगुणविहीनं पावनं तथ्यमेव ।
अजरमजमनन्तं स्वप्रकाशं स्ववेद्यं
निरुपममखिलस्थं ब्रह्म पश्यन्ति धीराः ॥
पश्यन्ति परमात्मानं परमात्मानमात्मना ।
आत्मन्येवात्मविद्वांसो निरस्तद्वैतभावनाः ॥
इच्छाद्युपाधिविधुरः अहं कर्तेति मन्यते ।
स एवोपाधिनिर्मुक्तः परमात्मा न संशयः ॥

**End:**

शरणमेकमनादिमनामयं सकललोकविकल्पनकारणम् ।
अखिलतत्त्ववरा विधिमीश्वरं विश परं पुरुषं हृदये सदा ॥
इति मुषितविशेषं सर्वमद्वैतशास्त्रं
कतिपयपदवाक्यैर्ब्रह्मसिद्धान्तसारम् ।

अनुदिनममुना हृन्नेत्रमुन्मील्य पश्ये-
त्परमपुरुषमन्तर्ज्ञानसिद्धान्तजेन ॥
वेदान्तसारमुद्धृत्य योगानुष्ठानसिद्धये ।
इयं सङ्क्षेपतः प्रोक्ता ब्रह्माद्वैतप्रकाशिका ॥

**Colophon:**

इति श्रीमाधववागीश्वरविरचिता ब्रह्माद्वैतप्रकाशिका समाप्ता ॥

---

R. No. 3315.

Paper. 10¾ × 9½ inches. Foll. 170. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Pudiyakōvilakam Śrīmānavēda Rajah, Calicut.

सिद्धान्तचन्द्रिकाव्याख्या.

SIDDHĀNTACANDRIKĀVYĀKHYĀ.

Same work as that described under No. 4332 of the D.C.S. MSS., Vol. VIII; but with different readings and with the additional stanzas which are given below. By Gaṅgādharavājapēyadīkṣita.

Contains up to end of the Buddhinirūpaṇa only.

**Beginning:**

यो ध्वान्तमान्तरमुदस्यति बोधदीपा-
लोकेन संयमवतां दयया प्रसन्नः ।
चिन्मुद्रया कलितपाणिरसौ स देवो
गेही वटद्रुमतलेन ममान्तरस्तु ॥
वक्त्रे दिव्या वाहिनी कन्धरायां वाचां देवी कल्पवृक्षः कटाक्षे ।
शम्भुश्च व्याचक्षते चित्तवर्त्ती येषां युक्तं विश्वरूपेन्द्रनाम ॥
तेषां पादाम्बुजं नत्वा गङ्गाधरसुधीमणिः ।
सिद्धान्तचन्द्रिकाव्याख्यां तनोति विदुषां मुदे ॥

* * * *

**Colophon:**

इति सिद्धान्तचन्द्रिकाव्याख्यायां गङ्गाधरवाजपेयदीक्षितविरचितायां पर-
त्वापरत्वनिरूपणं समाप्तम् ॥

**End:**

प्रमायां गुणहेतुत्वोपवर्णनस्य फलमाह—अत एवेति । अतश्शब्दार्थ-

माह्—ज्ञानेति । ज्ञानसामान्यसामग्री आत्ममनोयोगादिः । तदतिरिक्तो यो विशेषणवद्विशेष्येन्द्रियसन्निकर्षादिलक्षणगुणः । तज्जन्यतेत्यर्थः ॥

**Colophon:**

इति सिद्धान्तचन्द्रिकाव्याख्यायां गङ्गाधरवाजपेयदीक्षितविरचितायां बुद्धिनिरूपणं समाप्तम् ॥

---

R. No. **3316.**

Paper. 10⅜ × 9⅜ inches. Foll. 72. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Nārāyaṇa-Nambūdirippāḍ, Kūṭalūr-mana, Narēri, Tritala, Malabar district.

शब्दकौमुदी.

ŚABDAKAUMUDĪ.

Similar to the work described under No. 1354 of the D.C.S. MSS., Vol. III. By Śokkanātha.

Contains up to the end of Samāsāśrayavidhi only.

**Beginning:**

सोमास्कन्दं शिवं नत्वा पाणिन्यादिमुनीश्वरान् ।
गुरूंश्च तुष्ट्यै विष्णोः कलये शब्दकौमुदीम् ॥

अ इ उ ण्, ऋ ऌ क्, ए ओ ङ्, ऐ औ च्, हयवरट्, लण्, ञमङणनम्, झभञ्, घढधष्, जबगडदश्, खफछठथचटतव्, कपय्, शषसर् हल्—इत्यणादिसंज्ञार्थानि सूत्राणि । हकारादिष्वकार उच्चारणार्थः । लकारे त्वकारोऽनुनासिक इति प्रतिज्ञायते । प्रतिज्ञया हि समधिगम्यं पाणिनीयानामानुनासिक्यम् । हलन्त्यमित्यस्य द्विरावृत्तिः । हलन्त्यम् । हलिति सूत्रेऽन्त्यमित्संज्ञं स्यात् ।

* * * *

**Colophon:**

इति शोक्कनाथकृतौ शब्दकौमुद्यां स्त्रीप्रत्ययाः ॥

**End:**

सुषामादिषु च । शोभनं सामास्य सुषामा, सुषेधः (षन्धिः) इत्यादि । आकृतिगणः । एति संज्ञायामगात् । सस्य मूर्धन्यादेशः स्यात् संज्ञायाम् । हरिषेणः रोहिणीषेणः । नकारात्परस्य तु विष्वक्सेनः ।

**Colophon:**

इति समासाश्रयविधयः ॥

R. No. 3317.

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 96. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920-21 from a MS. of Dhanyamrāju Sūryabhagavānuḍu Gāru, Vizianagram, Vizagapatam district.

पराशरसंहिता.

PARĀŚARASAṀHITĀ.

Same work as that described under No. 7911 of the D.C.S. MS. Vol. XV, wherein see for the beginning.

Date of transcription:—Wednesday, the 13th day of the bright fortnight of the lunar month Śrāvaṇa in the year Saumya.

Contains the Paṭalas 94 to 120 as given below:—

९४. हनुमदष्टोत्तरशतनामस्तोत्रकथनम्.
९५. हनुमदष्टोत्तरशतनामावलिः.
९६. वीरहनुमन्मालामन्त्रप्रकारकथनम्.
९७. हनुमत्पताकाप्रभावकथनम्.
९८. मन्त्रोद्धारमन्त्रमाहात्म्यादिवर्णनम्.
९९. मन्त्रनित्यप्रकारकथनम्.
१००. मन्त्ररहस्यत्रयकथनम्.
१०१. पञ्चाक्षरीद्वादशाक्षरीप्रभावकथनम्.
१०२. हनुमदन्तरिक्षस्थितिस्तुतिप्रभावकथनम्.
१०३. भीषणोग्रहनुमन्मालामन्त्रप्रभावकथनम्.
१०४. प्रसूतिविषयमालामन्त्रकथनम्.
१०५. शृङ्खलाबन्धविमोचनमालामन्त्रकथनम्.
१०६. त्रयोदशाक्षरीप्रभावकथनम्.
१०७. एकादशाक्षरीप्रभावकथनम्.
१०८. सीतासनहनुमत्प्रभावकथनम्.
१०९. पिण्डीकाक्षरविद्यावासचरित्रकथनम्.
११०. नीलाद्रिप्रभावकथनम्.
१११. रामदासत्वप्रकारकथनम्.
११२. हनुमद्विश्वरूपप्रदर्शनकथनम्.
११३. मृतसंजीविनीविद्याकथनम्.
११४. मृतसञ्जीविनीविद्याप्रभावकथनम्.
११५. शृङ्खलाबन्धमोचकमन्त्रप्रयोगः.
११६. कालकूटविषहरहनुमन्मन्त्रप्रभावः.
११७. सर्वमन्त्रनिर्वीर्यत्वकथनम्.
११८. हुङ्कारहनुमन्मन्त्रप्रभावकथनम्.
११९. हुङ्कारहनुमन्मन्त्रोद्धारकथनम्.
१२०. हनुमत्पूजार्थमन्त्ररहस्यकथनम्.

**End:**

शिरत्रयं महाभीमं नेत्रषट्कविराजितम् ।
हनूमन्तमहं वन्दे द्वात्रिंशद्भुजधारिणम् ॥
शिरत्रयविभीषणं विलसमानवक्त्राश्रितं
षडीक्षणविशङ्कटं घनतरोग्रबालायुधम् ।
सहस्रभुजमण्डलं सकलसी(वा)त संहारकं
सहङ्कृति हनूमतो हृदि भजामि रूपं महत ॥

**Colophon:**

इति श्रीपराशरसंहितायां पञ्चमुखहनुमन्मन्त्रविवरणे पराशरमैत्रेयसंवाद विंशत्युत्तरशत(तम): पटलस्समाप्तः ॥

---

R. No. **3318**.

Paper. 10¾ × 9¾ inches. Foll. 14. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Vāsudēvanambūdiri, Attuppurattu-mana, Ottapālam.

व्युत्पत्तिवादव्याख्या.

VYUTPATTIVĀDAVYĀKHYĀ.

A commentary on Gadādhara's Vyutpattivāda which work has been described under No. 4290 of the D.C.S. MSS., Vol. VIII. By Vigraham Dēśikācārya of Vaṅgīśa family.

Contains the Prathamāvibhakti incomplete.

**Beginning:**

श्रीमत्पद्म(द्म)तरस्तीरभु(भू)विभूषणविभ्रणा(महा)म् ।
वन्दे वेङ्कटशैलेन्द्रज्योया(जायां)शुकपुरीश्वरीम् ॥
वागी(वङ्गी)शवंशजनुषा(विदुषा) श्रीदेशिकाभिधा[ने]नजुषा ।
व्युत्पत्तिवादवाणीगूढार्थाः प्रायशः प्रकाश्यन्ते ॥

अभेदतदतिरिक्तसंसर्गकशाब्दबोधप्रकारं सपरिकरमुपपादयितुकामस्तदुपपादनौपयिकविशेषजिज्ञासोत्थापनाय प्रथमतः सामान्यनिर्देशमातनुते—शाब्दबोध इति । सप्तम्या निरूपितत्वमर्थः । तस्याश्रयतत्त्व(तास)म्बन्धेन भासधात्वर्थविषयतायामन्वयः । प्रत्यक्षे भासते अनुमितौ भासत इत्यादौ तथा

दर्शनात् । एकपदार्थ इति सप्तम्या विशेष्यत्वमर्थः । अपरपदार्थस्येति षष्ठ्याः प्रकारत्वमर्थः ।

* * * *

**Colophon:**

इति देशिकाचार्यविरचितसमानवचनकत्वक्रोडः समाप्तः ॥

**End:**

प्रतियोगितायाः प्रकारतानिवेशाच्चान्वयितावच्छेदकप्रमात्वावच्छिन्नप्रतियोगितादानावश्यकतया च प्रमावृत्तिप्रतियोगितात्वेन शाब्दतावच्छिन्नप्रतियोगितालाभः.

---

R. No. 3319.

Paper. 10⅞ × 9⅜ inches. Foll. 70. Lines, 20 in a page. Dēvanāgari Good.

Transcribed in 1920-21 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State

Fol. 70 is left blank.

न्यायसुधाव्याख्या.

NYĀYASUDHĀVYĀKHYĀ.

A commentary on the Nyāyasudhā also called Anuvyākhyānaṭīkā which work has been described under No. 4820 of the D.C.S. MSS., Vol. X.

This commentary is called Pradīpa.

Breaks off in the third Sūtra of the III Pāda in the first Adhyāya (ending with the words प्रतिक्षिपति— नेति । तेषामसर्वविषयत्वादित्यर्थः) ॥

**Beginning:**

विश्वोत्पत्तिनिमित्तमात्मनिहितस्वान्तात्मदत्ताभयं
तत्तद्भूतहिताहिताहितमतिध्वस्तेहितानीहितम् ।
सच्छास्त्रप्रमितामितोत्तमगुणं धात्रादिदेवस्तुतं
लक्ष्मीवल्लभमच्युतं धृतिमयं दोषातिदूरं नुमः ॥
निराकृतासन्मतमोहजालो निवारितायोग्यजनप्रचारः ।
स्थिरीकृताशेषयथार्थबोधः चकास्तु नश्चेतसि पूर्णबोधः ॥
गूढभावानुभाष्यस्य व्याख्या न्यायसुधाभिधा ।
तदर्थप्रत्ययार्थोऽयं प्रदीपस्तन्यते मया ॥

टीकाकारश्शास्त्रादावनुष्ठेयं शिष्टाचारमनुतिष्ठति—श्रियः पत्य इत्यादिभिष्षड्भिश्श्लोकैः । यत्कार्यमुद्दिश्य मङ्गलाचरणं कृतं तन्निर्दिशति—श्रीमदिति । देवतागुरुप्रसादपूर्वत्वान्नात्र ग्रन्थेऽनादरः कार्य इत्याह—न शब्दाब्धाविति ।

* * * *

परिहारप्रणाल्या न केवलमर्थवादबलादोङ्कारस्य प्रथमसूत्रावयवत्वं समवेतार्थत्वात् अपीति न सन्देह—इत्याह—वक्ष्यमाणेति । एवं च मङ्गलाचारादप्युपपन्नं ब्रह्मसूत्राणां व्याख्येयत्वमिति सिद्धम् ।

अथातो ब्रह्मजिज्ञासा इति शास्त्रे प्रेक्षावत्प्रवृत्त्यर्थं प्रयोजनादिप्रतिपादकं सूत्रं तदर्थपरं भाष्यं चानर्थकमित्याक्षिपति ।

**End:**

आदिपदेन कालान्तरभावियागादिबोधकागमादिर्वोपादीयते । यावन्ति प्रमेयाणि तद्विषयत्वं ज्ञेयाव्यभिचारित्वमिति पक्षं प्रतिक्षिपति—नेति । तेषामसर्वविषयत्वादित्यर्थः.

---

## R. No. 3320.

Paper. 10⅜ × 9⅝ inches. Foll. 23. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920–21 from a MS. of the Sanskrit Library, Tiruppanattura, Cochin State.

(*a*) व्याघ्रालयेशशतकम्.

### VYĀGHRĀLAYĒSAŚATAKAM.

Foll. 1*a*—11*a*. Foll. 11*b* and 12 are left blank.

A centum of stanzas in praise of God Vyāghrālayēśa worshipped at Vaikam, a celebrated place near Tiruppaṇattura in Travancore.

Complete.

**Beginning:**

चित्रं कालस्य शक्त्यापशिथिलभुवनैश्वर्यमुद्रा समिन्द्धे
यत्र त्रैलोक्यनाथः पथि पथिकजनाराधनार्थं कपाली ।
पुत्रः श्रीषण्मुखश्चोत्तरभुवि भगवान् वासुदेवश्च शैवं
सत्रं किं वर्ण्यते तच्छिव शिव शिवलोकायते व्याघ्रदेशः ॥

सङ्केते योजनाभिस्तिसृभिरभिमते शङ्करस्य प्रसिद्धे
सन्त्यद्यापि प्रतिष्ठाः शतमवहरमष्टोत्तरं देवतानाम् ।
सङ्ख्या नास्ति द्विजानां सदनमिह सहस्राधिकं यत्र सर्वे
सन्तुष्यन्त्याशु तं द्रागखिलभयहरं व्याघ्रदेशं प्रपद्ये ॥

**End:**

वेदे शास्त्रे पुराणादिषु च बहुविधं वर्ण्य(र्ण्य)ते वस्तु नाम्ना
भेदेनाभिन्नमेकं यदिह हरिहरब्रह्मशक्रादयोऽमी ।
ये देवास्ते तदंशाः किमु पुनरपरे कृष्णरामार्जुनाद्याः
मोदायोदेतु तत्त्वं मनसि तदनिशं व्याघ्रगेहस्थितं मे ॥
गात्रं कैलासगोत्रप्रभवमपि हतं यस्य शास्त्रेण नेत्रं
श्रोत्रं वेदेन लूनं रसनमपि पुराणेन नूनं क सोऽहम् ।
स्तोत्रं काहो पवित्रं परतरभगवद्भक्तिमाहात्म्यपाली-
पात्रं व्याघ्रालयाधीश्वरशतकमिदं कस्य काव्यं न जाने ॥

---

Transcribed in 1920–21 from a MS. of M.R.Ry. A. M. Malayappiḷḷai Kavirāyar, Āḻvārtirunagari, Tinnevelly district.

(b) श्रीरामशतकम्.

ŚRĪRĀMAŚATAKAM.

Foll. 13a–23a. Fol. 23b is left blank.

Similar to the work described under R. No. 2625(a) ante.

**Beginning:**

आपादचूडमतिसुन्दरदिव्यगात्रं
श्रीपादरेणुहृतगौतमदारशापम् ।
कोपातिरक्तनयनक्षुभिताम्बुराशिं
भूपालसूनुमवलोकय रामचन्द्रम् ॥
कोदण्डकोटिविनिवेशितबाहुदण्ड-
माखण्डलाद्यमरपातितपुष्पवर्षम् ।
आयोधनक्षितिरजःपरिधूसराङ्ग-
मव्याच्चिरं रघुपतेरवसन्नशत्रोः ॥

End

ये श्रुव(शृण्व)न्ति पठन्ति रामचरितं ये भाग्यवन्तस्सदा
धीरोदात्तरघूत्तमस्य चरणौ ध्यायन्ति ये मानसे ।
ये कुर्वन्ति समस्तधर्मनिचयं रामस्य सुप्रीतये
तेषां सर्वमनोरथान् वितनुते साक्षाद्रघूणां पतिः ॥
रामं रामानुजं सीतां भरतं भरतानुजम् ।
सुग्रीवं वायुसूनुं च प्रणमामि पुनः पुनः ॥
यन्नामधेयं म्रियमाण आतुरः पतन् स(स्ख)लन्वाप्यवशो गृणन्नरः ।
विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यन्ति न (हि) तं कलौ जनाः ॥

**Colophon:**

श्रीरामशतकं सम्पूर्णम् ॥

---

R. No. 3321.

Paper. 10¾ × 9⅛ inches. Foll. 38. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Periyanambi Tirumālikai Śrīnivāsācārya Avargal, Āḻvārtirunagari.

अलङ्कारग्रन्थः.

ALAṄKĀRAGRANTHAḤ.

A portion probably from a big treatise on poetics and rhetoric. This portion contains the following subjects and extract corresponds up to a certain extent with the Pratāparudrīya.

| I. नाटकप्रकरणम्. | II. रसप्रकरणम्. |
|---|---|
| १. नवरससरणिः. | ३. नायिकाभेदसरणिः. |
| २. नायकगुणसरणिः. | ४. तृतीयपुरुषार्थफलसाधकसरणिः. |

Incomplete and in disorder.

Name of the scribe: Gōpālasamudram Śivarāmaśāstrin; date of transcription, 22nd day of the solar month Vaiyāsi.

**Beginning:**

अथ नाट्यप्रधानानि (नि)रूप्यन्ते—

चतुर्विधैरभिनयैस्साविकाङ्गिकपूर्वकैः ।
धीरोदात्ताद्यवस्थानुकृतिर्नाट्यरसाश्रयम् ॥
भावाश्रयं तु नृत्तं स्यान् नृत्यं ताललयाश्रयम् ।

मधुरोद्धतभेदेन तद्द्वयं द्विविधं पुनः ॥
लास्यताण्डवरूपेण नाटकाद्युपकारकम् ।
वस्तुनेतृरसास्तेषां रूपकाणां हि भेदकाः ॥

स्तु त्रिविधम्—प्रख्यातमुत्पाद्यं मिश्रं चेति । तथोक्तं दशरूपके

* * * *

इति नवरससरणिः ॥

* * * *

इति साधारणनायकगुणसरणिः ॥

End:

नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः ॥
निद्राच्छेदस्तनुता विषय . वृत्तिस्त्रपानाशः ।
उन्मादो मूर्छा च स्मृतिरित्येव स्मरदशैव स्युः ॥

**Colophon:**

इति चतुर्विधपुरुषार्थसाधकप्रकरणे तृतीयपुरुषार्थफलसाधकसरणिः ॥

The scribe adds—

गोपालसमुद्रे शिवरामशास्त्रिणा लिखितम् ॥

---

R. No. **3322.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 156. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. S. Ayyāśāstrigal, Nallapalli, Chennamangalam, Cochin State.

चन्द्रनाडी.

CANDRANĀḌĪ.

Foll. 1a—154b.

Similar to the work described under R. No. 853(a) ante and Nos. 13775 and 13776 of the D.C.S. MSS., Vol. XXIV. This is also called Dēvakēralam.

Wants the beginning and the end.

**Beginning:**

कमलाकरांशके चन्द्रे स्वक्षेत्रे गुरुसंयुते ।
तुरीयकालसञ्जातो विष्णुभक्तकुलोद्भवः ॥
सोदरभ्रातृहीनश्च भाग्यवंशे प्रसूतिमान् ।
चन्द्रारूढाधिपे शुक्रे मीने गुरुनिरीक्षिते ॥
महानदीप्रान्त्य(न्त)देशे जननं वा समादिशेत् ।
पूर्वभागे च नगरे प्रख्यातपुरजन्मभाक् ॥

**End:**

पितृमातृसुखं चेति तन्मूलात्सौख्यमादिशेत् ।
सम्प्रदाये तथा चेति पितृप्राबल्यमुत्तमम् ।
तन्मूला.

Foll. 154*b* and 155*a* contain the Grahapādajātivarṇalakṣaṇa. Foll. 155*b* and 156 are left blank.

---

## R. No. 3323.

Paper. 10⅞ × 9⅞ inches. Foll. 236. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. K. C. Valiyarāja Avargal, Kottakal, Malabar district.

Foll. 235*b* and 236 are left blank.

### महाभारतव्याख्या.
### MAHĀBHĀRATAVYĀKHYĀ.

A commentary on the Mahābhārata which work has been described under Nos. 1915—1957 of the D.C.S. MSS., Vol. IV, Part I: by Mahānandapūrṇa.

The commentary on the Paulōmaparvan is called कृष्णगीता, on the Āstikaparvan विषमपादिका, and on the Saṁbhavaparvan व्याख्यानरत्नावली.

Contains the Ādiparvan complete.

**Beginning:**

कृष्णगीतां नाम पौलोमव्याख्यां सम्प्रदायक्रमेणार्थप्रदर्शनाय कर्तुमारभते —पूर्वमवान्तरतमो नाम विष्णुमूर्तिर्हिमवद्गिरिगुहायां स्वस्मिन्नाश्रमे तपस्तप्त्वा

. . . . . . . . द्वापरावसाने भविष्यद्वृत्तान्तवेत्ता भूत्वा कृष्णद्वैपाय(न)-नामा भगवान् पराशराद्यमुनाद्वीपे सत्यवत्याम(परो)ऽवान्तरतमस्यावतारोऽपि लोकानुग्रहणार्थाय । तथा खलु भगवतो हि प्रवृत्तिः ।

* * * *

तान्येव भावोपहतानि कल्कम् इति । तान्येव प्रस्तुतानि मोक्षसाधनान्येतान्येव भावोपहतानि कल्कम् । ब्रह्मार्पणबुद्ध्या विहितानि चेत् कल्कसमानानि कृतानि संसारबन्धमूलादि(नी)त्यर्थः ॥

**Colophon:**

इति श्रीमहाभारतव्याख्यायां कृष्णगीतानुक्रमणिर्नाम प्रथमोऽध्यायः ॥

* * * *

परित्राणमित्यादिना । भीरूणां सर्पाणां ब्राह्मणात्परित्राणं विहितं चेत्यन्वयः । विहितं कल्पितमतः कारणादिदं कर्मोक्तयाः ॥

**Colophon:**

इति पौलोमव्याख्यायां कृष्णगीतायाषष्टमोऽध्यायः ॥ पौलोमव्याख्या समाप्ता ॥

* * * *

तेन हेतुना मन्त्रग्रामो न फलितवानित्युक्तम् । तमित्यादिना चोद्यपरिहारः क्रियते । उपसङ्गृह्याभिवाद्य वीतमोहास्तस्वचित्तास्तुप्रसन्नात्मरूपा भृशं भक्तिमन्तस्तवानुग्रहादिच्छानुरूपेण वर्तन्तो(माना)वयम् । असितादय आस्तिकशिष्याश्श्रुत्वा सर्पेभ्यो भयं न विद्यत इति सम्बन्धः ॥

**Colophon:**

इत्यास्तिकविषमदीपिकायामेकचत्वारिंशोऽध्यायः ॥ समाप्तमिदमास्तिकम् ॥

**End:**

विश्वकर्मा चित्रकर्ता नानुकुर्यात् सदृशं न कुर्यात् । अभिप्रायान् कौशलभेदान् वेद्यं विद्वांसं पूर्वदेवं हितं प्रीतिकरं युक्तमुपपन्नं स्वजनशामि(मी)नि षन्धुविषयाणि वचनानि श्रावितवान् । विपक्तिवचनव्यत्ययः । तस्युषा परः । गजश्रेष्ठचितं धूर्येतां चलयेताम् ॥

**Colophon:**

इति श्रीमहानन्दपूर्णविरचितायां व्याख्यानरत्नावल्यां सम्भवपर्वणि त्र्युत्तरशततमोऽध्यायः ॥

इत्यादिपर्वव्याख्या समाप्ता ॥

## R. No. 3324.

Paper. 10¾ × 9⅜ inches. Foll. 66. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of the Naḍuvil Maṭham, Trichur, Cochin State.

### (a) बृहद्वाक्यवृत्तिः.
### BṚHADVĀKYAVṚTTIḤ.

An elaborate exposition of the Mahāvākyas (i.e.), of the more important passages of authority, in the Vēdas and the Upaniṣads.

Complete.

**Beginning:**

विदधद्विचित्रजगदुद्भवस्थितिप्रलयप्रवेशनियमक्रियाः स्फुटम् ।
वितरत्वदभ्रसुखबोधविग्रहः स्फुटमस्मदिष्टफलवृद्धिमच्युतः ॥

अथ तत्त्वमस्यादिमहावाक्यार्थं व्याख्यास्यामः—

कस्मै प्रयोजकज्ञानवते विधिवदुपसन्नाय साधनचतुष्टयसम्पन्नाय श्रवणमनननिदिध्यासनविधिप्रेरिताय मुख्याधिकारिणे किमिदं प्रयोजकज्ञानमध्ययनप्रभवं विज्ञानमिति ब्रूमः ।

* * * *

तत्र प्रथमं तत्त्वंपदयोस्सामानाधिकरण्यं भवति । ततः पदार्थयोः परस्परविशेषणविशेष्यभावेनान्वयः । ततो मुख्यार्थे तात्पर्याभावाद्वाक्यार्थान्वयितत्त्वंपदार्थलक्षणा । ततो लक्षितपदार्थोपादानेन महावाक्यार्थप्रतिपत्तिः । इत्थं वाक्यार्थप्रतिपत्तिक्रमः ।

**End:**

श्रुतीनां चान्यविषयत्वाद्विदुषः प्राणानुत्क्रमणवचनाच्च न देशान्तरे कालान्तरे । किं तु इहैव ज्ञानसमकाल एवेति सिद्धम् ॥

---

### (b) बृहद्वाक्यवृत्तिव्याख्या.
### BṚHADVĀKYAVṚTTIVYĀKHYĀ.

Foll. 9a—31b. Fol. 32 is left blank.

A commentary on the Bṛhadvākyavṛtti, described under subdivision (a) of the same number: by Ānandajñāna, disciple of Śuddhānanda.

Complete.

**Beginning:**

> एकान्तेनागमान्ता य वदन्ति पुरुषोत्तमम् ।
> तं वन्दे प्रत्यगात्मानं सुखबोधैकविग्रहम् ॥
> यत्पदाम्भोजसम्भूतपांसवो विश्वसेतवः ।
> गुरवे रचये तस्मै नमस्यां करुणापते ॥

प्रारिप्सिताया बृहत्या वाक्यवृत्तेरविघ्नपरिसमाप्त्यादिसिद्धये परदेवतातत्त्वानुस्मरणपुरस्सरमाशीर्वादरूपं मङ्गलाचरणं मुखतस्सम्पादयन्नर्थादपेक्षितमनुबन्धचतुष्टयं च सूचयति विदधदित्यादिना । अच्युतो जन्मविनाशादिविकारविरही कूटस्थो भगवानस्माकं मुमुक्षूणामपेक्षितां फलवृत्ति मोक्षहेतुभूततत्त्वज्ञाननिष्ठां स्फुटं सम्भावनाविपरीतभावनाप्रतिबन्धप्रध्वंसपूर्वकं वितरतु प्रयच्छत्विति सम्बन्धः ।

**End:**

इहेति वर्तमानो विद्वद्देहो गृह्यते । अत्र ब्रह्म समश्नुत इति हि श्रूयते । तदेवमधिकारिणो महावाक्यव्याख्यानं साङ्गोपाङ्गं सफलं सिद्धमित्युपसंहरतीति सिद्धमिति ॥

> बृहत्या बृहती वृत्तिर्वाक्यवृत्तेरियं कृता ।
> ददती कृतिना मोदमर्पिता पुरुषोत्तमे ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचितं बृहद्वाक्यवृत्तिविवरणं समाप्तम् ॥

---

(c) वाक्यवृत्तिः, वाक्यदीपिकासहिता।

VĀKYAVṚTTIḤ WITH VĀKYADĪPIKĀ.

Foll. 33*a*—39*a*. Foll. 39*b* and 40 are left blank.

A commentary on the Vākyavṛtti of Śaṅkarācārya which work has been described under No. 4719 of the D.C.S. MSS., Vol. IX: by Ānandasvarūpa-Bhaṭṭāraka, disciple of Ānandātmapūjyapāda.

Complete.

**Beginning:**

> सच्चित्सुखात्मकं ब्रह्म यद्धयग्रीवविग्रहम् ।
> दयानिधि नमस्तस्मै परस्मै विदधीमहि ॥

ब्रह्मणो निर्मृष्टनिखिलद्वैतानुषङ्गप्रत्यक्चैतन्यैकतानस्य मुखतः प्रतिपादनमशक्यमिति जगत्प्रकृतित्वं समारोप्य तद्रूपेण प्रथमं लक्षयति—

सर्गस्थितिप्रलयहेतुमचिन्त्यशक्तिं विश्वेश्वरं विदितविश्वमनन्तमूर्तिम् ।
निर्मुक्तबन्धनमपारसुखाम्बुराशिं श्रीवल्लभं विमलबोधघनं नमामि ॥
यस्य प्रसादादहमेव विष्णुर्मय्येव सर्वं परिकल्पितं च ।
इत्थं विजानामि सदात्मरूपं तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥
तापत्रयार्कसन्तप्तः कश्चिदुद्विग्नमानसः ।
शमादिसाधनोपेतस्सद्गुरुं परिपृच्छति ॥

अनेनाधिकारिविषयसम्बन्धप्रयोजनान्युक्तानि द्रष्टव्यानि । तत्रोभयकुलविशुद्धः कश्चिद् द्विजवरो नित्यानित्यविवेकादिसाधनचतुष्टयसम्पन्नस्संसारासारतातत्त्वदर्शनान्निर्विण्णचेताः करुणापूर्णहृदयं ब्रह्मविदमुपसमेत्य

अनन्तपारं बहु वेदितव्यमल्पश्च कालो बहवश्च विघ्नाः ।
यत्सारभूतं तदुपासितव्यं हंसो यथा क्षीरमिवाम्बुराशिम् ॥

इत्यमुमर्थं हृदि निधायाल्पायासेन ज्ञातुं शक्यं निर्वाणैकप्रयोजनं यत्तन्मे संक्षिप्य भगवन् ब्रूहीति विज्ञापयामास—

अनायासेन येनास्मान्मुच्येयं भवबन्धनात् ।
तन्मे सङ्क्षिप्य भगवन् केवलं कृपया वद ॥

**End:**

पद्यत इति पदं ज्ञानगम्यमित्येतत् अज्ञानकल्पनायास्सवासनायास्तत्त्वापरोक्ष्येण दाहात् कैवल्यं प्रतिपद्यते एकलो(तोऽ)वशिष्यते । ब्रह्मप्राप्तिरप्यारोप्यमाप्तिवत्प्राप्तप्राप्तिरेव बोधमात्रस्य ब्रह्मत्वादित्यशेषमतिमङ्गलम् ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्यानन्दात्मपूज्यपादशिष्यश्रीमदानन्दस्वरूपभट्टारकविरचिता वाक्यवृत्तिव्याख्या वाक्यदीपिका समाप्ता ॥

---

(*d*) वाक्यवृत्तिव्याख्या.

**VĀKYAVṚTTIVYĀKHYĀ.**

**Foll. 41*a*—45*b*. Fol. 46 is left blank.**

Similar to the commentary described under subdivision (c) of this number ante.

Almost complete.

**Beginning:**

ऐदम्पर्येण वेदान्ता यद्वदन्ति परं पदम् ।
तदहं ब्रह्म निर्भेदं सत्यादिपदलक्षितम् ॥

मुमुक्षुजनानुजिघृक्षया वाक्यवृत्तिसंज्ञितं प्रकरणं प्रारभमाणः विघ्नोपशमनादिप्रयोजनसिद्धये परदेवताप्रणामरूपं मङ्गलाचरणं मुखतस्संम्पादयन् प्रकरणप्रारम्भापेक्षितमनुबन्धत्रयं च विषयसम्बन्धप्रयोजनलक्षणं संक्षिप्य प्रतिपत्तिसौकर्यार्थं कथयति—सर्गेति । तत्र श्रीवल्लभं नमामीति सम्बध्यते । श्रियो विद्याशक्तेः वल्लभः तदाधारः परमात्मा तं प्रति वाङ्मनःकायप्रणिधानेन प्रह्वीभूतोऽस्मीत्यर्थः । तस्य तटस्थलक्षणमाह—सर्गस्थितिप्रलयहेतुमिति ।

**End:**

कैवल्यस्य प्रेप्सितत्वं सूचयति—निरस्तेति । न च गतिपूर्वकं तस्य प्राप्यत्वं, सर्वत्र व्याप्तत्वादित्याह—वैष्णवमिति । हैरण्यगर्भादिपदापेक्षया वैलक्षण्यं वक्तुं परममित्युक्तं तस्य प्राणि(थि)कत्वाविवक्षया (?) ॥

---

(e) पञ्चीकरणविवरणम्.

PAÑCĪKARAṆAVIVARAṆAM.

Foll. 47a—48b. Foll. 49 and 50 are left blank.

A commentary on the Pañcīkaraṇa of Śaṅkarācārya: by Prajñānānandayati, pupil of Prajñānasvarūpēndra.

Complete.

**Beginning:**

ब्रह्मा विष्णुश्च रुद्रश्च यद्यदादिसमाश्रयात् ।
तत्तदादि विना योऽहं सोऽहमस्मि हरिः परः ॥

मुमुक्षूणां श्रद्दधानानां प्रणवमहावाक्यादेव मोक्षसाधनं ब्रह्मात्मैकत्वविज्ञानमुत्पा(त्पिपा)दयिषुरोंका(ङ्का)रमहावाक्यव्याख्यानाय पञ्चीकृताख्यमुपदेशप्रकरणं भगवानाचार्य उपचिक्षेप । तत्रापि वाक्यार्थविज्ञानस्य पदार्थपूर्वकत्वात्प्रथममोङ्कारगतवाक्यगताकारोकारमकारार्थमात्रपदार्थान् क्रमेणाह—पञ्चीकृतेत्यादिना । चिदानन्दाद्वयोऽनादिनिधन ईश्वरः अनिर्वाच्यमायोपाधिवशात् प्राणिनां कर्मफलभोगार्थमाकाशादिक्रमेण पञ्च महाभूतानि ससर्ज ।

* * * *

इत्येवं पञ्चीकर्तारमीश्वरं मङ्गलाचरणत्वेन मनसि कृत्वाकारार्थमाह—पञ्चीकृतेति । तानि पञ्चीकृतपञ्चमहाभूतानि तत्कार्यं गिरिसरित्समुद्रचतुर्विधभूतग्रामशरीरादि विराडित्युच्यते ।

**End:**

आत्मनि परमानन्दाद्वयब्रह्माभिन्ने मनसोऽमनीभावस्समाधिमहावाक्यार्थज्ञानपरिपाकहेतुरित्यर्थः । समाधिग्रहणं श्रवणादेरुपलक्षणार्थम् ॥

अहमेवाद्वयेशानस्सर्वारम्भफलं परम् ।
नमस्यामि भजे कं वा किमर्थं कस्य शासनात् ॥
प्रज्ञानानन्दयतिना कृता शिष्यहितामिता ।
पञ्चीकृतस्य विवृतिस्सन्तोषं कुरुतास्सताम् ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यप्रज्ञानस्वरूपेण(न्द्र)शिष्येण श्रीप्रज्ञानानन्दभगवता कृतं शिष्यहितं पञ्चीकृतविवरणं समाप्तम् ॥

---

(*f*) हस्तामलकश्लोकाः, सव्याख्याः.

HASTĀMALAKAŚLOKĀḤ WITH COMMENTARY.

Foll. 51*a*—55*b*. Fol. 56 is left blank.

A commentary on the Hastāmalakaślōka of Hastāmalakācārya, pupil of Śaṅkarācārya, which work has been described under No. 4779 of the D.C.S. MSS., Vol. IX.

Almost complete.

**Beginning:**

निमित्तं मनश्चक्षुरादिप्रवृत्तौ . . . स नित्योपलब्धिस्वरूपोऽहमात्मा ॥

* * * *

उपाधौ यथा(भेदता सन्म)णीनां . . . (तथा) चक्षु(त्वं) तवापीह विष्णो ॥

सच्चिदानन्दरूपाय हरये परमात्मने ।
स्वानुभूतिप्रमाणाय प्रतीच साक्षिणे नमः ॥

अनेकजन्मानुष्ठितपुण्यकर्मवशादुत्पन्नबुद्धिशुद्धि साधनचतुष्टयसम्पन्नं गर्भस्थवामदेववत्पूर्वाधीतस्मृतमहावाक्यसमुत्थितसम्यग्बुध्द्यनुरोधेन

* * * *

निरुपाधिचैतन्यस्वभावस्सन् प्रत्यगात्मा परमात्मैवेति दर्शयति—निमित्तमित्यादिना । तत्र प्रत्यगात्माहंशब्दार्थः परमात्मा चात्मशब्दार्थः तयोरहमा-

स्मपदयोरहमात्मेति सामानाधिकरण्यात्प्रत्यग्ब्रह्मणोरैक्यं वाक्यार्थं कथयति । त्वंपदवाच्यमर्थं निर्दिशति—निमित्तमिति । कामादिबीजमन्तःकरणं मनश्शब्देनोच्यते ।

End :

तस्मात्त्वमपि सर्वविक्रियारहितोऽद्वितीयनित्यशुद्धबुद्धमुक्तस्वभावस्सन् परमात्मैवेत्यर्थः । तदेवमाचार्यवदन्यस्यापि तत्त्वसाक्षात्कारे मोक्षो(भवतीति-सिद्धम्) ।

---

(g) हरिपादपूजार्या.

HARIPĀDAPŪJĀRYĀ.

Foll. 57*a*—65*a*. Foll. 65*b* and 66 are left blank.

A collection of stanzas in the Āryā metre in praise and worship of the feet of Lord Viṣṇu : by Nārāyaṇa.

Complete.

**Beginning :**

भवितव्यमविस्त्रब्धैरस्मिन् सांसारिके विभूतिलवे ।
विमृशद्भिर्मतिमद्भिर्गहनं संसारचक्रपरिवर्तम् ॥
इह बत दुर्लभलाभास्सुखलेशा भङ्गिनश्शरीरभृताम्
तेऽपि च दुःखायन्ते दुःखानि पुनस्स्वतोऽपि दुःखानि ।
जन्(नि)मृतिगर्भस्थितिभिर्नरकैश्च पुनः पुनः प्रतप्तानाम् ।
का नु गतिर्जन्तूनामज्ञानतमोऽभिभूतचिन्तानाम् ॥

* * * *

विहरति चित्तसरोजे हरिचरणाम्भोजरेणुभृङ्गकुलम् ।
यस्य स धन्यः पुरुषो यो वा को वा स एव मान्यश्च ॥

**End :**

हरिचरणाम्बुजपूजा सेयं गदिता क्रमेण मुक्तिफला ॥
तद्भावापत्तिफला तत्पूजा तेन तेन रूपेण ।
. . . . . . . . . प्रपञ्चिता सा तथैव विज्ञेया ॥
गुह्यतमं ज्ञानमिदं देयं देवे गुरौ च भक्तिमते ।
उपसन्नाय यथावन्मुमुक्षवे श्रद्धयान्वितायैव ॥
नारायणाङ्घ्रिपूजापरेण नारायणेन रचितेयम् ।
आर्याचार्यपराणां चरणसरोजप्रणामशरणेन ॥

R. No. 3325.

Paper. 10⅝ × 9⅝ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa Nambiyar, Iriñjālakkoda, Malabar district.

Foll. 1—18b. Foll. 19 and 20 are left blank.

अलङ्कारसर्वस्वम्.

ALAṄKĀRASARVASVAM.

Same work as that described under No. 12798 of the D.C.S. MSS., Vol. XXII, and with slight difference in the beginning.

Contains the Nāyakaprakaraṇa, Kāvyaprakaraṇa, Guṇaprakaraṇa and Rasaprakaraṇa only.

**Beginning:**

श्रीमद्गोपालदेवस्य हर्षोपाध्यायैःकथि(यकल्पि)तम् ।
तदलङ्कारसर्वस्वं सतां कर्णोत्सवोऽस्तु वः ॥
श्रीमद्गोपालदेवस्य यशो भूषयितुं कृतम् ।
उपाध्यायकृतिस्सेयं स्वयत्नेन विभूष्यते ॥

सूक्त्यैव न प्रतिपाद्यमहिम्ना प्रबन्धमहत्ता—

कवेरल्पापि वाग्वृत्तिर्विद्वत्कर्णावतंसिनी ।
नायको यदि वर्ण्येत लोकोत्तरगुणोत्तरः ॥
पूर्वशास्त्रानुसारेण कतिचित्कथिता इमे ।
तस्य गोपालदेवस्य गुणा वाचामगोचराः ॥

**End:**

अथ शृङ्गारादिरसानां गुणाधिदैवते उच्यन्ते(च्येते)—

शृङ्गार उत्पलाहारः विष्णुस्तस्याधिदेवता ।
रौद्रो जयो रक्तवर्णो रौद्रस्तस्याधिदेवता ॥

* * * *

अद्भुतः कनकच्छायो ब्रह्मा तस्याधिदेवता ।
शान्तस्स्फटिकवर्णस्स्यात्परं ब्रह्माधिदेवता ॥

**Colophon:**

इत्यलङ्कारसर्वस्वे रसप्रकरणं समाप्तम् ॥

---

R. No. 3326.

Paper. 10⅜ × 9⅝ inches. Foll. 22. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. K. Kōdaṇḍarāmayyagāru, Bobbili.

(a) सूर्यशतकम्.

SŪRYAŚATAKAM.

Foll. 1a—11b. Fol. 12 is left blank.

Similar to the work described under No. 11314 of the D.C.S. MSS., Vol. XIX. By Kōdaṇḍarāmārya.

Complete.

**Beginning**:

श्रिया समेतं श्रितपारिजातं वियत्प्रदीपं विततप्रताय(प)म् ।
नयप्रचारं नगराजधीरं दयासमुद्रं तपनं नमामि ॥
तेजोमये मण्डलमध्यभागे सिंहासने रत्नमयेऽब्जपीठे ।
आसीनमुग्रायुधदीप्तहस्तं छायापतिं चण्डकरं नमामि ॥

**End**:

त्वत्सुन्दरीभ्यां भवदाश्रयेभ्यस्त्वत्पुत्रिकाभ्यस्तव सेवकेभ्यः ।
तुभ्यं हरे सौम्यमते दयालो जगद्रते मङ्गलमस्तु नित्यम् ॥
कोदण्डरामार्यकृतस्तुतिं ये पठन्ति शृण्वन्ति च भक्तियुक्ताः ।
तेषां श्रियं पुत्रकलत्रसौख्यं स्वर्गं च मोक्षं दिननाथ देहि ॥

---

Transcribed in 19 0-21 from a MS. of the Śrīrāmatīrtham Library, Śrīrāmatīrtham, Vizagapatam district.

(b) अष्टश्लोकी, सव्याख्या.

AṢṬAŚLŌKĪ WITH COMMENTARY.

Foll. 13a—18b.

Similar to the work described under R. No. 2 ante.

Complete.

**Beginning**:

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥
अखिलचिदचिदीशः श्रीनिवासो दयालु-
स्स्वपदकमलयुग्मप्रापकस्संश्रितानाम् ।
निगमशिखरगम्यो नित्यमव्याजबन्धुः
विलसतु मम चित्ते वेङ्कटेशो मुकुन्दः ॥
अकारार्थो विष्णुर्जगदुदयरक्षाप्रलयकृ-
न्मकारार्थो जीवस्तदुपकरणं वैष्णवमिदम् ।

उकारोऽनन्याहं नियमयति सम्बन्धमनयोः
त्रयीसाररूयात्मा प्रणव इममर्थं समदिशत् ॥

अकारार्थ इति । उदयश्च रक्षा च प्रलयश्चोदयरक्षाप्रलयाः । जगतामुदयरक्षाप्रलयास्तान्करोतीति जगदुदयरक्षाप्रलयकृत् । जगदुत्पत्ति(रक्षण)संहारकर्तेत्यर्थः । व्याप्नोतीति विष्णुः विषॢ व्याप्ताविति धातोर्विष्णुर्व्यापनशीलः श्रियः पतिः ।

**End:**

मत्प्राप्तिप्रतिबन्धकानामविद्यादीनां पुण्यपापरूपपूर्वोत्तराघाणां क्षयमश्लेषविनाशरूपवासनानिवृत्तिं कर्तासीति करिष्यसीति दृढोऽसि अ(ध्य)वसायनिष्ठया निर्भयोऽस्मीत्यर्थः ॥

---

(c) महालक्ष्मीपूजाविधिः.
MAHĀLAKṢMĪPŪJĀVIDHIḤ.

Foll. 19a—22a. Fol. 22b is left blank.

Similar to the work described under No. 8674 of the D.C.S. MSS. Vol. XVI.

Complete.

**Beginning:**

अथ ध्याये महादेवीं लक्ष्मीं सम्पत्प्रदायिनीम् ।
पद्मासने पद्मकरे पद्मगर्भसमुद्भवे ॥
त्रैलोक्यपूजिते लक्ष्मीः यावत्पूजावसानकम् ।
अस्मिन् पद्मासने रम्ये विष्णुवक्षस्स्थलालये ॥
उपविश्य मया क्लृ(प्तां) पूजां स्वीकुरु ते नमः ।
एवं ध्यात्वा महालक्ष्मीमुपचारैः प्रपूजयेत् ॥

**End:**

इन्दिरा प्रतिगृह्णाति इन्दिरा वै ददाति च ।
इन्दिरा तार(रि)का नित्यमिन्दिरायै नमो नमः ॥
इति प्रार्थना ॥

**Colophon:**

महालक्ष्मी[नारायण] पूजाविधानं सम्पूर्णम् ॥

R. No. 3327.

Paper. 10⅜ × 9¼ inches. Foll. 46. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Rāmakṛṣṇa Rājugāru, Dhārākōṭa, Ganjam district.

शैवचिन्तामणिः.

ŚAIVACINTĀMAṆIḤ.

A treatise on Śaiva Philosophy dealing with the following topics:—

१. वैशगङ्गादिरुद्राक्षधारणान्तकथनम्.
२. शिवसन्ध्यादिमातृकान्तकथनम्.
३. श्रीकण्ठादिपञ्चाक्षरोद्धारणान्तकथनम्.
४. अन्तर्योगादिमुद्रान्तकथनम्.
५. ध्यानासनोपचाराद्युद्वासनान्तकथनम्.
६. परमन्यासाद्येकाम्रवनवर्णनम्.
७. काशीहिमवद्वर्णनाविनियोगाग्निसंस्कारादिकथनम्.
८. दर्शनादिशिवरात्रिव्रतकथनम्.

Complete in eight Paṭalas.

**Beginning:**

अज्ञानतिमिरान्धस्य ( . . . ) तस्मै श्रीगुरवे नमः ॥

प्रालेयामलमिन्दुकुन्दधवलं गोक्षीरफेनप्रभं
भस्माभ्यक्तमनङ्गदेहदहनज्वालावलीलोचनम् ।
ब्रह्मेन्द्रादिमरुद्गणैः स्तुतिपरैरभ्यर्चितं योगिभिः
वन्देऽहं सकलं कलङ्करहितं शम्भोर्मुखं पश्चिमम् ॥

* * * *

प्रणम्यादौ महादेवं हिमवत्तनयापतिम् ।
शैवचिन्तामणिग्रन्थो वक्ष्यते मुक्तये नृणाम् ॥

देवं नत्वा करिवरमुखं सर्वविघ्नापहारं
सर्वेशानं त्रिणयनमथो चन्द्रखण्डाङ्कितं च ।
वक्ष्ये शैवागमजलनिधिं ज्ञानमीशानतत्त्व-
प्रादुर्भावं वृजिनकलहं शैवचिन्तामणिं च ॥
आदिध्येयो गुरुरपि तथा देवदेवो यथासौ
सद्यो मन्त्रसकलपददः सेवनीयस्तु तुल्यः ॥
एषां भेदं वचनमनसा यः करोतीह मन्त्री
यावद्भूमी रविरुडुपतिस्तावदेवापि सिद्धः ॥

* * * *

रुद्राक्षान् कण्ठदेशे दशनपरिमितान् मस्तके विंशतिर्द्वे
षट् षट् कर्णावतंसे करयुगलगतान् द्वादश द्वादशैव ।
बाह्वोरिन्दोः कलाभिः पृथग(पि)विदितो ह्येकमेकं शिखायां
वक्षस्यष्टाधिकं यः कलयति शतकं स स्वयं नीलकण्ठः ॥

**Colophon:**

इतिश्रीशिवीचिन्तामणौ वैराग्याद्रुद्राक्षधारणान्तकथनं नाम प्रथमः पटलः ॥

**End:**

श्री श्रीनिवासपदपङ्कजदिव्यगन्धमत्तालिना शिवपदाम्बुजसेवकेन ।
निर्मुक्तये गिरिशमानसमानवानां ग्रन्थोऽयमारचित आशु च निर्मलोऽयम् ॥
कृत्वैतं शिवशास्त्रसंशयभिदं श्रीशैवचिन्तामणिं
शम्भोः पादसरोरुहेऽम्बुजभवाद्यैः सेविते हर्षतः ।
शास्त्राग्रे(विन्यस्ता) शिवभक्तिरेव हृदये पुण्या सदा निश्चला
यां कृत्वामरसिद्धमानवव[ा]राः प्रापुः पदं शाश्वतम् ॥

**Colophon:**

इति श्रीशिवचिन्तामणौ दर्शनादिशिवरात्रिव्रतकथनं नामाष्टमः पटलः ॥
समाप्तश्चायं ग्रन्थः ॥

---

R. No. **3328.**

Paper. $10\frac{3}{4} \times 8\frac{1}{4}$ inches. Foll. 204. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920-21 from a MS. of the Maharaja's Library, Vizianagram.

Foll. 1*b*, 202*b* and 204*b* are left blank.

लघुशब्देन्दुशेखरव्याख्या—शब्देन्दुचन्द्रिका.

LAGHUŚABDĒNDUŚĒKHARAVYĀKHYĀ: ŚABDĒNDU-CANDRIKĀ.

A commentary on the Laghuśabdēnduśēkhara (of Nāgēśvarabhaṭṭa), which work has been described under No. 1414 of the D.C.S. MSS., Vol. III: by Viśvanātha, son of Subbammadēvī and Vīrarāghava of Daṇḍibhaṭṭakula. The author was the disciple of Bāla Śāstrin of

Ranade family who was himself the disciple of Karlekar Rājārāma Śāstrin who was the disciple of Aṣṭaputra Kāśinātha Śāstrin. At the end of the work, the commentator states that he was assisted by one Lakṣmīpati. The author was patrionized by king Ānandagajapati of Vizianagar and salutes Patañjali, the author of the Mahābhāṣya.

Complete.

**Beginning:**

श्रीमत्सत्यव्रतदीनानुकम्प्यन्नदातृमहाराजानन्दगजपार्तभूपसकाशात् दण्डिभट्टोपाख्यान्नपूर्णानामकधर्मपत्नीसहितविश्वनाथशर्मा स्ववंश्यानां पुरुषाणामुपनयनमारभ्य विवाहपर्यन्तं दशराजतमुद्रा

* * * *

मासिकं प्रार्थयन् शब्देन्दुचन्द्रिकां रचयामास । तेन च भवानीविश्वेश्वरौ गुरुवररानदे - इत्युपाख्यबालशास्त्रिपरमगुरुकार्लेकरोपाख्यराजारामशास्त्रियतीन्द्रप्रपरमगुरु · अष्टपुत्रोपाख्यकाशीनाथशास्त्रिणश्च प्रीयन्ताम् । ते च श्रीमदन्नदात्रानन्दगजपतिभूपतेराचन्द्रार्कं वंशाभिवृद्धिमखण्डराज्याभिवृद्धिं च वितरन्त्विति शम् ।

सत्यव्रताख्य विजयनगराधिपसत्तमात् ।
पूस्पाट्वंशसम्भूतादानन्दाल्लब्धवृत्तिना ॥
श्रीदण्डिभट्टकुलजवीरराघवसूनुना ।
बालशास्त्रिपदाम्भोजध्यानसंलब्धबुद्धिना ॥
पतञ्जलिं नमस्कृत्य मुदा शब्देन्दुचन्द्रिका ।
क्रियते विश्वनाथेन श्रीविश्वेश्वरतुष्टये ॥

चिकीर्षितग्रन्थनिर्विघ्नपरिसमाप्तये कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—पातञ्जल इति । ननु सर्वभाष्येष्वस्यैव भाष्यस्य महत्त्वान्महाभाष्यपदेनैव पातञ्जलभाष्यलाभेन पातञ्जल इति विशेषणोपादानं व्यर्थमिति चेन्न । महात्मनां नामोच्चारणमपि मङ्गलाय भवतीति मङ्गलार्थं तदुपादानात् । के चित्तु विनापि चं समुच्चय इति पातञ्जले योगशास्त्रे महाभाष्ये व्याकरणभाष्ये च कृतभूरिपरिश्रम इत्याहुः । यत्तु भूरिपरिश्रमस्सन् महाभाष्यरूपे जले पातमकृतेति तन्न । एवं हि अश्लीलप्रतीत्या काव्यस्य दुष्टत्वापत्तेः ।

**End:**

यस्मात्पञ्चमी विभक्त इत्यनेन पञ्चमी विभक्तिः कर्तव्या । तत्प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियो(गिवाचिनः) पञ्चमी भवतीत्यर्थः । नक्षत्रे च लुपि । तत्र नक्षत्रपदं नक्षत्रयुक्तचन्द्रमःपरम् । इति सप्तमी ॥

सत्यव्रताच्च विजयनगराधिपसत्तमात् ।
पूत्पाठिवंशसम्भूतादानन्दाल्लब्धवृत्तिना ॥
बालशास्त्रिपदाम्भोजध्यानसंलब्धबुद्धिना ।
श्रीदण्डिभट्टकुलजवीरराघवसूनुना ॥
सुन्दम्मदेवीपुत्रेण नवीनप्रक्रियायुता ।
लक्ष्मीपतेश्च साहाय्यात्तुशालान्तिकवासिना ॥
रचिता विश्वनाथेन मुदा शब्देन्दुचन्द्रिका ।
प्रीत्यै भयाद्भगवतोर्भवानीविश्वनाथयोः ॥

---

## R. No. 3329.

Paper. 10⅜ × 8⅜ inches. Foll. 10. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippād, Kūṭalūr-mana, Narari, Trittala, Malabar district.

Foll 9b—10 are left blank.

### ध्वन्यालोकलोचनव्याख्या.

### DHVANYĀLŌKALŌCANAVYĀKHYĀ.

Similar to the work described under R. No. 2630 ante.

Contains the first Uddyōta incomplete.

**Beginning:**

इदानीं व्याचिख्यासितस्य ग्रन्थस्य निगूढमप्यर्थं करबदरकल्पं करिष्यन्नाद्यकारिकायास्तावत् करिष्यमाणध्वनिस्वरूपप्रवचनप्रतिज्ञामात्रपरत्वेन मन्दफलत्वमाशङ्क्य श्रोतृप्रवृत्तिविषयतया शास्त्रादवश्यवक्तव्यस्याभिधेयादेरयजातस्य श्रुत्यर्थाभ्यां प्रतिपादकत्वं प्रकटयति—अथ प्राधान्येनेत्यादिना । अथशब्दोऽयं कारिकाव्याख्यानोपक्रमं द्योतयितुं प्रयुज्यते मङ्गलार्थं वा ।

**End :**

अपूर्वोऽयं ध्वनिर्नाम काव्यात्माङ्गीचिकीर्षितः ।
स किं चारुत्वहेतुर्वा चारुत्वस्थानमेव वा ॥

* * * *

चारुत्वस्थानभावे वा तद्धेतुत्वेऽथवाश्रिते ।
ध्वनेरपूर्वतासिद्धेस्तदुदीर्णा यदि त्वयम् ॥ इति ।

एवं ध्वनेश्चारुत्वस्थानभावासम्भवेन चारुत्वहेतुतामापाद्य गुणालङ्काराव्यतिरिक्तताप्रसञ्जनेनाभावः समर्थितः । अन्ये ब्रूयुरित्यादिना त्वनापाद्यापि समर्थ्यत इति विवेकं दर्शयंस्तदौचित्येना.

---

R. No. **3330.**

Paper. 10⅞ × 9⅛ inches. Foll. 84. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of the Library of the Dēśamaṅgalam-manakkal, Dēśamaṅgalam, Cochin State.

Fol. 84 is left blank.

## दिनकरीयव्याख्या—विषमार्थप्रकाशिका.

## DINAKARĪYAVYĀKHYĀ: VIṢAMĀRTHAPRAKĀŚIKĀ.

A commentary on the Dinakarīya (of Mahādēva), which work has been described under No. 3955 of the D.C.S. MSS., Vol. VIII: by Raṅganātha, who wrote this work at the request of his disciple.

Complete.

**Beginning :**

श्रीरङ्गनाथसुधिया कृता शिष्यार्थनावशात् ।
मुक्तावलीप्रकाशस्य विषमार्थप्रकाशिका ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तये मङ्गलमाचरन् शिष्यशिक्षायै ग्रन्थतो निबन्धनं कुर्वन् शिष्यावधानाय प्रतिजानीते—लक्ष्मीपादयुगमिति । ग्रन्थादौ कृतस्य मङ्गलस्य तन्निबन्धनस्य च वैयर्थ्यमाशङ्क्य फलं दर्शयति तत्रेति । ग्रन्थादावित्यर्थः । कृतस्येत्यनेनान्वयः । ननु साक्षाद्वाचकशब्दस्यैव विशेष्यतायास्सिद्धतया लीलेत्यादिसमस्तपदस्य विशेष्यत्वकथनमसङ्गतमत आह—वस्तुतस्त्विति ।

**End:**

प्रतिबन्धकस्य सत्त्वादिति । एककालीनस्वकर्तृकत्वस्वभिन्नकर्तृकत्वयोरविरोधेऽपि भिन्नकालीनयोस्तयोर्विरोधेन स्वकर्तृकत्वविशिष्टो धर्मी स्वभिन्नकर्तृकत्वविशिष्टाद्धर्मिणो भिन्न इति भेदावगाहिप्रत्ययस्याभेदावगाहिप्रत्ययप्रतिबन्धकस्य सत्त्वादिति भावः ॥

श्रीरङ्गनाथसुधिया कृता शिष्यार्थनावशात् ।
मुक्तावलीप्रकाशस्य विषमार्थप्रकाशिका ॥

**Colophon:**

समाप्तश्चायं ग्रन्थः ॥

---

R. No. **3331.**

Paper. 10¾ × 9¼ inches. Foll. 181. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of the Raja of Chirakkal, Malabar district.

Fol. 84 is left blank.

**क्रियासारः.**

KRIYĀSĀRAḤ.

Similar to the work described under No. 5438 of the D.C.S. MSS., Vol. XI.

Breaks off in the 69th Paṭala.

**Beginning:**

गणेशानं नमस्कृत्य देवं नारायणं प्रभुम् ।
क्रियासारं प्रवक्ष्यामि सामंसार्धं (?) समासतः ॥
सर्वशास्त्रेषु निर्दिष्टं सर्वं सङ्गृह्य लक्षणम् ।
विशेषतस्तु यत्तेषु प्रोक्तं वक्ष्ये यथात(थ)थम् ॥
एकस्मिन्नागमे नोक्ताः प्रायशस्सकलाः क्रियाः ।
तस्मात्संक्षेपतो वक्ष्ये साधकानां हिताय वै ॥
या याः क्रियागमेषूक्ताः स्थापनार्थं मनीषिभिः ।
तां तामादाय सन्धाय वक्ष्ये कर्म यथाक्रमम् ॥
प्रतिष्ठां कर्तुकामो यः सम्पूर्णं वरयेद्गुरुम् ।
तन्त्रज्ञं दीक्षितं भक्तमभिषिक्तं समूर्तिपम् ॥

• • • •

**Colophon :**

इति क्रियासारे प्रथमः पटलः ॥

**End :**

सम्पातेन च संस्पृश्य पूजयेद्भक्तिसंयुतः ।
नृत्तगीताट्टहासैश्च न चेद्रात्रिमनिद्रया ॥

**Colophon :**

इति क्रियासारे अष्टषष्ठितमः पटलः ॥

ततः प्रभाते विमले स्नात्वा जप्त्वा यथाविधि ।
स्थापनाय ततो यत्नं कुर्याद्गुरुरतन्द्रितः ॥

* * * *

सम्यक् छास्त्रमसी(धी)त्य(त)त्र गदितं ज्ञात्वैव कार्याः क्रिया
ये कुर्वन्ति ततोऽन्यथा परिभवा(वं) यान्त्येव ते कर्मिणः ।
शास्त्रे तावदधीतिनोऽल्पमतयोऽनुष्ठानकाले स्मृतिं
ये नेच्छन्ति न तेषु सद्गुहवरा सङ्क्षेपरूपा कृतिः ॥
सम्यक्तत्र महोदधेस्सुविशदं सङ्कीर्णसर्वक्रिया-
सारं रत्नमिवोद्धृतं गुरुपदाम्भोजप्रसादान्मया ।
तेनालं क्रियता जनो विमलधीस्सद्भिर्गुणैरन्वितैः
गोप्योऽयं खलसन्निधेर्मतिमुताप्यालोचनीयं सदा ॥

---

R. No. 3332.

Paper. 10⅝ × 9⅜ inches. Foll 114. Lines, 20 in a page. Dêvanâgari. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Kuñjukṛṣṇa Vāriyar, Sanskrit Paṇḍit, Zamorin College, Calicut.

### वक्रोक्तिजीवितम्.

### VAKRŌKTIJĪVITAM.

A work on poetics in four Unmēṣas by Kunta!a who quotes Ānandavardhana and is quoted by Mahima. Quotations from the following hitherto unknown works are given, viz., the Tāpasavatsararāja of Anaṅgaharṣa, Abhirāmajānakī (probably the author's own drama) and Pādatāḍitaka of Śyāmalaka.

Deals with the following subjects, in elucidating what may be called the deviationistic method of literary criticism :

१. काव्यसामान्यविशेषलक्षणम्.
२. पदवक्रिमवाच्यवाचकवक्रता-
विच्छित्तिप्रकारकथनम्.
३. वाक्यवक्रिमवस्तुवक्रिमनिरूप -
णम्.
४. प्रकरणवक्रतानिरूपणम्.

**Beginning:**

जगत्त्रितयवैचित्र्यचित्रकर्मविधायिनम् ।
शिवं शक्तिपरिस्पन्दमात्रोपकरणं नुमः ॥
यथातत्त्वं विवेच्यन्ते भावास्त्रैलोक्यवर्तिनः ।
यदि तन्नाद्भुतं न . . देव रक्ता हि किंशुकाः ॥
ख्याप्यते प्रौढिमात्रं तत्परमार्थो न तादृशः ।
इत्यसत्तर्कसन्दर्भे स्वतन्त्रेऽप्यकृतादरः ॥
साहित्यार्थसुधासिन्धोस्सारमुन्मीलयाम्यहम् ।
येन द्वितयमप्येतत्तत्त्वनिर्मितिलक्षणम् ॥
तद्विदामद्भुतामोदचमत्कारं विधास्यति ।

ग्रन्थारम्भेऽभिमतदेवतानमस्कारकरणं समाचारः। तस्मात्तदेव तावदुपक्रमते—

वन्दे कवीन्द्रवक्त्रेन्दुलास्यमन्दिरनर्तकीम् ।
देवीं सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलाम् ॥ इति

देवीं वन्दे देवतां स्तौमि । कामित्याह—कवीन्द्रवक्त्रेन्दुलास्यमन्दिरनर्तकीम् । कवीन्द्राः कविप्रवरास्तेषां वक्त्रेन्दुर्मुखचन्द्रः स एव लास्यमन्दिरं नाट्यवेश्म तत्र नर्तकीं लासिकाम् ।

* * * *

वाग्रूपां सरस्वतीं स्तौमीति । एवं नमस्कृत्येनां वक्तव्य(वि)षयभूतान्य-भिधानाभिधेयप्रयोजनान्यासूत्रयति—

वाचो विषयनैयत्यमुत्पादयितुमुच्यते ।
आदिवाक्येऽभिधानादिर्निर्मितेर्मानसूत्रवत् ॥
लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये ।
काव्यस्यायमलङ्कारः कोऽप्यपूर्वो विधीयते ॥

अलङ्कारो विधीयते अलङ्करणं क्रियते । कस्य काव्यस्य ।

* * * *

**Colophon:**

इति राजानककुन्तलविरचिते वक्रोक्तिजीविते काव्यालङ्कारे प्रथमोन्मेषः ॥

**End:**

लावण्यादयः सौन्दर्यप्रभृतयः पदन्यासः पादविक्षेपः विलासः सृष्टाविशेषो विच्छित्तिः वाक्यता । भूषणानि कव्यमिधावचनं इशो भागः प्रबन्धसारथ्यमिति ॥

**Colophon:**

इति कुन्तलविरचिते वक्रोक्तिजीविते तृतीय उन्मेषः समाप्तः ॥

एवं सकलसाहित्यसर्वस्वकल्पवाक्यतावक्रताप्रकारप्रकाशनानन्तरमवसरप्राप्तां प्रकरणवक्रतामवतारयति—

यत्र निर्यन्त्रणोत्साहपरिस्पन्दोपशोभिनी ।
व्यावृत्तिर्व्यवहर्तॄणां स्वाशयोल्लेखशालिनी ॥

* * * *

प्रबन्धस्य वक्रिमाणमावहति । यथा नागानन्दे—तत्र दुर्निवारवैरादपि वैनतेयान्तकादेक . . . सकलकारुणिकचूडामणिः शङ्खचूडजीमूतवाहनो निजदेहदानादभिरक्षन्न केवलं तत्कुल . . . . . . . . . . . . . . . . पदेशिनां महाकवि.

R. No. 3333.

Paper. 10¾ × 9¼ inches. Foll. 48 Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Gōdavarmarāja, Cranganore, Cochin State.

Fol. 48*b* is left blank.

## नैषधव्याख्या.

## NAIṢADHAVYĀKHYĀ.

A commentary on the Naiṣadha, which work has been described under No. 11543 of the D.C.S. MSS., Vol. XX: by Śrīdharapaṇḍitēndra, pupil of Makkibhaṭṭa. The commentary is also called Śrīdharīya after the name of the commentator.

Contains the commentary on the Sargas two and five only; the commentary on the fifth being incomplete.

**Beginning:**

नमो गुणवतीनाथपादाम्भोजालिमौलये ।
मक्किभट्टाय गुरवे शास्त्राम्भोजालिहेलये ॥

शिखि(खि)मित्रयुगार्कशम्भुभिः पवनेन्द्वग्न्यनिलैस्सुवर्मलेति लक्षितलक्षणेन सुवर्मलावृत्तेन रचितोऽयं द्वितीयस्सर्गो व्याख्यायते—तत्रैवं क्ष्मापालुना नलेन परित्यक्तो हंसः सुमनस्कतया तच्छीलमवलोक्य तज्जातहर्षः स्वयमपि किंचि-

त्युपकर्तुकामः पुनर्नलकरमागत्य नलं वाक्यपाटवने परितोष्य महोपकारिणे तुभ्यं यथाशक्ति किञ्चित् प्रत्युपकरिष्यामीत्यभिधाय तदर्थं भैमीकथामुपक्षिप्य तस्याः कुशील(व)लावण्याद्यानुकूल्यं वर्णयित्वा सा

* * * *

हंसस्यानन्दातिशयमाह—अधिगत्येति । अथ विमोचनानन्तरं जगत्याः भूमेरधीश्वरात् पुरुपु(षे)द्भूतमात्ततो नलात् सकाशात् ।

* * * *

**Colophon:**

श्रीधरपण्डितेन्द्रविरचितायां नैषधचरितटीकायां श्रीधरीयाभिधानायां द्वितीयस्सर्गः ॥

नमो गुणवतीनाथपादाम्भोजालिहे(मौ)ळये ।
मकिभट्टाय गुरवे शास्त्राम्भोजालिहेळये ॥

स्वागतेति रनभा गुरुयुग्ममिति लक्षितलक्षणेन स्वागतावृत्तेन रचितः पञ्चमस्सर्गो व्याख्यायते—अथ भीमे स्वयंवरायोद्युक्ते सति इन्द्रो नारदमुखेन भैम्या लावण्यातिशयः(यं) प्रक्रान्तं स्वयंवरोत्सवं चाकर्ण्य स्वयमपि कामुकस्सन् कुण्डिनपुरं गन्तुमिच्छया वह्नियमवरुणैस्सार्धं धरातलमधिगत्य स्वीयां दूतीं भैमीं प्रति

* * * *

कथास्मिन् सर्गे निरूप्यते—तावन्नारदप्रस्थापनमाह—यावदिति ।

**End:**

तदेवाह—भङ्गी नश्वरः सङ्गमो यस्यास्सा । कुरङ्गदृक् स्त्री तस्यार्थे तत्प्रयोजने तत्कृते इति यावत् । कुरङ्गदृशोऽर्थं कुरङ्गदृगर्थम् । भङ्गी दूरदेशाननुवृ-

---

## R. No. 3334.

Paper. 10¾ × 9¼ inches. Foll. 16. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippād, Kūṭalūr-mana, Nareri, Trittala, Malabar district.

Foll. 15b and 16 are left blank.

**कारकतत्त्वम्.**

KĀRAKATATTVAM.

Similar to the work described under No. 3927 of the D.C.S. MSS., Vol. VIII. By Śēṣacakrapāṇipaṇḍita, pupil of Viśvēśvara, born in the Śēṣa family.

Complete.

**Beginning :**

साधयति नेह मानं देहविहीनं च येह जगदीशम् ।
सा मयि सेवकभावं प्राप्ते वाग्देवता दयताम् ॥
विरोधिनां तिरोधानक्षमो यस्य गिरां गणः ।
विश्वेश्वरगुरुं शेषवंशोत्तंसमहं भजे ॥

कारकतत्त्वं चिन्त्यते—तत्र वक्ष्यमाणापादानत्वाद्यन्यतम(त्व)म् । अपादानाद्यन्यतमत्वं सङ्केतविशेषसम्बन्धेन कारकशब्दो वा । कारकत्वं कारकव्यवहारविषयतावच्छेदकम् ; तदज्ञाने कारकव्यवहाराभावात् । तदुक्तं हरिणा—

सामान्यान्यभिधीयन्ते सत्ता वा तैर्विशेषिता ।
संज्ञाशब्दस्वरूपं वा प्रत्ययैस्त्वतलादिभिः ॥

**End :**

चैत्रेण स्थित इत्यत्र धात्वर्थे तृतीयार्थ आश्रयः उक्तसम्बन्धः प्रकृत्यर्थः तृतीयार्थेऽन्वेतीति पूर्ववदेव बोध इति । भवतश्च पदमित्यादौ षष्ठ्या अप्याश्रयोऽर्थः । बोधश्चोक्तरीत्यैवेति ध्येयम् ॥

**Colophon :**

इति शेषचक्रपाणिपण्डितविरचितं कारकतत्त्वं समाप्तम् ॥

---

R. No. **3335.**

Paper. 10¾ × 9¼ inches. Foll. 128. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920–21 from a MS. of the Sanskrit College, Tiruppanattura, Cochin State.

**प्रमाणसङ्ग्रहः.**

**PRAMĀṆASAṄGRAHAḤ.**

A collection of authoritative passages taken from various Purāṇas, Itihāsas, Smṛtis, etc: by Lakṣmaṇa, eldest son of Lakkaramantrin.

Deals with the following subjects. The procedure herein laid down is intended for Mādhvas.

१. सगुणप्रकरणम्.
२. साकारत्वप्रकरणम्.
३. परमात्मजीवभेदप्रकरणम्.
४. नारायणपदवाच्यत्वप्रकरणम्.
५. मोक्षप्रकरणम्.
६. जगत्सत्यत्वप्रकरणम्.

७. लक्ष्म्या ब्रह्माद्युत्तमत्वस्थापनम्.
८. यतिप्रशंसनम्.
९. वैष्णवलक्षणम्.
१०. जीवपराधीनकर्तृत्वम्.
११. तप्तमुद्रोर्ध्वपुण्ड्रधारणम्.
१२. द्वादशीनिर्णयः.
१३. मोक्षसाधनप्रकरणम्.
१४. हेयप्रकरणम्.
१५. यज्ञप्रकरणम्.

Complete.

**Beginning :**

वन्दे विधिशिवेन्द्रादिवृन्दारकगणार्चितम् ।
इन्दिरारमणं सान्द्रानन्दसौन्दर्यमन्दिरम् ॥
वेदव्यासाय हरये श्रीमध्वमुनये नमः ।
नमः पूर्वगुरुभ्योऽस्मद्गुरुभ्यश्च नमो नमः ॥
श्रीवादिराजशिष्येण पोष्येण हरिसेविना ।
तत्सम्पूज्यहयग्रीवप्रसादप्राप्तशक्तिना ॥
मया लक्करसङ्ख्यस्य मन्त्रिणो ज्येष्ठसूनुना ।
लक्ष(क्ष्म)णेन प्रमाणानां सङ्ग्रहोऽयं वितन्यते ॥
पुराणानां प्रमाणं हि चातुल्प(ल्य)कं पुरोदितम् ।
जनानामल्पबुद्धित्वात्तत्सर्वं न प्रवर्तते ॥
प्रवर्तमानो ह्यल्पोंऽशः सोपदेशे कचित् (कचित्) ।
अमूनि तद्गतान्येव वचनानि यथामति ॥
कानि चिद्भारतस्थानि हरिवंशगतानि च ।
सङ्गृह्यन्ते श्रीशमध्वगुरुप्रीत्यै सतां मुदे ॥

* * * *

हरेस्सर्वोत्तमत्वे विष्णुपुराणे ६ अध्याये पराशरः—

यथावत् कथितो देवैः ब्रह्मा प्राह ततः परम् ।
परावरेशं शरणं व्रजध्वमसुरार्न(र्द)नम् ॥
प्रधानपुंसोरुभयोः कारणं कार्यभूतयोः ।
प्रणतार्तिहरं विष्णुं स वः श्रेयो विधास्यति ॥

* * * *

पद्मपुराणे ३३ अ. रुद्रः—

कल्याणगुणवान् श्रीशस्सर्वकामफलप्रदः ।
योऽसौ निर्गुण इत्युक्तश्शास्त्रेषु जगदीश्वरः ॥

प्राकृतैर्हेयसंयुक्तैर्गुणैर्हीनत्वमुच्यते ।

**Colophon :**

इति सगुणप्रकरणम् ॥

**End :**

सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ।
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ॥

ज्ञानयज्ञस्य सर्वयज्ञोत्तमत्वे गीतायाम् ४ अ. भगवान्—

श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥

**Colophon :**

इति यज्ञप्रकरणम् ॥

इमं लक्ष्मर(ण)साल्योऽहं व्यदधां मानसद्रुहम् ।
तेन प्रीतो रमानाथः करं गृह्णातु मे हरिः ॥

* * * *

नाहं कविर्येन तूष्णीं कल्पयामि कपोलतः ।
यदस्ति मूले तद्दृष्ट्वा सङ्गृह्णामि पृथक् पृथक् ॥

---

R. No. 3336.

Paper. 10⅝ × 9¼ inches. Foll. 88. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of the Samsthānam Library, Bobbili.

भागवतव्याख्या—भागवतार्थतत्त्वदीपिका.

BHĀGAVATAVYĀKHYĀ : BHĀGAVATĀRTHATATTVA-DĪPIKĀ.

Same commentary as that described under R. No. 1525(*b*) ante.

Contains the first Skandha complete, but without the first two Adhyāyas.

**Beginning :**

अथाख्याहि हरेर्धीमन्नवतारकथाश्शुभा इति प्रश्नोत्तरया सूतेन भगवतोऽवतारास्सन्तीति तृतीयाध्याये प्रतिपाद्यते । अवताराश्च द्विविधाः—

अनुप्रवेशाववाराः स्वेन रूपेणावताराश्चेति । अकर्महेतुकत्वादुभयत्रावतारशब्दप्रयोगः । द्विविधानपि तान् वक्तुं तदुपयोगित्वेन प्रथमं चेतनमिश्रं प्रकृतिप्राकृतवस्तुजातमेकं शुद्धसत्त्वमयमपरं चेति रूपद्वयं भगवतोऽस्तीति विवक्षन् पूर्वं प्रकृतिप्राकृतात्मकरूपपरिग्रहमाह—जगृहे इति । भगवान् (पौरुषं) पुरुषसम्बन्धि । पुरुषाः क्षेत्रज्ञाः तन्मिश्रमित्यर्थः । षोडशकलमेकादशेन्द्रियाणि पञ्च महाभूतानि षोडशकलाः ता यस्मिन् तत् महदादिभिः महदहङ्कारपञ्चतन्मात्रैस्सम्भूतं रूपम् ।

* * * *

**Colophon:**

इति प्रथमस्कन्धव्याख्यायां तृतीयोऽध्यायः ॥

**End:**

एवमिति । राज्ञा परिक्षिता एवमहो अद्य वयमित्यादिकया श्लक्ष्णया गिरो(रा) वाचो(चा) आभाति अतः अभिमुखीकृतः । कृष्णश्च प्रत्यभाषत ॥

**Colophon:**

इति श्रीमद्भागवतव्याख्यायां भागवतार्थतत्त्वदीपिकायां प्रथमस्कन्धे एकोनविंशोऽध्यायः ॥ समाप्तश्चायं प्रथमस्कन्धः ॥

---

## R. No. 3337.

Paper. 10¾ × 9¼ inches. Foll. 28. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Danyamraju Sūryabhagavānuḍu Pantulu Gāru, Vizianagram.

Fol. 28 is left blank.

### गङ्गालहरी, सव्याख्या.

### GAṄGĀLAHARĪ WITH COMMENTARY.

A commentary on the Gaṅgālaharī also called Piyūṣalaharī, of Jagannātha, which is a eulogy addressed to the river Gaṅgā: by Dalapatirāma, son of Durgārāma, grandson of Gōvindarāma and pupil of Śrīkṛṣṇabhaṭṭa who was the son of Raṅganātha.

This commentary is called Bālabōdhinī and was written on Monday, the 12th day of the dark fortnight of the lunar month Vaiśākha in the year 1864.

Complete.

**Beginning:**

भागीरथी त्रिदशसेवितपादपद्मा
अज्जा(ब्जा)मृताभयकरी वरदाब्जहस्ता ।
मुक्ताविभूषणविराजितचारुदेहा
पापं विनाशयतु मे सुकृतप्रवाहा ॥
दुर्गाराममहं प्रणम्य पितरं गोविन्दरामात्मजं
साहित्यालयरङ्गनाथतनयं श्रीकृष्णभट्टं गुरुम् ।
टीकां बालमुदे करोमि विशदां गङ्गालहर्याः परां
तुष्यन्तु प्रतिभाजुषः चफ(प)लतां वीक्ष्यार्भकस्य स्फुटाम् ॥

अथ चिकीर्षितस्य पीयूषलहर्याख्यस्तवराजस्य निर्विघ्नपरिसमाप्तिकामनया जगन्नाथाभिधेयः पण्डितवर्यस्स्तवाधिष्ठात्री देवतां स्तौति—

समृद्धं सौभाग्यं सकलवसुधायाः किमपि त-
न्महैश्वर्यं लीलाजनितजगतः खण्डपरशोः ।
श्रुतीनां सर्वस्वं सुकृतमथ मूर्तं सुमनसां
सुधासौन्दर्यं ते सलिलमशिवं नश्शमयतु ॥

समृद्धेति । हे गङ्गे ते सलिलं जलं नोऽस्माकमशिवमकल्याणं शमयतु ।

**End:**

इमां पीयूषलहरीं जगन्नाथेन निर्मिताम् ।
यः पठेत्तस्य सर्वत्र जायन्ते जयसम्पदः ॥

इदानीं स्तोतृनामनिबन्धनपूर्वकं स्तोत्रपठनफलमाह—इमामुक्तलक्षणां पीयूषलक्षणामृतस्य लहरीं पीयूषलहरीम् । पठनकर्तॄणां मोक्षदायकत्वादक्षररूपायास्तु पीयूषलहरीत्वेनोपमानात् । जगन्नाथेन जगन्नाथनाम्ना कर्त्रा निर्मितां कृतां यः पुमान् पठेत्तस्य पुंसस्सर्वत्र सर्वकालं जयसम्पदः सर्वोत्कर्षसम्पदः जायन्ते उत्पद्यन्त इति शिवम् ॥

सम्प(संव)द्वेदरसे(स)द्विदन्तकुमिते(१८६४) वर्षे शुभे माधवे
मासे कृष्णदले शशाङ्कदिवसे श्रीद्वादशीसत्तिथौ ।
दुर्गारामतनूजनिर्दलपतिर्गङ्गालहर्यास्स्तुतेः
टीकां बालविबोधिनीं स निरगा(मा)द्भागीरथीप्रीतये ॥

**Colophon:**

इति श्रीदुर्गारामसूरिसूनुदलपतिरामविरचिता गङ्गालहरीटीका बाल-बोधिनी समाप्ता ॥

---

R. No. **3338.**

Paper. 10¾ × 9¾ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of the Naḍuvil-Maṭham, Trichur, Cochin State.

Foll. 21*b* and 22 are left blank.

वेदान्तार्थसारसङ्ग्रहः.

VĒDĀNTĀRTHASĀRASAṄGRAHAḤ.

Similar to the work described under R. No. 110(*d*) ante. By Sītārāmavidvat.

Complete.

**Beginning:**

प्रणताज्ञानतिमिरभास्वन्तं करुणार्णवम् ।
परमानन्दचिद्रूपं प्रणौम्यादिमदेशिकम् ॥
स्वभक्तिबोधजलधिसुधाकरमधोक्षजम् ।
वन्दे स्वानन्दसम्पूर्णं कृष्णं कारुण्यविग्रहम् ॥

इह खलु सकलश्रुतिमौलिलालितं सच्चिदानन्दघनमपास्तस्वगत(स)जातीयविजातीयभेदं नित्यशुद्धबुद्धमुक्तनिष्कलनिर्मलनिर्विकाररूपं भूमशब्दवाच्यं परं ब्रह्मैवाद्वितीयमस्ति इति निर्मला वस्तुदृष्टिः ।

* * * *

एतत्सर्वमपि मन्दबुद्धीनां सुबोधायास्मिन् वेदान्तार्थसारसङ्ग्रहप्रकरणे मया स्फुटं प्रतिपाद्यते । अस्य च प्रकरणस्य वेदाङ्ग(न्त)शास्त्रैकदेशत्वादारम्भापेक्षितमनुबन्धचतुष्टयं निरूप्यते । अनुबन्धचतुष्टयं नाम—अधिकारी, सम्बन्धः, विषयः, प्रयोजनं चेति । अस्मिन्प्रकरणे साधनचतुष्टयसम्पन्नोऽधिकारी । साधनचतुष्टयं नाम नित्यानित्यवस्तुविवेकः ।

**End:**

किंतु साधनचतुष्टयसम्पन्नाय सर्वदा मुमुक्षवेऽन्तर्मुखाय सच्छिष्याय देयम् । तदुक्तमुपदेशसाहस्त्र्यां श्रीमदाचार्यैः—

प्रशान्तचित्ताय शमान्विताय प्रहीणदोषाय यथोक्तकारिणे ।
गुणान्वितायानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे ॥ इति ।

इति सर्वमवदातम् ॥

वेदान्तसारसर्वस्वं सङ्गृहीतं मयाधुना ।
अनेन भगवान् साक्षात्परमात्मा प्रसीदतु ॥

**Colophon:**

इति श्रीदक्षिणामूर्तिचरणकमलभृङ्गेण सीतारामाख्यविदुषा विरचितं वेदान्तार्थसारसङ्ग्रहस्सम्पूर्णः ॥

---

R. No. 3339.

Paper. 10¾ × 8¾ inches. Foll. 20. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920-21 from a MS. of the Śrīrāmatīrtham Library, Rāmatīrtham, Vizagapatam district.

प्रतापरुद्रीयव्याख्यानम्—रत्नशाणः.

PRATĀPARUDRĪYAVYĀKHYĀNAM: RATNAŚĀṆAḤ.

Same work as that described under R. No. 1923 ante, wherein see for the beginning. By Cilakamarri Tirumalācārya.

Contains the Dōṣanirūpaṇa and Guṇanirūpaṇa only.

**Beginning:**

रसनिरूपणानन्तरं तदुपस्कारहेतूनां गुणानां निरूपणे प्रसक्तेऽपि तद-तिक्रम्य मध्ये दोषनिरूपणप्रसक्तिं कथयन् तन्निरूपणं प्रतिजानीते—अथे-त्यादिना । तत्र काव्यस्योपस्कारः रुचिः तत्र हेतूनां विवेकाय ज्ञानाय यथा हेत्वाभासनिरूपणात्सद्धेतुज्ञापनं तथा विशेष(दोष)निरूपणात् गुणानां सम्यग्ज्ञानं भवतीति भावः ।

* * * *

**Colophon:**

इति प्रतापरुद्रीयव्याख्याने रत्नशाणाख्याने दोषप्रकरणं समाप्तम् ॥

**End:**

अत एव स्वयमेवोक्तवान् काव्यप्रकरणे—

हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ।
श्लेषादयो गुणास्तत्र शौर्यादय इव स्मृताः ॥

आत्मोत्कर्षावहा इति । इतीत्यादि ॥

**Colophon:**

इति प्रतापरुद्रीयव्याख्याने रत्नशाणाख्याने गुणनिरूपणं नाम षष्ठप्रकरणं समाप्तम् ॥

---

## R. No. 3340.

Paper. 10⅝ × 9⅞ inches. Foll. 40. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920–21 from a MS. of Maṅgattu Ammaṅgār, Vaḍakkutirumāḷigai, Āḷvārtirunagari, Tinnevelly district.

Fol. 40*b* is left blank.

शृङ्गारविलासभाणः.

ŚṚṄGĀRAVILĀSABHĀṆAḤ.

A Bhāṇa: by Śāmbaśiva, eldest son of Kanakasabhāpati of Śrīvatsagōtra. The author lived in the village of Gōpālasamudram and was a pupil of Svāmi Śāstrin who was the son of Āpaduddhāraṇa of Bhāradvājagōtra. This work was written to please the audience in the court of the king Mānavikrama Mahārāja.

Date of transcription—Friday, the 29th day of the solar month Aippiśi, which is the first day of the dark fortnight in the lunar month Kārttika in the year Bahudhānya 994, corresponding to 1878–79 A.D.

Name of scribe—Varadadēśikar, son of Rāmānujadēśikar of Vaḍakkutirumāḷigai.

Complete, but breaks off here and there.

**Beginning:**

आनीता निकटं सखीभिरधिकप्रेम्णा कटाक्षाङ्कुरैः
पश्यन्तीं गुरुलज्जया नतमुखीं स्पर्शेन रोमाञ्चिताम् ।
मीनाक्षीं वरपाण्ड्यराजतनयां हारं क्षिपन्तीं गले
दृष्ट्वा हृष्टमनाः शिवः परिणये श्रेयांसि पुष्णातु वः ॥

सूत्र—तथैवाय . . . (स्मृतिमभिनीय संस्मरणानन्दम्) सम्प्रति हि—
सर्वेषामपि विदुषां तत्तच्छास्त्रार्थवावदूकानाम् ।
सानुग्रहैः कटाक्षैः सरसकविख्यातिमान्भवान्यस्तु ॥

किं च—
श्रीगोपालसमुद्रग्रामे मृदुसूक्तिमल्लिकारामे ।
कनकसभापतिविद्वज्ज्येष्ठसुतो यस्तु कीर्तिमान् लोके ॥

किंच—

श्रीमान्यस्य गुरुर्विद्वदापदुद्धारणात्मजः ।
भारद्वाजकुलोत्तंसः स्वामी शास्त्री बुधाग्रणीः ॥

किंच—

श्रीवत्सगोत्रकलशाम्बुधिपूर्णचन्द्रो
विज्ञातसर्वकविबन्धविचित्ररीतिः ।
सत्साहितीजननभूरिह दाक्षिणात्यः
सोऽयं चकास्ति खलु साम्बशिवः कवीन्द्रः ॥
मनोजधनुराहितस्फुटसरोजगर्भस्फुर-
न्मरन्दझरधोरणीसरसमाधुरीसोदरी ।
सुवृत्तिरसरीतिभाक् सरसशब्दभ(व)त्युज्ज्वला
कवेर्जयति साम्प्रतं जगति तस्य सा साहिती ॥

तेन महाकविना रचितं शृङ्गारविलासं नाम भाणमभिनयद्भिरस्माभि-र्नितरमापाद्यत एव श्रीमानविक्रममहाराजविद्वत्सामाजिकहृदयानन्दः ।

**End:**

तदेतस्या बालचन्द्रिकाया भोगानुभवादपि मम प्रियतरं किमन्यत्? तथापीदमस्तु भरतवाक्यम्—

आलङ्कापुरमासुमेरु धरणावुच्छ्रायमुच्चैः श्रयन्
श्रीमान् शैलपयोधिराट् विजयतां भूमण्डलाखण्डलम्(:) ।
सामोदा निरुपद्रवा भुवि जनास्सर्वे चरन्त्वासतां(न्त्वात्मनां)
कुर्वन्तः प्रमदाभिरेवमनिशं भोगोत्सवं मङ्गलम् ॥
मन्दानिलेन मधुना रजनीविटेन
मैत्रीं समारचयतो मकरध्वजस्य ।
आज्ञाभिरुत्पलदृशां सकलातिशायि
तारुण्यमस्तु तरुणैरुपभुज्यमानम् ॥
शृङ्गारविलासाख्यो भाणो विद्वद्भिरादृतः सर्वैः ।
श्रीसाम्ब(शिव)सुकविना जीयादासूर्यचन्द्रकं कलितः ॥

**Colophon:**

शृङ्गारविलासो नाम भाणस्समाप्तः ॥

## R. No. 3341.

Paper. 10⅜ × 9⅝ inches. Foll. 20. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Harikṛṣṇarājaguru, Gaṅgapuraśāsanam, Dhārākōṭa, Ganjam district.

(a) नारायणस्तोत्रम्.

NĀRĀYAṆASTŌTRAM.

Foll. 1a—10a.

A hymn in 100 stanzas addressed to God Nārāyaṇa: by Śrīvidyākarapurōhita Mahāpātra of Jīvadāsavaṁśa.

Complete.

**Beginning :**

> स्वं चिद्रत्नं चिरन्तं यदि तमुद्यते नष्टमन्वेष्टुमिच्छा
> श्रेयःपात्रे तदा स्वे हृदि मिलदमलस्नेहपूरस्य पूर्णे ।
> आसाद्य द्योतमानं भृशमकृशदशां संहताह्नः(चिताहः) पतङ्गं
> दद्यादध्यात्मदीपं दलिततमतमस्तोममीशस्य धाम ॥
> रुग्णक्लेशाटवीकं रिपुविसरसरःक्षोभवेतण्डशुण्डा-
> दण्डाभं सक्थिकाण्डं कलयतु मनसा पुण्डरीकेक्षणस्य ।
> बाहुस्संवाहयन्त्या जलनिधिदुहितुर्यत्र गाङ्गेयगौरी
> स्वर्गङ्गाम्भोजिनीव स्फुरति विकसता पाणिपाथोरुहेण ॥

**End :**

> योगीन्द्राणां द्विषः षड्विषधरविषमानिच्छतां रोद्धुमद्धा
> वज्रैर्घोत्थैर्मघोनो धनुभिरगणितैश्चित्र . . . द्रणैश्च ।
> निर्वाणीभूय भूयः सफलयति मतिं यो भिया भावमूलं
> नश्यद्दोषां विभूषां महयतु महितं मौलिमाम्नायमौलेः ॥

**Colophon :**

इति श्रीजीवदासवंशावतंसश्रीविद्याकरपुरोहितमहापात्रकृतं श्रीमन्नारायणप्रत्यङ्गवर्णनाशतकं समाप्तम् ॥

---

(b) शिवशतकम्.

ŚIVAŚATAKAM.

Foll. 10b—20b.

A centum of stanzas in praise of God Śiva.

Complete.

**Beginning:**

न्यस्तोदस्तादसीयप्रपदगुरुभरन्यञ्चितोदञ्चितोर्वी-
प्रख्यातक्षीरसिन्धु(न्धू)चलनमुकुलनान्दोललीलाकलाभिः ।
प्रस्फारस्वापसौख्यप्रसररमसिनः शेषशय्याशयालो-
राशास्या शश्वदास्तां विषमशरमुषः श्रेयसे लास्यलीला ॥
चूडापीडोद्भवोद्यत्स्फुटनिटिलतटीचत्वरोदित्वरोच्चै-
र्ज्वालाजाज्वल्यमानं गलकलितमहानीलपाषाणशीलम् ।
सर्वाङ्गालिङ्गिरिङ्गन्निरुपमसुषमं वेददुर्वेदभेदं
किञ्चिद्वस्तु वास्तूभवतु हृदि महानन्दसन्दोहसान्द्रम् ॥

**End:**

उन्मीलत्कम्पसम्पच्चलदचलमिथस्स्पष्टसङ्घट्टरुग्ण
ग्राव्णां निर्घोषदैर्घ्यैः पटुपटहरवाडम्बरोऽपि व्यडम्बि ।
उद्वेलोद्वेलदब्धेस्समसमयवलल्लोलकल्लोलनाले-
रुत्तालाताल्लीलामयसमुपनमद्ब्रह्मकाकुश्च गीतिः ॥

**Colophon:**

इति श्रीशिवशतकं समाप्तम् ॥

---

R. No. 3342.

Paper. 10¾ × 8¼ inches. Foll. 18. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. acquired through M.R.Ry. V. Gōpālacāriyar of Villiambakkam, Chinglaput district.

Fol. 18b is left blank.

स्मृतिचूडामणिसङ्ग्रहः.

SMṚTICŪḌĀMAṆISAṄGRAHAḤ.

Same work as that described under No. 2784 of the D.C.S. MSS., Vol. V.

Contains the Āhnika portion incomplete.

The colophon at the end of the manuscripts is wrongly given as (इति श्रीनडादूरम्माळ्प्रणीतः श्रुतिचूडामणिसङ्ग्रहस्समाप्तः) ॥

## R. No. 3343.

Paper. 10⅞ × 9¼ inches. Foll. 10. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of the Naduvil- Matham, Trichur, Cochin State.

### निरुक्तपरिशिष्टम्.

### NIRUKTAPARIŚIṢṬAM.

A supplement to the Nirukta, which work has been described under No. 1025 of the D.C.S. MSS., Vol. II.

Contains the Pādas four and six complete and seven incomplete.

**Beginning:**

व्याख्यातं दैवतं यज्ञश्च(श्च) । अयात ऊर्ध्वमात्मगतिं व्याख्यास्यामः—सूर्य आत्मेत्युदितस्य कर्माणि इष्ट्वायैतदनुप्रवदन्त्वथैतं महान्तमात्मानमेष गणः प्रवदन्तीन्द्रं मित्रं वरुणमग्निमाहुरिति तत्पुरस्ताद्व्याख्यातम् । अथैष महानात्मात्मजिज्ञासयात्मानं प्रोवाच । स य आत्मानं प्रोवाचाग्निरस्मि जन्मना जातवेदा अहमस्मि प्रथमजा इत्येताभ्यां सह ज्ञात्वा प्रादुर्बभूवैवं च व्याजहारायं स महानात्मायं तत्राध्यगममिति कमन्यमेतस्मादाचचक्षेऽपश्यं गोपामित्येतयाथैष महानात्मा ।

* * * *

पश्य विज्ञानहीनत्वादतस्ते दन्दशूकाः कृमयः कीटाः पतङ्गा वा यावदिदं नमानतस्तावदिदं वैदिकूप्यं तरति शोकमात्मविदिति ॥

इति चतुर्थः पादः ॥

**End:**

पश्य कविकर्माणि महान्त्यथ रात्रौ म्रियते स्वपान्न न तत्पीयते तथाश्वः स मनि(रि)ष्यतीत्यात्मगतिमाचष्टे ॥

**Colophon:**

इति षष्ठः पादस्समाप्तः ॥

साकञ्जानां . . . नि रूपशः । सहजातानामृतूनां षण्णामृतूनामादित्य एकज इत्याहुः । एकं हि तद्ब्रह्म तस्माज्जात आदित्यः षडेते ।

* * * *

त्यपि निगमो भवति . . . मा च त ऊतयः.

R. No. 3344.

Paper. 10⅜ × 9½ inches. Foll. 24. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of the Naḍuvil-Maṭham, Trichur, Cochin State.

Fol. 24*b* is left blank.

## तत्त्वबोधः.

## TATTVABŌDHAḤ.

Similar to the work described under No. 4585 of the D.C.S. MSS., Vol. IX. By Tattvabōdha-Bhagavat, disciple of Satyabōdha-Bhaṭṭāraka and Prajñāraṇya.

Breaks off in the third Paricchēda.

**Beginning :**

जगज्जन्मस्थितिध्वंसा यस्मादेव श्रुतौ श्रुताः ।
तं वन्दे सच्चिदानन्दं सर्वधीसाक्षिणं हरिम् ॥

* * * *

तं वन्दे शङ्कराचार्यं लोकत्रितयशङ्करम् ।
सत्तर्कनखरोद्दीर्णवावदूकमतङ्गजम् ॥
वन्दे वेदान्तशैलस्थं ज्ञानोत्तममृगोत्तमम् ।
यद्वाक्यकौमुदी पुंसां तापत्रयविनाशिनी ॥
श्रीसत्यबोधशीतांशुमक्षीणकलमाश्रये ।
यत्पादपद्ममासाद्य निरस्ताज्ञानकञ्चुकः ॥
तत्त्वबोधोऽस्मि तं वन्दे प्रज्ञारण्यमहामुनिम् ।
रागद्वेषादिराहित्याद्ब्रह्मदर्शनकौतुकात् ॥
यः प्रव्रजति लोकेऽस्मिंस्तस्य धर्म इहोच्यते ।
अथर्ववेदादारभ्य यस्सर्वत्र विधीयते ॥
तं सङ्ग्रहेण वक्ष्यामि शृणुताथर्वणं वचः ।
पिप्पलादस्य शाखाया ब्रह्मोपनिषदि श्रुतम् ॥
यज्ञोपवीतं परममित्युक्त्वा तदनन्तरम् ।
सशिखं पव(वप)नं कृत्वा बहिस्सूत्रं त्यजेद्बुधः ॥

* * * *

इति परमरहस्यं वेदराद्धान्तमेतं
ग्रथितमतिमनोज्ञं तत्त्वबोधं सुबोधम् ।

शृणुत मतिविशुद्धज्ञाननिर्वाणहेतुं
महितगुरुपदाब्जद्वन्द्वरक्ता विरक्ताः ॥

**Colophon:**

इति सत्यबोधभट्टारकशिष्येण तत्त्वबोधभगवता कृते तत्त्वबोधाख्ये प्रकरणे प्रथमः परिच्छेदः ॥

**End:**

जननमरणबद्धो बौद्धपित्तज्वरार्तः
पिबतु मधुरसुक्तं दुग्धमाम्नायगव्याः ।
स्मरतु परमभक्त्या नित्यमाद्यन्तहीनं
सकलजनहृदिस्थं सच्चिदानन्दमेकम् ॥

**Colophon:**

इति सत्यबोधशिष्यस्य तत्त्वबोधभगवतः कृतौ तत्त्वबोधे द्वितीयः परिच्छेदः ॥

दैगम्बरादयस्सर्वे जगदेवं प्रचक्षते ।
भिन्नाभिन्नमतो माया नेति तत्रापि कथ्यताम् ॥
यस्मिन्नभेदो भेदोऽपि तस्मिन्नेवेति चेन्मतम् ।
कथमेकत्र भेदस्स्यात् विनैव प्रतियोगिना ॥
विशेषः प्रतियोगी चेद्विशेषोऽपि स्वयं न वा ।
स्वयं चेत् का भिदा तत्र भवतैवेष्यतेऽन्यता ॥
ततो विशेषो वस्तु स्याद्वस्तु चेन्न विशेषता ।
प्रतियोगी न धर्मस्स्याद्धर्मित्वे प्रतियोगिना ।
नैकस्य प्रतियोगित्वं धर्मित्वं च ततो भवेत् ॥

---

## R. No. 3345.

Paper. 10¾ × 9½ inches. Foll. 144. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Sāmavēdam Nārāyaṇa Śāstrigāru, Bobbili.

(a) फुल्लसूत्रम्, दीपिकासहितम्.

**PHULLASŪTRAM WITH THE COMMENTARY DĪPIKĀ.**

Foll. 1a—125b. Fol. 121b is left blank.

Same text as that described under No. 937 of the D.C.S. MSS., Vol. II, but with a different commentary. By Rāmakṛṣṇa alias Nānābhāyi, son of Dāmōdaratripāṭhin.

The text is also described under No. 1743 of the I. O. Catalogue—vide p.p. 45, Part I, Vedic MSS.

Contains the Prapāṭhakas five to seven only.

**Beginning:**

सप्तस्वरैस्समस्तं यो जगदेतच्चराचरम् ।
सञ्जीवयति विश्वात्मा स नो विष्णुः प्रसीदतु ॥
सामजालजलाकीर्णं छन्दःकल्लोलसङ्कुलम् ।
तन्त्रग्राहान्वितं वन्दे सामवेदं महार्णवम् ॥

सू—परूगाद्यं तमसे—हा उ वोधा—इति सहो दैर्घतमसे ऋच आद्यं दीर्घमक्षरं वर्धते हा उ भूरा इ एवमादिषु । यश्च ।

सू—यकारश्च ऋचः । आद्यो ह्रस्वोऽपि वर्धते । हा उ—यास्ता इ—

* * * *

**Colophon:**

इति फुल्लसूत्रदीपिकायामुच्चनीचं समाप्तम् ॥

इति श्रीत्रिपाठिदामोदरसूनुना दीक्षितरामकृष्णेन नानाभायिद्वितीयनाम्ना कृते फुल्लसूत्रदीपे पञ्चमप्रपाठकस्य द्वादशः खण्डस्समाप्तः ॥

समाप्तः पञ्चमः प्रपाठकः ॥

**End:**

सू—अभिश्यैते तद्विदास तृतीयायाम् । तद्विदांस भुवनेषु ३४ औ हो वा । ज्येष्ठा मा मा । इति श्यैते तृतीयायां स्तोत्रीयायाम् । स्वादो स्वादीयायाम्—मधु मधुनाऽनुभा । अत्र हि मध्ये आगावः प्राप्तः ॥

**Colophon:**

इति श्रीत्रिपाठिदामोदरसूनुना दीक्षितरामकृष्णनामधेयेन नानाभायि इति द्वितीयनाम्ना विद्वद्वरेण कृते पुल्लसूत्रदीपे सप्तमप्रपाठके द्वादशः खण्डः ॥

सप्तमः प्रपाठकस्समाप्तः ॥

(b) नारदशिक्षाव्याख्या.

NĀRADAŚIKṢĀVYĀKHYĀ.

Foll. 128a—143b. Fol. 144 is left blank.

A commentary on the Nāradaśikṣā, which work has been described under No. 920 of the D.C.S. MSS., Vol. II: by Bhaṭṭa-śubhākara.

Contains the first Prapāṭhaka complete and the second incomplete.

**Beginning:**

प्रणम्य परमात्मानमृक्सामस्वरविग्रहम् ।
मुनिना नारदेनोक्ता शिक्षा व्याख्यातुमिष्यते ॥
अथातस्स्वरशास्त्राणां सर्वेषां वेदनिश्चयम् ।
उच्चनीचविशेषाद्धि स्वरान्यत्वं प्रवर्तते ॥

अथ सामसंहिताध्ययनानन्तरं संहिताध्ययनात् क्षिप्रं सर्वेषां शास्त्राणामृक्सामगतानां निश्चयं सम्यक् स्वरूपप्रतिपत्तिवेदनीयं शास्त्राध्ययनेन जानीयादिति भगवान्नारदः सामान्येन शिष्यं प्रत्याह—सामान्यभूत ओङ्कारगतस्वरूपोच्चनीच . . . . . . . . . . . . उच्चतमे नाचं वा नीचविशेषे नीचतरे नीचतमे च स्थाने । व्यज्यमानः । स्वरान्यत्वं नानास्वर . . . . . . . . . . . . . . अथवा सर्वेषां वाग्विनिश्चयमिति वा पाठः। कथमिति पूर्वपठितशिक्षामाहारयिष्यते । ऋगादिस्वराणां विशेष उच्यते—

आर्चिकं गाथिकं चैव सामिकं च स्वरान्तरम् ।
कृतान्ते स्वरशास्त्राणां प्रयोक्तव्यं विशेषतः ॥
एकान्तरस्वरो ह्यृक्षु गाथासु द्व्यन्तरस्वरः ।
सामसु त्र्यन्तरं विद्यादेतावत्स्वरतोऽन्तरम् ॥

* * * *

स्वराणामहमेतेषां पृथग्वक्ष्यामि लक्षणम् ।
उद्दिष्टानां यथान्यायमुदाहरणमुच्यते ॥

**Colophon:**

इति नारदशिक्षाव्याख्यायामष्टमखण्डिका समाप्ता ॥

इति श्रीभट्टशुभाकरविरचिते शिक्षाविवरणे प्रथमः प्रपाठकस्समाप्तः ॥

अथ द्वितीयप्रपाठकः—

सयकारं समं वाप्यक्षरं स्वरितं भवेत् ।
न चोदात्तं पुर(न)स्तस्य जात्यस्स्वारस्स उच्यते ॥

**End:**

जुह्वा ममेत्यादि । जुह्वोऽग्निस्तत्र दर्शनमिति ॥

**Colophon:**

इति नारदशिक्षाव्याख्यायां द्वितीयप्रपाठके द्वितीयः खण्डः ॥

चतुर्णां स्वराणां क्वचित् ह्रस्वकम्पता, क्वचिद्दीर्घकम्पत्वमित्याह—

इकारान्ते पदे पूर्व उकारे परतः स्थिते ।

ह्रस्वकम्पं विजानीयान्मेधावी नात्र संशयः ॥

* * * *

नीचं चोच्चं च परतः तत्रोदात्तं विदुर्बुधाः ॥

नीचमनुदात्तं नीचात्पूर्वमुदात्तं पूर्वस्य पूर्वयोर्वा परत इत्यर्थः

अथ वर्णोच्चारणगतं लक्षणमुच्यते—

न रेफे वा हकारे वा द्विर्भावो जायते क्वचित् ।

न च वर्गद्वितीयेषु न चतुर्थे कदाचन ॥

---

R. No. 3346.

Paper. 10¾ × 9¼ inches. Foll. 176. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of the Naḍuvil-Maṭham, Trichur, Cochin State.

Fol. 176*a* gives the contents of this work. Fol. 176*b* is left blank.

## वेदान्तकौमुदी.

## VĒDĀNTAKAUMUDĪ.

A discussion on the first four Adhikaraṇas of the Brahmasūtras, in accordance with the Advaita-Vēdānta: by Rāmādvaya, disciple of Advayāśrama. In the beginning of the work, the author praises Mahādēvāśrama and salutes Vyāsa, Śaṅkara and Advayāśrama, the preceptor of the author.

Complete in four Adhyāyas.

**Beginning:**

व्याख्यामुद्राक्षमाले कलशसुलिखिते बाहुभिर्वामपादं

बिभ्राणो जानु मूर्ध्ना पदतलनिहतापस्मृतिर्दुद्रुमाधः ।

सौवर्णे योगपीठे लिपिमयकमले सूपविष्टस्त्रिनेत्रः

क्षीराभश्चन्द्रमौलिर्वितरतु विपुलां शुद्धबुद्धिं शिवो नः ॥

*  *  *  *

यो ब्रह्मधीकल्पलतालवालैश्छात्रैर्विचित्रैर्न उपासनीयः ।
स्यात्तो महादेवगिराश्रमाह्वा धामाद्यमाराध्यतमः पुनीतात् ॥
बिभ्रद्दुग्णविषाणकन्दलमलं यो विघ्नदन्तावलैः
गाढायोधनतः स्वबुद्धिकरणायो(यै)व प्रभुर्भासते ।
भक्तानां निदर्धीमहीममनिशं स्वान्ते नितान्तेप्सित-
श्रेयोविघ्नमि(पि)दं विनिघ्नमनसां सेव्यं सतां भक्तिभिः ॥
नत्वा व्यासनखण्डबोधसुधया सन्तापयन्तं बुधा
धौरेयं शमशालिनां च भगवत्पादं स्वनाथं तथा ।
आचार्यान्मुहुरद्वयाश्रमगिरः कर्मन्दिचूडामणीन्
भव्यां व्याकरवाणि वेदकुमुदप्रोल्लाहृदां कौमुदाम् ॥

अथ कथमदःआरम्भः? को भावः? किं विषयाद्यनुबन्धविधुरत्वादनारम्भः? यद्वा सदोषत्वात्, आहोस्वित् बहवोऽत्र प्रायसन्निति, अथ वा कथाङ्गस्य प्रमाणादेरद्वैतपक्षे वास्तवत्वविकलत्वात् । प्रमाणादेः कथाङ्गत्वं प्रथितमेव । तथा हि—तात्पर्यशुद्धिस्तत्त्वनिर्णयममिसन्धाय विवदमानयोः प्रमाणतर्काभ्यां स्वसिद्धान्तानुरूपसाधनदूषणप्रयोगसन्दर्भो वादः ।

*  *  *  *

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीम(द)द्वयाश्रमपूज्यपादशिष्यस्य भगवतो रामाद्वयस्य कृतौ वेदान्तकौमुद्यां प्रथमोऽध्यायस्समाप्तः ॥

आनन्दज्ञानदेहोऽप्यनुपममलस्वान्तसंसेवनीयः
यस्य स्वात्संविभज्य स्फुटमिव कमलामालयं मङ्गलानाम् ।
धत्ते वक्षःक्षमायां भ्रममिव विदधत्तार्किकाणां पुमर्थैः
सोऽस्मात्संसारचक्रभ्रमाभिदुरदशालिङ्ग्तु(न)म्लानबोधान् ॥

अथ जन्माद्यस्य यत इति ब्रह्मणो लक्षणं निरूपणार्थः ; प्रमाणादि-विचारस्य स्वरूपविचारापेक्षत्वात् ।

**End:**

अतो मुक्तदेहे जीवच्छरीरत्वमप्याभासरूपमेवेति तेन कृतस्यापि न फलपर्यवसानम् । तस्मादस्ति सर्वथा जीवन्मुक्तिरपीति सकलमनाविलम् ॥

* * * *

वेदान्तमुक्तामणिसूत्रकर्ता सरस्वतीकान्तकलावतारः ।
युष्मानजस्रं द्विजसार्वभौमो द्वैपायनः पात्वघसन्निपातात् ॥
यश्शङ्करोऽपि विषमां श्रयते न(नु) दृष्टं ख्यातः कलानिधिरपि स्वयमेव यस्य।
सच्चैः स्फुरत्कमलकं . द . ल . पृष्ठं वन्दामहे परमहंसधुरन्धरं तम् ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदद्वयाश्रमपूज्यपादशिष्यस्य भगवतो रामाद्वयस्य कृतौ वेदान्तकौमुद्यां चतुर्थोऽध्यायस्समाप्तः ॥

---

R. No. 3347.

Paper. 10⅝ × 9¼ inches. Foll. 56. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nīlakaṇṭha Nambūdirippād, Kannūr-mana, Othapalam, Malabar district.

Foll. 55*b* and 56 are left blank.

सूर्यस्तुतिः, सव्याख्या.

SŪRYASTUTIḤ WITH COMMENTARY.

A eulogy in 50 stanzas in the Mandākrāntā metre, addressed to Sūrya (Sun god). The text is by Sāmba and so it is called Sāmbapañcāsikā after the name of the author.

Almost complete.

**Beginning:**

नमस्समस्तजन्तूनां प्राणानां प्राणदायिने ।
सर्वदाय जगद्धात्रे सवित्रे परमात्मने ॥
शब्दार्थत्वविवर्तमानपरमज्योतीरुचो गोपते-
रुद्गीथोऽभ्युदितः पुरोऽरुणतया यस्य त्रयीमण्डले ।
भास्वद्वर्णपदक्रमेरिततमः सप्तस्वराश्वैर्वियद्-
द्विद्यास्यन्दनमुन्नयन्निव नमस्तस्मै परब्रह्मणे ॥

अनेन आदित्यस्स्तूयते न शब्दराश्यादिः । या वाक्यद्वचिर्गुणगणकीर्तनेन देवताया अहो अहमित्याश्चर्यबुद्धिजननी सा स्तुतिरिति स्तुतिलक्षणवैचित्र्यप्रतिपादनमाश्चर्यबुद्धिहेतुः । तत्त्रिविधं वैचित्र्यम्—शब्दतोऽर्थत उभयतश्चेति । अयं श्लोक उभयतो वैचित्र्यप्रतिपादकः । तथाहि—

एक एवादित्यो जगद्भासकत्वेन वेदरूपेण जीवरूपेण ब्रह्मरूपेण च स्थित इति ।

**End:**

> सर्वात्मत्वं सवितुरिति यो वाङ्मनःकायवुद्ध्या
> रागद्वेषोपशमसमतायोगमेवारुरुक्षुः ।
> धर्माधर्मग्रथनरशनामुक्तये युक्तियुक्तां
> स श्रीसाम्बः स्तुतिमिति रवेस्सुप्रतिष्ठां चकार ॥

* * * *

श्रीसाम्बः भगवद्रूपस्तुतिं सुप्रतिष्ठामचलां स्थितिं चकार । श्रोतॄणां मुनीनामाशीर्वादं करोति सूतः ।

इति परमरहस्यं श्लोकपञ्चाशिकैषा तपननमनपुण्या सागमब्रह्मवर्चा ।
हरतु दुरितमस्मद्वर्णनाकर्णिता वो दिशतु च शुभदृष्टिं मातृवद्भक्तिभाजाम् ॥
इतिशब्दः प्रकारवाची परमरहस्यं ब्रह्मतत्त्वप्रतिपादकत्वात्स्तोत्रमपि परमरहस्यं शुद्धिसाधनम् ।

* * * *

दिशतु ददातु । शुभदृष्टिं ब्रह्मविद्यामित्यर्थः । तेषां मातृवत्सवितरि भक्तिमतामित्यर्थः ॥

The scribe adds—

नारायणशिष्यस्य लिखितं पुस्तकम् ॥

---

## R. No. 3348.

Paper. $10\frac{3}{8} \times 9\frac{3}{8}$ inches. Foll. 188. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Kṛṣṇarāja Guru, Dharakota, Ganjam district.

### शैवकल्पद्रुमः.

### ŚAIVAKALPADRUMAḤ.

Similar to the work described under R. No. 3327 ante. By Lakṣmīdharamiśra.

Complete in eight Kāṇḍas.

**Beginning:**

> एकदन्तमुमापुत्रं गजवक्त्रं त्रिलोचनम् ।
> चन्द्रार्धधारिणं वन्दे सर्वविघ्नविपत्तये ॥

वन्दे शम्भुं त्रिभुवनगुरुं सर्वलोकाधिवासं
ब्रह्मोपेन्द्रार्चितपदयुगं सोमसूर्याग्निनेत्रम् ।
कर्म ब्रह्मेश्वर इतिमतां स्वर्गमोक्षस्वलोकान्
दातारं गोद्विजहितकरं ब्रह्मविष्ण्वादिरूपैः ॥
श्रुतिस्मृतिपुराणानां भारतागमवर्मिणाम् ।
भूयात्सुवाक्यबीजाद्य शैवकल्पद्रुमोदयः ॥
गुरुवचनजनप्रवर्धमानो जपनवपल्लवमर्चनप्रसूनम् ।
फलममृतमयं दधानमारात्सुखयतु वज्रस . . . हस्य यं हि ॥
पापपुण्यपथश्रान्ता जनास्सर्वे निराकुलाः ।
शैवकल्पद्रुमं प्राप्य गतश्रान्ता भवन्तु च ॥
तस्माज्जगत्समुत्पन्नं कारणान्यत्र कानि च ।
तेषां यं श्रीशिवं पूज्य चादावेतन्निरूप्यते ॥

तत्रादौ महाभारते शान्तिपर्वणि युधिष्ठिरं प्रति भीमवाक्यम्—

प्रकृतं(तिं)पुरुषं चैव योजयित्वा स्वतेजसा ।
ब्रह्माणमसृजत्तस्माद् देवदेवः प्रजापतिः ॥
ब्रह्मविष्णुमहेशानां स्रष्टायं प्रभुरेव च ।
ब्रह्मादयः पिशाचान्ता यं हि देवा उपासते ॥

तथा च स्कान्दपुराणे सूतसंहितायां ब्रह्मवाक्यम्—

देवादयो मनुष्याश्च तथा पश्वादयो जनाः (नाः) ।
तत्तत्कर्मानुसारेण मया सृष्टा(ः) शिवाज्ञया ॥

* * * *

**Colophon:**

इति श्रीएकाम्रविपिनविहितस्वर्णकूटाचलवरशिखरकन्दरोदरविनोदिशम्भुवरत्रिभुवनेश्वरपदद्वन्द्वारविन्दमकरन्दपानानिर्भरमत्तमधुकरलक्ष्मीधरविरचिते शैवकल्पद्रुमे प्रथमः काण्डः ॥

**End:**

शिवधर्मोत्तरे—

यावदक्षरसङ्ख्यानं शिवशास्त्रसुपुस्त(पुस्त)के ।
तावद्वर्षसहस्राणि शिवलोके महीयते ॥

एवमायतनिर्माणलिङ्ग(सं)स्थापनादिकम् ।
कथितं सर्वलोकानां हिताय परमार्थतः ॥
कल्पद्रुमोऽष्टकाण्डोऽयं विद्वद्भिः परिरक्ष(क्ष्य)ताम् ।
वचनाश्वासनजलैर्मूर्खवाददवाग्नितः ॥
एकाम्रे भुवनेश्वरप्रियकरं चक्रेऽध्वरं यः पुरा
शालाद्व(स्स्व)मुकुन्दवारणपतिं कुल्यान्वयावेदकः ।
प्रद्युम्नाह्वय एष शङ्करतनुः साक्षादिति श्रीगृही
त्वादौ यस्य विलोक्य फालनयनं श्रीमान्नसिंहो नृपः ॥
तत्पुत्रो मधुसूदनाग्रजत(प)दश्रौतोऽग्निहोत्रशिव-
ध्यानानन्दविकासिहृत्सरसिजः श्रीरामकृष्णाभिधः ।
तस्माद्भूव(रि)नयोऽम्बिकापतिमतिर्लक्ष्मीधरो मन्दधीः
स्वेनायं रचितस्सतां सुखकरः श्रीशैवकल्पद्रुमः ॥

**Colophon**:

इति श्रीमदेकाम्रविपिनविहितस्वर्णकूटाचलशिखरकन्दरोदरविनोदिशम्भुवरत्रिभुवनेश्वरपदद्वन्द्वारविन्दमकरन्दपाननिर्भरमत्तमधुकरलक्ष्मीधरमिश्रविरचिते श्रीशैवकल्पद्रुमे अष्टमः काण्डस्समाप्तः ॥

समाप्तश्चायं शैवकल्पद्रुमः ॥

---

## R. No. 3349.

Paper. 10⅜ × 9¼ inches. Foll. 40. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of the Sanskrit-Pāṭhaśālā, Tiruppanattura, Cochin State.

Fol. 40*b* is left blank.

वेदान्तविचारः.

VEDĀNTAVICĀRAḤ.

A fragmentary Dvaita tract.

Incomplete.

**Beginning**:

श्रीमदानन्दतीर्थार्यपादपाथोरुहद्वयम् ।
श्रीमद्गुरुहृदब्जस्थं भजे सर्वेष्टसिद्धये ॥

दण्डीतिविशिष्टप्रत्ययबलात् विशिष्टस्यातिरिक्तत्वम् । न च विशेषणविशेष्यतासम्बन्धातिरिक्तविषयकत्वज्ञानाभाव इति वाच्यम्; तथा सति दण्डपुरुषसंयोग इति समूहालम्बनादुक्तविशिष्टप्रत्ययस्य वैलक्षण्याभावप्रसङ्गात् ।

* * * *

गौरवेण ब्रह्मातिरिक्ते सर्वत्र व्यावहारिकत्वाङ्गीकारस्यैव युक्तत्वात् प्रमाणबाधस्य पारमार्थिकत्वमात्रापहारकत्वेन व्यावहारिकत्वाविरोधात् । तथापि ब्रह्मणोऽपि क्षणिकत्वप्रसङ्गो दुर्वार एव ।

निखिलनिगमवर्त्मस्फूर्तये सज्जनानां
प्रकटितनिजबोधानन्दशक्त्येकरूप ।
कुमुददलनपङ्क्तिज्ञानदा(दी)प्तिं वितन्वन्
वसति मम हृदीशो व्यासनामा रमेशः ॥

श्रीमद्रमासहचरस्मरणैधितान्तर्ज्ञानोदयेन विजिताखिलमायियूथः ।
दुर्दामिमस्करिभुजङ्गविषं निरुन्धन् श्रीवासुदेवगुरुरस्तु मुदे पिता मे ॥

यत्तु सगुणश्रुतीनां केषांचिदुपासनापरत्वम्, उपासनाविध्यसन्निहितानां तु नेह नानास्ति (किंचनेति श्रुति)निषङ्गा(पेक्षा)पेक्षितप्रतियोगिसमर्पकत्वं निर्गुणश्रुतिविरोधात् ।

**End :**

सविशेषाभेदस्य यावद्द्रव्यभाविखले खण्डिते च भेदाभेदस्यैवाङ्गीकार्यत्वात् । नायं दण्डी न नील इति दण्डिभेदनीलभेदावगाहिप्रत्यक्षसत्त्वात् भेदस्य दण्डी चैत्र इति प्रत्ययेन.

---

R. No. 3350.

Paper. $10\frac{3}{8} \times 9\frac{3}{8}$ inches. Foll. 238. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of the Naduvil-Maṭham, Trichur, Cochin State.

Foll. 237 and 238 are left blank.

इष्टसिद्धिविवरणम्.

ISṬASIDDHIVIVARAṆAM.

Same work as that described under R. No. 2971 ante, wherein see for the beginning.

Complete.

**End:**

द्वैतं पुंभेदश्च सतमाध्यायोक्तदोषः । तच्चया नेष्यते चेत्तर्हि अवस्था लाभ इत्याशङ्क्याह--तत्रेति । अवस्तुतोऽपरमार्थ(त): । क्वचिदपि व्यवस्था मया नेष्यते इति न; किं तु सर्वथापीष्यते माय . . . . मौ दृष्ट्वा-दित्यर्थः । विशेषतश्चाप्रधाने कारणमाह—प्रत्यक्षादिना । उक्तमर्थजातं संक्षिप्याह—अस्ति मुक्तिरित्यादिना ॥

**Colophon:**

इतीष्टसिद्धिविवरणे अष्टमोऽध्यायः ॥
समाप्ता चेयमिष्टसिद्धिटीका ॥

---

## R. No. 3351.

Paper. 10⅜ × 9⅝ inches. Foll. 106. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of the Raja of Chirakkal, Malabar district.

Fol. 106*b* is left blank.

### सूर्यसिद्धान्तव्याख्या—गणकोपकारिणी.

### SŪRYASIDDHĀNTAVYĀKHYĀ: GAṆAKŌPAKĀRIṆĪ.

Same work as that described under R. No. 1766 ante.

Contains the Adhyāyas 1—12 complete and 13th almost complete.

Date of transcription—Friday, the fourth day of the bright fortnight of the lunar month Āśvayuja in the year Vikārin (Śaka year 1761).

Name of the scribe—Vāsudēvaśarman, second son of Agnihōtrivināyakagōpālaśarman.

---

## R. No. 3352.

Paper. 10⅜ × 9⅝ inches. Foll. 82. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of the Naduvil-Maṭham, Trichur, Cochin State.

Fol. 81 is left blank.

ऐतरेयारण्यकव्याख्या.

AITARĒYĀRAṆYAKAVYĀKHYA.

A commentary on the Aitarōyāraṇyaka, which work has been described under No. 38 of the D.C.S. MSS., Vol. I, Part I: by Ṣaḍguruśiṣya.

Contains the first three Āraṇyakas complete and up to the third Khaṇḍa of the third Adhyāya in the fifth Āraṇyaka.

**Beginning:**

वर्ण्यतेऽथ प्रसादेन षड्गुरूणां महाव्रतम् ।
महिदासैतरेयर्षिदृष्टं सोपनिषद्वयम् ॥
ब्राह्मणादौ कथा प्रोक्ता माहिदासैतरेषि(यि)की ।
तत एवावधार्येति नात्र सा खलु वर्ण्यते ॥

अथ महाव्रतम्—अथेत्यानन्तर्ये । प्रायणीयचतुर्विंशपृष्ठ्यषडहाभिप्लवषडहाभिजित्स्वरसामन्यहविषुवद्विश्वजिच्छन्दोमन्यहदशमरूपाणामह्नां चतुर्विंशतिस्सप्रासङ्गिको ब्राह्मणेनोक्तः ।

अथेदानीं महाव्रताख्यमहरुच्यत इत्यर्थः । अथ महाव्रतशब्दं निराह—

इन्द्रो वै वृत्रं हत्वा महानभवद्यन्महानभवत्तन्महाव्रतमभवत्तन्महाव्रतस्य महाव्रतत्वम् । वैशब्दः प्रसिद्धो पुरावृत्तत्वद्योतनार्थः । यत् गा(टा)लुक् । येन दुष्करो महत्त्वदायी पुत्रवधो येन कर्मणेन्द्रस्याभूत् । तत्किमिति विमृश्यमानं महाव्रतमभूत्तत्स्मान्महाव्रत इन्द्रस्य व्रतं कर्मेति कृत्वा छन्दस्त्वादात्वेन महाव्रतशब्दस्य प्रवृत्तिनिमित्तं विवादित्यर्थः । अस्याग्निष्टोमसंस्थस्य होतुः शस्त्राणि यानि षट् तेषामाद्यमाज्यं शस्त्रं विशेषस्तत्र वर्ण्यते द्वे एतस्याह्न आज्ये कुर्यादिति हैक आहुः ।

* * * *

**Colophon:**

इति षड्गुरुशिष्येण विरचितायामारण्यकवृत्तौ मोक्षप्रदायां महाव्रते प्रथमोऽध्यायः समाप्तः ॥

**End:**

नाप्रवक्त्रे एता ब्रूयादित्येव । नैतावदेव प्रवक्त्रे ह्यन्तेवास्यब्दवासिने । इत्याचार्या आचार्या इति ।

बह्वृचसिंहाचार्याः पात्रलक्षणमब्रुवन् ।
द्विरुक्तिर्बोधयत्यत्र ह्यध्यायस्य समापनम् ॥

**Colophon:**

इति षड्गुरुशिष्यविरचितायामारण्यकवृत्तौ संहितोपनिषदि तृतीयोऽध्यायः ॥

द्वाविंशतिरिति प्राहुः खण्डसङ्ख्यां महाव्रते ।
उपनिषदि पञ्चविंशतिः संहितायां त्रयोदश ॥

त्रिपर्वखण्डाः षष्टिरिति स्थितिः ।

समाप्तं तृतीयारण्यकम् ॥

नादीक्षितो महाव्रतं शंसेन्नानग्नौ न परस्मै नासंवत्सर इत्येते कामं पित्रे वाचार्याय वा शंसेत् । आत्मनो हैवास्य तच्छस्तं भवति ।

* * * *

नेदंविदनिदंविदा समुद्दिशेत् । आत्मानमिति शेषः । इदंवित् आरण्यकचतुष्टयार्थविदनिदंविदाज्ञातारण्यकार्थेन पुरुषेणात्मानं स सह उ स चाहं च तीर्थपुरातीर्थमगच्छादसावचेत्यादि? न वदेदित्यर्थः । न सह भुञ्जीत-अनिदंविदित्येव । एकपङ्क्तावेककाल इति भुञ्जीत नो सह न सधमादी स्यादनिदंविदित्येव ।

लौकिकं वैदिकं वापि हर्षं नानुभवेत्सह ।

---

R. No. **3353.**

Paper. $10\frac{5}{8} \times 9\frac{1}{4}$ inches. Foll. 64. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippād, Kūtalūr-mana, Nareri, Trittala, Malabar district.

Fol. 64*b* is left blank.

## त्रिपुरदहनव्याख्या—अर्थप्रकाशिका.

## TRIPURADAHANAVYĀKHYĀ: ARTHAPRAKĀŚIKĀ.

A commentary on the Tripuradahana of Vāsudēva, which work has been described under R. No. 1852(*a*) ante: by Nīlakaṇṭha.

Complete.

**Beginning:**

भक्ताघौघविघाताय दन्तकुन्दधरं परम् ।
नमामि भारतीमिन्दुख(ण्ड)मण्डनमण्डिताम् ॥
वन्दे भवं धाम वटमूलकृतस्थिति[:] ।
फणि . . . . . . . . . . . . . . . . ।
क्षीणं दोषाकलक्षं महिषशिरसि राजन्मुक्तिपूर्वस्थले वः ॥
कुलव . . . . . . . . . . . . . . . . . . ॥
स्वान्तेवासिहृदम्बुजस्थतिमिरप्रध्वंसभान्वाकृति
त्रय्यन्तोक्तिवा : : . . . . . . . गुरुम् ।
अर्थप्रकाशिका नाम्ना व्याख्या पौरदहन्यसौ ।
क्रियते नीलक(ण्ठेन) . . . . . . . . ॥
. . . . मिदमृद्धं पाति रामेण साकं
रचयति मितमेनां वृत्तिमल्पेतरार्थाम् ।

* * * *

तथा भवे शिवे विषयसप्तमी । प्रणामतत्पराः प्रणतिनिरताः भवप्रणामपरता तत्र कारणमित्यर्थः ॥

**Colophon:**

व्याख्येयं पौरदहनी प्रथमाश्वासगा गता ।
अर्थप्रकाशिका नाम्ना नीलकण्ठेन निर्मिता ॥

इति प्रथमाश्वासः ॥

**End:**

कीदृशे स्ववर्त्मनि वन्धुरे सुन्दरे निर्दोषे परविहितमार्गो हि परस्य बन्धुरो भवति । तथा पिनाकिनापि हरेणापि आमोदि मुदितन् ।

कीदृशेन नाकिनां स्वर्गिणां देवानां मोदकारिणा इति ॥
व्याख्येयं पौरदहनी तृतीयाश्वासगा गता ।
अर्थप्रकाशिका नाम्ना नीलकण्ठेन निर्मिता ॥

हररुचिरकथाया वर्णनेनाञ्जसा मे वचसि मनसि गात्रे पुण्यमायात्यगण्यम् ।
इति मम लघुबुद्धेरत्र काव्ये प्रयासश्शुभधिय इह सन्तस्तन्न कुर्वन्ति हासम् ॥

विहिताखिलतत्त्वानां व्याख्येयं सर्षपोपमा ।
तथापि मादृशां लोके भवत्येव महीध्रवत् ॥

तुहिनदीधितिखण्डलसज्जटं रविशशाङ्ककृशानुविलोचनम् ।
वटतटीकृतरागमहं भजे रजतवर्णमनङ्गहरं हरम् ॥

**Colophon:**

इति तृतीयाश्वासव्याख्या समाप्तिमगमत् ॥

---

R. No. **3354.**

Paper. 10¾ × 9¼ inches. Foll. 192. Lines, 20 in a page. Dēvanāgari Good.

Transcribed in 1920-21 from a MS. of the Naḍuvil-Maṭham, Trichur, Cochin State.

Fol. 192 is left blank.

नैष्कर्म्यसिद्धिव्याख्या—विद्यासुरभिः.

NAIṢKARMYASIDDHIVYĀKHYĀ: VIDYĀSURABHIḤ.

Foll. 1a—191a. Fol. 191b contains the beginning portion of Iṣṭasiddhivivaraṇa.

A commentary on Surēśvāra's Naiṣkarmyasiddhi, which work has been described under No. 4610 of the D.C.S. MSS., Vol. IX: by Jñānāmṛtayati, disciple of Uttamāmṛtayati.

Complete.

**Beginning:**

नमामि नारायणमामरेड्यं न मानमेयं जगतो निदानम् ।
निरस्तभेदं सुखसंविदेकं निगूढमन्तःकरणेष्वसङ्गम् ॥
निरङ्कुशैश्वर्यजितामरेश्वरं निरङ्कुशज्ञानजिताम्बुजासनम् ।
निराकृतद्वैतकथं यतीश्वरं नमामि नाम्ना सदृशोत्तमामृतम् ॥
आनन्दारण्यपूज्यानां पादपङ्कजपांसवः ।
पान्तु मां मृत्युसन्तानात्स्वान्तध्वान्तान्तहेतवः ॥

* * * *

आविर्भूतान् स्वबोधाद्विविमुखजजलैर्वर्धितान् वेदवृक्षान्
शाखाभेदैर्विभिद्य श्रुतितुलितमहाभारतं योऽथ कृत्वा ।

---

श्रीमच्छारीरकाख्यं निरुपमसुखदं ब्रह्म पक्वं गृहीत्वा
तेभ्यो नः प्रादिशत्तं मुनिजनसहितं व्यासविष्णुं नमामि ॥

महामोहपङ्के विरिश्वाचरा(द्यगा)न्तं प्रजाहरितनं मग्नमालोक्य भाष्यैः ।
जलैः क्षालयित्वात्मविद्यादिवं यो नयत्येकलं शङ्करं तं नमामि ॥

प्रकटविकटविश्वव्यापिनैष्कर्म्यसिद्धि-
द्युमणिकरगणौघैर्यो जगद्ध्वान्तमन्तः ।
नयति विमलकीर्तिं तं सुरेशोदयाद्रि-
निविडतमतमस्तकपाटनं नमामि ॥

ब्रह्मात्मदृष्टिहतमोहमदादिदोषाः
कारुण्यसागरनिमग्नमहाधियो ये ।
आशास्महे प्रणतिपूर्वमिमान् वदन्तु
नैष्कर्म्यसिद्धिविवृतेर्गुणदोषभेदान् ॥

* * *

वेदान्तेभ्यः किमपि भगवद्भाष्यतो किञ्चिदन्यत
भाष्यादिभ्यो बहु बहुतरं पूर्वटीकान्तरेभ्यः ।
आचार्येभ्यो बहुतममहं भावतत्त्वं गृहीत्वा
व्याख्यां विद्यासुरभिममलां वच्मि नैष्कर्म्यसिद्धेः ॥

नैष्कर्म्यसिद्धेस्सङ्क्षेपादन्वयादिप्रधानतः ।
ज्ञानामृतेन यतिना व्याख्यानं क्रियते मया ॥

अनेकजन्मसु निरन्तरसञ्चितनित्यनैमित्तिककर्मापूर्वनिकरपरिमार्जननिरा-कृतनिखिलदुरितरागादिमलान्तःकरणदर्पणः तैरेव कर्मभिः परितर्पितपितृदेवगण-प्रेरितपरमेश्वरेण शङ्करभगवत्पूज्यपादरूपिणा भाष्यकारेण सकृदुपदेशमात्रा-देवापरोक्षीकृतब्रह्मात्मतत्त्वः परमहंसपरिव्राजकश्रीसुरेश्वराचार्यः गुरुनियो-गात् प्राणिनामुपकाराय श्लोकप्रबन्धरूपां नैष्कर्म्यसिद्धिं श्रीमच्छारीरकप्रक-रणमुपनिबबन्ध । स एव पुनर्गुरुनियोगात्तस्य सम्बन्धोक्तिं कुर्वन् स्वानिवा-(लाभ्यवा)दिभिः किञ्चिच्छ्लोकैरधिकार्यादीनां सूचितानामपि युक्तिभिरसमर्थि-तत्वात्प्रकरणानारम्भमाशङ्क्यादावेवाधिकारिप्रयोजनसाधनसम्बन्धविषयप्रकरण-लक्षणानि श्रोतृप्रवृत्तिसिद्ध्यर्थं क्रमेण दर्शयति—आब्रह्मेत्यारभ्यारभ्यत इत्यन्तेन ग्रन्थेन । तत्रापि प्रवृत्तिस्स्वरसत इत्यन्तेनाधिकारिणं साधयति ।

* * * *

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकश्रीमदुत्तमामृतपूज्यपादशिष्यस्य ज्ञानामृतयतेः कृतौ विद्यासुरभिसंज्ञके श्रीनैष्कर्म्यसिद्धिविवरणे प्रथमोऽध्यायः ॥

**End :**

समन्वयादींश्चतुरोऽपि सागरानतीत्य जित्वा ककुबीश्वरान् हरेः ।
परं पदं सम्प्रति मुक्तबन्धनस्सुखैकतानं शिवमेति मे महः ॥

* * * *

तत्त्वोपदेष्टृव्याख्यातॄन् बुद्ध्वा मस्करिणो गुरून् ।
साष्टाङ्गपातं तान्नित्यं नमामि ब्रह्मवेदिनः ॥
यावद्रोभिः परिवृततनुः कामदा कामहत्री
यद्गोद्धृतिर्मुनिवरजिता याति पादैश्चतुर्भिः ।
प्रत्यक्पु(पु)च्छा निगममनुवाक् शृङ्गिणी दिव्यरूपा
सेयं विद्यासुरभिरजिता मोक्षमार्गं पुनातु ॥

**Colophon :**

इति श्रीमदुत्तमामृतपूज्यपादशिष्यस्य ज्ञानामृतभगवतः कृतौ श्रीनैष्कर्म्यसिद्धिवि रणे विद्यासुरभिनाम्नि चतुर्थोऽध्यायः समाप्तः ॥

---

R. No. **3355.**

Paper. 10⅜ × 9⅜ inches. Foll. 184. Lines, 20 in a page. *Dēvanāgarī.* Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Rāmakṛṣṇarājaguru, Gaṅgapuraśāsanam, Dharakota post, Ganjam district.

Fol. 182*b* gives the contents of this work. Foll. 183 and 184 are left blank.

**प्रक्रियाकौमुदीव्याख्यानम्—नामनिर्मलदर्पणम्.**

**PRAKRIYĀKAUMUDĪVYĀKHYĀNAM : NĀMANIRMALADARPAṆAM.**

A commentary called Nāmanirmaladarpaṇa on the Prakriyākaumudī, which work has been described under No. 1337 of the D.C.S. MSS., Vol. III : by Lakṣmīdhara, son of Nṛsiṁha, born in the family of Jatūkarṇya. The author lived in the Gaṅganārāyaṇa country which is now called the Oriya country.

Contains up to the end of Samāsāntaprakriyā.

Name of the scribe—Nīlakaṇṭha.

**Beginning :**

श्रीमद्विट्ठलमानम्य पाणिन्यादिमुनीन् गुरून् ।
प्रक्रियाकौमुदीं कुर्मः पाणिनीयानुसारिणीम् ॥
गङ्गानारायणे नाम्नि देशे श्रीपुरुषोत्तमे ।
वेदाङ्गविद्भिर्विप्रैश्च निवा(त्य) संपूरिते पुरे ॥ व्याप्त इत्यर्थः ।
परम्पराक्रमेणैव पितृभिस्स्वकुलोद्भवैः ।
कुर्वता जातुकर्ण्यस्य गोत्रोत्पन्नेन धीमता ॥
नृसिंहोद्गातृपुत्रेण लक्ष्मीधरद्विजन्मना ।
क्रियते बालबोधाय नामनिर्मलदर्पणम् ॥

अथ प्रत्याहारसूत्राणि—अ इ उण् , ऋलृक् , ए ओङ् , ऐ औच् , हयवरट् , लण् , ञमङणनम् , झभञ् , घढधष् , जबगडदश् , खफछठथचटतव् , कपय् , शषसर् , हल् । छन्दोवत्सूत्राणि भवन्तीति न्यायेन अइउणित्यादौ सन्धिर्न भवति । इति चतुर्दश प्रत्याहारसूत्राणि । एभिरेकचत्वारिंशत्प्रत्याहारसूत्राणां प्रत्याहाराक्षराणि ज्ञेयम् । इमानि चतुर्दश सूत्राणि महेश्वरेण पाणिनय उपदिष्टानि । तथा चोक्तम्—येनाक्षरसमाम्नायम् + तस्मै पाणिनये नमः ॥ हकारादिष्वकार उच्चारणार्थः । अकार इति वर्णात्कारप्रत्ययः । हकारादिषु हयवर इत्यादिषु यः अकारः स उच्चारणार्थः । लण्मध्ये योऽकारः स इत्संज्ञकः—उपदेशेऽजनुनासिक इदिति ।

* * * *

**Colophon :**

इति सन्ध्युपयोगिसंज्ञाप्रकरणव्याख्या समाप्ता ॥

Foll. 169a—170b. give the Vibhaktyarthavicāra in the Oriya language; on fol. 171a the scribe adds :

नीलकण्ठाभिधानेन कविराजेन धीमता ।
सुतस्याध्ययनार्थाय लिखितं पुस्तकं त्विदम् ॥

**End :**

मातृपितृभ्यां स्वसेति । मातृपितृभ्यां परस्य स्वसुस्सकारस्य षः स्यात् समासे सतीत्यर्थः । मातृष्वसा । पितृष्वसा । पतिशब्दे परे आह—ननान्दुः पतिः । लुक् पक्षे ननान्दपतिः । असमासे तु मातुः स्वसा, पितुः स्वसा इत्येवं नित्यमिति ॥

**Colophon:**

इति समासान्तप्रक्रियाव्याख्या समाप्ता ॥

अव्ययादिसमासान्तप्रक्रिया टीकया सह ।

भात्यस्मिन्पुस्तके चैव शेषा तद्धितप्रक्रिया ॥

The scribe adds:

वैशाखशुक्लैकादश्यां हस्तर्क्षे भौमवासरे ।

समाप्तिमगमत्सम्यग्ग्रहशून्याष्टयाब्दके (१८०९) ॥

शकभूपस्येति शेषः ।

नीलकण्ठाभिधानेन कविराजेन धीमता ।

लिखितं पुस्तकमिदं पुत्रवत्परिपालय ॥

R. No. **3356.**

Paper. 10⅜ × 9⅜ inches. Foll. 426. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Vāsudēvamiśra-garu of Changudi, Parlakimedi, Ganjam district.

Foll. 300 and 426*b* are left blank.

Bound in two volumes.

नामलिङ्गानुशासनव्याख्या.

NĀMALIṄGĀNUŚĀSANAVYĀKHYĀ.

A commentary on Amarasiṁha's Nāmaliṅgānuśāsana, which work has been described under Nos. 1620—1685 of the D.C.S. MSS., Vol. III.

Apparently complete.

**Beginning:**

तत्रादौ भगवतः सेवया परोपदेशेन प्रारिप्सितग्रन्थे प्रत्यूहविघाताय धर्ममर्ज(य)न्नाह । ज्ञानं समस्तविषयपरिज्ञानं, दया निरुपाधिपरदुःख-प्रहारी(रे)च्छा, ताभ्यां सिन्धुः तस्य प्रकृत्यादिभ्य उपसङ्ख्यानमिति तृतीया । तृतीयेति योगविभागात्समासः । सिन्धुशब्दोऽत्र विपुलाधारत्वादुपचारितः । अगाधस्य अन्यैरनधिगतज्ञानाद्याधारत्वापरिच्छेदगाम्भीर्यस्य । अनघा रागा-दिदोषरहिताः । तथा चाजयः—अघशब्दो भवेत्पापे दुःखव्यसनयोरपि इति च ।

* * * *

**Colophon:**

इति प्रथमः काण्डः ॥

**End:**

रक्ष एव राक्षसः स्वार्थिकोऽण् । अस्य पुंस्त्वम् । तथा सामान्येन सर्वं नपुंसकमनुसन्धेयम् । एवं ज्वरः प्रधानो रोगाणामिति पुंस्त्वम् । तथा गोधा पुंस्यपि । स्त्री पोटावि(पि)च कारकाणीत्यत्र क्लीबत्वम् । एवं शिष्टप्रयोगाज्ज्ञेयम् ॥

The scribe adds:

योगिनाथाभिधो मिश्रो जडोद्दंशसमुद्भवः ।
कविचन्द्राख्यनामायं लिखेद्यतं(त्नात्) यथोचितम् ॥

---

R. No. 3357.

Paper. 10⅝ × 9¼ inches. Foll. 44. Lines, 20 in a page. Dēvanāgari and Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Rāmakṛṣṇarāja-guru, Dharakota, Ganjam district.

(a) कामशास्त्रम्.

KĀMAŚĀSTRAM.

Similar to the work described under No. 3895 of the D.C.S. MSS., Vol. VIII.

Deals with the following subjects :—

१. नाडीसंचोदना.
२. विषयविभागः.
३. आलिङ्गनादिनिरूपणम्.
४. वाजीकरणादिनिरूपणम्.

Incomplete.

**Beginning:**

सुखं चतुर्विंशतिनाडिकानां महावहानां मदनातपत्रम् ।
नारीवराङ्गोदय(र)मध्यवर्ति प्रचोदयात् त्र्यक्षरबीजमुक्तम् ॥
उच्चारितानां क्रमशः फलानां द्वितीयकं पञ्चमदक्षमेकम् ।
विसर्गमध्यं प्रणवादिमन्त्रमुद्घाटनं त्र्यक्षरनामधेयम् ॥

मन्त्रः—ओं अः अम्

* * * *

रुषा कृशा विशीर्णाङ्गी जरारोगसमन्विता ।
पुत्रीसंचोदनादेव प्रिया पुत्रवती भवेत् ॥
दुहितृचोदनाचापि नान्यमिच्छाति मानवम् ।
क्लीबोऽपि तु च सर्वस्वं संप्राप्नोति न संशयः ॥

**Colophon:**

नाडीसंचोदना नाम परिच्छेदः ॥

**End:**

सेवेत कामतः कान्तां कामं वाजीकृतो हि मे ।
त्र्यहाद्वसन्तशरदोः पक्षाद्वृष्टिनिदाघयोः ॥

वाजीकरणं च—

चूर्णं विदार्याः सुकृतं स्वरसेनैव भावितम् ।
सर्पिः क्षौद्रयुतं लीढा(ढ्वा) दश गच्छेन्नरोऽङ्गनाः ॥

* * * *

शाल्मलीकुसुमैः पिष्टैः स्त्रीणां क्षीरेण तेन च ।
ऋतुकालं त्र्यहं पीते वन्ध्या नारी प्रजायते ॥

---

(*b*) शृङ्गारकौतूहलम्.

ŚṚṄGĀRAKAUTŪHALAM.

Foll. 9*b*—30*a*.

A treatise on Kāmaśāstra: by Kautukadēva.

Contains the Paricchēdas 1—21 complete:

१. प्रथमकार्योद्देशः.
२. स्त्रीभेदकथनम्.
३. पुरुषभेदकथनम्.
४. पुरुषविवेककथनम्.
५. रतभेदकीर्तनम्.
६. . . . . . . .
७. प्रकृतिलक्षणकथनम्.
८. स्त्रीचरितवर्णनम्.
९. स्त्रीनाशकारणकथनम्.
१०. गम्यागम्यकथनम्.
११. अनुरागकीर्तनम्.
१२. आलिङ्गननिर्णयः.
१३. चुम्बनाधिकारकथनम्.
१४. नखदानविधिः.
१५. दन्तक्षताधिकारकथनम्.
१६. . . . . . . .
१७. प्रहरणवर्णनम्.
१८. कण्ठकूजितकथनम्.
१९. मुखरतवर्णनम्.
२०. बन्धभेदकथनम्.
२१. हस्तादिनिवेशकथनम्.

**Beginning:**

त्रैलोक्यस्यादिकर्त्री तदनु विभुतया पालयन्ती निहन्त्री
नित्यानन्दात्मबोधोज्ज्वलबहलदशां दुर्जनानां प्रशास्त्रीम् ।

अज्ञानध्वान्तमैत्री विमलतरगतिं ब्रह्मरूपैकनेत्रीं
वन्दे सन्देहहन्त्रीं त्रिदशवरनुतां भारतीमादिमायाम् ॥
ये दृष्टाः परितुष्टिदा नयनयोः संभाषिता वाक्सुधा-
धाराभिः परिपूरयन्ति सततं ये सेविताः कामदाः ।
सामान्याः परकीयकीर्तिकलिकां विस्तारयन्त्यादरात्
जात्यन्धाः परदोषसंहतिषु ये तेभ्यो जिनेभ्यो नमः ॥
यज्जैनः किल पादपीठतुलना जातः सतां भूतले
यस्तद्वक्त्रविनिर्गतापररसास्वादादवाप्तोत्सवः ।
यस्तद्वक्त्रनिमन्त्रणापरिहृतः स्वेच्छाविहारस्सतां
प्रीत्यै कौतुकदेव एष कृतवान् शृङ्गारकौतूहलम् ॥

* * * *

वर्ण्यते तदिह भेद आदितो नायिकारमणयोरनुक्रमात् ।
तत्र धर्मिणमपेक्ष्य पण्डितैः साध्यधर्मविधिरुच्यते यतः ॥

* * * *

**Colophon:**

इति शृङ्गारकौतूहले प्रथमकार्योद्देशः प्रथमः परिच्छेदः ॥

**End:**

इति करिकरयोगान् सत्प्रयोगान्यधीनः (यावत्)
सततमधरपानं कूजितोग्रं चरस्य(न् यः) ।
मृदुरपि खलु कामी कामिनीं मुग्धकामां
करजपदविशुद्धं प्रीणयत्येव कान्तः ॥

**Colophon:**

इति शृङ्गारकौतूहले हस्तादिनिवेशो नाम एकविंशतिपरिच्छेदः ॥

---

(*c*) स्मरदीपिका.

SMARADĪPIKĀ.

Foll. 30*b*—35*a*.

Similar to the above.

Complete.

**Beginning:**

हरकोपानलैर्दग्धो भस्मीभूतः कृतः स्मरः ।
अर्धगौरीश्वरस्तस्मै हिते तस्मै नमो नमः ॥

सम्यङ्नाराधिते काममुरते कुसुमादिभिः ।
विदधाति वरस्त्रीणामाराद्ग्रन्थिविमोचनम् ॥
अनेककामशास्त्राणां सारमाकृष्य यत्नतः ।
बालवृद्धावरस्त्रीणां चित्तसन्तोषकारकम् ॥
मारं निर्जित्य बुद्धो हि बुद्धिमाभि(न्वि)मुखीकृतम् ।
येनतेनामधेयेन(?) निर्मिता स्मरदीपिका ॥
कामशास्त्रं विदित्वा तु भवन्ति सुन्दरीप्रियाः ।
कामशास्त्रमजानन्तो रमन्ते पशुवत् स्त्रियः ॥

**End:**

लेपनं सकललोमशातनं कान्तिकारकमशेषभोगदम् ।
योनिलेपनमिदं विशेषतो लोमहृ मदनशास्त्रनिर्मितम् ॥

**Colophon:**

इति स्मरशास्त्रे स्मरदीपिका समाप्ता ॥

---

(*d*) रतिमञ्जरी.

RATIMAÑJARĪ.

Foll. 35*b*—37*a*.
Similar to the above. By Jayadēva.
Complete.

**Beginning:**

नत्वा सदाशिवं कामं नागराणां मनोहिता ।
रचिता जयदेवेन राजते रतिमञ्जरी ॥
पद्मिनी चित्रिणी शङ्खिनी हस्तिनी तथा ।
शशो मृगो वृषोऽश्वश्च जातिः स्त्रीपुंसयोः स्मृतः ॥

**End:**

पद्मजासनलयेन पद्मिनी वेणुदारणलयेन चित्रिणी ।
नागपाशवरणेन शङ्खिनी स्कन्धपादयुगलेन हस्तिनी ॥
ग्राम्यं नागरकं चैव नागपाशं करग्रहम् ।
स्कन्धयुक्ताङ्घ्रिकं चैव वेणुदारितमेव च ॥
सेव्यं पद्मासनं चैव पुंनार्योरुत्तमं मतम् ॥

**Colophon:**

इति जयदेवकृती रतिमञ्जरी समाप्ता ॥

(e) वशीकरणाधिकारः.

VAŚĪKARAṆĀDHIKĀRAḤ.

Foll. 37b—43a. Fol. 43 gives the Yōgadhyāyavivaraṇa. Fol. 44 is left blank.

Similar to the above.

Complete.

---

R. No. 3358.

Paper. 10¾ × 9⅜ inches. Foll. 85. Lines, 20 in a page. Dēvanāgarī and Malayalam. Good

Transcribed in 1920-21 from a MS. of M.R.Ry. Tippan-Nambūdirippād, Ponpārkoṭṭa-mana, Perumbavore post, Travancore State.

(a) सिद्धसारतन्त्रम्.

SIDDHASĀRATANTRAM.

Foll. 1a—21b.

Similar to the work described under R. No. 799 ante. By Niśācarabhaṭṭācarya. This is also called the Rasōpaniṣad.

Deals with the following subjects:—

१. महागूढसिद्धिः.
२. गुरुप्राप्तिः.
३. शिष्यलक्षणम्.
४. मण्डपविधानम्.
५. बलिविधानम्.
६. मूर्द्धाकल्पः.
७. मूषविरचनम्.
८. उपस्करणविधिः.
९. वह्निकर्मविधिः.
१०. महारसोपरसकथनम्.
११. द्रव्यशोधनन्.
१२. लोहरञ्जनम्.
१३. लोहमारणम्.
१४. सत्त्वपातनम्.
१५. द्वन्द्वमेलनम्.
१६. गगनद्रावणम्.
१७. हेमताराकृष्टिप्रदर्शनम्.
१८. स्वेदनाधिकारः.
१९. बीजव्युत्पत्तिः.
२०. विडाधिकारः.
२१. खगयुक्त्यधिकारः.
२२. सारणाधिकारः.
२३. क्रामणकारणम्.
२४. वर्णोत्कर्षविधिः.
२५. मृदुकरणाधिकारः.
२६. रससिद्धप्रयोगः.

Breaks off in the 26th Viraṭi.

**Beginning:**

नमस्कृत्य दुर्गां भगवतीम् ।
तथा सिद्धिप्रधानानां रससिद्धिं समारभेत ।
प्रत्यहं पायसे(सैः) भक्ष्यभोज्यं सुघृतसंयुतैः ॥
दशांश[ब्र]भा(गा)नुद्दिश्य ब्राह्मणान् दश भोजयेत् ।
सदक्षिणाभिस्संयुक्तं तथा पञ्चविधार्चने ॥

* * * *

एवमेव प्रकारेण गुञ्जामात्रं पुनः पुनः ।
गन्धकं विमलं दद्याद्धूमवेधी न संशयः ॥

**Colophon:**

इति सिद्धसारतन्त्रे निशाचरभट्टाचार्यकृतं नागार्जुनप्रसादेन कनकमञ्जरीकृतं महागुदेषु सिद्धिः ॥

* * * *

तस्यां पूर्वस्यां दिशि ओषधीः अनेके(क)रसस्वेदनां, दक्षिणे लोहमारणं, नैरृत्यां कुट्टनपेषणं, वारुण्यां लोहद्रावणं, वायव्यां धमनं, कौबेर्यां वेधनम्, ऐशान्यां वर्णोत्कर्षणं प्रविद्ध्यान्मध्ये गुरोरासनमिति ।

**Colophon:**

इति रसोपनिषदि मण्डपविधानं नाम चतुर्थी विरतिः ॥

**End:**

घृतं यष्टि मधु क्षौद्रं किंवेजं वीरकन्दली ।
गुडतैलसमायोगान्निषेको मृदुकारकः ॥

**Colophon:**

इति (रसोपनिषदि) मृदुकारणी पञ्चविंशतिर्विरतिः ॥

* * * *

समरसगन्धकचूर्णं तरसायसपात्रमर्दितं सम्यक् ।
लीढं मधुसर्पिर्भ्यां हन्यात् कफमारुतपित्तसम्भवान् रोगान् ॥

* * *

स्मरेद्देवान् जपेन्मन्त्रान् ध्यायेच्चैवादिभावनाम् ।
गगनरससिन्धुत्रिफला त्रिकटुकशिला ॥

---

(6) महास्वच्छन्दसारसङ्ग्रहः.

MAHĀSVACCHANDASĀRASAṄGRAHAḤ.

Foll. 21b—40a.

Same work as that described under No. 5691 of the D.C.S. MSS., Vol. XII, wherein see for the beginning.

Contains the Paṭalas 47 to 49 complete, and the 50th incomplete.

**End:**

प्रधानं सर्वशास्त्रेषु प्रायश्चित्तविधिः प्रिये ।
भ्रष्टाचारवतां पुंसां प्रायश्चित्तं च संशृणु ॥

**Colophon:**

इति महत्(हा)स्वच्छन्दसानु(ग)सङ्ग्रहे एकोनपञ्चाशतितमतः(त्तमः) पटलः ॥

प्रायश्चित्तं वदाम्यद्य साधकानां यथेप्सया ।
सन्ध्याकर्मविलोपे तु त्रिखण्डानि त्रिशो जपेत् ॥
नित्यार्चनायां लुप्तायां सासनाङ्गावृति शिवाम् ।
जलाञ्जलीभिस्सन्तर्प्य स्वस्वमन्त्रैरनुक्रमात् ॥

* * * *

गुरोर्नियोगादुक्तेन प्रायश्चित्तेन शुध्यति ।
स्वयं विचा . . . . . . . . . . . ॥

---

(c) सिद्धशाम्भवतन्त्रम्.

SIDDHAŚĀMBHAVATANTRAM.

Foll. 40a—84a. Foll. 84b and 85 are left blank.

Similar to the work described under subdivision (a) of the same number. This is also called the Siddhaśakti.

Deals with the following topics:—

१. रसप्रशंसाधिकारः.
२. आचारोपकरणनिरूपणम्.
३. रसशोधनाधिकारः.
४. रसशुद्ध्यधिकारः.
५. सारणप्रतिसारणविधिः.
६. रञ्जनाधिकारः.
७. गगनजारणविधिः.
८. अभ्रकजारणविधिः.
९. सूतसंस्कारविधिः.
१०. सूतचारणाविधिः.
११. क्रामणाधिकारः.
१२. वेधाधिकारः.
१३. भक्षणसंस्काराधिकारः.
१४. द्रव्योपायनिरूपणम् (with Malayalam meaning).

Breaks off in the 14th Paṭala.

**Beginning :**

जीयाज्ज्योतिर्विभोस्सूक्तिस्सा सुवर्णपदानुगा ।
शिवयोस्सामरस्यैक्यं मर्त्यानां वितनोति च ॥
परं यस्या विलासेन मन्त्रं बिन्दुद्वयात्मकम् ।
सद्यस्सिध्यति जन्तूनामष्टौ किमुत सिद्धयः ॥

* * * *

तत्सूतो बिन्दुरूपेण ध्वनिरूपेण चाभ्रकः ।
प्रत्यक्षं तिष्ठतो लोके भूतानुग्रहकाम्यया ॥
इति परमरहस्यं सिद्धसूक्तिप्रदिष्टं
विबुधहृदयपद्मोल्लासिबालार्कबिम्बम् ।
विलसितमणिमाद्यैर्वैभवैरप्रमेयः
प्रभवति नियतानां साधकानां विभूत्यै ॥

**Colophon :**

इति श्रीसिद्धशाम्भवे श्रीसिद्धसूक्त्यां रसप्रशंसाधिकारो नाम प्रथमः पटलः ॥

**End :**

पदसधारा सूक्तिस्सिद्धा(द्धैर)वतारिता लोके ।
सुकरमिह साधकानां साक्षाद्ध्यान्मनोरथावाप्त्यै ॥

**Colophon :**

इति श्रीसिद्धशाम्भवतन्त्रे श्रीसिद्धसूक्त्यां भक्षणसंस्काराधिकारो नाम त्रयोदशः पटलः ॥

अथ साधकसिद्ध्यर्थं द्रव्योपायं(यो) निरूप्यते—

पुरुषार्थत्रयं येन भूमौ सिध्यति हेलया ।
त्रिविधार्थस्य चोत्पत्तिरुत्तमा रससम्भवा ॥
क्षेत्रजा मध्यमा प्रोक्ता कनिष्ठा लोहसङ्करात् ।

* * * *

गन्धकं [शिला]रससंयुक्तं माक्षिकं च समाश्रितम् ।
इङ्गिलीकसमं कुर्यात् तारमायाति काञ्चनम् ॥

* * * *

नागस्य रूपं त्रिपुटं कुङ्कुमोदरसन्निभम् ।
त्रिविधं तारमेकार्थं तत्समं कनकं भवेत् ॥

---

R. No. 3359.

Paper. 10¾ × 9⅛ inches. Foll. 40. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa-Nambūdirippād, Kūṭalūr-mana, Nareri, Tritāla, Malabar district.

Foll. 39*b* and 40 are left blank.

काव्यादर्शव्याख्या.

KĀVYĀDARŚAVYĀKHYĀ.

A commentary on Daṇḍin's Kāvyādarśa, which work has been described under No. 12830 of the D.C.S. MSS., Vol. XXII: by Yamuna.

Complete.

**Beginning:**

करोतु कमलाकान्तः कल्याणं करुणाकरः ।
बुद्धिबोधकबोध्यात्मा प्रपञ्चोऽयं यदाश्रयः ॥
अथ दण्डिप्रणीतस्य विवृणोत्यर्थमादरात् ।
काव्यादर्शाभिधानस्य काव्यशास्त्रस्य यामुनः ॥
प्रबन्धादौ प्रयोक्तव्यामाचार्यस्सद्भिराशिषम् ।
प्रायुङ्क्त दण्डी पद्येन चतुरित्यादिना स च ॥
चित्ते सरोविशेषे च मानसाख्या प्रयुज्यते ।
शुक्लशब्दश्च निर्दोषे श्वेतवर्णे च वस्तुनि ॥
हंसी जलचरी तस्या रतिर्युक्तैव मानसे ।
अम्भोजेषु च तत्प्रीतेः दैर्घ्यमाशस्यमत्र तु ॥
काव्यस्वरूपजिज्ञासुजनचित्तानुवर्जनम् ।
पूर्वशास्त्रा(णि संह)त्येत्यादिना सोऽकरोत्सुधीः ॥
अत्र लक्षणशब्देन ज्ञापकं शास्त्रमुच्यते ।
नो चेत्क्रियत इत्येतदमुना स्यादनन्वितम् ॥

कालिदासादिकविजनप्रयुक्तान् रघुवंशादिकाव्यप्रयोगानुपलक्ष्य तत्स्वरूपनिरूपणलक्षणप्रतिपादकानि काश्यपप्रभृत्याचार्यविरचितानि बहूनि शास्त्राणि विस्तरग्रहणाशक्तबालजनानुग्रहत्वाय संहृत्यास्माभिर्यथासामर्थ्यं काव्यलक्षणं क्रियते काव्यस्य गुणालङ्कारादिदोषादिज्ञापकः ग्रन्थविशेषः क्रियत इति पद्यार्थः ।

*    *    *    *

**Colophon :**

इति यामुनविरचितायां काव्यादर्शटीकायां प्रथमः परिच्छेदः ॥

**End :**

अथाचार्यः स्व(ा)रब्धं शास्त्रमुपसञ्जिहीर्षुरुक्तमर्थजातमनुवदति—(शब्दा)र्थालङ्क्रिया इत्यादिना । गुणदोषान् न शास्त्रज्ञः कथं विभजते जन इत्यादिना पूर्वं निर्दिष्टं शास्त्रं निगमयति—व्यंत्पंन(व्युत्पन्न)बुद्धिरित्यादिना । विधिदर्शितेन शास्त्रचोदितेन गुणदोषयोर्वशवर्तिनीभिः दोषगुणविषयहानोपादानक्रियोपकरणभूताभिः धन्यस्सुभगः लभते किंकिं(कीर्त्तिं) च लभत इति कवेः काव्यकरणस्यैहिकामुष्मिकसुखहेतुत्वमुक्तम् ॥

**Colophon :**

इति यामुनेयविरचितायां काव्यादर्शटीकायां चतुर्थः परिच्छेदः ॥

---

## R. No. 3360.

Paper. 10⅝ × 9⅝ inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa-Nambūdiri, Vadakke-Maṭham, Iriñjalakuḍa, Cochin State.

Fol. 26 is left blank.

### रुक्मिणीपरिणयम्
### RUKMIṆĪPARIṆAYAM.

Similar to the work described under No. 12637 of the D.C.S. MSS., Vol. XXI. By Rāma Śarman, son of Śrīnivāsa Śarman of Śrīvatsa family. It was intended to be enacted in the court of Rāmakulaśēkhara Varman of Vañci family.

Complete in five Acts.

**Beginning :**

नन्दन्नन्दिप्रधानप्रमथपरिवृढप्रस्तुतोत्तालताला
काली सङ्गीतभङ्गीमधुरिमसुभगंभावुका भावुकानाम् ।
पारम्पर्यैश्चरंवो(यौश्चलन्ती) निरवधिपरमानन्दसम्पन्निलिम्प-
श्रेणीनिर्वर्ण्यमाना पटुनटनकला शाम्भवी बोभवीतु ॥

अपि च

यत्संवर्ते न वृत्तं वटविटपिदले यच्च सर्पेशतल्पे
नोत्पन्नं नन्दगेहे यदपि मणिमयान्दोलिकायां न जातम् ।
राधाङ्गन्यस्तमूर्ध्नो निधुवनविरतौ नक्तमल्पावशेषे
तद्धस्सं(स्सं)वेशसौख्यं कुहचन कुहनागोपसूनोर्धिनोतु ॥

नान्द्यन्ते ततः प्रविशति सूत्रधारः । सूत्रधारः—सामाजिकाभिमुखमञ्जलिं बद्ध्वा भो भो निखिलखलहृदयनिचङ्क्रन्यमानशोकशल्यस्य शल्यस्येव धर्मजातबद्धचेतसः प्रचेतस इव पार्श्वपरिभ्राजमानवाहिनीसहस्रस्य

* * * *

राज्ञः श्रीपद्मनाभदासवञ्चिबालरामकुलशेखरवर्मणः सभासदस्सर्वे शृण्वन्तु मम प्रश्रयवतीं विज्ञापनाम् । अहमस्मि कल्याणतरङ्गो नाम शैलूषकिशोरकः । अस्ति तत्रभवतः पवित्रकीर्तेश्श्रीवत्सकुलसम्भवस्य श्रीनिवासशर्मणः पुत्रेण श्रीरामशर्मणा निबद्धमभिनवं रुक्मिणीपरिणयं नाम नाटकम् । तदखिलचराचरप्रपञ्चभवनमूलस्तम्भस्य दोस्स्तम्भसन्दानितकमलाकरेणोः कैटभकरटिकूटपाकलस्य

* * * *

पद्मनाभस्य सान्निध्यादव(प)गतनिश्शेषकल्मषनिर्मलधिषणायामस्यां सभायामभिनेतुमभिलषामि ।

**End :**

तथापीदमस्तु भरतवाक्यम्—

प्रौढोदारगुणा प्रपञ्चितरसस्रोतस्तरङ्गोत्तरा
कुत्राप्यस्खलिता स्फुटध्वनिपदन्यासोज्ज्वलालङ्क्रिया ।
भावैस्संवननं विधाय विदुषामास्थानरङ्गस्थले
भव्या काव्यनटी मुहुर्विहरतामाचन्द्रतारं भुवि ॥

इति निष्क्रान्तास्सर्वे ॥

**Colophon :**

पञ्चमोऽङ्कः ॥

## R. No. **3361.**

Paper. 10¾ × 9⅜ inches. Foll. 150. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Rāmakṛṣṇa-rāja-guru, Dharakota, Ganjam district.

Fol. 150*b* is left blank.

साहित्यरत्नाकरव्याख्या—अलङ्कारसुधाकरः.

SĀHITYARATNĀKARAVYĀKHYĀ : ALAṄKĀRASUDHĀ-KARAḤ.

A commentary on the Sāhityaratnākara, which work has been described under R. No. 306 ante: by Kṛṣṇa, son of Paramānanda and grandson of Rāmadīkṣita of Kautsagōtra. The commentator and his ancestors lived in the Oriya country.

Contains the Kaumudis one to five complete; Kaumudī sixth is incomplete and wants the beginning and the end in the seventh Kaumudi.

**Beginning:**

नमश्शिवाभ्यां नवयौवनाभ्यां परस्परालिङ्गितविग्रहाभ्याम् ।
नगेन्द्रकन्यावृषकेतनाभ्यां नमो नमश्शङ्करपार्वतीभ्याम् ॥

अकृतिविकृतिज्ञानाधारं परे तु परेतर-
द्विभु बहुगुणं प्राहुः केचिच्चराचरकारणम् ।
अजनिसुखचित् केचिद्वाचोयुरेकमसद्गुणं
रघुपतिमयं धाम श्यामं नमामि तदुत्तमम् ॥

नानाशास्त्रविशारदो द्विजवरो यो रामनामा महान्
यज्वा कौत्सकुलावलीहिमकरः प्रादुर्बभूवोत्कले ।
कृष्णस्तत्तनयात्मजः कविसुधीः साहित्यरत्नाकरा-
लङ्कारस्य सुधाकराख्यममलं व्याख्यानमाख्यात्यसौ ॥

विघ्नविध्वंसनपूर्वकसमाप्तित्वावच्छिन्नं प्रति, विघ्नध्वंसमात्रं प्रति वा मङ्गलस्य हेतुतायास्सिद्धत्वात् ग्रन्थादौ शिष्यशिक्षार्थं तदुपनिबन्नन्नाह । यद्यपि देवतास्तुतेर्मङ्गलरूपत्वेन प्रथमतो विष्णुशङ्करादेरेव प्रधानदेवतात्वात् स्वस्यापि ग्रन्थकर्तुः रामोपासकत्वेन वैष्णवत्वाच्च विष्ण्वादिस्तुतिनिबन्धनमुचितं, तथापि गणनाथस्य विद्याधिकारात् विघ्ननाशकत्वेन स्मृतिसिद्धत्वात्, अग्रपूज्यो गणाधिप इति वचनाच्च गणेशस्तवोद्घाटनम् । आलिङ्ग्येति ।

बालश्चेति गजाननश्चेति सः नः अस्मान् अवतु रक्षतु ।

* * * *

वृन्दावने कुसुमधन्वा विजयत इति हंसदूतादिप्रयोगात् ।

**Colophon:**

इति श्रीकौत्सकुलकैरवशरन्निशाकरन्यायवैशेषिकशेषभाष्यादिशास्त्राकूपारपारङ्गमसाहित्यसङ्गीतज्योतिःप्राकृतच्छन्दोनिगमविस्सर्वङ्कषमहामहोपाध्यायकविकोविदकृष्णमिश्रविरचितायामलङ्कारसुधाकरसमाख्यायां साहित्यरत्नाकरटीकायां ग्रन्थारम्भसमर्थनप्रथमतरङ्गविवरणप्रथमा कौमुदी ॥

विद्वन्मण्डलमण्डनेन जनितः कौत्सान्वयद्योतिना
यो रामाह्वयदीक्षितेन परमानन्दाख्यमिश्रो महान् ।
तत्पुण्योत्थसुतस्य कृष्णविदुषः साहित्यरत्नाकर-
स्यालङ्कारसुधाकरे रुचिकरे पूर्णोदिमा कौमुदी ॥

**End:**

अत एवात्यर्थं रोचत इत्युक्तमिति दिक् ॥

**Colophon:**

इति श्रीमहामहोपाध्यायकृष्णमिश्रकृतौ अलङ्कारसुधाकरे साहित्यरत्नाकरटीकायां गुणनिरूपणा नाम पञ्चमी कौमुदी ॥

विद्वन्मण्डलमण्डनेत्यादि ।

तत्पुण्योत्थसुतस्य कृष्णविदुषः साहित्यरत्नाकरा-
लङ्कारादिसुधाकरे गतवतीयं पञ्चमी कौमुदी ॥

अथेति । अथ गुणनिरूपणानन्तरम् । गुणानन्तरमलङ्कारनिरूपणे सङ्गतेः प्रथमतरङ्गस्यादौ दर्शितत्वादिति भावः ॥

* * * *

धत्ते पालयति अत्ति संहरते कृत्रिम इत्यनेन ब्रह्मरूपं विधत्तेऽत्तीत्याभ्यां विष्णुरुद्ररूपत्वं चोक्तम् । असतामिन्द्रारीणामसुराणाम् ।

छदाः पल्लवाः तत्तमैरलक्तकचिह्नैरङ्किताः । अनुक्तत्वादिति । अम्बरस्थल्याः शब्दानुपात्तत्वेऽपि उक्तज्योत्स्नातारापुञ्जा द्यौरिव निर्वाहाय गम्यत्वादिति भावः । एवमन्येऽपीति वीक्षणीयाः काव्यालोकादिति उन्नेयाः ।

अनुक्तविशेषो यथा—

ऊर्ध्वोर्ध्वमुपमेयस्य यदि स्यादु(प)मानता ।
रशनावचसान्योऽन्ययोगः स्याद्रशनोपमा ॥

* * * *

यद्यपि निश्चयान्तसन्देहे एकस्यैव ज्ञानस्य संशयनिश्चयोभयरूपत्वं न सम्भवति, तथापि निश्चयपार्श्वकयेन पूर्वस्यैव तदलङ्कारत्वम् । ज्ञानद्वये वाच्या(व्या)सज्यवृत्ति तत् ॥

---

R. No. **3362.**

Paper. 10⅝ × 9⅜ inches. Foll. 48. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of the Naḍuvil-Maṭham, Trichur, Cochin State.

Foll. 47*b* and 48 are left blank.

तोटकश्लोकाः, सव्याख्याः.

TŌṬAKAŚLŌKĀḤ WITH COMMENTARY.

Slightly different from the work described under R. No. 2518 ante. By Cidānandayōgin, disciple of Pūrṇātmayōgīndra.

The text is also called Śrutisārasamuddharaṇa and the commentry is called Tattvadīpikā.

Complete.

**Beginning:**

तं वन्दे मुनिवर्यं तोटकवृत्तं चकार यः कृपया ।
प्रकरणमध्यात्मपरं प्रकटितपरमात्मतत्त्वमभ्यसताम् ॥
श्रीमत्पूर्णात्मकृष्णस्य पादपङ्कजपादुकाम् ।
प्रणम्य रचये व्याख्यां तोटकश्लोकगामिनीम् ॥

इह खलु निखिलोपनिषत्सारभूतं श्रुतिसारसमुद्धरणाख्य प्रकरणमारभमाणस्तस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च विशिष्टेष्टदेवताप्रणतिलक्षणं मङ्गलाचरणं मुखतस्सम्पादयन् अस्य प्रकरणस्य शारीरकभाष्यार्थसङ्ग्रहत्वेन तत्प्रकरणत्वात्तदीयमेव विषयप्रयोजनादिकं सूचयति—

त्रैलोक्यनाथहरिमीड्यमुदारसत्त्वं शक्रेस्तनूजतनयं परमेष्ठिकल्पम् ।
जीमूतमुक्तविमलाम्बरचारुवर्णं वासिष्ठमुग्रतपसं प्रणतोऽस्मि नित्यम् ॥
अत्र त्रैलोक्यमित्याकाशादिप्रपञ्चो लक्ष्यते । तस्य त्रैलोक्यस्य ।

**End :**

तं त्रिभुवनवपुषमखिलं नियन्तारं सहस्रशीर्षेत्यादिश्रुतिसिद्धं विष्णुं मुहुर्मुहुर्नमामि ॥

अतिमन्दमुमुक्षूणां तत्त्वबोधप्रसिद्धये ।
तोटकश्लोकगीतेयं रचिता तत्त्वदीपिका ॥

**Colophon :**

इति श्रीमत्पूर्णात्मयोगीन्द्रशिष्येण चिदानन्दयोगिना रचिता तत्त्वदीपिका समाप्ता ॥

---

R. No. **3363.**

Paper. 10¾ × 9¾ inches. Foll. 64. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippād, Kūṭalūr-mana, Nareri, Tritala, Malabar district.

Fol. 64*b* is left blank.

## कुमारसम्भवव्याख्या—कुमारसम्भवदीपिका.

## KUMĀRASAMBHAVAVYĀKHYĀ : KUMĀRASAMBHAVA-DĪPIKĀ.

A commentary on Kālidāsa's Kumārasambhava, which work has been described under No. 11494 of the D.C.S. MSS., Vol. XX. By Kavi-Nārāyaṇa.

Contains the Sargas one to eight complete.

**Beginning :**

स जयति जगदभिवन्द्यः चन्द्रः चूडामणिः कलामूर्तिः ।
वक्रोऽपि निष्कलङ्कः परमस्य विभोः परिग्रहबलेन ॥

अनेन प्रारम्भे समस्तकाव्यरसपरिपूर्तिकारी परमेश्वरचूडामणिः चन्द्रमाः काव्याभिप्रायेणाभिष्टू(ष्टू)यते । निष्कलङ्कः शब्दार्थदोषवर्जितः वक्रः विविधगुणालङ्कारसमन्वयाद्विचित्रोक्तिरूपः कलामूर्तिः अनेकविद्यातीर्थमयः चन्द्रः परमाह्लादरूपरसोपपन्नः । परमस्य विभोः ।

* * *

परमेश्वरपत्न्या देव्यास्सम्भवमभिधास्यन् तस्याः पितुः प्रालेयमयस्य पर्वतपतेर्वर्णनेन वस्तु निर्दिशति—अस्त्युत्तरस्यामित्यादि । अस्ति स्वस्ति

कल्याणं मङ्गलं भद्रं लक्ष्मीर्गौरी सरस्वती ब्रह्मविष्णुशिवसिद्धस्वयम्भूदर्पण-वृषभगजेन्द्रचन्द्रादिषु काव्यादौ प्रयोज्येषु प्रशस्तेषु लाक्षणिकैः उपादाना-दस्तिशब्दस्तावदभ्युदयार्थदर्शकः । एवमुत्तरस्याम् ।

* * * *

**Colophon:**

इति कविनारायणविरचितायां कुमारसम्भवदीपिकाख्यायां परमेश्वरोपासनं नाम प्रथमस्सर्गस्समाप्तः ॥

**End:**

यद्यप्येवं कालो जगाम तथापि सुरतसुखेषु नासौ छिन्नतृष्णः प्रशान्ताभिनिवेशो बभूव । समुद्रान्तर्गतो ज्वलनः बाडवाग्निः तज्जलेषु समुद्रवारिष्विव सुभृशं भोगाभिरतिरभवदित्यर्थः ॥

**Colophon:**

इति कविनारायणविरचितायां कुमारसम्भवदीपिकाख्यायामष्टमस्सर्गस्समाप्तः ॥

समाप्तं च कुमारसम्भवं काव्यम् ॥

---

## R. No. 3364.

Paper. 10⅞ × 8⅜ inches. Foll. 14. Lines, 20 in a page. Grantha and Dêvanāgarī. Good.

Transcribed in 1920-21 from a MS. of Vanamamalai Matham Nanguneri, Tinnevelly district.

(*a*) शरणागतिपञ्चविंशतिः, सव्याख्या.

SARAṆĀGATIPAÑCAVIṀŚATIḤ WITH COMMENTARY.

Foll. 1*a*—6*b*.

A work in 25 stanzas in which the supplicant surrenders himself to the mercy of God. The work is followed by a commentary.

Incomplete.

**Beginning:**

नमोऽस्तु भक्तिसाराय महनीयगुणाब्धये ।
ययौ अङ्गमतां येन वेगासेतुर्विभावितः ॥

इह खलु गुरुपरम्पराप्राप्तं मन्त्ररत्नं सम्प्रदायानुसारिणा मन्त्ररत्नाक्षरसमसङ्ख्यश्लोकात्मना शरणागतिपञ्चविंशत्याख्येन प्रबन्धेन व्याचिकीर्षन्

प्रबन्धार्थसङ्ग्रहं मङ्गलं चादिमश्लोकेन निबध्नाति—वरणेति । मन्त्ररत्ने पूर्वः खण्ड उपायपरः उत्तरस्तूपेयपरः । तत्र धर्मिग्राहकेतिश्लोक उत्तरखण्डव्याख्यानरूपः, शेषाः पूर्वखण्डव्याख्यानरूपा । तत्र पूर्वखण्डे चरमश्लोकविहितं न्यासोपासनातिरिक्तं सिद्धोपायाधिकारिविशेषणत्वादिस्वभावकं वरणं स्वानुष्ठानमुखेन प्रकाश्यत इति सत्सम्प्रदायः ।

* * * *

शरणवरणं प्रतिपादयतो मन्त्ररत्नस्य विवरणमनेन शरणागतिपञ्चविंशत्याख्येन क्रियते । वरणेति—

वरणोपायभावस्य वक्तुं निरवकाशताम् ।
निवरीतौ करीशस्य निदधे चरणौ हृदि ॥

वरणस्योपायत्वप्रार्थनाया उपायभावस्योपायत्वस्य निरवकाशतां स्वविषयकवरणस्यापायतया स्वानुप्रवेशौपयिकावकाशराहित्यं वक्तुं बोधयितुं निवरीतौ ।

**End:**

अनवाप्त्यात्मविभवमित्यनेन न्यासभिन्ना शरणागतिः स्वरूपेण नास्ति न्यासोपासनयोः फलभेदोऽपि नास्तीति वदन्तः सयूथ्या व्यावर्तिताः । उपासनेनाप्तिर्न्यासेनानवाप्तिरिति विवेको विवक्षितः । उपासनापेक्षया न्यासस्यान्तरङ्गत्वात् । प्रसज्येति । प्रसज्यप्रसङ्गः

---

Transcribed in 1920–21 from a MS. of M.R.Ry. Tippan Nambûdirippâd, Ponnûrkotta-mana, Perumbavore post, Travancore State.

(*b*) कनकमञ्जरी.

KANAKAMAÑJARÎ.

Foll. 7*a*—12*b*. Foll. 13 and 14 are left blank.

A treatise in alchemy dealing with the preparation of chemical gold by combining several chemicals, shrubs, drugs, etc.: by Nâgârjuna.

Deals with the following subjects:—

१. पूतलोहसत्त्वजारणाधिकारः.
२. पूतलोहसत्त्वसङ्करजारणाधिकारः.
३. विडवर्गाधिकारः.

Complete.

**Beginning:**

प्रणम्य सर्वदं देवं त्रैलोक्यात्मनं शिवम् ।
सर्वदः सिद्धसङ्घस्य गुरुपादौ विशेषतः ॥

रससिद्धिं प्रवक्ष्यामि सुखोपायं सुविस्तरम् ।
दरिद्राणां हितार्थाय अन्येषां तदनन्तरम् ॥
सर्वसत्त्वानुकम्पाय लिखित्वा कनकमञ्जरीम् ।
आदौ तु मृत्तिकां गृह्य साधयेद्वज्रमूषिकाम् ॥
अग्निदग्धं तुषं गृह्य अर्धभागं तु मृत्तिकाम् ।
दग्धं तु शङ्खचूर्णं तु भागैकं यत्र योजयेत् ॥

* * * *

एतच्चूर्णं तु हेमेन निर्वाह्यं द्वादशं गुणम् ।
एतद्बीजसमे जीर्णे शतं तारं तु विन्दति ॥

**Colophon:**

इति पूति(त)लोहसत्त्वजारणाधिकारः ॥

**End:**

सहस्रार्धकृते वेधं म्लेच्छं न यदि काञ्चनम् ।
बिडं तस्य प्रवक्ष्यामि सामुद्रमथ सैन्धवम् ॥

**Colophon:**

इति पूतलोहसत्त्वसङ्करजारणाधिकारः ॥

दरदार्यां हतं तीक्ष्णं शुल्बं गन्धकमारितम् ।
अन्धमूषा . . ध्वान्तखोट्टो भवति तत्क्षणात् ॥
एतत्तीक्ष्णेन सत्त्वं च सुखोष्णेन तु जीर्यति ।
हेमबीजं समेनापि लेपं कृत्वा तु वर्त्तिका ॥

* * * *

वत्सकं तालकं भागं चूलिता लवणं तथा ।
शिग्रुमूलरसे भाव्यं लोहानि जारणे बिडम् ॥
दातव्याष्टांशसूतस्य प्रथमं तु द्वितीयकम् ।
षोडशांशेन वार्तिकं जरयन्ति शनैश्शनैः ॥

**Colophon:**

इति बिडवर्गः ॥

नागार्जुनकृते(ता) कनकमञ्जरी दीनानां हितार्थाय ।
सोपलिखितायाममृतभट्टारकाणाम् ॥

R. No. 3365.

Paper. 10⅝ × 9⅝ inches. Foll. 52. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of the Raja of Chirakkal, Malabar district.

रुरुजित्पूजाविधानपद्धतिः.

RURUJITPŪJĀVIDHĀNAPADDHATIḤ.

On the details connected with the conduct of the worship of the goddess Durgā.

Complete.

**Beginning:**

गुरुं गणानामधिपं सरस्वतीं शिवं शिवां क्षेत्रपतिं च मातृकाः ।
प्रणम्य भक्त्या रुरुजिद्विधानके विलिख्यते पद्धतिरम्बिकार्चने ॥

ओं परमशिवाद्यशेषगुरुपारम्पर्यक्रमेण स्वगुरुपादाम्बुजं यावत्तावत्प्रणौमि । ओं परमशिवपादुकायै नमः । ओं परमशिवापादुकायै नमः । ओं ब्रह्मपादुकायै नमः । ओं सनकादिपादुकाभ्यो नमः । ओं परमगुरुपादुकाभ्यो नमः ।

* * * *

मां मदीयं च सकलमस्मत्स्वामिन्यै चामुण्डायै तुभ्यं सम्यक् समर्पयामि । ओं तत्सत् ओं नमश्शिवाय(यै) ॥

**Colophon:**

इति रुरुजित्पूजाविधाने दुर्गापूजाविधिः ॥

**End:**

पुनरन्तर्दीपादीन् न्यस्य द्वारं पिधाय द्वारि नित्यपूजां कृत्वा त्रीणि दिनानि नीत्वा चतुर्थदिवसे स्नानं कुर्यात् । इति रहितबलिदेवताया भद्रकाली काल्यां नवीकरणानुष्ठानप्रकारः ॥

**Colophon:**

इति रुरुजित्पूजाविधानपद्धतौ काल्यां नवीकरणानुष्ठानप्रकारस्समाप्तः ॥

## R. No. 3366.

Paper. 10⅜ × 9¼ inches. Foll. 37. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. K. A. Lakṣmaṇa Śāstri Avargal, Kalpati, Palghat.

Fol. 37*a* gives the contents of this work. Fol. 37*b* is left blank.

कर्मप्रकाशिका.
KARMAPRAKĀŚIKĀ.

On the mode of performing the domestic religious rites, such as Pākayajña, etc. By Pañcākṣaraguranātha.

Deals with the following subjects :—

१. पाकयज्ञः.
२. पिण्डपितृयज्ञः.
३. औपासनाग्निसमारोपणम्.
४. अश्वत्थोपनयनविधिः.
५. अश्वत्थविवाहविधिः.
६. कूश्माण्डहोमः.
७. गणहोमविधिः.
८. गृहप्रवेशादिविधिः.
९. पुत्रस्वीकारविधिः.
१०. शूलगवविधिः.
११. सर्पबलिः.
१२. उपस्थानम्.
१३. प्रत्यवरोहणम्.

Contains the fifth Pariccheda complete.

**Beginning :**

आदौ पौर्णमास्यां . . . . स्थालीपाकस्य पूर्वेद्युरिध्माबर्हिः करोति । क्षारलवणताम्बूलतैलाभ्यङ्गमैथुनानि वर्जयित्वा एकभुक्तः सन् एवं पर्वव्रतं कृत्वापरेद्युः स्नानादिचतुष्टयं कृत्वा प्रथमस्थालीपाके पूर्वोक्तवत् कूश्माण्डहोमं कृत्वा ब्राह्मणाननुज्ञाप्य अमुकपुण्यतिथौ स्थालीपाकमारप्स्ये । प्रथमं पौर्णमासेन स्थालीपाकेन यक्ष्ये । तत्रादौ भवन्तामिति पुण्याहं वाचयित्वा ।

**End :**

अश्वावती त्वं वरुणः बृहस्पते युवं स्वस्ति न इन्द्रो वृद्धश्रवाः इति त्रयोदशमन्त्रैर्बलीन् हरेत । शान्तिकाम औदुम्बरसमिधमष्टाविंशतिसङ्ख्यया यदग्ने यानीति जुहुयात् । आयुष्कामः शं नो देवीः इति मन्त्रेणाष्टाविंशतिसङ्ख्यया दूर्वां जुहुयात् । एवं कृते सद्यः सिध्येत् ॥

**Colophon :**

इति पश्चाक्षरगुरुनाथविरचितायां कर्मप्रकाशिकायां नैमित्तिकपूर्वप्रयोगानुक्रमे स्थालीपाकादिसमुदायो नाम पञ्चमः परिच्छेदः ॥

---

R. No. 3367.

Paper. 10¾ × 9¾ inches. Foll. 70. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. S. A. Rāmasvāmi Śāstrigal, Sanskrit Pandit, Trichur, Cochin State.

तत्त्वचिन्तामणिप्रकाशव्याख्या.

TATTVACINTĀMAṆIPRAKĀŚAVYĀKHYĀ.

A commentary on Rucidatta's Tattvacintāmaṇiprakāśa, which work has been described under Nos. 4013 and 4014 of the D.C.S. MSS., Vol. VIII: by Mahōpādhyāyayajvan of Bādarāyaṇa family.

Contains up to the end of Vyaptivada in the Anumānakhaṇḍa.

**Beginning :**

विजयविजयसिद्धिं भक्तभीष्मप्रतिज्ञा-
मपि घटयितुमिच्छन्नात्तचक्रो रणाग्रे ।
शमयतु दुरितं मे शौरिरस्माहुरार्यो
निखिलभुवनरक्षादीनि लीलायितानि ॥
शैलतुङ्गस्तनीपादपरिचर्यापरम्पराम् ।
शील्यामि शिवोत्तुङ्गयशसे श्रेयसेऽपि च ॥
प्रत्यूहतूलजालप्रबलानलललीलनिजनुतिस्मरणौ ।
बन्धूकबन्धुकान्तेस्सुन्दरवक्त्रस्य चिन्तये चरणौ ॥
बादरायणवंश्येन महोपाध्याययज्वना ।
प्रकाश्यते प्रकाशोऽयं मणेस्सोऽपि क्वचित्क्वचित् ॥

ननु मणिकृतानुमानं निरूप्यत इति प्रतिज्ञायते । तत्प्रतिज्ञा चेदानीमसङ्गता । प्रतिज्ञा हि सग्रन्थे शिष्यप्रवृत्त्यर्थं तत्प्रतिपाद्यविषयनिर्देशार्था । सा च ग्रन्थादावेव कर्तव्या । ननु ग्रन्थादावेवाथ जगदेव दुःखपङ्केत्यादिना न्यायशास्त्रस्य विषयं षोडशपदार्थमुक्त्वा तेष्वभ्यर्हितत्वात्प्रमाणतत्त्वमत्र ग्रन्थे विविच्यत इति सामान्यतः प्रतिज्ञानतापि

* * * *

किमर्थं तत्प्रतिज्ञेत्याशङ्क्याह—शिष्यावधानायेति ।

**End:**

उक्तयोर्हेतुस्वरूपयोः कथं हेतुनिष्ठव्यभिचारानुमापकत्वं व्यधिकरणत्वादित्यत आह—प्रयोजकत्वेति । नचेष्टापत्तेरिति विषमव्याप्तत्वादिति भावः । शास्त्रेऽपीति । विषमव्याप्तस्य तथात्वमस्तीति भावः ॥

**Colophon:**

व्याप्तिवादः समाप्तः ॥

---

## R. No. 3368.

Paper. 10⅞ × 9⅜ inches. Foll. 144. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Narayana Nambadirippad, Kuṭalūr-mana, Nareri, Tritala, Malabar district.

Fol. 144 is left blank.

### चन्द्राभरणहोरा.
### CANDRĀBHARAṆAHORĀ.

A treatise on horoscopy dealing with the following subjects: by Yavanācārya.

Complete.

१. राशिप्रभेदः.
२. षष्टिवर्षादिवर्णनम्.
३. नवग्रहाभरणम्.
४. नवांशकफलवर्णनम्.
५. होराफलवर्णनम्.
६. द्रेक्काणजफलवर्णनम्.
७. अंशकफलवर्णनम्.
८. नक्षत्रतिथिदेवतावर्णनम्.
९. लग्नफलवर्णनम्.
१०. उदयग्रहचिन्तावर्णनम्.
११. द्वितीयग्रहचिन्तावर्णनम्.
१२. सहजचिन्तावर्णनम्.
१३. सुखस्थानचिन्तावर्णनम्.
१४. पुत्रस्थानचिन्तावर्णनम्.
१५. शत्रुस्थानचिन्तावर्णनम्.
१६. कलत्रस्थानचिन्तावर्णनम्.
१७. अष्टमग्रहचिन्तावर्णनम्.
१८. भाग्यग्रहचिन्तावर्णनम्.
१९. दशमस्थानचिन्तावर्णनम्.
२०. लाभस्थानचिन्तावर्णनम्.
२१. व्ययस्थानचिन्तावर्णनम्.
२२. अर्काश्रयदृष्टिकथनम्.

२३. चन्द्राश्रयदृष्टिफलकथनम्.
२४. भौमाश्रयदृष्टिफलकथनम्.
२५. बुधाश्रयदृष्टिफलकथनम्.
२६. गुर्वाश्रयदृष्टिफलकथनम्.
२७. शुक्राश्रयदृष्टिफलकथनम्
२८. मन्दाश्रयदृष्टिफलम्.
२९. राहुकेतुदृष्टिफलम्.
३०. वारफलम्.
३१. नक्षत्रफलम्.
३२. बालारिष्टयोगः.
३३. तिथिफलम्.
३४. करणफलम्.
३५. नित्ययोगफलम्.
३६. द्विग्रहयोगफलम्.
३७. त्रिग्रहयोगफलम्.
३८. चतुर्ग्रहयोगफलम् (incomplete).
३९. } Wanting.
४०. }
४१. राजयोगः
४२. पञ्चमहायोगः.
४३. भास्करादियोगः.
४४. वासीवेसीउभयचरीयोगः.
४५. सुनभानभायोगः.
४६. धुराधुरायोगः.
४७. कुण्डलयोगः.
४८. वीणायोगः.
४९. नलयोगः.
५०. शान्तियोगः.
५१. मृत्युयोगः.
५२. लग्नद्विग्रहयोगः.
५३. चतुर्ग्रहविशेषकथनम्.
५४. जामित्रे द्विग्रहयोगः.
५५. कर्मणि द्विग्रहयोगः.
५६. कर्मफलवर्णनम्.
५७. राजाधियोगकथनम्.
५८. अष्टकवर्गफलम्.
५९. सूर्याष्टकवर्गफलम्.
६०. कुजबुधगुर्वष्टकवर्गफलम्.
६१. शुक्राष्टकवर्गफलम्.
६२. शनैश्चराष्टकवर्गफलम्.
६३. मासजातकविधिः.
६४. जातकफलदत्तकालनिर्णयः.
६५. सूर्यदशाप्रकरणम्.
६६. चन्द्रदशाप्रकरणम्.
६७. भौमदशाप्रकरणम्.
६८. बुधदशाप्रकरणम्.
६९. गुरुदशाप्रकरणम्.
७०. शुक्रदशाप्रकरणम्.
७१. मन्ददशाप्रकरणम्.
७२. मरणसंस्कारः.
७३. दशाननयोगः.
७४. अष्टकवर्गदशाफलम्.
७५. ग्रहातियोगबलम्.
७६. ग्रहबलाबलम्.
७७. सौर्यां चन्द्रदशाप्रकरणम्.
७८. चन्द्रदशाफलम्.
७९. भौमदशाफलम्.
८०. बुधान्तर्दशाफलम्.

८१. जीवान्तर्दशाफलम्.
८२. शुक्रान्तर्दशाफलम्.
८३. मन्दान्तर्दशाफलम्.
८४. दशान्तरफलविपाकः.
८५. स्त्रीपुरुषसंज्ञावर्णनम्.
८६. योगदशाफलम्.
८७. मध्यमायुर्योगः.
८८. चिरायुर्योगः.
८९. कालानुभाववर्णनम्.
९०. ग्रहनानानामवर्णनम्.
९१. गर्भाधिपतियोगः.
९२. स्त्रीजातकफलम्.
९३. नष्टजातकनिरूपणम्.
९४. ग्रहविशेषकम्.
९५. जातकभागाध्यायः.
९६. दशानुयोगकथनम्.
९७. निर्याणलक्षणम्.
९८. मरणकालकथनम्.
९९. मरणलक्षणम्.
१००. मातापितृचिन्ता.
१०१. शत्रुक्षययोगः.
१०२. नववर्गकथनम्.
१०३. काणिवर्गकथनम्.

**Beginning:**

जयति जगतामे(दे)कहेतुर्विश्वात्मा सकललोकदीपकरः ।
अनुदिनमुदयविनाशस्थितिकर्ता भास्करो दिनाधीशः ॥
समुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् ।
व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव ॥

* * * *

अन्येषां जातकाभासो विस्तरेण मयोच्यते ।
शास्त्रं च तद्गतिं चैव उपदेशं च तद्विधिम् ॥
गुरू_पास्य कर्तव्यर(म)न्यथा निष्फलं भवेत् ।

* * * *

निमिषादिवत्सरान्तं कालं राशिप्रमाणमेकैकम् ।
गणितं प्रोक्तं (भाद्यैः) पूर्वं ग्रहचारलक्षणैस्सार्धम् ॥
चन्द्राभरणे सम्यक् दशाविभागं पुरा विनिर्दिष्टम् ।

* * * *

एको राशिर्द्विहोरः स्यात्त्रिद्रेक्काणो नवांशकः ।
त्रिंशांशो द्वादशांशश्च षड्वर्गः परिकीर्तितः ॥

**Colophon:**

इति यवनाचार्यकृतौ चन्द्राभरणहोरायां राशिभेदः प्रथमोऽध्यायः ॥

**End:**

अन्योऽन्यमधिक शोध्यं शून्यभागे शुभं वदेत् ॥
अधिके मध्यमं ब्रूयात्समे मध्यफलं वदेत् ।
चतुर्वर्गेऽधिके योगे काणिवर्गफलं बुधा ॥

**Colophon:**

इति यवनाचार्यकृतौ चन्द्राभरणहोरायां काणिवर्गं नाम त्रिंशत(त)मोऽध्यायः ॥

चन्द्राभरणहोरा समाप्ता ॥

The scribe adds—

भगवत्या दासेन वल्लभेन लिखितमिदम् ॥

---

R. No. **3369.**

Paper. 10¾ × 9¼ inches. Foll. 106. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Mahāmahōpādhyāya Tātāsubbarāya Śāstrigāru, Vizianagram, Vizagapatam district. Fol. 106 is left blank.

(a) गदाधरीयसव्यभिचारक्रोडपत्रम्.
GADĀDHARĪYASAVYABHICĀRAKRŌḌAPATRAM.

Foll. 1a—16.
A short expatiatory tract on the Savyabhicāra of Gadādhara.
Complete.

**Beginning:**

फलीभूतसंशयधर्मितावच्छेदकता यादृशधर्मे पर्याप्ता तादृशधर्मावच्छिन्नविशेष्यकयद्रूपावच्छिन्नप्रकारकत्वं संशयजनकतावच्छेदकं तद्रूपत्वं विवक्षितमिति । पर्याप्त्यधिकरणत्वानिवेशे नित्यत्वतदभावविषयकज्ञानवानयं नित्यो न वेति संशयं प्रति इदंत्वावच्छिन्नविशेष्यकनित्यत्वतदभावविषयकज्ञानप्रकारकत्वेन संशयजनकतया नित्यत्वादिसाध्यकज्ञानादिहेतोः सव्यभिचारत्वापत्तेः ।

**End:**

तच्चिन्त्यम्—तत्तदवच्छेदकतायास्तत्तद्व्यक्तित्वेन युगसहस्रेणापि ज्ञातुमशक्यतयानुगतरूपेणोपकारनाघटितस्यैव युक्तत्वादिति ॥

**Colophon :**

गदाधरीयसव्यभिचारकोडपत्रं सम्पूर्णम् ॥

The scribe adds—

नातासुब्बरायशास्त्रिणे वेङ्कि महादेवशर्मणा संलिख्य प्रदत्तः ॥

---

(*b*) जगदीशव्यधिकरणपत्रम्.

JAGADĪŚAVYADHIKARAṆAPATRAM.

Foll. 62*a*—105*b*.

Similar to the work described under R. No. 1586 ante.

Complete.

**Beginning :**

नन्वस्तु पारिभाषिकमेवाव्यभिचरितत्वं तथाहि—

यत्समानाधिकरणास्साध्यव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः प्रतियोगिसमानाधिकरणास्तत्त्वं शिरोमणिः । अत्र शास्त्रकारीयसङ्केतः परिभाषा । तया चार्थबोधकं पारिभाषिकस्या(म)व्यभिचरितत्वम् ।

* * * *

अथ साध्यव्यापकतावच्छेदकप्रतियोगित्वकत्वस्य वैयर्थ्यमुक्तं जगदीशेन ; तन्न चारुतरं प्रतिभाति ।

**End :**

न च धनी चैत्रत्वादित्यादौ साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्ध्या अव्याप्तिरिति वाच्यम् ; वृत्तिनियामकसम्बन्धस्य प्रतियोगितावच्छेदकसम्बन्धत्वमताभिप्रायेणैव तल्लक्षणप्रणयनादिति दिक् ॥

**Colophon :**

इति श्रीजगदीशव्यधिकरणपत्रं समाप्तम् ॥

---

## R. No. 3370.

Paper. $10\frac{3}{8} \times 9\frac{1}{4}$ inches. Foll. 148. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of Śrīran Bṛndāvana Ratho, Sirgade, Ganjam district.

भागवतसन्दर्भः.

BHĀGAVATASANDARBHAḤ.

A treatise on the Caitanya philosophy bringing out the importance of devotion towards Lord Kṛṣṇa.

Date of transcription—Eighth day of the dark fortnight of the lunar month Vaiśākha in the year 1786 of Vikramaśaka, corresponding to the seventh year of king Divyasiṁha.

Contains the fifth Sandarbha called the Bhaktisandarbha only.

**Beginning :**

तौ सन्तोषयतां सन्तौ श्रीलरूपसनातनौ ।
दाक्षिणात्येन भट्टेन पुनरेतद्विविच्यते ॥
तस्याद्यं ग्रन्थनालेख्यं क्रान्तव्युत्क्रान्तखण्डितम् ।
पर्यालोच्याथ पर्यायं कृत्वा लिख्य(ख)ति जीवकः ॥

अत्र पूर्वं सम्बन्धचतुष्टयेन सम्बन्धो व्याख्यातः । तत्र पूर्णसनातन-परमानन्दलक्षणपरतत्त्वरूपं सम्बन्धि च ब्रह्म परमात्मा भगवानिति त्रिधाविर्भावतया शब्दितमिति निरूपितम् । तत्र च भगवत्त्वेनैवाविर्भावस्य परमोत्कर्षः प्रतिपादितः प्रसङ्गेन विष्णवाबाश्रतुस्तनाबाश्च(!) तदवतारतयव दर्शिताः । स च भगवान् स्वयं श्रीकृष्ण एवेति निर्धारितम् ।

**End :**

अत्रान्योऽपि विशेषश्शास्त्रमहाजनदृष्ट्यानुसन्धेयः ।
गुरुश्शास्त्रं श्रद्धा रुचिरनुगतिस्सिद्धिरिति मे
यदेतत्तत्सर्वं चरणकमलं राध्यति तयोः ।
कृपापूरस्तद्यत्स्थापितनयनाम्भोजयुगलौ
सदा राधाकृष्णावगतिगतिदौ तौ मम गतिः ॥

**Colophon :**

इति श्रीकलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीभगवत्कृष्णचैतन्यदेवचरणानुचरविश्ववैष्णवराजसभासभाजनभाजनश्रीरूपसनातनानुशासनाभारतीगर्भे श्रीभागवतसन्दर्भे भक्तिसन्दर्भो नाम पञ्चमस्सन्दर्भः ॥

The scribe adds—

अङ्गनागनगचन्द्रसङ्ख्यके (१७८६) वत्सरे क्षितिपवृन्दशिखामणेः ।
दिव्यसिंहनृपतेस्तुरगाङ्के (७) माधवस्य बहुलाष्टमीतिथौ ॥

नन्दनन्दनपदाब्जसेविना वैष्णवेन शरदुर्गवासिना ।
लिख्यते पवननन्दनपूर्वराजपूज्यपठनाय पुस्तकम् ॥

---

R. No. 3371.

Paper. 10⅜ × 8¼ inches. Foll. 24. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of the Raja of Chirakkal, Malabar district.

तर्कसङ्ग्रहार्थप्रकाशिका.

TARKASAṄGRAHĀRTHAPRAKĀŚIKĀ.

A commentary on the Tarkasaṅgraha which work has been described under No. 4143 of the D.C.S. MSS, Vol. VIII: by Puruṣōttama. This commentary is also called Saṅgrahārthaprakāśikā.

Complete.

**Beginning:**

निधाय हार्दे विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः ॥

निधायेति । हार्दे विश्वेशं निधाय ध्यात्वा गुरुवन्दनं कृत्वा शिष्यशिक्षार्थं श्लोकरूपं वाचनिकं मङ्गलं ग्रन्थतो निबध्नन् शिष्यावधानाय प्रतिज्ञां करोति--क्रियत इति । शिष्यावधानं शिष्याणां श्रोतुमिच्छा । शाब्दबोधः—हृदयनिष्ठविश्वेश्वरविषयकध्यानानन्तरकालीनगुरुविषयकवन्दनविषयक-[नमस्कार](कृत्य)नन्तरकालीनबालनिष्ठानायासप्रयोज्यबोधजनकस्तर्कसङ्ग्रहो मन्निष्ठकृतिविषयीभूत इति । पदार्थविभागं करोति—द्रव्येति । द्रव्यं च गुणश्च कर्म च सामान्यं च विशेषश्च समवायश्चाभावश्च—इति पदार्थास्सप्त ।

**End:**

कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ।
अन्नंभट्टेन विदुषा रचितस्तर्कसङ्ग्रहः ॥

---

कणानत्तीति कणादः कणादमते नवीनमते न्यायमते गौतमादिप्राचीनमते च बालानां पदार्थज्ञानासिद्ध्यर्थं विदुषा अन्नंभट्टकविना तर्कसङ्ग्रहः कृत इत्यर्थः ॥

नवीनन्यायमतयोर्बालानां सुखबोधिका ।
पुरुषोत्तमेन रचिता सङ्ग्रहार्थप्रकाशिका ॥

**Colophon:**

इति तर्कसङ्ग्रहार्थप्रकाशिका समाप्ता ॥

समाप्तश्चायं ग्रन्थः ॥

---

R. No. 3372.

Paper. 10¼ × 9¼ inches. Foll. 164. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. obtained through M.R.Ry. S. Gōpalācāriyar, Villiyambakam, Chingleput district.

हरिवंशपुराणम्.

HARIVAMŚAPURĀṆAM.

Foll. 163b and 164 are left blank.

Same text as that described under R. No. 2993 ante, wherein see for the beginning. By Brahmaśrījinadāsa, pupil of Sakalakīrti.

Contains the Sargas 1—20 in the first part, dealing with the following subjects:—

१. पीठिकावर्णनम्.
२. सुखराज्यवर्णनम्.
३. सुमुखवनमालासङ्गमवर्णनम्.
४. श्रेणिकपृच्छावर्णनम्.
५. कुन्तीमाद्रीभवान्तरवर्णनम्.
६. गन्धर्वसेनाविवाहवर्णनम्.
७. वसुदेवविविधवधूपाणिग्रहणवर्णनम्.
८. वसुदेवमदनवेगालाभवर्णनम्.
९. मृगध्वजवर्णनम्.
१०. वसुदेवसोमश्रीसमागमवर्णनम्.
११. वसुदेवरोहिणीविवाहवर्णनम्.
१२. कंसभवान्तरवर्णनम्.
१३. वसुदेवसप्तपुत्रभवान्तरवर्णनम्.
१४. कंसवधोग्रसेनराज्यवर्णनम्.
१५. यादवद्वारवतीप्रवेशवर्णनम्.
१६. नेमीश्वरगर्भावतारवर्णनम्.
१७. नेमीश्वरजन्माभिषेकमण्डनादिवर्णनम्.

१८. शिशुपालवधरुक्मिणीविवाहवर्णनम्.
१९. प्रद्युम्नपूर्वभववर्णनम्.
२०. श्रीकृष्णजाम्बवत्यादिविवाहपाण्डवलाक्षागृहादिप्रवेशनिर्गमादिवर्णनम्.

**Beginning:**

सिद्धं सम्पूर्णभव्यार्थं सिद्धेः कारणमुत्तमम् ।
प्रशस्तदर्शनज्ञानचारित्रप्रतिपादिनम् ॥
सुरेन्द्रमकुटाश्लिष्टपादपद्मांशुकेसरम् ।
प्रणमामि महावीरं लोकत्रितयमङ्गलम् ॥
वन्दे नेमीश्वरं भक्त्या त्रिदशाधिपवन्दितम् ।
त्रिजगत्पूज्यपादाब्जं समस्ताघविनाशनम् ॥
सकलांस्तीर्थकर्तॄंश्च प्रणमामि स्वसिद्धये ।
मुक्तिश्रीललनासङ्गलालितान् विश्ववन्दितान् ॥

* * * *

तथा विद्वत्क्रमायातं वक्तुं व्यवसिता मतिः ।
हरिवंशचरित्रं मे जनानां हितमिच्छ(वाञ्छ)या ॥
साधूनां कीर्तनात्पापं दूरं याति सहस्रधा ।
प्राप्नोति बुद्धिविज्ञानं यशो जायेत वामलम् ॥

* * * *

**Colophon:**

इति श्रीहरिवंशपुराणे सकलकीर्तिशिष्यब्रह्मचारिजिनदासविरचिते पीठिकावर्णनं नाम प्रथमस्सर्गः ॥

**End:**

एवं यस्माद्विधानाद्भवति भुवि नृणां शास्त्रसिद्धिः प्रशस्ता
देवा मर्त्याश्च सेवां विदधति महती कीर्तिरुत्कण्ठिता स्यात् ।
स्थाने स्थाने नरेन्द्राश्श्रुतिमुखरमुखाः सद्गुणालिं स्तुवन्ति
श्रीमत्तज्जैनदास्यं भजत भजत भो भूरिभूतिप्रदायि ॥

**Colophon:**

इति श्रीहरिवंशपुराणे भट्टारकश्रीसकलकीर्तिशिष्यब्रह्मचारिश्रीजिनदासविरचिते कृष्णस्य जाम्बवत्यादिस्त्रीलाभपाण्डव[ानां] लाक्षागृहादु[द्धो]द्धृत्य देशा-

**Beginning:**

चतुश्चित्रगर्भश्रीरामायणसङ्ग्रहे बालकाण्डादिमाक्षरमारभ्यान्त्यश्लोकादिमाक्षरपर्यन्तं तैरक्षरैः कृतचित्राणि । श्रीरामाय नमोऽस्तु सीतापते रक्ष मां रघुपते पाहि । राम त्वां नमामि ।—

* * * *

रामकवचम्.

राम सदा पाहि शिरो मामकमगजे-
शमानसानन्दकर फालतलं त्वं मम च ।
श्रोत्रयुगलमागमान्तरस्थितपद नयनयुगं
सीताप्रिय रक्ष मदीयं च नासिकां वालिहर ॥

**End:**

सीताकरसारसयुगपाताविविशदमणिविराजितमौलिम् ।
स्त्रीयुतमरुणमणिप्रोतासनगं भजे शुभे रामम् ॥

---

(*b*) रामायणसङ्ग्रहः.

RĀMĀYAṆASAṄGRAHAḤ.

Foll. 1*b*—218*a*.

A treatise in prose and verse narrating the story of the Rāmāyaṇa: by the same author as that of subdivision (*a*), supra.

The required information about the author comes out by the regular combination of the first letters in the second Pāda of the stanzas in the Balakaṇḍa.

Complete.

**Beginning:**

अथास्य काण्डस्याद्यपद्यद्वितीयपादादिमवर्णमारभ्यान्त्यपद्यद्वितीयपादादिवर्णपर्यन्तं तैर्वर्णैरुदितचित्राणि—श्रीनिट्ठलोपमाकशर्मणा विश्वनाथतनयेन कामाम्बालताप्रसवेन जायाद्वयजातसूरविश्वनाथरामभद्रामादिपुत्रवता च रामपादकमलयुगसञ्चारलोलमानसेन विबुधचरणकञ्जसेविना भवतमोऽरुणोऽयं श्रीरामायणसङ्ग्रहो नाम मूतकालरचि(चरि)तो रचितो बभूव ।

य इदं रामचरितं सदा वदति मानवः ।
स याति परमं स्थानं धाम धामशतप्रभम् ॥

* * * *

गद्यम्—

श्रीमद्रामनाममहिमजिज्ञासाधीनमानसाचलराजसुताचेतोनन्दकन्दमृताधिकरुचिकरवाचं वाचा वञ्चितमोचं दिवाकरनिशाकरधनञ्जयलोचनं सेवकजनभवपाशमोचनम्

* * * *

रघुवंशाब्धिसम्पूर्णविधुर्दशरथो नृपः ।
मान्धातृरघुवत्कीर्त्या कुतले राजते भृशम् ॥

* * * *

**Colophon:**

इति चतुश्चित्रगर्भे श्रीरामायणसङ्ग्रहे बालकाण्डे षष्ठस्सर्गः । षट्सर्गोपेतबालकाण्डस्थश्लोकानां सङ्ख्या ६८७ । ग्रन्थसङ्ख्या ७३३। शेषवर्णाः २८। बालकाण्डस्थसर्वश्लोकचतुश्चित्रवर्णानां ग्रन्थसङ्ख्या ८५ । शेषवर्णाः २८॥

**End:**

स्तुत्यं निहलविश्वनाथतनयेनोप्माकनाम्ना कृतं
लक्ष्मीनाथसमर्पितं हरिकृपासम्प्राप्तिबीजं परम् ।
स्तुत्वा राममभीष्टदायिनमनन्तं राममोदास्पदं
मत्वेदं चरितं पठन्त्यनुदिनं ये ते हि धन्या भुवि ॥

**Colophon:**

इति चतुश्चित्रगर्भश्रीरामायणसङ्ग्रहे उपमाकवेङ्कटेश्वरशर्मणा विरचिते युद्धकाण्डे एकोनत्रिंशः सर्गः ॥

युद्धकाण्डस्यैकोनत्रिंशत्सर्गगतश्लोकाः १७३८ । ग्रन्थसङ्ख्या १७८६ । शेषाक्षराणि २८। बालादिषट्काण्डस्थसर्गाः ६८। षट्काण्डस्थश्लोकाः ३७३६। षट्काण्डस्थग्रन्थसङ्ख्या ४११२ । शेषाक्षराणि २४ ।

The scribe adds—

श्रीधात्रपरपरार्धे श्वेतवराहाख्यकल्पकेऽधिकपुण्ये ।
वैवस्वतमन्वन्तरगतविंशत्युत्तरे च देवयुगे ॥
कलियुगादिमपादे शालिवाहनशकेऽर्कवत्सराश्च गताः ।
गजदिङ्मुनीन्दुसङ्ख्या (१७८८): प्रभवशरन्मार्गभानुदिवसे वै ॥
इचब्दोत्तरैकर्तुकालस्य गौरीविवाहादिचित्रोदरं काण्डषट्कम् ।
श्रीदं च रामायणं संप्रणीतं द्विजेनोपमाकाख्येन सत्कीर्तनीयम् ॥
श्रीचतुश्चित्रगर्भश्रीरामायणसङ्ग्रहाख्यं काव्यं समाप्तिमगमत् ॥

---

(c) गौरीविवाहः.

GAURIVIVĀHAḤ.

Foll. 218b—223a.

A treatise describing the marriage of Gauri with Śiva.

The peculiarity of the composition of this work consists in the fact that it is made up by the regular combination of the first letter in

the stanzas from the Ayōdhyākāṇḍa to the Yuddhakāṇḍa of the work described above.

Complete.

**Beginning**:

अयोध्याकाण्डा द्युद्धकाण्डान्तश्लोकादिपादगतगौरीविवाहकाव्यम्—

श्रीमानमेयगुणवानचलाधिराजो
वाभाति भूरि हिमवानितिनामधेयी ।
नक्षत्रचुम्बिशिखरो दिशि देवभावो
यक्षप्रभो . . म . वितभूरिधामा ॥
स योगिनीं मेरुसुतां तु मेनां रमाङ्गनां शौरिरिवोपयेमे ।
ततोऽनुरागादधिकादसौ तामनङ्गभोगेन चकार लोलाम् ॥
तौ गेहलीलासु सुखं चरन्तावेवं भवानीनिजजीवितेशौ ।
दक्षावमानेन कृतप्रकोपा विहाय देहं समनन्तरं सा ॥

* * * *

आलोचयित्वा मनसि दौहृदव्यञ्जनानि तु ।
ययौ प्रमोदमधिकं शुभकाले हि मेनका ॥
सुषुवे तनयां मङ्गलक्षणां साधुसत्तुताम् ।
ततो महीधरेशोऽसौ शिवेमे इति नामनी ॥
चकार सकलं चैतदीशोऽगे राजते परे ।
गणयोगिगणोपेतो ययौ श्रुत्वाधिकां मुदम् ॥

**End**:

शिव ते विवाहकथया ये नित्यं मुदितमानसास्तु भवन्ति ।
शुभसम्पदा यदधिकास्ते पुत्रा(धि)कयशोयुजोऽपि भवन्ति ॥
एवं वनित्वा (विचिन्त्य) तदनु तदनुज्ञाधरो हरिः ।
प्रदातापि ययौ लोकं स्वं स्वं स्वजनसम्मतः ॥

गद्यम्—

श्रीकान्ताकान्तप्रचोदितमानसकविविरचितनानाविचित्रकुक्षिश्रीरामायणसङ्ग्रहायोध्याकाण्डप्रथमपादाद्याक्षरप्रभृति कदनकाण्डगत . . . श्लोकाद्यक्षरावधिक्रमनियमिताक्षरैरुदितगौरीविवाह(ख्य)मिदं चरितमखिलकविजनतिलकानां प्रतिभवनमाचन्द्रतारकं सकलशुभदातृ शिववितितदयया . . . . कविकृतानन्दस्य कृतौ जीयात् ॥

(d) श्रीरङ्गादिक्षेत्रमाहात्म्यम्.

ŚRĪRAṄGĀDIKṢETRAMĀHĀTMYAM.

Foll. 223b—228b. Fol. 223 gives the Śivastava.

On the greatness and religious sanctity of Śrīraṅga, etc.

This work is formed by the regular combination of the first letter formed in the secon Pāda of the Ślōkas from the Ayōdhakāṇḍa to the Yuddhakāṇḍa of the Rāmāyaṇasaṅgraha described under subdivision (b) above.

Complete.

**Beginning:**

कावेरीलसदन्तरावनितले रङ्गे विमाने . . . श्रीरङ्गाधिपमन्तरेऽहमनिशं ध्याये महामोक्षदम् ॥

रङ्गेशं सेवकाधीनं मानातीतसुखप्रदम् ।
नमामि त्वामिह त्राहि मां दयाधीनमानसम् ॥

* * * *

जगतां नाथ मां पाहि सदा ते पादसेवकम् ।
दारुपाञ्चालिकारूपधरं सेवकपालकम् ॥

* * * *

रामेश्वरक्षेत्रफलाभिकाङ्क्षी रामेश गौरीश शिवेश शम्भो ।
नित्यं वदन् रामकृतेशलिङ्गप्रदक्षिणे याति परं पदं वा ॥

**End:**

भक्तहृत्कञ्जभृङ्गाय रक्षकाय तपस्विनाम् ।
भद्राचलनिवासाय सीतारामाय मङ्गलम् ॥

**Colophon:**

इति चतुश्त्रिंशद्गर्भश्रीरामायणसङ्ग्रहायोध्याकाण्डाद्यश्लोकद्वितीयपादाद्यक्षरमारभ्य युद्धकाण्डान्तिमश्लोकद्वितीयपादाद्यक्षरपर्यन्तं चतुर्वर्गत्रिवर्गधर्मार्थिप्रदानामुपमाकवेङ्कटेश्वरविरचितानामाद्यश्रीरङ्गपुरुषोत्तमरामेश्वराविमुक्तसिंहाचलकाञ्चीसाकेतद्वारकामधुराशेषाचलप्रयागगौतमीभद्राचलाभिधानत्रयोदशप्रधानदिव्यक्षेत्रतीर्थपुरीमहिमोपेतानां त्रिषष्टिश्लोकानां वत्सरत्रयावश्यनुदिनमास्तिक्येन पठतां जनानामायुरारोग्यपुत्रपौत्रधनधान्यगोगजाश्वादिसम्पदोऽन्ते शाश्वतदिव्यलोकनिवाससिद्धिः सर्वलोकपूर्तियशःप्राप्तिश्चाचन्द्रतारकं भवन्ति ॥

---

(e) भगवदवतारचरित्रम्.

BHAGAVADAVATĀRACARITRAM.

Foll. 229a—232b.

On the different incarnations of God Viṣṇu.

This work is formed by the regular combination of the first letter of the third Pâda of the stanzas from the Ayōdhyākāṇḍa to the Yuddhakāṇḍa of the Rāmāyaṇasaṅgraha described under subdivision (*b*) above

Complete.

**Beginning :**

अयो—तृतीयपादगतवर्णकृतमवतारचरित्रकाव्यम्—श्रीमदनन्तनामकभुजङ्गराजसहस्रफणान्तरमणिप्रभाभासुरमङ्गीकृतातिमञ्जुलभोगोरुप्रदेशं श्रीलानीलाकान्ताकरकिसलयसंवाहनसमश्चितपादपयोजातं योगमायासमेतं सोमकाभिधानदानवहृतवेदनिचयं भूयोऽशेषजगदवनायाथातुकामेन मीनाकारेण तमसुरं हत्वा तं श्रुतिराशिमादाय वेधसे दत्वा । तदवसरविरिञ्चनशङ्करसुरनाथादिसुरासुरमुनिसंस्तुतमहिमोपेतम् ।

* * * *

कमलासमेतं त्वां विदित्वा स्तोतुं कोऽस्ति जय रमानाथ दामोदर ।

**End :**

वासुदेव मदुदीरितं तेऽवतारगुणकथनं परमादरेण लोके ये जनाः प्रतिदिनं संवत्सरं गायन्ति, ते जगति[जगति]चिरायुररोगतायशोधनभोगसम्पदुपेतपुत्रपौत्रसंयुताः प्रतिमातीतसुखमनुभूय निरुपमेऽनन्ततेजोविराजिते वैकुण्ठलोकेऽमानानन्दकन्दलितहृदयारविंद रमासहितेन हरिणा सह निवसन्ति ॥

---

(*f*) द्रौपदीकल्याणम्.

DRAUPADĪKALYĀṆAM.

Foll. 232*b*—236*b*.

A short poem describing the story of the marriage of Draupadī with the Pāṇḍavas: by the same author as that of the above.

This work becomes naturally formed if the first letter of the fourth Pāda of the stanzas from the Ayōdhyākāṇḍa to the Yuddhakāṇḍa of the Rāmāyaṇasaṅgraha be regularly taken and combined.

Complete.

**Beginning :**

अयो—चतुर्थपादगतद्रौपदीकल्याणम्—

गजनिगमराजधानीं सुजनमनोहरसुवस्तुसन्दोहा(म्) ।
सुबलतनयासनाथो भृशमतुलां भुवि विभाति तां शासन्(त्) ॥
कुन्तीमद्रसुषा(ता)धीशो हरिविक्रमसम्पदा ।
चकार विजयं पाण्डुराजस्तदनुजो दिशाम् ॥

* * * *

ततस्तां गृहीत्वा मुदायत्तचित्ता गता राजकन्यां समीपं स्वमातुः ।
परं पाण्डवास्ते तदा शौरिभूरिप्रसादात्समस्तावनीशा इवासन् ॥

**End:**

इदं द्रौपदीमङ्गलं साधु नित्यं चतुश्चित्रगर्भैतरामायणस्थम् ।
पठन्त्यादरात्ते यशस्सम्पदायुस्सुपुत्रान् भजन्ते पदं शाश्वतं च ॥

श्रीमच्चतुराननप्रमुखपिपीलिकान्तजीवजातहृदयस्थपरमेश्वरनियमितस्वान्तेनाने-
कविचित्रोदरश्रीरामायणलङ्घहादिमकाण्डगोपितनामधेयेन कविना

* * * *

द्रौपदीशुभाङ्कितो वासुदेवाधीनः कृतोऽयं ग्रन्थः कविकुलशिरोमणिना प्रति-
कुलं कविसञ्चितसुकृतवशेन सं . . . वासुदेवकृपयानवरतपठनलेखना-
दिव्यापारेण जयतु ॥

Fol. 237 gives the Kṛṣṇastuti. Fol. 238 is left blank.

---

## R. No. 3376.

Paper. 8¼ × 6¾ inches. Foll. 64. Lines, 11 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippād, Culambanakkodath-mana, Tiruppanattura, Cochin State.

Foll. 8, 63*b* and 64 are left blank.

### निरुक्तव्याख्यापाठान्तराणि.
### NIRUKTAVYĀKHYĀPĀṬHĀNTARĀṆI.

Gives the different readings in the Niruktavyākhyā of Dēvarājayajvan.

Incomplete.

**Beginning:**

| पुटे. | पङ्क्तौ. | मुद्रितपुस्तकपाठः. | मातृकातालग्रन्थपाठः. |
|---|---|---|---|
| २ | २ | मदाल ... | मदान्ध. |
| ,, | ७ | प्रणमामि यास्कभास्करं यो हततमसः प्रकाशितपदार्थः. | तं नौमि यास्कभास्करमाहततमसं प्रकाशितपदार्थम् । |

| पुटे. | पङ्क्तौ. | मुद्रितपुस्तकपाठः. | मातृकातालग्रन्थपाठः. |
| --- | --- | --- | --- |
| १ | ११ | यदृष्ट ... | तं दृष्ट. |
| ,, | १२ | नैरुक्तश्चित्र क्रम .. | नैरुक्तविद्वन्निकष. |

End:

| | | | |
| --- | --- | --- | --- |
| २८३ | १, २ | इति निगमः ... | यूयं वयं च सूरय इति निगमौ। |
| ,, | ६ | छद आच्छादने छदेश्चेत्यसुन् | यद्वा चदि आह्लादने चदेरादेश्छचेत्यसुन् आह्लादयति |
| ,, | १२ | आच्छादयति कृपण्युः. | कृपण्युः कृपण्यते र्स्वतिकर्मण आश्रवादित्वात् डुः निगमोऽन्वेषणीयः. |

R. No. 3377.

Paper. 10¾ × 9⅝ inches. Foll. 98. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of the Paliyattu Valiya Accan, Chennamangalam, Cochin State.

(a) न्यायपरिशिष्टम्.

NYĀYAPARIŚIṢṬAM.

Foll. 1a—40a.

This work is an amplificatory appendix to the fifth Adhyāya of the Nyāyasūtras of Gautama. It is by Udayanācārya and is called also the Prabōdhasiddhi.

Complete.

**Beginning:**

प्रथमस्य प्रथमाह्निकार्थः—प्रमाणप्रकरणं, प्रमेयप्रकरणं, न्यायपूर्वाङ्गप्रकरणं, न्यायाश्रयप्रकरणं, न्यायस्वरूपप्रकरणं, न्यायोत्तराङ्गप्रकरणमिति षट् । द्वितीयाह्निकार्थः संशयादिरिति । द्वितीयाह्निकेऽर्थः—संशयपरीक्षाप्रकरणं, प्रमाणसामान्यलक्षणपरीक्षाप्रकरणं, प्रत्यक्षपरीक्षाप्रकरणं, तत्प्रसङ्गागतावयविप्रकरणमनुमानप्रकरणं, तदुपोद्घातप्राप्तवर्तमानपरीक्षाप्रकरणम्

* * * *

तत्रानयोर्युक्ताङ्गहीनत्वप्रदर्शनार्थं सूत्रम्—

गोत्वाद्गोसिद्धिवत्तत्सिद्धिः ।

गोसिद्धिर्गोव्यवहारसिद्धिरित्यर्थः । इहैवं प्रत्युत्तरक्रमः ।

* * * *

**Colophon:**

इति श्रीमदुदयनकृतौ प्रबोधसिद्धिनाम्नि न्यायपरिशिष्टे पञ्चमस्य प्रथमाह्निकम् ॥

**End:**

तर्हि व्यक्तिदूषणेऽपि प्रतिकूलतर्कास्सम्भवन्ति । पृथगेव वक्तव्याः सत्यमुक्ता एव न्याये तत्र सम्भाविताः । सूत्रैरेव जातिप्रत्युत्तरे प्रपञ्चनादिति ॥

लक्ष्यं लक्षणमुत्थितिस्थितिपदं मूलं फलं पातनं
जातीनां सविशेषमेतदखिलं प्रव्यक्तमुक्तं रहः ।
तथ्वं निग्रहसंहृतेरपि गतिर्विस्पष्टमावेदितौ
अस्मिन्विस्तरभीरुभिर्गुरुतमैरालम्ब्यमभ्यासितम् ॥
गम्भीरेऽस्मिन्नयजलनिधौ सन्ति रत्नानि भूयो
येषामेषा कतिपयवता लेखदृष्टा न लक्ष्मीः ।
निश्श्रीहीने जगति विपुलं ग्राहको नास्ति यस्याः
तस्याः कर्षः कनु परिणतो यः परीक्षां विदध्यात् ॥

**Colophon:**

इति श्रीमदुदयनकृतौ(प्र)दोषासिद्धिनाम्नि न्यायपरिशिष्टे पञ्चमस्याध्यायस्य द्वितीयमाह्निकम् ॥

समाप्तश्चाध्यायः ॥

---

(b) न्यायपरिशिष्टव्याख्या—निबन्धः.

**NYĀYAPARIŚIṢṬAVYĀKHYĀ: NIBANDHAḤ.**

Foll. 41a—95b. Fol. 96 is left blank.

A commentary on the work described under the previous subdivision: by Vāmēśvaradhvaja. This is also called the Nyāyapariśiṣṭapañcikā.

Complete.

**Beginning:**

तमीशानं वन्दे तमिममथ वन्देऽक्षचरणं
स्वसिध्यै यावेतावनुगतिमितौ द्वावपि मिथः ।

. . . . . . . . . . . . . . .

. . . . . . . . . . . . . . .

. . . . . . . . . . निरुक्तिप्रिया

वक्तुं चुम्बति हन्त सन्ततिमियं प्रौढिं समातन्वती ।

चित्ते चञ्चलतां विमुच्य वचसि त्यक्त्वा च तां फल्गुतां

सानन्द . . . . . . . . सका(मा)कर्ण्यताम् ॥

अर्थोऽयं करुणावशादुदयनाचार्येण सूत्राक्षरान्

आकृष्टः परिशिष्टके च रचितः प्राज्ञैर्यदप्यूह्यते ।

क्वापि क्वापि तथापि किंचिदपि यद्वाच्यं न सम्बुध्यते

मन्दैस्तद्विशदं विधातुमधुना वामेश्वरो यत्नवान् ॥

दृष्टादृष्टफलोच्चयेन जगतः पुष्टिं विधातुं क्षमा-

मूर्तीगार्तिभिदः प्रणम्य नियतः साष्टाङ्गमष्टावपि ।

तुष्टै शिष्टजनस्य शिष्टधिषणाकृष्टस्य विच्छित्तये

स्पष्टार्थैः परिशिष्टमेतदधुना स्पष्टीकरोम्यक्षरैः ॥

ननु लक्षणस्याध्यायार्थत्वेन प्रकृतलक्षणस्यापि प्रथम एवाध्याये अभिधातुमुचितत्वमित्यत आह—अथेति । चतुर्थाध्यायानन्तरमित्यर्थः । जातिनिग्रहस्थानविशेषयोः सूत्रसमूहः प्रकरणं तत्समूह आह्निकं तत्समूहाध्यायरूपग्रन्थव्युत्पाद्यतया लक्षणस्याध्यायार्थत्वेऽप्यवान्तरविशेषविवक्षया लक्षणाध्यायद्वयं परीक्षाया अध्यायार्थत्वेऽपि अवान्तरविशेषविवक्षया परीक्षाध्यायत्रयवदित्यभिप्रायः ।

• • • •

**Colophon :**

इति भगवत्पादाचार्यस्य श्रीवामेश्वरध्वजविरचिते न्यायपरिशिष्टनिबन्धे प्रथमाह्निकं समाप्तम् ॥

**End :**

तस्मादव्यापकतां परिहर्तुमवयवशब्दमन्यथा व्याचष्टे—अवयवशब्दस्त्वत्रेति । यद्यपि प्रतिज्ञापञ्चकस्याप्यवयवशब्दः प्रसिद्धस्तथाप्यत्र समुदायो-(या)पेक्षया तदेकदेशवचनो ग्राह्य इष्टार्थसङ्ग्रहार्थमित्यर्थः ॥

**Colophon :**

इति वामेश्वरध्वजविरचितपरिशिष्टपञ्जि(ञ्जि)का समाप्ता ॥

The scribe adds—

परमपदद्रुमुक्तौ विप्रवय पारिव्राट् परिवृढपरिचर्यातत्परे प्रीतियोगात् ।
परमसुहृदमुष्य न्यायशास्त्रैकदेशं परिगतपरिशिष्टं कृष्णनामालिलेख ॥

* * * *

न्यायपरिशिष्टपत्रि(ञ्जि)का समाप्ता ॥

---

R. No. 3378.

Paper. 10¾ × 9¼ inches. Foll. 64. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippad, Kuṭalūr-mana, Nareri, Tritala, Malabar district.

Foll. 63*b* and 64 are left blank.

गाथासप्तशती, तात्पर्यटीकासहिता.

GĀTHĀSAPTAŚATĪ WITH TĀTPARYAṬĪKĀ.

Same work as that described under R. No. 23 ante. By Mādhavayajva Miśra.

Wants the beginning and breaks off in the fifth Śataka.

**Beginning:**

शङ्केदयुतो मनोऽक्ष्येऽनुगन्तव्यः । तथा हृदयं च क . . . . . .
. . . . . . . वसन्तेतत्ववत्ताकल्येऽपि सहधर्मचारिणीत्वेन साहाय्यमेव स्वारसिकमित्यतः

* * * *

व्यङ्ग्यं प्रत्येतव्यम् । आरिप्सितस्य प्रबन्धस्य श्रोतृप्रवृत्त्यर्थं सम्बन्धाभिधेय . . . . . . . . . . . . . . . . . अम अं इत्यादिना । अम अं वायड (पाड अ) कव्वं पडि ई सो उं अ जेण आणन्ति । काम . . . . . . . .

* * * *

सङ्केतस्थानीकृतस्य शालिक्षेत्रस्य परिणामात् प्रतिक्षणधवलीभावेन लवनभयाद्रुदती स्वैरिणीं सखीं समाश्वासयति ।

किं रुअसि ओणअमुही (. . .) च्छणवाडिआ जाआ ॥
किं रोदिषि अवनतमुखी (. . .) नदीव शणवाटिका जाता ॥

* * * *

**Colophon :**

इति वादिकविचूडामणिमनो(हो)पाध्यायश्रीमन्माधवयज्वमिश्रविरचितायां हालसप्तशतीतात्पर्यटीकायां प्रथमं शतकं सम्पूर्णम् ॥

**End :**

त्रिधा हि वेश्या—गणिका, विलासिनी, रूपाजीवा चेति प्रागेवोक्तम् । छेकोक्तिच्छायालङ्कारः ।

**Colophon :**

इति हालसप्तशतीतात्पर्यटीकायां चतुर्थं शतकं सम्पूर्णम् ॥

बहुवल्लभस्य वध्वाः कनिष्ठाया रात्रिवृत्तान्तमनुयोक्तुमागतानामाकारत एव प्रकटया गाढस्तापतया शिथिलावयवतया च रात्रिरतनैरन्तर्यमुन्नीयानुमोदमानानां तत्सखीनां मिथस्सल्लापः ।

अह सुवइ दिण्णपडिवक्खवेअणा पसिडि(ढि)लेहि अङ्गेहिम् ।
णिव्वत्तिअसुरअरसाणुबन्धसुहणिब्भरं बहुआ ॥

* * * *

परिमलश्रिरानुबन्धी गन्धः विचित्ररतभेदोपमर्दसहिष्णुत्वं तु ध्वन्यम । हताशाया माल्त्या इत्यनुषङ्गः । वेश्यास्तमेयम्.

---

R. No. 3379.

Paper. 10¾ × 9¼ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Jośyam Valiya Koccunnirājā, Cranganore, Cochin State.

हंससन्देशः, सव्याख्यः.

HAMSASANDEŚAH WITH COMMENTARY.

Similar to the work described under No. 11869 of the D.C.S. MSS., Vol. XX. The text is a Samdēśa-kāvya in form and allegorises the chief Vēdāntic principles.

Complete.

**Beginning :**

गणेश्वरं नमस्कृत्य गुरूंश्च करुणानिधीन् ।
गम्भीरे हंससन्देशे गूढार्थं दर्शयाम्यहम् ॥
अविघ्नेन समाप्त्यर्थं शिष्टाचारानुसारतः ।
करोति मङ्गलाचारं तत्त्वानुस्मृतिलक्षणम् ॥
कश्चिन्मायामृगवशगतः कर्मणा मुह्यमानो
भक्त्या शम्भोश्चरणभवया विप्रयुक्तो विषण्णः ।
रामो यद्वज्जनकसुतया दण्डकारण्यभूमौ
क्षेत्रे प्राप्ते क्वचन पुरुषः कल्पयामास वासम् ॥
को ब्रह्मा परमात्मा वा किं वा ब्रह्म श्रुतौ श्रुतम् ।
चिज्जीवात्मा तयोरैक्यं कश्चिदित्यत्र कीर्त्यते ॥
मृगवच्चेतनाहीनो मृगैर्मायात्र रूप्यते ।
मायामृगात्मा मारीचो यद्वद्रामममत्रभयत् ॥

* * * *

तत्त्वमित्थं विनिर्धार्य तत्साक्षात्कारकारिणीम् ।
अजपामन्तरुद्यन्तीं वदत्यक्षरमातृकाम् ॥
क्षेत्रे तस्मिन् सह विहरतामिन्द्रियाणां मृगाणां
कृत्वा वृत्तिं विषयकवलैर्यापयित्वा दिनानि ।
संसाराब्धेः प्रतरणविधावाञ्छनेवं यथार्न्यं
हंसं कंचित्सहचरमसौ मानसस्थं ददर्श ॥

**End :**

आत्मज्ञानामृतमभिमतं जन्मतापोपशान्त्यै
पायं पायं सपदि विसृजन् कृत्यशेषानशेषान् ।
संछिद्याहं मम तदिदमित्यादिसंसारपाशान्
स्वैरं लोके विहर सुचिरं कर्मपाशैरलिप्तः ॥
विस्तरेण पुरा प्रोक्तं वेदान्तार्थमशेषतः ।
सुखेन प्रतिपत्त्यर्थं संक्षिप्योपादिशत् कविः ॥

**Colophon :**

इति हंससन्देशस्समाप्तः ॥

R. No. **3380.**

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 72. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. *Narayaṇa* Nambūdirippāḍ, Kūṭalūr-mana, Nareri, Tritala, Malabar district.

(*a*) वाक्यवृत्तिव्याख्या.

VĀKYAVṚTTIVYĀKHYĀ.

Foll. 1*a*—7*b*.

Same work as that described under R. No. 3324(*d*) ante, wherein see for the beginning. By Ānandajñāna, disciple of Śuddhānandapūjyapāda.

Complete.

**End:**

किं च द्वितीयतया परिपूर्णत्वेनावस्थितमित्याह—कैवल्यमिति । तदेवं प्रश्नचतुष्टयनिष्टङ्कनद्वारा तत्त्वज्ञानं मुक्तिसाधनं सङ्क्षेपतो निर्धारितमिति स्थितम् ।

वाक्यवृत्तेरियं ह्रीतरुचिता रचिता मया ।
पुना रुचिरतां याता सागतौ(र्पिता) पुरुषोत्तमे ॥

**Colophon:**

इति शुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानरचितवाक्यवृत्तिविवरणं समाप्तम् ॥

---

(*b*) बृहद्वाक्यवृत्तिः.

BṚHADVĀKYAVṚTTIḤ.

Foll. 7*b*—17*b*.

Same work as that described under R. No. 3324(*a*) ante. By Vēdōttamabhaṭṭāraka, as made out from the colophon given below.

Complete.

इति श्रीवेदोत्तमभट्टारकविरचिता बृहती वाक्यवृत्तिः समाप्ता ॥

---

(*c*) स्वरूपविवरणम्.

SVARŪPAVIVARAṆAM.

Foll. 18*a*—25*a*.

A commentary on a work which explains the nature of the individual soul and the Supreme Brahman: by Ānandajñāna, a pupil of Śuddhānanda.

Complete.

**Beginning:**

विधूतविविधोपाधि . . . बोधैकमूर्तये ।
प्रतीचे परमानन्दवपुषे ब्रह्मणे नमः ॥

स्वरूपाख्यं स्वरूपविषयं प्रकरणं चिकीर्षुरधिकारिणो हेयोपादेयविवेकार्थमनर्थमनर्थहेतुभूतं पुरुषार्थं पुरुषार्थहेतुं च प्रथमं सङ्क्षिप्याह्वनात्मभूत इति । साविद्येति । अनाद्यविद्याकार्यत्वादिहाभाव मा(आ)त्मन्यात्माभिमानोऽविद्येत्युच्यते । तत् कुत इति तया विद्यया कार्यकारणरूपया निमित्तोपादानभूतया जन्यत्वं संसारस्य निरुच्यते ।

**End:**

इदं प्रत्यक्षभूतं ब्रह्मैव सच्चिदानन्दात्मकं सर्वतो व्याप्तमखण्डपरिपूर्णं तिष्ठतीति ज्ञानफलमुपसंह्रियते । तदेवमनर्थतद्धेतु(तू)जिहासता पुरुषार्थतद्धेतू जिघृक्षता प्रकरणमिदं श्रोतव्यमिति भावः ॥

हेयादेयभिदावासे यस्मिन्नर्थे न गाहते ।
तं प्रपञ्चपरानन्दं पुरुषोत्तममाश्रये ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचितं स्वरूपविवरणं समाप्तम् ॥

---

(*d*) त्रिपुरीविवरणम्.

TRIPURĪVIVARAṆAM.

Foll. 25—31*a*.

A commentary on a small introductory Advaitic tract by Śaṅkarācārya: by Ānandajñāna, disciple of Śuddhānanda.

Complete.

**Beginning:**

अध्यात्मादिविभेदेन यदविद्या विजृम्भते ।
तद्ब्रह्म ण्यम(नौम्य)हं सत्यमानन्दज्ञानमद्वयम् ॥

मुमुक्षूणां मोक्षसाधनं सम्यग्ज्ञानमपेक्षमाणानामनायासेन तत्प्राप्त्यर्थं त्रिपुरीप्रकरणमारभमाणस्सुखप्रतिपत्त्यर्थमध्यारोपापवादन्यायेन तत्त्वमुपदिदिक्षुरध्यारोपप्रक्रियया प्रथमं सृष्टिमन्वाचष्टे—शब्देति । शब्दादयो गन्धान्ता बुद्धीन्द्रियविषयाः । वक्तव्यादयश्चानन्दयितव्याः ताः कर्मेन्द्रियविषयाः । मन्तव्यादयश्च चेतयितव्यास्ता अन्तःकरणविषयाः । पृथिव्यादयश्चाकाशान्ताः पञ्च महाभूताख्याः स्थूलसूक्ष्मविभागभाजः परस्मादात्मनस्सकाशान्मायाशक्तिद्वारा जाता व्यवहारमार्गमवतरन्ति ।

**End:**

शोधितत्वंपदार्थमनूद्य तस्य तत्पदार्थत्वं वाक्यार्थं कथयति—स परमात्मेति । संप्रति व्यतिहारविवक्षया परिशोधितं तत्पदार्थमनूद्य तस्य प्रत्यगात्ममात्रत्वं प्रत्याययति—सोऽहमिति । इतिशब्देन प्रकरणं परिसमापयन् यथोक्तवाक्यार्थपरिज्ञानादज्ञानतदुत्थानत्वानिवृत्त्या परिपूर्णपरमानन्दाविर्भावेन कृतकृत्यता भवतीति—एतावद्यः कथयतीति ॥

पुरत्रयपरामर्शो वस्तुतो ना(नेता)नुभूयते ।
यत्र तस्मै नमः कुर्वे पुरुषोत्तममूर्तये ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचितं त्रिपुरीविवरणं समाप्तम् ॥

---

(*e*) उपसदनव्याख्यानम्.

UPASADANAVYĀKHYĀNAM.

Foll. 31*a*—43*a*.

A commentary on a small tract dealing with the conduct of a pupil approaching a proper Guru for spiritual enlightenment: by the same author as that of the above.

Complete.

**Beginning:**

षड्गुणा निर्गुणे यत्र समये समवायिनः ।
तमहं सततं वन्दे निर्दोषं पुरुषोत्तमम् ॥

शुद्धानन्दपदाम्भोजस्मृतिमात्रविकस्वरम् ।
गुरूपसदने चेतो मदीयं संप्रसीदतु ॥

प्रारिप्सितोपसदनाभिधानीयप्रकरणाप्रत्यूहपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय विशिष्टेष्टदेवतातत्त्वानुस्मरणं तन्नमस्काररूपं मङ्गलाचरणं वृद्धाचारप्रमाणकं मुखतस्तत्पादयन्नर्थादपेक्षितमनुबन्धजातं च सूचयति—नम इति । ब्रह्म परिपूर्णम् । तस्मै नमो वाङ्मनोदेहानां प्रह्वीभावो भवत्विति सम्बन्धः । किं तत् ब्रह्मेत्युक्ते स्वरूपतटस्थाभ्यां लक्षणाभ्यां तदभिधित्समानः तटस्थलक्षणमाह—अखिलेति ।

**End:**

तदेवं योग्यस्याधिकारिणो गुरुप्रसादादुपदेशलभ्यमैक्यज्ञानं कैवल्यनिबन्धनं सिध्यतीति ॥

सिद्धं मयोपसदनो(नं) गरीयान्(यो)गोचरीकृतः(म्) ।
कृतेन सुकृतेनातो गृह्यतां (तुष्यतात्) पुरुषोत्तमः ॥

**Colophon:**

इति श्रीशुद्धानन्दपरमहंसपूज्यपादशिष्यानन्दज्ञानविरचितमुपसदनव्याख्यानं समाप्तम् ॥

---

(*f*) हरिमीडेस्तोत्रम्.

HARIMIḌESTŌTRAM.

Foll. 43*a*—45*b*.

By Śaṅkarabhagavatpūjyapāda.

Same work as that described under No. 10472 of the D.C.S. MSS., Vol. XVIII; but with a different colophon which is given below.

Complete.

इति वाक्यवृत्तौ विष्णुस्तवः सम्पूर्णः ॥

---

(*g*) हरिमीडेस्तुतिव्याख्या.

HARIMIḌESTUTIVYĀKHYA.

Foll. 45*b*—54*b*.

A commentary on the above work.

Complete.

**Beginning:**

मुमुक्षूणां विचारासमर्थानां जपमात्रादपि ब्रह्मविद्या भूयादिति भगवान् भाष्यकारः सर्ववेदान्तसर्वस्वं स्तुतिव्याजेन दिदर्शयिषुः प्रतिजानीते—स्तोष्ये भक्त्या (इति) । विष्णुं व्यापनशीलं परमात्मानमनादिमजमादिरहितं स्वमायया जगदादिकारणं स्तोष्येऽहमिति प्रतिज्ञातम् ।

**End:**

मनुष्यः । कथंभूतं स्तोत्रं भवभीतिरेव ध्वान्तं तस्य विनाशः तं चार्कवदपहरति तथोक्तम् । भक्तानामिहाधिकार इत्याह—भक्तजनेड्यमिति ॥

इति शङ्करभगवत्पा(त्प)दमुनिकुञ्जरगदितां
मथितामृतभरितां(श्रितजनता)मलदहनीम् ।
भजतानिशमवधीरितविफलेतरम(च)रितां
हरिसंस्तुतिमतिदुस्तरभवसागरसुतरीम् ॥

(h) आत्मज्ञानटीका.

ĀTMAJÑĀNAṬĪKĀ.

Foll. 55a—72a.

A commentary on the Ātmajñāna, which is a treatise by Śaṅkara on the nature of the soul, according to the Advaita-Vēdanta: by Ānandajñāna, disciple of Śuddhānandapūjyapāda.

Complete.

**Beginning:**

विधूतविविधानन्दकल्पनं कल्पनास्पदम् ।
अमन्दानन्दसन्दोहं वन्देऽहं पुरुषोत्तमम् ॥

यस्य प्रसादमासाद्य सद्गतिं बहवो गताः ।
तमहं प्रत्यहं वन्दे शुद्धानन्दपदं गुरुम् ॥

आत्मज्ञानाख्यं प्रकरणमशेषोपनिषदर्थसारसङ्ग्राहकं प्रारभमाणो भगवान् भाष्यकारश्चिकीर्षितप्रकरणाप्रत्यूहपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय मङ्गलाचरणं वृद्धाचारप्रमाणकं कुर्वन् "ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ" ॥ इति स्मृतिमनुसृत्याथशब्दोच्चारणरूपं मङ्गलाचरणमादौ संपादयत्यथेति ।

* * * *

परिहरति—दृष्टेति ।

देहादेरहमन्तस्य श्रुतिन्यायानुरोधतः ।
धियोऽन्यथात्वादात्मत्वहानादज्ञानकल्पना ॥

**Colophon:**

इत्यात्मज्ञानटीकायां प्रथमः खण्डः ॥

**End:**

पदाभ्यासस्य प्रकरणपरिसमाप्तिफलत्वादितिशब्देन शास्त्रार्थस्य सर्वस्यैवात्र सङ्क्षिप्योक्तत्वादुक्तव्यावशेष(?)भावादशेषमति विशदमिति सूचयति ॥

संसारगरलध्वंसिसुधाधारामिवर्षिणी ।
आत्मज्ञानानुगा टीका टीकतां पुरुषोत्तमम् ॥

**Colophon:**

इति श्रीशुद्धानन्दशिष्यानन्द(ज्ञान)विरचिता टीका समाप्ता ॥

Fol. 72 gives some stanzas relating to Advaita-Vēdānta.

---

R. No. **3381.**

Paper. 10⅜ × 8¼ inches. Foll. 124. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. V. N. Nārāyaṇa Nambūdirippāḍ, Vaidyamaṭham, Tritala, Malabar district.

Fol. 124*b* is left blank.

अष्टाङ्गहृदयव्याख्या—हृद्या.

AṢṬĀṄGAHṚDAYAVYĀKHYĀ: HṚDYĀ.

A commentary on the Aṣṭāṅgahṛdaya which, work has been described under No. 13072 of the D.C.S. MSS., Vol. XXIII. The commentator states that he has consulted the Sarvāṅgasundarī, the Aṣṭāṅgasaṅgraha and its another commentary Indu, the Caraka and Suśruta.

Contains the Sūtrasthāna complete and breaks off in the III Adhyāya of the Śārīrasthāna.

**Beginning:**

सौन्दर्योदयसङ्गतैन्दवरुचि ह्रींहे(ह्रीहा)तुरक्लिष्टवाङ्-
मूर्च्छद्दोषविघाति सुश्रुतघनैस्सचारकैरीप्सितम् ।
व्याख्यानस्फुटमुद्रयान्वितमदश्शास्त्रं यथा शाम्भवं
मुख्याष्टाङ्गकहृत् क्रुषीष्ट भवतामिष्टावबोधं वपुः ॥
वर्तन्तां पदपद्मपांसुततयो विश्वक्षमं मण्डनं
कृत्वास्मत्कृतिरक्षिताहतयशोभारो भवेयं भुवि ।
दत्तस्या(त्ता)ञ्जलि मे हिमामृतवद्दा सूक्तिर्भवेत्संपदे
देवि त्वद्वदनामृते पदसदानन्दा सुविद्या मुदे ॥
व्याख्यानतो विशेषार्थप्रतिपत्तिर्यतस्ततः ।
व्याख्या विलिख्यतेऽष्टाङ्गहृदयस्य यथागमम् ॥

* * * *

सर्वाङ्गसुन्दरीं व्याख्यां सेन्दुमष्टाङ्गसङ्ग्रहम् ।
सव्याख्यं चारकं शास्त्रं सव्याख्यानं च सौश्रुतम् ॥

श्रुत्वा सम्यग्विषायार्थान् निरीक्ष्यान्यानि भूयशः ।
तदुक्तैरपि हृद्यार्था व्याख्येयं क्रियते मया ॥
हृद्या कृतिस्संशयसङ्कटानां मोहप्रदानां हृदयाश्रितानाम् ।
भेत्री निजाभ्यासवशेन तन्वी पुंसामियं स्यादनुकूलवाणी ॥
शिष्टाचारानुसारेण समारम्भ समाप्तये ।
विश्वविघ्नोपशमनी देवतेष्टाभिवन्द्यते ॥

रागादिरोगानिति । रागादयश्च रोगाश्च रागादिरोगाः । राग इच्छातिशयः । उक्तं च—

(परकीयम्) इदं मे स्यादिति भेदविकल्पनी ।
मानसी साध्यविषया वृत्तिरिच्छेति कथ्यते ॥
प्रज्विता सैव कुर्वाणा प्रवृत्तिं चोत्तरक्षणे ।
तदसिद्धौ विरोधेन तापनी राग उच्यते ॥

इति । आदिशब्देन द्वेषलोभयोरेव ग्रहणं, तयोर्लक्षणमेतत् ।

* * * *

सततानुषक्तान् सर्वदा संबद्धान् कदाचिद्रागः कदाचिद्द्वेषः, कदाचिल्लोभः, कदाचित् ज्वरादीनामन्यतम इति सततानुषक्तिः नैकस्यैव सर्वदा सम्बन्धोऽभिप्रेतः ।

* * * *

**Colophon:**

हृद्यायां प्रथमोऽध्यायः ॥

**End:**

अत्र सूत्रिता । अर्थाः प्रतन्यन्ते विस्तीर्यन्ते सर्वतः । सप्तम्यर्थे तासिरिति ॥

**Colophon:**

इति हृद्यायां त्रिंशोऽध्यायः ॥

सूत्रिते सति शास्त्रार्थे सर्वस्मिन्नभिधित्सिते ।
अधुना साधुनिर्णीतिश्शरीरस्याभिधीयते ॥
ज्ञाते शरीरे रोगाणां निदानं सुवचं भवेत् ।
अतो निदाननिर्णीतेः पुरस्ताद्देहनिर्णयः ।

प्रथमस्थानसमाप्तेरुपरि निदानाभिधानमन्यत्र शास्त्रेषु दृष्टमस्मिन् विलङ्घ्यते । तत्प्रयोजनं चेदम् ।

* * * *

**Colophon:**

द्वितीयोऽध्यायः ॥

अयातोऽङ्गविभागमिति। अङ्गानां विभागो विभक्तिः पृथक्करणमिति पर्यायः।

यथद्वायुवशादङ्गमित्यङ्गं प्रस्तुतं यतः।
ततोऽङ्गानां विभागार्थमध्याय उच्यते—शिरोऽन्तराधिरिति।

* * * *

तथाहि—

भयं नाम वदन्त्यार्यास्सहसात्मविघातनी(म्)।
पुरः प्रतीते चित्तस्य विक्रियां रोमहर्षणीम्॥

अज्ञानमन्यथाज्ञानमथवा ज्ञानाभावो विषादितेति विषादभावः।

उक्तं च—

कार्याक्षमत्वं चित्तस्य विषादो दुःखपीडनादिति॥

---

## R. No. 3382.

*Paper.* 10⅜ × 6¼ inches. Foll. 130. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamaṅgalam, Parur post, Cochin State,

(*a*) किरातार्जुनीयव्याख्या—सुखबोधिनी.

KIRĀTĀRJUNĪYAVYĀKHYĀ: SUKHABŌDHINĪ.

Foll. 1*a*—112*a*.

Same work as that described under R. No. 2912 ante, wherein see for the beginning. By Dēvarājārya, son of Kṛṣṇadvaipāyanabhaṭṭa.

Contains the Sargas 4—15 complete.

**End:**

तत्त्वविदामपि मुनीनां येऽर्जुनः पुरातनमुनिरिति मन्यन्ते, तेषामप्यङ्गानि अभिन्नं निरन्तरं रोमाञ्चं बिभरांबभूवुः। वीर्यं सम्पश्यतामिति "समो गमी"त्यादौ दृशेश्चेति वक्तव्यमित्यात्मनेपदस्या[त्म]कर्मकादित्यधिकारे प्रवृत्तत्वात्प्रयोगः।

वसन्ततिलकावृत्तमिति शुभम्।

आलोच्य देवराजार्यो विद्वद्भिर्बहुभिस्सह।
व्याख्यां विषमसर्गस्य यथाबोधमवर्णयत्॥

**Colophon:**

इति श्रीकृष्णद्वैपायनभट्टसूनुना देवराजार्येण विरचितायां सुखबोधिन्याख्यायां किरातार्जुनीयव्याख्यायां पञ्चदशस्सर्गः॥

(b) किरातार्जुनीयव्याख्या—शब्दार्थदीपिका.

KIRĀTĀRJUNĪYAVYĀKHYĀ : ŚABDĀRTHADĪPIKĀ.

Foll. 112b—129b. Fol. 130 is left blank.

A commentary on the Kirātārjunīya of Bhāravi, which work has been described under No. 11464 of the D.C.S. MSS., Vol. XX; by Varadarāja, son of Dhānya.

Contains the Sargas 16—18 complete, but wants the beginning of the 16th Sarga.

**Beginning :**

. . . . . . . . . . . किराताधिपतेरलघ्वीमाजिक्रियां वीक्ष्य इति कारणानि तर्कयामास । . . . . . . . (२) मदस्रुतीत्यादि । मदस्रुत्या श्यामिता गण्डरेखा येषां ते तथा नरैराऊढाः विक्रान्ताश्च ते नराधिरूढाश्च विक्रान्तनराधिरूढाः । युधां सहिष्णवः युधामभिज्ञा नगोच्छ्रायमाक्षिपन्त इव एवंभूता हस्तिन इह सङ्ग्रामे न क्रामन्ति ।

* * * *

एममसावपि तस्मादेव महादेवात् बलवीर्यलक्ष्मीं पुत्याचकाङ्क्ष । बलमुत्साहं वीर्यं शक्तिः ॥

**Colophon :**

इति वरदराजीये किरात(तार्जुनीय)व्याख्याने षोडशस्सर्गः ॥

**End :**

असंह[ा]रणीयोत्साहं तरसा स्वेन बलेन विजयिनमुदयं प्राप्य जगतः अनवसादनार्थं धुरं गुर्वीं वोढुं स्थितं दिनकृतमिव स्वधाम्ना तेजसा लोकपालानामुपरि कृतस्थानं तपोलक्ष्म्या दीप्तमेवंभूतमर्जुनममरा उच्चैरुपजगुः । उपगीतवन्तः । उपरिकृतस्थानमिति द्विपदे बहुव्रीहौ निष्ठान्तस्य पूर्वनिपातेन भवितव्यं तस्मादुपरीत्यन्तमव्ययम् ॥

**Colophon :**

इति धान्यसूनुना वरदराजेन विरचितायां किरातार्जुनीयव्याख्यायां शब्दार्थदीपिकायामष्टादशस्सर्गः ॥

---

R. No. 3383.

Paper. 10¾ × 9¼ inches. Foll. 42. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920–21 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

शास्त्रसङ्ग्रहः.

ŚĀSTRASAṄGRAHAḤ.

A treatise explaining, in accordance with the Advaita-Vēdānta, the meaning of the Uttaramīmāṁsāsūtras of Vyāsa. The author Kṛṣṇānubhūtiyati, who was the pupil of Ṣaṇmukha, salutes Vyāsa, Śaṅkara, Ṣaṇmukha and Gōvinda.

Breaks off in the fourth Pāda of the second Adhyāya.

**Beginning:**

हेरम्बं च सदाशिवं वटगतं वागीश्वरीं शाश्वतीं
व्यासं शङ्करनामधेयगुरुमप्यस्मद्गुरुं षण्मुखम् ।
गोविन्दं च जगद्गुरुं शमनिधिं विद्यागुरुं गोपतिं
वन्दे सर्वनिदानमेकममलं ब्रह्मापि सच्चित्सुखम् ॥
कृष्णानुभूतियतिभिः क्रियते शास्त्रसङ्ग्रहः ।
निर्मत्सरैर्जनैर्नित्यं क्रियतामस्य सङ्ग्रहः ॥

अस्पष्टसङ्गतिपदार्थमिदं हि सूत्रं
वैयासिकं तदहमद्य निरीक्ष्य भाष्यम् ।
विस्पष्टसङ्गतिपदार्थयुतं विधास्ये
पद्यत्रयानुगतगद्यमयैर्वचोभिः ॥

भाष्यार्थमात्रमिदमस्य न कोऽपि भेदः
सङ्गृह्य किञ्चिदुदितं किमनेकपद्यैः ।
इत्येवमादि यदि दूषयतीह कश्चित्
हन्ताधुनाभिलषितं फलितं मदीयम् ॥

सम्बन्धोक्तिर्यत्र सूत्रस्य नार्थः यत्राप्यर्थः सङ्गतिर्नात्र भाति ।
सापेक्षत्वं नापि चैकस्य युक्तं तस्माद्यत्नो मेलने तूभयोर्मे ॥

* * * *

शास्त्रस्य प्रथमसूत्रम्---ओं अथातो ब्रह्मजिज्ञासा ।

आत्मेत्यत्राविधेयं वा विधेयं श्रवणादिकम् ।
सिद्धत्वाद्दर्शनस्यैतच्चद्यं न विधीयते ॥
सिद्धस्य भ्रान्तिरूपत्वाद्विधेयं तस्य साधनम् ।
मननं ध्यानसहितं श्रवणं तत्त्वधानवत् ॥

* * * *

**Colophon:**

इति—

कृष्णानुभूतियतिभी रचिते शास्त्रसङ्ग्रहे ।
पादस्तृतीयस्सम्पूर्णः प्रथमाध्यायसंश्रितः ॥

इति तृतीयः पादः ॥

**End:**

प्रदेशादिति चेन्नान्तर्भावात् । नेयं व्यवस्था कस्मात् सर्वेषामात्मनां विभुत्वाविशेषेण सर्वशरीरेष्वन्तर्भावादिति ॥

**Colophon:**

कृष्णानुभूतियतिभी रचिते शास्त्रसङ्ग्रहे ।
तृतीयपादस्सम्पूर्णो द्वितीयाध्यायसंश्रितः ॥

इति तृतीयः पादः ॥

भूतभोक्तृश्रुतेरेवमविरोधो निरूपितः ।
लिङ्गश्रुत्यविरोधार्थमथ पादः प्रवर्तते ॥

तत् कर्तृस्वरूपं प्राङ्निरूप्य करणानि च निरूपयन्निन्द्रियाणामुत्पत्तिं तावदीरयन् सूत्रकारश्चतुर्थपादस्य प्रथमाधिकरणमाह—तथा प्राणाः ।

* * * *

प्राणवता शब्दात् । अधिष्ठात्रीषु(षु) देवतासु सतीष्वपि प्राणवता शरीरेण वागादीनां सम्बन्ध इष्यते । कुतः अथ यो वेदेदं जिघ्राणीति.

---

R. No. **3384.**

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foli 30. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippād, Kūṭalūr-mana, Nareri, Tritala, Malabar district.

तत्त्वानुसन्धानम्.

**TATTVĀNUSANDHĀNAM.**

Same text as that described under R. No. 2509 ante. By Mahādēvasarasvatī, disciple of Svayamprakāśānanda.

Complete in four Paricchēdas.

## R. No. 3385.

Paper. 10¾ × 8½ inches. Foll. 38. Lines, 20 in a page. Dêvanāgari and Malayalam. Good.

Transcribed in 1920-21 from a MS. of the Raja of Chirakkal, Malabar district.

Fol. 38 is left blank.

### वास्तुविद्या, केरलभाषाटीकासहिता.

### VĀSTUVIDYĀ WITH MALAYALAM MEANING.

A treatise on architecture dealing with the following subjects:—

१. मानसाधनकथनम्.
२. भूपरीक्षाकथनम्.
३. वास्तुदेवतास्थितिकथनम्.
४. वास्तुद्वारफलवर्णनम्
५. द्वारविधिः.
६. अङ्गणलक्षणम्.
७. कालनियमः.
८. शालालक्षणम्.
९. पादमानकथनम्.
१०. लुपालक्षणम्.
११. लुपाकरणम्.
१२. धूलिकारोपनम्.
१३. द्वारविन्यासः.
१४. कवाटद्वारविन्यासः.
१५. भवनपरिग्रहः.
१६. मृद्धोष्टलक्षणम्.

Contains the Adhyāyas 1—16 complete.

The work has been printed in the Trivandrum Sanskrit Series.

**Beginning :**

गजास्यमगजापुत्रं विघ्नेशं परमं शिवम् ।
नमामि वचसां देवीं मन्दारकुसुमप्रभाम् ॥
प्रणम्य विश्वकर्माणं शिल्पिनां परमीश्वरम् ।
वास्तुविद्यां प्रवक्ष्यामि यथाशक्ति समासतः ॥
तत्रादौ संप्रवक्ष्यामि सर्वेषां मानसाधनम् ।
मानेनैवाखिलं लोके वास्तु संसाध्यते यतः ॥
परमाणोः क्रमाद्वृद्ध्या मानाङ्गुलमिति स्मृतः ।
परमाणुरिति प्रोक्तो योगिनां दृष्टिगोचरः ॥

* * * *

**Colophon :**

इति वास्तुविद्यायां प्रथमोऽध्यायः ॥

**End:**

एवं देवालयादौ च हाटकादिभिरेव वा ।
स्वर्णादिलोष्टमानं तु ज्ञेयं द्रव्यानुसारतः ॥

**Colophon:**

इति वास्तुविद्यायां षोडशोऽध्यायः ॥

एभिस्तु षोडशाध्यायैः काश्यपीये समीरिता ।
वास्तुविद्याथ चाध्यायैः क्षेत्रविद्या प्रकथ्यते ॥
अध्यायैरुत्कृतिमितैः क्षेत्रसिद्धान्तदर्शिनी ।

ഇപ്രകാരം പതിനാറദ്ധ്യായംകൊണ്ടു കാശ്യപീയത്തിൻ വാസ്തുവിദ്യാ ചൊല്ലപ്പെട്ടു ഒരു അദ്ധ്യായംകൊണ്ടു ക്ഷേത്രവിദ്യാ ചൊല്ലപ്പെട്ടതു. –

---

R. No. 3386.

Paper. 10¼ × 8½ inches. Foll. 162. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

Fol. 162 is left blank.

न्यायसुधाटीका—गुर्वर्थदीपिका.

NYĀYASUDHĀṬĪKĀ : GURVARTHADĪPIKĀ.

Similar to the work described under R. No. 1285 ante. By Vādirāja, who mentions Ānandatīrtha and Vyāsa.

Complete.

**Beginning:**

नारायणं हयग्रीवं व्यासं वायुं सरस्वतीम् ।
नत्वा तत्करुणासत्त्वाद्रमे न्यायसुधाम्बुधौ ॥

श्रिय इति मूर्तिर्महालक्ष्मीरिति च श्रीवाचकपदाभ्यामाद्यन्तयोः सम्पुटीकरणात् श्रीकरोऽयं ग्रन्थः । तत्र वयमेव साक्षिणः । (श्रियः पत्ये) नित्यागणितगुणमाणिक्यविशदप्रभाजालोल्लासोपहतसकलावद्यतमस इति वदता ज्ञानानन्दादिगुणमाणिक्यविशदप्रभाजालोल्लासेन देशतः कालतश्च पूर्णत्वाख्यमहिम्ना अज्ञानदुःखादिदोषाणामनवसरदुःस्थतयोपहतत्वस्यापि सूचितत्वात्प्रथमद्वितीयार्थयोर्हेतु(ना)रूपापि सङ्गतिरुक्ता वेदितव्या ।

* * * *

**Colophon:**

इति श्रीमत्कविकुलतिलकश्रीमद्वादिराजपूज्य(पाद)विरचिते न्यायसुधाटिप्पणे प्रथमस्याध्यायस्य प्रथमः पादः ॥

**End:**

अत एव पूर्वं पुंलिङ्गत्वं श्रुत्यनुसारेणेत्युक्तम् । स्वरि[त्यत्रवे]त्यत्र सुवरिति व्याहृतेः स्वरितिपदेनोक्तौ यथोकारलोपस्तथात्रापीत्यर्थः ॥

**Colophon:**

इति श्रीमत्कविकुलतिलकश्रीमद्वादिराजपूज्यचरणविरचितायां श्रीमन्न्यायसुधाटीकायां गुर्वर्थदीपिकायां चतुर्थाध्यायस्य चतुर्थः पादः ॥ समाप्तश्चाध्यायः ॥

इयं न्यायसुधाम्भोधेस्तथा भाष्याणुभाष्ययोः ।
अनुव्याख्यासङ्गृहीतन्यायानां विवृतेस्तथा ॥
गुर्वर्थदीपिका वादिराजाख्ययतिना कृता ।
आनन्दतीर्थाख्यगुरोस्तथा व्यासस्य तद्गुरोः ॥
भारत्यास्तत्त्वदेवा(वेदा)नां कृपया न स्वशक्तितः ।

The scribe adds—

दुर्मत्यब्दे मासि आ(चा)षाढसंज्ञे शुक्ले पक्षे अ(ब)र्कजे वासरे तु ।
तिथौ सप्तम्यामयने दक्षिणे तु प्रीत्यै गुरोर्लिखितं चार्पितं च ॥

वादिराजयतीन्द्रेण कृता गुर्वर्थदीपिका ।
लिखिता कृष्णनाम्नेयं श्रीनारायणसूनुना ॥

दुर्वादिद्विरदकदम्बपञ्चवक्त्रः सद्विद्वज्जननिकराब्धिपूर्णचन्द्रः ।
विश्वेशाह्वययतिराट् पृथुप्रबोधराद्धान्ताम्बुजतरणिः पुनातु नोऽलम् ॥

---

## R. No. 3387.

Paper. 10¾ × 9¼ inches. Foll. 404. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Nārāyaṇa Śāstrigaḷ of Kalladakurichi, Tinnevelly district.

Foll. 403b and 404 are left blank.

तत्त्वचिन्तामणिव्याख्या—प्रकाशः.

TATTVACINTĀMAṆIVYĀKHYĀ: PRAKĀŚAḤ.

A commentary on the Tattvacintāmaṇi (of Gaṅgēśōpadhyāya), which work has been described under No. 4013 of the D.C.S. MSS., Vol. VIII: by Timmabhūpāla, son of Timmāmbikā and Nṛsimha.

Contains the Pratyakṣapramāṇa complete and Anumāna incomplete.

**Beginning:**

(नित्यानन्दपदावाप्ति)निदानाय चिदात्मने ।
जनार्दनाय जगतां गुरवे प्रणमामहे ॥

भक्तरक्षापि सौवद्धकच्छरक्षाय शूलिने ।

नस्त्यदक्षिक . . . . द्रोऽन्ववायेऽजनि वैरिजिष्णुः ।
अलङ्करिष्णुः किलस्य(ताळु)वेन्द्रकुलं गुणी कुण्ड इति क्षितीन्द्रः ॥
तमा(स्या)त्मजम(:) क्ष्मासि(षि)पराजिराजिचूडामणीभूतपदा(रविन्दः) ।
. . . . . . . . . . . हः प(शा)शा(स)साक्षाद्बलिजिन्नृसिंहः ॥
. . . . . . . . . (क्षो)णिपतीन्द्रपुत्रीं तिम्माम्बिकामाहितलक्षणां सः ।
पुलोमकन्यामिव पूर्णचन्द्रमुखीं वृषो(षे)वोद्वहतिस्मु(स्म)योग्याम् ॥

* * * *

यस्मिन् कृताभ्ये(?) कुलजैरमुष्याः आलिङ्गितोऽसौ युवराज्यलक्ष्म्या ।
प्र(।)व(त)स्थितेऽपि श्रुतबाहुवीर्यैः श्रुतिमेमा (श्रीतिम्मम्)मृद्यमुपां सुधांशुः ॥

* * * *

अप्राप्तपूर्वं पृथिवीपतीन्द्राः प्राप्तुं व(य)शः प्रार्थ्यजनार्दनस्सः ।
श्रीतिम्म(भू)मृद्वि(दु)षां हि(तैषी) (चिन्तामणे)र्वर्तयति प्रकाशम् ॥

निर्विघ्नं प्रारिप्सितपरिसमाप्तिकामनया कृतं पु(रभि)दृपेष्टदेवतानमस्कारात्मकं मङ्गलं शिष्याशिक्षायै ग्रन्थादावुपनिबध्नाति—गुणातीत इति । पुरभि)दे पुरदारिणे नमः न(म)स्कारः अस्त्विति शेषः ।

* * * *

ग्रन्थकरणं प्रतिजानीते—अन्वीक्षेति । गङ्गेशस्तं श्रीतत्त्वचिन्तामणिमतनुत इत्युत्तरवाक्यैकवाक्यतयान्वयः ।

* * * *

प्रासावि तिम्माम्बिकया नृसिंहभूभर्तुरुद्गास(य)शःप्रकाशः ।
दाक्षिण्यरत्नैकभुवार्थिसार्थे चिन्तामणिर्विश्वविभूषणाय ॥

* * * *

प्रत्यक्षादिप्रमाणतत्त्वाविवेचनं चिकीर्षुस्सर्वप्रमाणमूर्धन्यं प्रत्यक्षं प्रथमं विविच्य हेतुहेतुमद्भावसङ्गत्या चोपमानात्प्रागनुमानं विवेचयिष्य(न्) . . . . . . प्रदर्शयन्नेव शिष्यावधानाय प्रतिजानीते—अ(प्र)त्यक्षेति । अनुमानं स्वमूलत्वेन व्याप्त्यादिप्रत्यक्षमुपजीवतीति :

End:

अस्त्वेवं ततः किमित्यत आह—तस्मादिति । नन्विति । दत्तबाधकादेरिति भावः ।

---

R. No. 3388.

Paper. 10⅝ × 9⅜ inches. Foll. 36. Lines, 20 in a page. -Grantha Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nilakaṇṭhan Nambūdirippaḍ, Kaṇṇūr-mana, Ottapalam, Malabar district.

Fol. 36 is left blank.

रघूदयम्.

RAGHUDAYAM.

An artificial (Yamaka) alliterative poem narrating the story of Raghu, one of the famous kings of the solar race and his descendants. A commentary on this work has been described under R. No. 2977 ante By Śrīkaṇṭha, nephew and pupil of Śaṅkara.

Complete in eight Āśvāsas.

Beginning:

श्रीमदुदारं भवतः साम्भवमव्याद्वपुस्सदारम्भवतः ।
तस्य सदारं भवतः स्मरणैकपरास्स्मरार्तिदारं भवतः ॥
यस्य विकृतमालस्यपदं द्विषोऽक्षि स्फुटानुकृतमालस्य ।
परिधृतकृतमालस्य ज्वलनस्तिलकस्य कुल्यकृतमालस्य ॥

* * * *

सोऽजनि नासन्नायान्वुतिमद्यवधीशपत्तनासन्नायाम् ।
शिवदिशि नासन्नायान्यायादपि यत्र बुधजनासन्नायाम् ॥
पारशवान्वयमानः ख्यातो योऽष्टाङ्गहृदयवान्वयमानः ।
गुणविभवान्वयमानस्पृशच्छ्रियः शङ्करोऽपि वान्वयमानः ॥

मेषनवस्वसुरस्य श्रीकण्ठशिष्य उद्भवस्स्वसुरस्य ।
रसपर्वस्वसुरस्य स्थिरमतिरल्पमस्मि नतसवस्वसुरस्व ॥
पट इव वाचा तुर्यांथ रते क्रियते गुरावबाचातुर्या ।
यमकभुवा चातुर्याश्रिता मया ग्रन्थ एष वाचातुर्या ॥
व्यवहारविदेवायन्यथोऽत्र पदे सदव्जरविदेवाय ।
तत्सारविदेऽवायन्याये यमके नमोऽस्तु रविदेवाय ॥
अधिगणमकनिष्ठानां कुबेरदेवस्य सद्यमकनिष्ठानाम् ।
इह नामकनिष्ठानान्यस्य रचौ कर्तृतागमकनिष्ठानाम् ॥
* * * *
इति तरसा यमितायां श्रीकण्ठकृतौ बुधोद्धसाय मितायाम् ।
वाग्भिरसार्यमितायां नाद्याश्वासो न साहसायमितायाम् ॥

**Colophon:**

इति रघूदये प्रथमः आश्वासस्समाप्तः ॥

**End:**

प्रजया स नृपो रुरुचे तनया जनितास्सहजैरपि चेतनया ।
मुमुदेऽथ नृणामपि चेतनया क्वचिदप्यपथे हि सचेतनया ॥
रघूदयः प्रभावतः प्रभावतस्ततोऽभवत ।
कृतारिकम्प्रभावतः प्रभावतस्स्थिताः श्रियः ॥
कृतिरिति सम्पद्यमिता श्वासाष्टमविरतिमुत्तरसम्पद्यमिता ।
साहससम्पद्यमिता शम्भोर्मम चेतु मानसम्पद्यमिता ॥

**Colophon:**

इति रघूदये अष्टम आश्वासः ॥
रघूदयं समाप्तम् ॥

---

### R. No. 3389.

Paper. 10¾ × 9¼ inches. Foll. 219. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippad, Kaimukku-mana, Pudukkad post, Cochin State.

Fol. 219 is left blank.

बोधायनश्रौतमन्त्रवृत्तिः.

BŌDHĀYANAŚRAUTAMANTRAVṚTTIḤ.

A commentary on the Mantras repeated in the course of the performance of the sacrificial rites, such as Anvādhāna, in accordance with the school of Bōdhāyana.

Deals with the following subjects:—

१. अन्वाधानमन्त्रवृत्तिः.
२. पिण्डपितृयज्ञमन्त्रवृत्तिः.
३. अग्न्याधानमन्त्रवृत्तिः.
४. प्रायश्चित्तमन्त्रवृत्तिः.
५. अग्निहोत्रमन्त्रवृत्तिः.
६. परिषेकमन्त्रवृत्तिः.
७. अग्न्युपस्थानमन्त्रवृत्तिः.
८. परिभाषासूत्रमन्त्रवृत्तिः.
९. ज्योतिष्टोमादिमन्त्रवृत्तिः.
१०. सवनत्रयमन्त्रवृत्तिः.
११. पवमानहविषां पूर्णाहुतिमन्त्रवृत्तिः.
१२. यूपोपस्थानमन्त्रवृत्तिः.

Wants the beginning; otherwise complete.

**Beginning:**

वाक्यान्युत्थामदानि ये विश्वे देवाः तेऽप्यत्र सूक्त . . . . . हुतं मां त्वं मा हिंसीः त्वदस(नु)ग्रहादपि मधु मनिष्ये मधुवत् प्रियमेव कार्यं मनसा चिन्तयिष्यामि । तथा मधु जनिष्ये मधुवत्प्रियं कर्मफलमुत्पादयिष्यामि । तथा मधु वक्ष्यामि मधुवत्प्रियस्य हविषा प्रतिहवनं करिष्यामि । तथा मधु वदिष्यामि मधुवत्प्रियं लौकिकं वाक्यमुच्चारयिष्यामि ॥

* * * *

वैश्वानरेण सर्वमनुष्यहितेन ज्योतिषा युक्तान् वो युष्मान् उपतिष्ठे यत्र कुत्र स्थितोऽप्यहं सेवे इति ॥

**Colophon:**

इति श्रौतमन्त्रवृत्तौ सारस्वतहोममन्त्राः व्याख्याताः ॥

**End:**

यजमानस्य यूपोपस्थानाय मन्त्र आशासान इति । हे यूप त्वं यजमानाय मह्यं रायस्पोषं धनसमृद्धिमाशासानः कामयमानस्तिष्ठ ।

* * * *

समृद्ध्यै स्वाहेत्यन्तं पूर्वाज्या देवताः सर्वास्स्वाहुतय एव ।

अभिप्रेतार्थसिद्धस्य एव [नम]नमामि त्वामनन्तशक्तिम् (?) ॥

**Colophon:**

श्रौतमन्त्रवृत्तिस्समाप्ता ॥

---

R. No. 3390.

Paper. 10¾ × 9¼ inches. Foll. 34. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920–21 from a MS. of M.R Ry. Nārāyaṇa-Nambūdirippād, Kūṭalūr-mana, Pudukkad post, Malabar district.

पाण्डवचरित्रम्.

PĀṆḌAVACARITRAM.

A poem describing the leading incidents in the life of the Pāṇḍavas. The author, whose name is not given salutes one Vāsudēvakavi.

Contains the Sargas 1—12 only.

**Beginning:**

कल्याणानि गणेशो वः करोतु सुतरामयम् ।

यत्प्रसादेन जनता निर्विघ्नं लभते हितम् ॥

* * * *

तस्मै नमोऽस्तु कवये वासुदेवाय धीमते ।

येन पार्थकथा रम्या यमिता लोकपालि(व)नी ॥

कलायकुसुमच्छायं पीताम्बरविराजितम् ।

वेणुनालङ्कृतकरं वनमालाविभूषितम् ॥

वृन्दावनरतो लोलं वृन्दावनरतं गवाम् ।

वृन्दारकहितं गोपवृन्दारकमहं भजे ॥

* * * *

पुराय जाह्नवीतीरे कुरूणामभवत्पुरम् ।

हस्तिना निर्मितं राज्ञा सुरलोकमनोहरम् ॥

अभूतां तत्र राजानौ सौभ्रात्रेण समन्वितौ ।
धृतराष्ट्रश्च पाण्डुश्चेत्याख्यया लोकविश्रुतौ ॥
अग्रजस्तु तयोरन्धः तस्मादवरजो महान् ।
शशास पृथिवीं कृत्स्नां पाण्डुरेव यथाविधि ॥
धृतराष्ट्रस्य भार्यासीद्गान्धारी सुबलात्मजा ।
कुन्ती माद्रीति विख्याते भार्ये पाण्डोर्बभूवतुः ॥

* * * *

**Colophon:**

इति पाण्डवचरिते प्रथमस्सर्गः ॥

**End:**

त्यक्तबाणासने कर्णे भीते च धृतराष्ट्रजे ।
(स) भीष्मोऽनुदिनं हन्तुं प्रतिजज्ञे नृपायुतम् ॥
गजतुरगपदातिस्यन्दनोद्धूतधूली-
विहितदशदिगन्त(व्याप्तसंयत्)निनादम् ।
गुणविरममहीयस्सिन्धुदुर्लक्ष्यवारं
त्वरितमति तदासीत् सैन्ययुग्मं रणाय ॥

**Colophon:**

इति पाण्डवचरिते द्वादशस्सर्गः ॥

---

## R. No. 3391.

Paper. 10⅝ × 9¼ inches. Foll. 116. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Nilakaṇṭhan Nambūdirippād, Kuunūr-mana, Ottapalam.

Fol. 146 is left blank.

### भागवतव्याख्या—कृष्णपदी.

### BHĀGAVATAVYĀKHYĀ: KṚṢṆAPADĪ.

Same work as that described under R. Nos. 2767 and 2816 ante.

Contains the fifth Skandha only complete.

R. No. 3392.

Paper. 10⅞ × 9¼ inches. Foll. 64. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdiri, Kaimukku-mana, Trichur, Cochin State.

Foll. 63*b* and 64 are left blank.

## बोधायनशुल्बसूत्रविवरणम्.
## BŌDHĀYANAŚULBASŪTRAVIVARAṆAM.

A commentary on the Śulbasūtras of Bōdhāyana, which give the size and dimensions of the different kinds of sacrificial halls. The text has been described under No. 1318 of the R. L. Mitra's Catalogue, Vol. III.

Contains the Adhyāyas one to three complete.

**Beginning:**

अङ्गस्मृत्यात्मविद्याद्यैर्यं भाप्याय(र्थं)वती श्रुतिः ।
वन्दे तस्य गुरोर्मू(र्भो) पादौ पापहरौ शिवौ ॥
भवस्वाम्यादिभिः भाह्नैः तं व्याख्यातमिति श्रुतम् ।
ईहमानो हितार्थं तु मन्दमे . न निष्फलाः ॥
शुल्बस्यातः प्रवक्ष्यामि यथाबुद्धि निबन्धनम् ।
आध्या(न्ध्या)दभ(दीषद्ध)वं श्रेयो दृष्टेरिति(हि) वृद्धवाक् ॥

अथेमेऽग्निचयाः । अथशब्द आनन्तर्यार्थे । कस्मादनन्तरमग्निकल्पात् । अग्निकल्पेऽप्युपधानद्वारेण सामान्येन सर्वाग्निचयाः प्रकृता इति । अथ वाय वै भवति छन्दश्चितं चिन्वीतेत्येतस्मादनुवाकादनन्तरम् । एवञ्च मेऽग्नि चयास्सर्वा इत्यनन्तरोक्ता अग्निचयाः परामृष्टुं शक्यन्ते । अस्मिन्ननुवाके श्रुत्यर्थमात्रमुक्तम् ।

* * * *

**Colophon:**

इात शुल्बविवरणे प्रथमोऽध्यायः समाप्तः ॥

**End:**

त्रयस्सप्तविधा इत्यादिना । इह पुनर्न तथा तदुभयं ब्राह्मणं तद्वाक्ज- मुभयं ब्राह्मणमेव विधिवाक्यमेवेत्यर्थः । उभयस्य ब्राह्मणार्थत्वादुभयमनुष्ठेय- मिति वीप्सा समाप्तिख्यापनार्था शान्तिपुष्ट्यवराच्यर्या च ॥

**Colophon:**

इति शुल्बविवरणे तृतीयोऽध्यायः समाप्तः ॥

R. No. 3393.

Paper. 10⅜ × 9⅜ inches. Foll. 264. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. K. C. Valiyarājā of Kottakkal, Malabar district.

Foll. 263*b* and 264 are left blank.

महाभारतव्याख्या.

MAHĀBHĀRATAVYĀKHYĀ.

A commentary on the Mahābhārata, which work has been described under No. 1915 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Adhyāyas 1—72 of the Udyōgaparvan.

**Beginning:**

अथ उद्योगपर्वादितो यथाविदितं व्याख्यायते—

तत्र तावत् कृत्वा विवाहमित्यादि पृष्टो महर्षिराह—उक्तानुवादं कुर्वन् तुशब्दो हेतुं विना वृथ्या पक्षान्तरेषु वर्तते । अत्र पक्षान्तरे प्रयुज्यते वार्यो आपत्पक्षेण समयमनुष्ठाय मुख्यपक्षसमानमेव फलं यथा प्राप्तं तथा तद्वद्यत इत्यर्थः ।

**End:**

पुराणज्ञैः प्राप्यत इति पुराणं धाम इत्याश्रयम् । पुराणमनूतनमजं जन्मादिषड्भावशून्यम्—अस्ति, जायते, विवर्धते, विपरिणमते, अपक्षीयते, विनश्यतीति षड् भावाः । जनित्रं जगतामुत्पत्तिकरं परेभ्यः परं विशिष्टतमेभ्यो विशिष्टं देवादीनाम् । जनित्रमित्यनेन जगद्व्याचिनामपि स्रष्टारमिति सूचितम् । विदुषां ब्राह्मणानामित्यर्थः ॥

**Colophon:**

द्विसप्ततितमः (अध्यायः) समाप्तः ॥

---

R. No. 3394.

Paper. 10⅜ × 9⅜ inches. Foll. 34. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of the Paliyam-Kōvilakam, Cochin State.

Foll. 33*b* and 34 are left blank.

प्राकृतसप्तशतीसारटीका—भावदीपिका.

PRĀKṚTASAPTAŚATĪSĀRAṬĪKĀ : BHĀVADĪPIKĀ.

A commentary by Vēmabhūpāla on one hundred choice verses from the Gāthāsaptaśati, described under R. No. 23 ante

Complete.

**Beginning:**

हालः प्राक् सप्तशतीं गाथाकोटेर्यद(व्यध)त्त सम्प्रति तु ।
सोऽयं वेद(म)नृपालस्तस्या अपि शतकमाहरत्सारम् ॥

अथ शालिवाहननरेन्द्रो निर्विघ्नग्रन्थपरिसमाप्त्यर्थमिष्टदेवतानमस्कारमादौ (नि)बध्नाति—

पसुवइणो रोसारुणपडिमासंकंतगोरिमुहअंदम् ।
गहिअग्घपंकअं वि [उअ] संझासलिलंजालिं णमह ॥
पशुपते रोषारुणप्रतिमासङ्क्रान्तगौरीमुखचन्द्रम् ।
गृहीतार्घ्यपङ्कजमिव सन्ध्यासलिलाञ्जलिं नमत ॥

गौरीमुहअंदमित्यत्र गभीरग इति नत्वम् । पशुपतेस्सन्ध्यासलिलाञ्जलिं नमत कथमिव स्थितम् ? रोषारुणप्रतिमासङ्क्रान्तगौरीमुखचन्द्रम् । सङ्गृहीतार्घ्यपङ्कजमिव स्थितम् ।

**End:**

गृहिणीप्रवेशितजारे गृहे गृहस्थेन असती स्थापिता ।
मिलिता वसतो जारौ पश्यद्गृहिणीगृहस्थश्च ॥

अत्र वाक्यार्थः स्पष्टः । अभिप्रायो व्यक्त एव ॥

**Colophon:**

इति वेंद(पेद्द)कोमठि(टि)वेमभूपालेन कृता सप्तशतीसारटीका भावदीपिका सम्पूर्णा ॥

---

R. No. 3395.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1920-21 from a MS. of the Naḍuvil-Maṭhaṃ, Trichur, Cochin State.

(a) एकादशीनिर्णयव्याख्या.

ĒKĀDAŚĪNIRṆAYAVYĀKHYĀ.

Foll. 1a—10a.

Similar to the work described under No. 3102 of the D.C.S MSS., Vol. VI. By Acyutānanda. In the beginning of the work the author salutes Ānandagiri, Surēśa and Śaṅkara.

Incomplete.

**Beginning:**

तदाद्यं दैवतं वन्दे जगदानन्द(कन्दलम्) ।
. . . . . . . . . . . . मादित मा(आ)दरात् ॥

श्रीमत्कौस्तुभहारश्रीश्रीवत्सोद्भासिवक्षसे ।
नमोऽस्तु नरसिंहाय निर्मलज्ञानचक्षुषे ॥

शान्तिदान्त्यादि(पुष्पाढ्यं) तत्त्वज्ञानफलानतम् ।
वेदपर्वतपादोत्थमहामिन्द्रवनं श्रये ॥

आनन्दगिरिकारुण्यसुधासंशोधिताश्रयः ।
एकादशीनिर्णयार्थमच्युतानन्दसंज्ञितः ॥

कलभास्यं प्रणम्याहं ससुरेशं च शङ्करम् ।
व्याकरोमि सुरेशस्य श्लोकत्रयमनन्तरम् ॥

पद्यत्रयं जगद्वन्द्यभगवत्पादनिर्मितम् ।
क्षन्तव्यं सद्भिरत्यर्थं गतिरज्ञस्य का कथा ॥

एकादशी तावद्यथाशास्त्रमुपोषिता चतुर्विधानपि पुरुषार्थानयत्नेनैव साधयिष्यति— इति स्मृतिपुराणेतिहासेषु चागोपालविपण्डि(श्रि)तं प्रसिद्धं-[अप्रसिद्धं] तस्यास्तत्तच्छास्त्रविशेषोष्वितस्ततः उपदिष्टान् षड्भिः स्वविशेषै रूनसमाधिकैस्संज्ञितैस्त्रिभिर्द्वादशीविशेषैश्च द्विविधैरपि च श्लोकैस्समुत्थापितानष्टादश विशेषानुपोष्याह ।

**End:**

एकादशी त्वहोरात्रं द्वादश्यां तु कला भवेदित्यादिना शुद्धैकादशीमवतार्य पश्चात्तयैव वाचा—

आदित्योदयवेला[वा]मारभ्या(चा)षष्टि नाडिका ।
सङ्कीर्णैकादशी सा तु त्याज्या धर्मफलेप्सुभिः ॥
इति पूर्वोदयात्पूर्वकालः.

---

Transcribed in 1920-21 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

(b) भृङ्गसन्देशः.

BHṚṄGASANDEŚAḤ.

Foll. 11a—21a. Foll. 11b, 21b and 22 are left blank.

Similar to the work described under Nos. 11865 and 11869 of the D.C.S. MSS., Vol. XX.

Complete.

**Beginning:**

कश्चित्कामी कमलनयनाविप्रयुक्तस्सुदूरे
निर्भाग्यत्वात् किल विरहजं खेदभारं दधानः ।
भ्रान्त्वा भ्रान्त्वा दिशि दिशि भृशं व्याकुलस्तान्तवृत्ति-
र्मध्येमार्गं क्वचन निषसादाम्रवृक्षस्य मूले ॥
तच्छाखासु प्रचुरविलसत्पुष्परम्यासु सम्यक्
स्वादं स्वादं मधु मधुकरं वीक्ष्य सङ्क्रीडमानम् ।
चिन्ताविष्टश्चिरतरमसौ चेतनादुर्विधोऽभू-
द्धीरस्यापि प्रभवति मधौ भिद्यते ह्यन्तरात्मा ॥
लब्ध्वा संज्ञां कथमपि चिराद्दीर्घनिश्वासमोची
दृष्ट्वा कालं पथिकयुवतीकालमन्तर्विषण्णः ।
आत्मप्रत्यागमनकथनैर्जीवनार्थी प्रियाया
दूतीकुर्वन् मधुपमथ तं सादरं सञ्जगाद ॥

* * * *

सम्प्राप्तव्यः सहज भवता श्रीशिवाज्ञानदेशः
खण्डो मध्यः प्रथितमहिमा जामदग्न्यस्य भूमेः ।
यत्रावासी स खलु भगवान् सार्धमद्रीन्द्रपुत्र्या
नित्यप्रह्वैरुरगमनुजस्वर्गिभिः सेव्यमानः ॥

**End:**

गाच्छामेनां सपदि सफलीकृत्य कृत्ताश्रिताघे
कीर्त्या सार्धं विशरणजनोद्धारणोद्भूतया त्वम् ।

गच्छ स्वेच्छाविषयविषयान् सन्ततं स्वैरचारिन्
मध्ये मध्ये भवतु च दृशोरेतयोरुत्सवश्रीः ॥

**Colophon:**

इति भृङ्गसन्देशस्समाप्तः ॥

---

R. No. **3396.**

Paper. 10¾ × 9¼ inches. Foll. 34. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Paliyattu Valiya-raja Acchan, Chennamangalam, Parur post, Cochin State.

(*a*) ध्वन्यालोकलोचनव्याख्या.

DHVANYĀLŌKALOCANAVYĀKHYĀ.

Foll. 1*a*—27*b*. Foll. 27*b*—29*a* contain the original Kārikās of the first Uddyōta of the Dhvanyālōka.

Same work as that described under R. No. 2680 ante.

Contains the first Uddyōta almost complete.

---

(*b*) ध्वन्यालोकसङ्ग्रहः.

DHVANYĀLŌKASAṄGRAHAḤ.

Foll 29*a*—34*b*.

A summary of Dhvanyālōka (Vṛtti portion only), which work has been printed in the Kāvyamālā Series, Bombay.

Contains the first two Uddyōta portions.

**Beginning:**

प्रणम्य गुरुमीशानं श्रवणानुगुणक्रमम् ।
ताथ व्यङ्ग्यामृताम्भोधेः करोमि ध्वनिसङ्ग्रहम् ॥
स्वयं कृतार्थो व्याख्यातृश्रोतृणामिष्टसिद्धये ।
आदावीश्वरसौमुख्यमाशिषाकृत वृत्तिकृत् ॥
व्यङ्ग्येऽथ व्यापृतौ काव्ये तथा शब्दार्थयोर्ध्वनिः ।
ध्वन्यते ध्वननं यत्र ध्वनतीति प्रसर्पति ॥

* * * *

भाक्तत्वासङ्गतेर्लक्ष्म सामान्यं कारकोदितम् ।
विवृतं वृत्तिकारेण तस्यायं सङ्ग्रहः कृतः ॥

**Colophon:**

इति प्रथमोद्द्योतसङ्ग्रहः ॥

अथानुत्सूत्रमाख्यातुं विशेषान् वृत्तिकृत्पुरः ।
अनूद्य स्वोक्तिमाख्याति सङ्गतिं कारिकाश्रयाम् ॥

**End** :

इत्येवं ध्वनिलक्ष्मोक्त्वा तदाभासो निरूप्यते ।
आन्तमेकप्रकारेण कोऽप्यर्थो नावभासते ॥
अतः स्फुटास्फुटतया प्रतीतौ स्फुटनोदये ।
ध्वनिरन्यो गुणीभूतव्यङ्ग्यचकत्वां विगाहते ॥

* * * *

अव्युत्पत्तेरशक्तेर्वा क(क्ल)ष्टकल्पनया पुनः ।
निबन्धने तूपचारमात्रान्नैव ध्वनिस्थितिः ॥
अतस्सर्वत्र दोषाणां निरासे यत्नमास्थितः ।
महाकविर्निबध्नीयादिति लक्षणसङ्ग्रहः ॥

**Colophon** :

इति द्वितीयोद्द्योतसङ्ग्रहः ॥

---

R. No. **3397**.

*Paper.* 10⅜ × 9¼ inches. Foll. 84. Lines, 20 in a page. Dēvanāgari Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Cochin State.

Fol. 84 is left blank.

राघवीयम्.

RĀGHAVĪYAM.

Same work as that described under No. 11706 of the D.C.S. MSS., Vol XX, wherein see for the beginning.

Complete in 20 Sargas.

**End** :

चतुर्जलधिमेखलां चरमपूर्वशैलस्तनी-
मुदारतरजाह्नवीजलसितोत्तरीयांशुकाम् ।
प्रियामिव विदेहजां वसुमतीमुपावर्जय-
न्नयन्नखिलवैरिणस्सुखमशादयोध्यापुरीम् ॥
कर्णानन्दं कलुषशमनं कामदं नामदेव-
प्रीतेरेकं करणमुचितं कारणं सम्पदां च ।

दीर्घायुष्यं किमिह बहुना सर्वदा सर्वदं वः
श्रेयो देयादनुपममिदं राघवीयं चरित्रम् ॥

**Colophon:**

इति राघवीये विंशति(तमः) सर्गः ॥
श्रीनारायणभट्टपादगुरुपादानां प्रसादोदया-
देतत्किंचन राघवीयमिति यत्काव्यं कृतं केनचित् ।
अप्रज्ञत्ववशादमुष्य महतो रामायणाम्भोनिधे-
रक्षोभ्यत्वबलाच तत्र सुलभो दोषो बुधैः क्षम्यताम् ॥
समाप्तश्चायं ग्रन्थः ॥

---

R. No. 3398.

Paper. 10⅝ × 9¼ inches. Foll. 132. Lines, 20 in a page. Grantha. Good

Transcribed in 1920–21 *from* a MS. of M.R.Ry. Yajñēśvara-dīkṣitar, Kalpati, Palghat.

Foll. 131 and 132 are left blank.

श्रौतप्रयोगसारः.

ŚRAUTAPRAYOGASĀRAḤ.

Deals briefly with the procedure relating to the performance of the sacrificial rites, such as दर्श, पूर्णमास, etc. By Kēśavasvāmin the author of Āpastambaśrautasūtra.

Contains the following subjects:—

१. दर्शपूर्णमासः.
२. अग्न्याधानम्.
३. अग्निहोत्रतदुपस्थाने
४. पशुबन्धः.
५. वैश्वदेवः.
६. वरुणप्रघासः.
७. साकमेधः.
८. महापितृयज्ञः.
९. चातुर्मास्यम्.

Incomplete.

**Beginning:**

श्रियः पतिं नमस्कृत्य कण्वं च मुनिसत्तमम् ।
प्रयोगसारं वक्ष्यामि केशवोऽहं यथामति ॥

नारायणादिभिः प्रयोगकारैरेकं पक्षमाश्रित्य दर्शपूर्णमासादीनां प्रयोग उक्तः । आचार्यपादैर्द्वैधे पक्षान्तराण्यप्युक्तानि । भवस्वामिमतानुसारिणा मया तूभयमप्यङ्गीकृत्य प्रयोगसारः क्रियते—आमावास्येनेत्यादि । प्रथमत एवामावास्यग्रहणं मन्त्रक्रमात् । हविषेति । सामान्यनिर्देशादेकवचनं, पुरस्ताद्ग्रहणं कर्मारम्भात्पूर्वकाले आतञ्चनद्रव्यं यथा स्यात्, इतरथा आरब्धे कर्मणि द्रव्यालाभे दोषः स्यात् ।

* * * *

**Colophon:**

इति केशवस्वामिकृते प्रयोगसारे दर्शपूर्णमासौ समाप्तौ ॥

**End:**

तथैवैनं क्रममवाप्नोति सन्तिष्ठते(न्ते) चातुर्मास्यानि । सोमान्तपक्षे ऐन्द्राग्नपशुः । इष्ट्यन्तपक्षे आग्नेयमष्टाकपालमैन्द्राग्नमेकादशकपालं वैश्वदेवं द्वादशकपालमिति वा भेदेन वा ॥

**Colophon:**

इति केशवस्वामिकृते प्रयोगसारे चातुर्मास्यानि समाप्तानि ॥

---

R. No. **3399.**

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 126. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Śrīnivāsācāriyar alias Tirumalai Ayyangār, Periyanambi-Tirumāḷigai, Alvartirunagari, Tinnevelly district.

Fol. 126 is left blank.

बोधायनप्रयोगादर्शः.

BŌDHĀYANAPRAYŌGĀDARŚAḤ.

Same work as that described under R. No. 1619 ante, wherein see for the beginning: by Kanakasabhāpati, son of Vaidyanātha of Maudgalyagōtra.

Contains the Aparaprayōga complete, but with slight difference in the beginning.

**Beginning:**

विघ्नेश्वरं महासेनं (. . .) मुहुर्मुहुः ॥

* * * *

बालादिकानां स्पष्टाय प्रवक्ष्यामि विशेषतः ॥

बोधायनसूत्रं तत्प्रयोगांश्च पूर्वं कारिकासारं च दृष्ट्वा कारिकामञ्जरीक्रमेण वैद्यनाथतनयन मौद्गल्येन कनकसभापतिना प्रयोगाख्यो वक्ष्यते—अथोपनयनादूर्ध्वं होतृसंस्कारविधिरुच्यते । भूमौ दर्भास्तृतायां मृतिसंशये तद्दक्षिणे कर्णे जपत्यायुषः प्राणमित्येतमनुवाकं संज्ञानमिति

* * * *

मृतस्यास्ये हिरण्यशकलं निधाय सम्भाराननुकल्पयते ।

**End:**

कालादर्शे—

श्राद्धद्वयं तथोद्दिष्टमेकोद्दिष्टं च पार्वणम् ।
नित्यं नैमित्तिकं काम्यमिति तच्च पुनस्त्रिधा ॥

**Colophon:**

इति कनकसभापतिकृतौ बौधायने प्रयोगादर्शे अपरप्रयोगः ॥

अपरप्रयोगादर्शः समाप्तः ॥

---

R. No. **3400.**

Paper. 10¾ × 9½ inches. Foll. 226. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Nambiyan Sōmayājippād, Valliyat-mana, Oorakaram post, Cochin State.

Foll. 146, 290*b*—292 are left blank.

षोडशाध्यायी.

ṢOḌAŚĀDHYĀYĪ.

A treatise in 16 Adhyāyas giving the substance of the Pūrvamīmāṁsā and the Uttaramīmāṁsā in accordance with Advaita-Vēdānta. The author, whose name is not given, salutes Jaimini, Vyāsa, Śabarasvāmin and Śaṅkara.

Complete.

**Beginning:**

जैमिनिबादरायणशबरस्वामिशङ्कराचार्येभ्यो नमः । स्वाध्यायोऽध्येतव्य इति श्रूयते— स्वाध्यायो वेदः । तत्र संशयः—किमस्य वेदाध्ययनविधेरदृष्टार्थत्वेन वेदार्थस्याविवक्षितत्वात्, तदर्थनिश्चयोपायभूतमीमांसाशास्त्रारम्भस्याविवत्वाच्च चोदनालक्षणोऽर्थो धर्म इत्यारम्य वा अथातो धर्मजिज्ञासेत्यारम्य वान्वाहार्ये च दर्शनादित्यतन्त्र(न्त)मिदं वेदार्थधर्मनिश्चयोपायविचार-

न्यायशास्त्रमध्वरमीमांसाख्यमनारम्भणीयम् उताध्ययनविधेर्दृष्टार्थज्ञानार्थत्वाद् दार्थस्य विवक्षितत्वात्तदर्थनिश्रेयोपायभूतस्य मीमांसाशास्त्रारम्भस्याप्यध्ययन- विधिनवार्थाद्विहितत्वेन वैधत्वादारम्भणीयमिति ।

* * * *

Colophon:

इति षोडशाध्याय्यां प्रथमस्य प्रथमः पादः ॥

* * * *

ब्रूमः—

ब्राह्मणानामार्त्विज्यमिति स्मरणात् ब्राह्मणानामेवार्त्विज्यमिति ॥

Colophon:

इति द्वादशाध्यायस्य चतुर्थः पादः ॥

बृहदारण्यके चतुर्थाध्याये चतुर्थे षष्ठाध्याये प्रथमे च मैत्रेयी- ब्राह्मणे श्रूयते—आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति ।

End:

छान्दोग्येऽष्टमेऽध्याये पञ्चदशे खण्डे न च पुनरावर्तत इति श्रवणाच्च ब्रह्मलोकं प्राप्तानां न पुनरावृत्तिरिति बोध्यम् । सर्वोपप्लवरहितप्रज्ञानघनप्रत्य गर्थो ब्रह्मैवाहमस्मि ॥

Colophon:

इति श्रीशारीरकमीमांसायां चतुर्थाध्यायस्य चतुर्थो ब्रह्मप्राप्तिपादः । फलाध्यायश्च समाप्तः ॥

अहं ब्रह्मास्मि—प्रथमाध्याये प्रथमे स्पष्टब्रह्मलिङ्गपादे अधिकरणानि एकादश द्वादश चतुर्दश ।

* * * *

शारीरकमीमांसायां द्विनवत्यधिकं शतं त्रिणवत्यधिकं शतमष्टनवत्यधिकं शतं वाधिकरणानि । सूत्राणि पञ्चपञ्चा.

---

R. No. 3401.

Paper. 10¾ × 9⅛ inches. Foll. 24. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, Cochin State.

Fol. 24b is left blank.

नामलिङ्गानुशासनव्याख्या.

NĀMALIṄGĀNUŚĀSANAVYĀKHYĀ.

A commentary on the Nāmaliṅgānuśāsana, which work has been described under No. 1620 of the D.C.S. MSS., Vol III: by Bhaṭṭōjidīkṣita.

Contains the first Varga incomplete.

**Beginning :**

वल्लवीवल्लभं नत्वा हरिं भट्टोजिदीक्षितः ।
अमरे विदधे व्याख्यां मुनित्रयमतानुगाम् ॥

प्रारिप्सितग्रन्थस्य प्रत्यूहापनुत्तये कृतं मङ्गलं शिष्यशिक्षार्थमादौ निबन्ध—यस्येति । हे अनघाः भवद्भिरस्स धीरस्सेव्यताम् । न अघं पापं येषां ते अनघाः निष्पापाः, सुकृतिन इति यावत् । सुकृतिन एव संसेवितुं प्रभवन्तीति त एव सम्बोध्यन्ते; धर्मेण पापमपनुदतीति श्रुतेः ।

**End :**

शुभदीप्तौ शोभायां वा स्फायीति रन् । शुभं दीप्तेऽभ्रके गते इति हैमः । शुच दीप्तौ इन् । श्विता वर्णे भौवादि . . . . वरादिका काष्ठा पाटला शङ्खिनीषु च । श्लीवं रूपे । शीयते, शद्ल शातने अच् । विशदः पाण्डरे व्यक्ते इति हैमः ॥

---

R. No. **3402**.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 38. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nīlakaṇṭha Nambūdirippād, Kunnūr-mana, Ottapalam, Malabar district.

Fol. 38*b* is left blank.

सूर्यशतकव्याख्या.

SŪRYAŚATAKAVYĀKHYĀ.

Same work as that described under R. No. 139(*b*) ante. By Śrīraṅgadēva.

Complete.

**Beginning :**

वन्देऽरविन्दजमुकुन्दकलेन्दुमौलीन्
विश्वोद्भवस्थितिविपत्तिकृतात्मभेदान् ।

येषां कमण्डलुपदाब्जकपर्दसङ्गा-
द्गङ्गाभवद्भुवनकल्मषमोषदक्षा[त] ॥

वन्देऽरविन्ददलकोमलशीतलाक्षं
वक्षस्स्थलश्रिम धृतशङ्खरथाङ्गशार्ङ्गम् ।
श्रीवत्समुद्रितमनुष्ठितवैनतेयं
ज्योतिः परं परमपूरुषनामधेयम् ॥

कश्चिज्जगत्प्रथितवंशभवोऽजन्मा
श्रीरङ्गदेव इति विश्रुतनामधेयः ।
ह्रासाय केवलमिमां सुधियां विधत्ते
व्याख्यां स सूर्यशतकस्य विमूढबुद्धिः ॥

* * * *

एवंभूता (भा)नवीया भानवो वो विभूत्यै भूयासुरिति सम्बन्धः । कीदृग्भूता अभिनवाः ।

**End:**

अत एव सर्वदा सर्वेषु कालेषु सर्वथा सर्वप्रकारैः जगतां . . . कारार्थितं दिशतु ॥

इति पुरुषवर्णना समाप्ता ॥

श्लोका लोकस्य भूत्यै शतमिति रचिताः श्रीमयूरेण भक्त्या
युक्तश्चैतान् पठेद्यस्सकृदपि पुरुषस्सर्वपापैर्विमुक्तः ।
आरोग्यं सत्कवित्वं मतिमतुलबलं कान्तिमायुःप्रकर्षं
विद्यामैश्वर्यमर्थं सुखमपि लभते सोऽत्र सूर्यप्रसादात् ॥

चत्वारिंशत्प्रमायात्त्रिभिरधिकमथो वाजिनां षट्कमेकं
पश्चान्नेतुर्द्विषट्कं पुनरपि च दश स्यन्दनस्यैकयुक्तम् ।
भूयोऽष्टौ मण्डलस्य स्तुतिरपि च रवेर्विंशतिः श्रीमयूरात्
इत्थं जातं पठेद्यः शतकमनुदिनं सूर्यसायुज्यमेति ॥

* * * *

**Colophon:**

सूर्यशतकव्याख्या समाप्ता ॥

R. No. 3403.

Paper. 10¾ × 9¾ inches. Foll. 76. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

Fol. 76 is left blank.

मुकुन्दशतकव्याख्या.

MUKUNDAŚATAKAVYĀKHYĀ.

A commentary on the Mukundaśataka, which is a treatise containing 100 stanzas in praise of Mukunda (Lord Viṣṇu) by Rāmapāṇivāda who was the pupil of Nārāyaṇabhaṭṭa and who wrote this at the instance of king Rāmavarman of Śrīkaṇṭha family. The commentator was a fellow-pupil with the author of the text.

Complete.

**Beginning:**

लक्ष्मीवक्षोजकाश्मीरकर्दमाङ्कितवक्षसम् ।
आधारं जगतामेकं राधाजारं हरिं भजे ॥

श्रीमन्मुकुन्दचरणाम्बुजभक्तिभार-
निर्निद्रनिर्मलमनोमणिदर्पणस्य ।
रामाह्वयस्य सुकवेर्वदनादुदीर्णं
मुख्यं मुकुन्दशतकं जयतीह लोके ॥

कविसहृदयताया वाञ्छया भ्रान्तचेताः
कथमपि विवरीतुं स्तोत्रमिच्छुस्तदीयम् ।
अलसमतिरिहाहं हास्यतां यामि को वा
विमृशति गुणदोषानात्मनो मूढचेताः ॥

सतीर्थ्यतामात्रनिरूढगर्वसम्भावितैतत्कविसाहृदय्यः ।
स्तोत्रं तदीयं विवृणोमि मोहात् सन्तः क्षमन्तामतिचापलं मे ॥

इह खलु सकलविद्वज्जनमौलिमाणिक्यभूतश्रीनारायणभट्टपादपादारविन्द-युगलपांसुपटलीमरीमृज्यमानमतिमयमणिदर्पणप्रतिबिम्बिताशेषागमनिगमसार्थप-रमार्थसारः

* * * *

मार्दङ्गिकवंशीमुक्तामणिः रामनामा कविर्मुकुन्दचरणारविन्दभक्तिभारपारिप्लवतानरीनृत्यमानचित्तवृत्तिस्सन् मुकुन्दशतकं नाम चिकीर्षुरादौ तद्विघ्नोपशान्तये सकलसमीहितार्थसिद्धिसाधनभूतहरिचरणपरिचरणरूपं मङ्गलमाचरति—श्रीमदित्यादिना । अहं मुकुन्दं भज इत्यन्वयः । अहं संसारी जीवात्मा सेवक इत्यर्थः ।

* * * *

**Colophon:**

मुकुन्दशतकव्याख्यायां श्रीकृष्णावतारवर्णनं समाप्तम् ॥

**End:**

(मू.)—

नत्वा मुकुन्दपुरनाथमशेषनाथं
नारायणं नतजनापरपारिजातम् ।
एतन्मुकुन्दशतकं पठति प्रभाते
योऽसौ समेष्यति मुकुन्दपदारविन्दम् ॥

* * * *

(मू.)—

श्रीनारायणभट्टपादगुरुपादानां प्रसादोदया-
दानन्दाय सतां मुकुन्दशतकं रामेण यन्निर्मितम् ।
गोविन्दस्य मुकुन्दमन्दिरपतेः श्रीपादसंसेविनः
स्तोत्रं तत्खलु रामवर्मनृपतेः चोभूयतां भूतये ॥

* * * *

(मू.)—

श्रीरामवर्मनृपतिर्मतिमान् यदार्थ
श्रीकण्ठवंशकलशाम्बुधिपूर्णचन्द्रः ।
केनापि कामदमचीकरदीदृशं तत्
मौकुन्दमस्तु शतकं जगतां हिताय ॥

(व्या)—

आर्यश्रीकण्ठवंशकलशाम्बुधिपूर्णचन्द्रः श्रीरामवर्मनृपतिः कामदमीदृशं यत् केनापि अचीकरत् तन्मौकुन्दं शतकं जगतां हितायास्त्वित्यन्वयः ।

वन्मीकुन्दं मुकुन्दसम्बन्धिशतकमचीकरत् कारितवान् तच्छतकं जगतां हिताय श्रेयसे अस्तु । जगत्प्रीतये अस्त्विति वा प्रार्थना ॥

**Colophon:**

इति श्रीराम[वर्म]निर्मितं मुकुन्दशतकं संपूर्णमभूत् ॥

---

## R. No. 3404.

Paper. 10⅝ × 9¼ inches. Foll. 188. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. P. Śaṅkaranārāyaṇa-Vādhyār, Tekke gramam, Chittoor post.

Foll. 187*b* and 188 are left blank.

स्मृतिसङ्ग्रहः

**SMṚTISAṄGRAHAḤ.**

A collection of stanzas taken from different Dharmaśāstra works written by Manu, Bōdhāyana, Vyāsa, etc.

Complete.

**Beginning:**

शुक्लाम्बरधरं विष्णुं (. . .) सर्वविघ्नोपशान्तये ॥

मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनाङ्गिराः ।
यमापस्तम्बसंवर्ताः कात्यायनबृहस्पतिः(ती) ॥
पराशरो व्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वसिष्ठश्च धर्मशास्त्रप्रवर्तकाः ॥

मनुः—

विद्वद्भिस्सेवितस्सद्भिर्नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातः यो धर्मस्तं व्यवस्यत ॥

* * *

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥

आत्मनस्तुष्टिः यथालाभसन्तोषः ।

* * *

श्रीधरीये—

नर्मदोत्तरदेशे तु सिंहस्थेऽमरपूजिते ।
विवाहादि न कुर्वीत नायं दोषोऽस्ति दक्षिणे ॥

बोधायनः—

यस्मिन् काले विरोधोऽस्ति ज्यौतिषोक्तागमोक्तयोः ।
ज्यौतिषोक्तं विहायैव स्मृतिचोदितमाचरेत् ॥

व्यासः—

दद्यात्पूर्वमुखः कन्यां गृह्णीयादुत्तरामुखः ।
दम्पत्योर्वर्धते चायुः दातुश्चैव विवर्धते ॥

स्कान्देऽपि—

नामगोत्रं समुच्चार्य प्राङ्मुखो वारिपूर्वकम् ।
उदङ्मुखाय वै दद्यात् कन्यां चैव यवीयसीम् ॥

**End:**

देवब्रह्मस्वहारी च वेदशास्त्रविनिन्दकः ।
अभक्ष्यभक्षणाच्चैव पाण्डुरोगी प्रजायते ॥
विश्वासघातकश्चैव छर्दियुक्तः प्रजायते ।
प्रदर्शनार्थमेवं तु सङ्ग्रहेण प्रकीर्तितम् ॥

**Colophon:**

स्मृतिसङ्ग्रहस्समाप्तः ॥

---

R. No. **3405.**

Paper. 10¾ × 9¼ inches. Foll. 100. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Paliyattu-Acchan, Chennamangalam, Parur post, Cochin State.

Fol. 100 is left blank.

**न्यायसूत्रतात्पर्यदीपिका.**

NYĀYASŪTRATĀTPARYADĪPIKĀ.

A commentary on the Nyāyasūtras of Gautama: by Bhaṭṭavāgīśvara.

Complete.

**Beginning:**

नमस्त्रिभुवनोत्पत्तिस्थितिसंहारकारिणे ।
निर्वाणप्रापणस्यैकहेतवे वृषकेतवे ॥
अन्वीक्ष्यानुपदं भाष्यमप्यनुक्रम्य वार्त्तिकम् ।
न्यायसूत्रार्थतात्पर्यदीपिकेयं विधास्यते ॥

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निश्श्रेयसाधिगमः । तत्त्वं ज्ञायतेऽनेनेति तत्त्वज्ञानं शास्त्रं तस्मात् प्रमाणादिपदार्थतत्त्वावगमावान्तरव्यापारात् निश्श्रेयसस्याधिगमः प्राप्तिर्भवतीति शास्त्रनिश्श्रेयसयोर्हेतुहेतुमद्भावप्रतिपादनार्थं सूत्रम् ।

* * * *

**Colophon:**

इति भट्टवागीश्वरविरचितायां न्यायसूत्रार्थदीपिकायां प्रथमोऽध्यायः ॥

**End:**

हेत्वाभासाश्च यथोक्ताः । यथैव विभक्ता लक्षणे . . . . . तेषां निग्रहस्थानभावो न लक्षणान्तरेण चकाराद्यत्किंचिदनुक्तमपि निग्रहस्थानमस्ति ॥

* * * *

इति जगति जनानामीशसायुज्यभाजा-
मनुपजनित . . . . . भाषणेषु ।
पशुपतिरपि यस्मै सस्मितः साधु साध्वि-
त्यवददवतु सोऽस्मानक्षपादो मुनीन्द्रः ॥

**Colophon:**

इति श्रीभट्टवागीश्वरविरचितायां न्यायसूत्रार्थदीपिकायां पञ्चमोऽध्यायस्समाप्तः ॥

समाप्तोऽयं ग्रन्थः ॥

---

R. No. **3406.**

Paper. 10⅝ × 9¼ inches. Foll. 205. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa-Nambūdirippad, Paliyanūr-mana, Tiruppanattura post, Cochin State.

Foll. 78*b*, 204*b* and 205 are left blank.

पञ्चपादिकाविवरणव्याख्यानम्—टीकारत्नम्.

PAÑCAPĀDIKĀVIVARAṆAVYĀKHYĀNAM:
TĪKĀRATNAM.

A commentary on the Pañcapādikāvivaraṇa of Prakāśātman, which itself is a commentary on the Pañcapādika of Padmapādācarya: by Ānandapūrṇa alias Vidyāsāgara disciple of Abhayānanda-Pūjyapāda.

The name of the original scribe is stated to be one Subrahmaṇya.

Complete.

**Beginning:**

आयुवाहमखिलस्य नायकं कारणात्कलभवक्त्रसंश्रितम् ।
प्रातरेव सततं नमाम्यहं पारिजातमिव पार्वतीसुतम् ॥

* * * *

प्रकाशात्मा यतिष्टीकाविवृतिं कृतवान् पराम् ।
आनन्दपूर्णमुनिना भावस्तस्याः प्रकाश्यते ॥

इह खलु निखिलवादिकृतविप्रतिपत्तिसंशयनिरसनतत्त्वदर्शनद्वारा निःश्रेयसप्रयोजनश्रीमच्छारीरकमीमांसक(सा)भाष्यटीकाग्रन्थस्य विवरणमन्तरेण दुरधिगमत्वात् तदर्थविवरणमारभमाणः शिष्टाचारमनुविदधानो मङ्गलमाचरति—आद्येन ।

* * * *

सर्गादिषु त्रिषु त्रिमूर्तित्वं दर्शयति—पालन इति । जगतः पालने फलतया विषयभूते सत्त्ववृत्तये विमलं रजस्तमोभ्यामस्पृष्टं सत्त्वं तस्मिन् वृत्तिः वर्तनं यस्य सः तस्मै ।

**End:**

तृतीयश्लोकतात्पर्यमाह—अद्वितयेति । विकल्पाश्रयविषयस्य कथं प्रामाण्यमिति ब्रुवतः किमाकूतम्?—किमधिष्ठानापरोक्ष्यात् प्राक् प्रामाण्यहानमुत परस्ता(त्)? नाद्यः—व्यवहारबाधानुपलब्धे व्यवहाराङ्गत्वरूपप्रामाण्याविरोधादित्यर्थः । निरतिशयानन्देत्यादिपदमनाद्यानन्दकूटस्थेतिश्लोकेनैकार्थतया व्याख्येयं द्वितीयमङ्गीकरोति—तस्मिश्चेति ।

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्याभयानन्दपूज्यपाद(शिष्य) विद्यासागरमुनिविरचितटीकारत्ने समन्वयसूत्रं समाप्तम् ॥

The scribe adds—

* * * *

दृष्ट्वा विद्यासागरीयाभिधाना व्या(ख्या)सेयं श्लाघ्यसन्दर्भयुक्ता ।
आचार्येभ्यः शृण्वता ब्रह्मविद्यां सुब्रह्मण्यस्मासुरेण व्यलेखि ॥

**Colophon:**

इति पञ्चपादिकाव्याख्याने टीकारत्ने समन्वयसूत्रम् ॥
समाप्तं टीकारत्नम् ॥

Fol. 203 contains some portion of the Pañcapadikavivaraṇa.

---

## R. No. 3407.

Paper. 10⅜ × 8¼ inches. Foll. 168. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of the Sanskrit College Library, Tiruppaṇattura, Cochin State.

Fol. 168 is left blank.

### श्लोकमाला (रामायणम्).
### ŚLOKAMĀLĀ (RĀMĀYAṆAM).

A treatise in verse narrating the story of the Rāmāyaṇa, apparently by some Madhva.

Contains from the beginning of the fifth Paricchēda in the Bālakāṇḍa up to the end of the second Paricchēda in the Sundarakāṇḍa.

**Beginning:**

सशङ्खवीणापटहादिवाद्यैस्सशब्दिताशाश्च सुनन्दिताशः ।
रामस्ससीतः प्रययौ पुराऽयात्स्वमित्रयुक्कन्मथकोटिरूपः ॥
स श्रीपतिः पङ्क्तिरथः प्रयास्यन् स पत्रिणामुत्तमधीर्निनादम् ।
निशम्य घोरं भयशंसि चाशिवं निशाकराभप्रममावपन् जगौ ॥

* * * *

वैकुण्ठेऽकुण्ठशक्तिस्सुखमयफणिनाथातिगौरोरुभोगे
पूर्णज्ञाननियात्मा स्वयमभिरमते सीतया चारुलक्ष्म्या ।
नित्यं सच्चित्सुखाङ्ग्या गुणगणजलधिः केशवो रामदेवः
तद्वत्साकेतपुर्यां गुणगणयुतया सीतयाथाभिरेमे ॥

**Colophon:**

इति रामावतारानुवर्णनश्लोकमालायां पञ्चमः परिच्छेदः ॥

इति रामावतारे बालकाण्डान्तश्लोकसङ्ख्या ॥

**End :**

तमालिलिङ्गे परमप्रहृष्टस्स्वात्मप्रदानं हि तदस्त्युदारम् ।
सर्वोत्तमोऽयं खलु रामचन्द्रो वायूत्तमं जीवगणेशितारम् ॥
हनूमन्तं कीर्तिमन्तं बलवन्तं तथा हरिम् ।
आनन्दतीर्थं श्रीभीमं भाविब्रह्माणमुत्तमम् ॥

* * * *

अथापि नारायणमार्गवीवरप्राणांशभूता दितिसूनुचिच्याम् ।
ते ह्यज्ञवद्भान्ति तदीयदोषाच्छ्रीरामसीताहनुमन्त ईशाः ॥

**Colophon :**

इति सुन्दरकाण्डे श्लोकमालायां द्वितीयः परिच्छेदः ॥

---

R. No. 3408.

Paper. 10⅜ × 9¼ inches. Foll. 110. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of. M.R.Ry. Śrīkṛṣṇacakravarti-Ācārya, Ketandapatti, near Jalarpet.

Fol. 110 is left blank.

मीमांसासर्वस्वम्.

MĪMĀṂSĀSARVASVAM.

A treatise in the Pūrvamīmāṃsā written in accordance with the veiws of Kumārilabhaṭṭa: by Nārāyaṇa Śāstrin son of Accamāmbā and Kollūri Sōmayājin and pupil of Sōmanāthadīkṣitamahōpādhyāya of Niṭṭala family, who was the author of Mayūkhamālikā.

Contains from the fourth Pāda of the second Adhyāya to the end of the third Pāda of the third Adhyāya.

**Beginning :**

श्रीरामभद्रः श्रितपारिजातस्समस्तकल्याणगुणाभिरामः ।
सीतामुखाम्भोरुहचञ्चरीको निरन्तरं मङ्गलमातनोतु ॥

विधिरिति चेन्न प्रकरणाद्यनुपस्थितस्याप्यनुवादः । नाम्ना सम्भवत्यनुवादे प्राप्तिमात्रमपेक्षितं न तु प्रकरणादिना । तथा च शास्त्रान्तरप्राप्तनित्याग्निहोत्रानुवादेन मासलक्षणगुणविधिर्नानुपपन्नः । ननु मासस्य पुरुष-

कृत्यत्वमुपपादयितुमशक्यत्वादनुपादेयस्य कथं विधेयत्वमिति चेन्न; मासस्यानुपादेयतया यो मासस्तत्र होमं कुर्यादित्येवं शब्दतो मासोद्देशेन कर्मविधिप्रतीतावपि विधेरप्राप्तपक्षपातित्वात् ।

* * * *

Colophon:

इति श्रीनिट्ठलकुलतिलकसोमनाथदीक्षितमहोपाध्यायचरणपरिचरणसमुदितमनोनैर्मल्याविशदीकृतसकलशास्त्रतत्त्वस्य कोह्लरिसोमयाजितनूभवस्याच्चमाम्बागर्भसम्भवस्य नारायणशास्त्रिणः कृतिषु मीमांसासर्वस्वसमाख्यायां द्वितीयस्याध्यायस्य चतुर्थः पादः ॥

अथातश्शेषलक्षणम् ।

End:

यद्यपि चात्र तद्धितसमासानन्तर्गतत्वात्पूष्णो न वृत्त्यसामर्थ्यम्; तथापि भागशब्दस्य यागलक्षकत्वात् यागेन च योग्यतया देवतात्वेन सम्बन्धे सम्भवति अनिर्धारितसम्बन्धग्रहणासम्भवात् देवतात्वेनैव पूष्णो भागान्वयादेकदेवत्यस्यैव ग्रहणमिति सर्वमवदातम् ॥

Colophon:

इति कोह्लरिनारायणशास्त्रिणा विरचितायां मीमांसासर्वस्वसमाख्यायां तृतीयस्याध्यायस्य तृतीयः पादः ॥

The scribe of the original adds—

श्रीनिगमान्तचक्रवर्तितनूजेन श्रीकृष्णचक्रवर्तिना लिखितोऽयम् ॥

---

R. No. 3409.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 234. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Paliyattu-Valiya-Acchan, Chennamangalam, Parur post, Cochin State.

Foll. 233 and 234 are left blank.

रामायणव्याख्यानम् — विवेकतिलकम्.

RĀMĀYAṆAVYĀKHYĀNAM: VIVĒKATILAKAM.

A commentary on the Vālmīkirāmāyaṇa, which work has been described under No. 1806 of the D.C.S. MSS., Vol. IV, Part I; by Varadarāja alias Cōlapaṇḍitabrahmarāja of Atrēya gōtra and of Uṭāli family.

Contains the Kāṇḍas one to five complete and six incomplete.

**Beginning:**

प्रपद्ये रघुनाथस्य चरणौ शरणं परम् ।
वनायनं ययोरासीद्देहभाजां रसायनम् ॥
दण्डकारण्यपाषाणे भर्तुर्वक्षसि कौस्तुभे ।
सदृशस्खलनौ वन्दे वैदेह्याः पादपल्लवौ ॥

* * * *

आद्याय कवये तस्मै भूयाद्वाल्मीकये नमः ।
अकामयत यं देवी स्वयमेव सरस्वती ॥
अहमल्पश्रुतमतिर्महाप्राज्ञजनोचितम् ।
व्याख्यानमादिकाव्यस्य विधास्ये बाल्यचोदितम् ॥

* * * *

विरुद्धानामिवार्थानां लक्षणोल्लङ्घिनामिव ।
शब्दानां च यथाशक्ति परिहारोऽत्र कथ्यते ॥
श्रीरामायणकाव्यस्य यद्यास्या विजये भवेत् ।
विवेकतिलकं नाम व्याख्यानमिदमीक्ष्यताम् ॥

को न्वस्मिन्नित्यादि । अत्र गुणशब्दस्सौशील्ये गुणविशेषे वर्तते न गुणसामान्ये; अतो वीर्यवानित्यादौ न पौनरुक्त्यदोषप्रसङ्गः । एकप्रियदर्शनः इति । एकमप्रतिद्वन्द्वं प्रियदर्शनमस्य । अस्य दर्शनमिवान्यस्य दर्शनं प्रियं न भवतीत्यर्थः ।

* * * *

**Colophon:**

इति प्रथमात्रेयगोत्रिणोटालिकुलसम्भवेन वरदराजेन चोलपण्डितब्रह्मराजापरनाम्ना विरचिते विवेकतिलकनाम्नि रामायणव्याख्याने बालकाण्डस्य प्रथमसर्गव्याख्यानम् ॥

**End:**

कुम्भकर्णेन पातितास्ते लब्धसंज्ञास्सुग्रीवमुपतस्थिरे अस्यार्थस्योपन्यासोऽङ्गदादीनां तेषां कर्मकीर्तनोपपत्त्यर्थः । अभिगम्येत्यादिपरशेषः ॥

**Colophon**:

श्रीसप्ततितमे श्री ॥

सृष्टगात्रः शिथिलगात्रः ॥

श्रीएकसप्ततितमे श्री ॥

कुम्भकर्णोऽयमुत्थित इत्यत्रेतिशब्दो द्रष्टव्यमु(ः)। व्यक्तहस्तदशायतौ
* * * *

संक्षिप्त(प)न्निव संहरन्निव शरस्य शीघ्रगमनादन्तरावस्थितमाकाशं प्रसन्निवे-त्यर्थः । विधार्यैवं एवं विचिन्त्य . . . . . . इष्टमागिनमिष्टार्थमाप्त-मिष्टमि.

---

## R. No. 3410.

Paper. $10\frac{3}{8} \times 9\frac{1}{4}$ inches. Foll. 194. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1920-21 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

Foll. 193*b* and 194 are left blank.

श्लोकमाला (कृष्णावतारचरितम्.)

ŚLŌKAMĀLĀ (KṚṢṆĀVATĀRACARITAM).

A treatise in verse narrating the story of the incarnation of Lord Kṛṣṇa, as found in the Mahābhārata and Śrībhāgavata. Apparently by a Mādhva whose name is not given.

Contains the Paricchēdas one to four complete and the fifth incomplete.

**Beginning:**

श्रीनारायण उत्तमश्चिदचितोर्लक्ष्मीयुतस्सर्वयोः

मूर्तेभ्यस्सकलावतारनिकरेभ्यस्संस्थितेभ्यस्त्वपि ।

भाविभ्यश्च समस्तवेदपरमार्थान् स्वीयसर्वोत्तम-

त्वाद्यान्यत्र महावतार उरुधीः प्राचीकशत्स्पष्टतः ॥

निखिलनिगमदृष्टादृष्टमुख्यार्थकृष्ण-

प्रमितिविषयकार्ये श्रीमहाभारतेऽस्मिन् ।

महिततममुदारं यद्गृहीत्वावतारं

त्वकथयदखिलं यच्छक्तिपीतो मुकुन्दः ॥

श्रीमद्भागवते च सत्तमशुकप्रोक्ते मृषावाक्यतो

निर्मुक्ते पदनित्यतायुजि फले वेदद्रुमस्योत्तमे ।

यद्रूपं परिगृह्य मञ्जुलतमं सन्नेत्रचित्तप्रियं
प्रोक्तं सच्चरितामृतं श्रुतिसुखं श्रीव्याससन्नन्दनैः ॥

* * * *

कृष्णस्य वृत्तमपि तत्कथयामि किञ्चि-
च्छ्रीवृष्णिवंशमकुटीमणिभूषणस्य ।
भैष्मीपतिश्च परमोऽपरसत्यभामा-
कान्तस्स मे च विबुधाः करुणां क्रियासुः ॥

* * * *

**Colophon:**

इति कृष्णावतारचरिते श्लोकमालायां प्रथमः परिच्छेदस्समाप्तः ॥

**End:**

श्रीकृष्णोऽपि जयिष्णुरामयुयुधानाक्रूरहार्दिक्यस-
स्सत्राजिद्विपृथुप्रधानयदुसिंहैराश्रितो माधवः ।
वृष्णीशं त्वपि चोग्रसेनमखिलां पृथ्वीं समस्तान् सुरान्
मर्त्यांश्चापि स मानव(य)न् पुरवरे तत्रावसत्सोद्धवः ॥

**Colophon:**

इति श्रीकृष्णावतारचरिते चतुर्थः परिच्छेदः समाप्तः ॥

श्रीकृष्णेऽवितरि प्रमोदमतुलं प्रापुस्सुरा देवता-
वर्गीया निखिलोपदेवतवरास्सन्मर्त्यसङ्घा अपि ।
मर्त्येष्वप्यथ पाण्डुपुत्रयदवो मोदं प्रजग्मुः परं
कृष्णेष्टा वशतस्सुयोधनजरासन्धादिका दुःखिताः ॥

* * * *

तदनु मायिनौ बाणमन्त्रिणावसुरसनया संयुतौ शठौ ।
परममायया यादवं कुलं विवशमातनोद्दितिजकटिकौ ॥
अद्वैतसिद्धिब्रह्मानन्दीयाभ्यां वादिनौ यथा ।
आनन्दतीर्थीयमतं वेदतत्त्वार्थयुक्तिमत् ॥

* * * *

अन्तस्स्वान्तःपुरस्थान् परतम भगवन् रुक्मिमुख्यानहत्वा
बन्धून् कार्यं तदेतत्कथमिति वरचे(ये)त्तत्र वदयाम्युपायम् ।
पूर्वेद्युः पूर्वदेवाहितकुलगुरयात्रास्ति यस्यां वधूस्सा
शर्वाणीमभ्युपेयात्कमलजनिपतर्देव यस्यां महा . . ॥

## R. No. 3411.

Paper. 10¾ × 9½ inches. Foll. 66. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920-21 from a MS. of the Naḍuvil-Maṭham, Trichur, Cochin State.

Foll. 25b, 26, 65b and 66 are left blank.

Bound in two volumes.

ऐतरेयारण्यकव्याख्या.

AITARĒYĀRAṆYAKAVYĀKHYĀ.

A commentary on the Aitarēyāraṇyaka which work has been described under No 38 of the D.C.S. MSS., Vol. I, Part (1). A similar work has been described under R. No. 3352 ante.

Breaks off in the fourth Āraṇyaka.

**Beginning:**

विष्णुः । अग्निर्वै देवानामवमादि(म इत्यादि)ब्राह्मणमभिहितं दशरात्रपर्यन्तमराध्स्येति । अतोऽनन्तरमथ महाव्रतमिति प्राप्ते आरण्यकेऽर्थादिह तस्योत्कर्षः कृतः । अत्र चाग्निहोत्रप्रायश्चित्तहरिश्चन्द्राख्यानि व्याख्यातानि । तस्य हरिश्चन्द्रस्य क्षत्रत्वात् । क्षत्रिययज्ञोऽभिहितः । तत्प्रसङ्गेन चान्यत्तेन क्षिप्रं हैवैनं स्तृणुते । अथ महाव्रतमित्येषोऽस्य क्रमः—

* * * *

**Colophon:**

इत्येकचत्वारिंशोऽध्यायस्समाप्तः ॥

* * * *

इति षड्गुरुशिष्यविरचितायामारण्यवृत्तौ मोक्षप्रदायां चतुर्थारण्यके सूत्रे द्वितीयोऽध्यायस्समाप्तः ।

**End:**

आरण्यकमिदं शास्त्रं चतुष्पर्वानधीत्य तु ।
स्नातको न भवेद्वेदे समु . . यतः ॥
स्नाताद्द्वितसमाप्तौ कं गणसूत्रेण वै कृतम् ।
इह्यार्योश्शत्रकृत्री(च्छि)णीत्यधीयन्पदनिर्वचः ॥

स्पष्टयति । यद्यप्यन्यद्बह्वधीयानो वेदमनधीय स्नातको भवति । ततश्च नास्मादधीतात्प्रमाद्येत् । प्रमादोऽवश्यकर्तव्यावधानरहित.

R. No. 3412.

Paper. 10¾ × 9¼ inches. Foll. 102. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920-21 from a MS. of the Librarian of Sanskrit College, Tiruppanittora, Cochin State.

Fol. 102 is left blank.

तत्त्वोद्द्योतटीकाविवृतिः—गूढभावप्रकाशिका.

TATTVŌDDYŌTAṬĪKĀVIVṚTIḤ : GŪḌHABHĀVA-PRAKĀŚIKĀ.

A commentary on Jayatīrtha's Tattvōddyōtaṭīkā which work has been described under No. 4792 of the D.C.S. MSS., Vol. X. By Vijayīndrabhikṣu, disciple of Surēndratīrtha.

Complete.

**Beginning:**

सर्वज्ञं सर्वकर्तारं सर्वजीवजडात्मकम् ।
प्रपञ्चाद्वस्तुतोऽत्यन्तभिन्नं श्रीनृहरिं भजे ॥
तं पाणिपल्लवं बाहुशालं सद्द्विजसेवितम् ।
विद्यावासलतापुष्पं मध्वकल्पतरुं भजे ॥
ब्रह्मविन्मुखरङ्गस्थां मध्वविद्यानटीं पराम् ।
विचित्रपदविन्यासैः मोहयन्तीं भजेऽन्वहम् ॥
यस्य वा कामधेनुर्नः कामितार्थान् प्रयच्छति ।
सेवे तं जययोगीन्द्रं कामबाणच्छिदं सदा ॥
यो व्यासमुनिदावाग्निः सच्छास्त्रमरुता सह ।
ददाह कुमतारण्यं प्रकाशाय तमाश्रये ॥
श्रीसुरेन्द्रमुनेः पादपद्मरागस्य पीडनात्(?) ।
रक्ते नखदलोपेते सेवे शिष्यालिशोभिते ॥
सर्वतन्त्रस्वतन्त्रेण विजयीन्द्राख्यभिक्षुणा ।
तत्त्वोद्द्योतस्य विवृतेः गूढो भावः प्रकाश्यते ॥

श्रीमज्जयतीर्थमुनिः प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्त्यर्थं शिष्यादा(वधा)नाविच्छेदरूपप्रचयार्थं च कृतमलौकिकाविगीतशिष्टाचारानुमितवेदबोधितकर्तव्यताकं श्रीरमणाभिवन्दनरूपं मङ्गलं शिष्यशिक्षायै निबध्नन्

तन्मनस्समाधानाय चिकीर्षितं प्रतिजानीते—विश्वोत्पत्तीति । तत्र विवृण्महे इत्युत्तमपुरुषबहुवचनघटनायाह -- अस्मद्युत्तम इति । शास्त्रार्थसम्पत्तये वयमिति कर्ता लभ्यते । तत्त्वोद्द्योतविवरणकर्तुरेकत्वेऽपि अस्मदो द्वयोश्चेति सूत्रात् वयमिति बहुवचनोपपत्तिः ।

**End:**

आचार्यस्य हरित्वेन रूपणं कथं लभ्यत इत्यत आह सर्वज्ञ इति । अस्मिन् श्लोके मायिनश्चोरत्वेन निरूप्यन्त इति ज्ञापनाय मायिशब्देनोभयग्रहणमित्याह—मायिन इति । यथा चोराणां सञ्चारः न भास्करोदये, एवं मायिनां श्रीमदाचार्योदयात्प्रागेव सञ्चारः, नतूदयानन्तरमिति भावः । सकलज्ञनामक इति । पूर्णप्रज्ञनामक इत्यर्थः ॥

इति श्रीविजयीन्द्राख्यभिक्षुणा प्रीतये हरेः ।
तत्त्वोद्द्योतस्य विवृतौ गूढो भावः प्रकाशितः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीमत्सुरेन्द्रतीर्थपूज्यपादानां शिष्येण विजयीन्द्रभिक्षुणा तत्त्वोद्द्योतविवृतिभावप्रकाशः ॥

मायिदर्प्पमातङ्गगर्भनिर्वापणक्षमः ।
विजयीन्द्रमृगेन्द्रो मे हृद्गुहावसथो भवेत् ॥

---

## R. No. 3413.

Paper. 10½ × 9¼ inches. Foll. 124. Lines, 20 in a page. Dêvanâgarî. Good.

Transcribed in 1920–21 from a MS. of Palyattu-Valiya-Acchan, Sennamangalam, Parur post, Cochin State.

राघवीयव्याख्या—बालपाठ्या

RÂGHAVÎYAVYÂKHYÂ: BÂLAPÂṬHYÂ.

A commentary on Râmapâṇivâda's Râghavîya, which work has been described under R. No. 3397 ante.

Breaks off in the 13th Sarga.

**Beginning:**

हस्तिमस्तकमस्तोकं वस्तु स्वस्तिकृदस्तु नः ।
यत्तु प्रत्यूहविध्वास्त विधत्ते वस्तुतस्तुतम् ॥

इह खलु केरलदेश्यो नाम(राम) पाणिपा(वा)दः काव्यं यशसे इत्यादिना काव्यरचनायाः बहुप्रयोजनसाधुत्वं निश्चिन्वानः तत्रापि स वाग्विसर्गो जनतापविप्लवः इति समस्तपापक्षपणनिपुणत्वेन प्रशस्यमानभगवद्गुणवर्णनं मनसि बहु मन्यमानः श्रीरामगुणवर्णनपरं राघवीयं नाम काव्यं प्राणैषीत् ।

तस्य बालप्रबोधाय सङ्क्षेपेणैव केनचित् ।
बालपाठ्यमिति प्रोक्तं व्याख्यानमुपरच्यते ॥

तत्रादौ आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्युक्तेः वस्तु निर्दिशति । श्रिय इत्यादिना—अत्र च प्रथमं श्रीशब्दप्रयोगः गणवर्णादिप्रयुक्तसकलदोषनिराकरणाय तदुक्तम्—

देवतावाचकाश्शब्दाः ये च भद्रादिवाचकाः ।
ते सर्वे नैव निन्द्यास्स्युर्गणतो लिपितोऽपि वा ॥ इति ।

श्रियः सम्पदः प्रसूतिः साधनी करणार्थे अधिकरणार्थे वा क्तिन् । मनुवंशजन्मनां महीभुजां पुरी अत्र च मनुग्रहणं तमारभ्य सर्वे सूर्यवंश्या राजानः तत्र न्यवसन्निति सूचनाय । तथाच रामायणे—

मनुना मानवेन्द्रेण या पुरी सन्निवेशिता ॥ इति ॥

**End:**

तादृक् गम्भीरप्रकृतिरपि तथा गम्भीरस्वभावोऽपि स हनुमान् मुग्धो विचेतनोऽभवत् । इत्यस्माद्धेतोः तेनापि लङ्घितलवणाम्बुधिनापि रूढोऽतिप्रवृद्धो भ्रमजलधिः संसारसिन्धुः न सुतरो न सुखेन तरीतुं शक्य . . . दिनं दिवसमनुपाल्य तिष्ठन् दिननाथः सूर्य इव । अत्रापि समुचितेत्यादि विशेषणद्वयमनुषञ्जनीयमिति सिद्धम् ।

**Colophon:**

इति श्रीराघवीयव्याख्यायां बालपाठ्याख्यायां द्वादशस्सर्गः ॥

अथ त्रयोदशस्सर्गः ॥

तरुवरनिकटे मनोज्ञशीलां जनकसुतामवलोक्य विस्मितस्सन् ।

## R. No 3414.

Paper. 10¾ × 9¼ inches. Foll. 171. Lines, 20 in a page. Devanāgarī Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Pandit Sadāśiva-vidyābhūṣaṇa, Berhampore.

अभिनवचिन्तामणिसारः.

ABHINAVACINTĀMAṆISĀRAḤ.

A treatise on medicine dealing with the distinguishing characteristics of different kinds of maladies, the method of diagnosing them and also remedial medicines.

Contains the Nidāna and Cikitsā complete.

**Beginning :**

अथ अभिनवचिन्तामणिसारचिकित्सा ।

ज्वररोगनिदानम्—

अस्मिन् शास्त्रे वातपित्तकफानां प्रधानत्वात् प्रथमतः तत्सामान्यलक्षणान्युच्यन्ते—

वातलिङ्गलक्षणम्—

वदनविरसता स्याद्वचसः कर्कशत्वं
भवति वपुषि कार्श्यं नातिनिद्राप्रवृत्तिः ।
त्वचि च परुषता स्याजातु वैषम्यमग्नेः
सकलवपुषि शूलं वातरोगस्य लिङ्गम् ॥

अथ पित्तलिङ्गलक्षणम्—

भ्रममदमुखशोषस्वेदसन्तापमूर्च्छा
मुखनयननखत्वङ्मूत्रविट्पीतता च ।
प्रलपनमतिसारश्चारुचिश्च ज्वरश्च
प्रभवति शिशिरेच्छा पित्तरोगस्य लिङ्गम् ॥

* * * *

**Colophon :**

इत्यभिनवचिन्तामणौ रोगनिदानं संपूर्णम् ॥

अभिनवजलदश्यामं पीतदुकूलं विदेहजारामम् ।
विलसितकौस्तुभवामं मङ्गलमूर्तिं भजे रामम् ॥

धर्मार्थकाममोक्षाणामारोग्यं मूलमुच्यते ।
अतः प्रवृत्तिरुचिता शास्त्रे सद्वैद्यसम्मते ॥

वैद्यलक्षणमाह—

शास्त्रेषु श्रमवान् क्रियासु कुशलः प्राज्ञस्सुधीस्सत्यवाक्
धीरो रोगनिरूपणैकनिपुणः पीयूषहस्तो घृणी ।
द्रव्याणां रसवीर्यपाकमखिलं वेत्ता दयालुस्सदा
निर्णेता ऋतुकालदेशवयसां मात्राधिकारी भिषक् ॥

* * * *

**Colophon:**

इति चिन्तामणौ प्रथमः किरणः ॥

**End:**

कफस्य विंशतिः प्रोक्ता रोगास्तन्द्रातिनिद्रता ।
गौरवं मुखमाधुर्यं मुखलेपः प्रसेकता ॥
श्वेतावलोकनं श्वेतविट्कत्वं श्वेतमूत्रता ।
तथा श्वेताङ्गवर्णत्वमुष्णेच्छा तिक्तकामिता ॥
आलस्यं मन्दबुद्धित्वं तृप्तिघर्घुरवाक्यता ।
अचैतन्यं च गदिता विंशतिः श्लेष्मजा गदाः ॥

इति वातादिरोगचिकित्सा ॥

**Colophon:**

इत्यभिनवचिन्तामणिसारचिकित्सा ॥

समाप्तोऽयं ग्रन्थः ॥

---

R. No. **3415**.

Paper. 10⅝ × 9¼ inches. Foll. 20. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920–21 from a MS. of the Raja of Chirakkal, Malabar district.

Fol. 26*b* is left blank.

**चतुर्वेदतात्पर्यसङ्ग्रहव्याख्या.**

**CATURVĒDATĀTPARYASAṄGRAHAVYĀKHYĀ.**

Slightly different from the work described under R. No 2200 ante. Wants the beginning and the end.

(मू)—

न्यासीकृतं वसु बलादमरैरवातु-
मन्वागतो रुदितवानिति रुद्रमग्निम् ।
रुद्रान् त्वदुद्भवतया मरुतो गणान् वा
रुग्द्रावणेन हि भवन्तमवैमि रुद्रम् ॥

(व्या)—

अमरैः न्यासीकृतं निक्षिप्तं वसु तैर्बलादवाप्तुमन्वागतो रुदितवान् रुदिरत्रान्तर्भावितणिचियकः (च्कः) रोदितवानित्यर्थः । इति हेतोरग्निं रुद्रशब्द-वाच्यमवैमि । तथा च श्रुतिः—देवासुरास्संयत्ता आसन्नित्यारभ्य सोऽरोदी-द्यदरोदीत्तद्रुद्रस्य रुद्रत्वमित्यन्ता । अस्या अर्थः—देवासुरा युद्धाय संयत्ताः सन्नद्धा आसन् । ते देवा विजयमुपयन्तः विजेतुं गच्छन्तः अग्नौ ता(वा)मं श्रेष्ठं वसु सन्न्य(द)धत सन्निहितवन्तः । अत्र हेतुमाह—इदमिति ।

**End:**

अष्टादशपुराणानां निष्ठा काष्ठा महेश्वरः ।
गुणाभिमानिनो नैव ब्रह्मविष्णुमहेश्वराः ॥
वैष्णवानि पुराणानि त्रिमूर्तीनां हरेरपि ।
तदंशस्य तदंशस्य वैभवं च वदन्ति हि ॥
सोऽपकर्षो भवेत् द्रष्टुर्भवेष्वखिलेष्वपि ।
पुराणेषु हरेस्साक्षान्मूलभूतस्य सत्तम ॥
वैष्णवेषु पुराणेषु योऽपकर्षस्तु दृश्यते ।
रुद्रांशस्य हरस्यास्य विभूतेरेव केवलम् ॥

---

## R. No. 3416.

Paper. 10⅜ × 8¼ inches. Foll. 70. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from the MS. of M.R.Ry. Puvvula Śrīraṅga-nāyakulugāru, Vaddadi, Vizagapatam district.

दिव्यसूरिचरितम्—आन्ध्रटीकासहितम्.

DIVYASŪRICARITAM: WITH TELUGU MEANING.

Foll. 1*a*—69*a*. Foll. 69*b* to 70 are left blank.

Similar to the work described under No. 12150 of the D.C.S. MSS., Vol. XXI.

Incomplete.

**Beginning:**

वात्सल्यसौशील्यगुणाम्बुराशिं वक्तारमर्थं द्रविडश्रुतीनाम् ।
श्रीदेवराट्पुत्रपदैकनिष्ठं यज्ञेशशौरीमुनिमाश्रयामः ॥

श्री[ ]कलिध्वंसिदयापात्रं पद्मा(श्रा)त्सुन्दरसंज्ञकम् ।
विज्ञातज्ञानसंपूर्णमस्मद्देशिकमाश्रये ॥

शठारिमुखनिस्सृतद्रविडवेदनिर्वाहकं
स्वभक्तजनरक्षण . . . तात्तसद्दीक्षणम् ।
स्वसूक्तरचनोज्वलद्गुरुपरम्परावैभवं
यतीन्द्रपदशेखरं तमपराङ्गरम्यं भजे ॥

श्री[ ]दिव्याकारं सरोजाक्षं शुभचक्रगदाधरम् ।
मुकुन्दद्वारनिलयं विष्वक्सेनमुपास्महे ॥

* * * *

हेमाब्जिनीहिमसरोजगर्भो(र्भात्) श्रीपाञ्चजन्योऽजनि दिव्ययोगी ।
तारे हरेराश्वयुजाख्यमासे समस्त जीवावन नि(कर्म)हेतुः ॥
आज्ञाधिश्रीचन्दने द्वापराख्ये [व्ज]सिद्धार्थ्याख्ये वत्सरे मानशेषः (सि चेषे) ।
शुक्लपक्षे(क्का)ष्टम्यां भौमवारे शुभर्क्षे विष्णोर्जन्म प्राप कासारयोगी ॥

* * * *

मह्वापुरवराधीशं माधवीकुसुमोद्भवम् ।
भूतं नमामि यद्विष्णोः ज्ञानदीपमकल्पयत् ॥
वन्दे भूताख्ययोगीन्द्रवरेण्यगुणसम्पदम् ।
लक्ष्मीसहायकरुणाप्राप्तप्रमितिवैभवम् ॥

**End:**

मरुद्वृधाया मध्यस्थे चन्द्रपुष्करिणीतटे ।
श्रीरङ्गमतुलं क्षेत्रं श्रिया सार्धं जगत्पतिः ॥

* * * *

अग्निं प्रज्वाल्य तद्देशे मुनेर्दे(र्नि दे)वं जपे(त्)क्षणम् ।
तस्यैतत्फलमाख्यातं(तुं) मया देवि न शक्यते ॥

## R. No. 3417.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 63. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Kandavalli-Narasiṃhācaryulugāru, Vizagapatam.

**वैखानससूत्रव्याख्या—तत्त्वप्रकाशिका.**

**VAIKHĀNASASŪTRAVYĀKHYĀ : TATTVAPRAKĀŚIKĀ.**

Foll. 1*a*—62*b*. Fol. 63*a* gives the contents of this work. Fol. 63*b* is left blank.

A commentary on the Vaikhānasasūtras, dealing with the consecration and worship of God Viṣṇu: by Nṛsiṃhācārya, son of Nṛsiṃhācārya of Penmada village.

Name of the scribe—Parlapalli Veṅkaṭācārya.

Complete.

**Beginning :**

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
ध्रुवादीनां यथाधीशे प्रागाद्यन्वग्रहीद्ध्रुवम् ।
तथा भक्तपराधीनो मम सम्यक् प्रसादयेत् ॥
कर्त्रे भर्त्रे प्रवक्त्रे च प्रेरयित्रे हृदादिकम् ।
सीतालक्ष्मणसंयुक्तश्रीरामाय नमो नमः ॥
सूत्रकर्त्रे विखनसे सुव्यक्तमनपेक्षणम् ।
तत्सूत्रानुमतेभ्यश्च भृग्वादिभ्यो नमो नमः ॥
श्रीमत्पेन्मदनामधेयमहिते ग्रामे निरूढस्थिते
सत्यं सत्यगुणोत्तरस्य नृहरेर्नाम्ना प्रसिद्धस्य सः ।
तन्नामा तनयस्तदीयचरणाम्भोजद्वयैकाश्रयः
श्रीवैखानससूत्रतन्त्रविलसत्तात्पर्यसिद्धिं व्यधात् ॥
प्रतिष्ठोत्सवतत्प्रायश्चित्तार्चनफलात्मकाः ।
पञ्चाधिकाराः प्रोच्यन्ते विविच्य च विशेषतः ॥

स्वामित्वसौशील्यवात्सल्यसौलभ्यज्ञानशक्तिमूर्तिप्राप्त्यादिसर्वगुणपरिपूर्णस्य सर्वोत्तमस्य नित्यप्रधानस्य सर्वफलप्रदायकस्य परस्य ब्रह्मणो लक्ष्मीनारायणस्यार्चनं मम श्रेयस्करमिति सूत्रकारेण स्वार्थं प्रतिष्ठासहितं प्रतिपादितम् । परार्थं चतुर्थप्रश्ने गृहे देवायतने वेत्यनेन सूचितमिति ऋषिप्रश्नपूर्वकं

भृग्वादिभिस्तदर्चनादिकमेव विस्तार्य प्रतिपादितम् । मया तदेतत्सङ्क्षिप्य सुव्यक्तं परानपेक्षप्रमेयतद्ग्रन्थांशं सङ्ग्रहेणोच्यते । तदेतदर्चनस्यामूर्तसमूर्तरूपेण द्वैविध्यमुक्त्वा अमूर्तार्चनं होमः, समूर्तार्चनं प्रतिमाराधनमिति ।

* * * *

**Colophon:**

इति श्रीमत्पेन्मदनृसिंहाचार्यपुत्रेण विरचितायां वैखानससूत्रसम्बन्धिन्यां तत्त्वप्रकाशिकायां प्रतिष्ठाधिकारः ॥

**End:**

सङ्गृहीतो मया धीराः सारज्ञास्त्यक्तमत्सराः ।
इमं ग्रन्थं समालोच्य सन्तुष्यन्तु समन्ततः ॥
न ह्यगाधेषु भृग्वादिग्रन्थेष्वेकं समस्तशः ।
व्याकर्तुं प्रभवत्यस्य त्वत्प्रसादविधेः क्वचित्
यथा ह्यगाधनद्यादौ अपेयमपि पीयते ।
यथातन्त्रं मया पेयमुपात्तं सर्वभागतः ॥
भृग्वाद्यगाधपङ्क्त्यशुद्धकूपादु(पो)द्धृतं मया ।
इदं तद्धाबरूपत्वात्स्वीकुर्वन्तु सुधीजनाः ॥

**Colophon:**

इति श्रीमत्पेन्मदनृसिंहाचार्यपुत्रेण नृसिंहाचार्येण विरचितायां श्रीवैखानससूत्रसम्बन्धिन्यां तत्त्वप्रकाशिकायां फलाधिकारः परिपूर्णः ॥

श्रीमत्पेन्मदनामधेय (. . .) तात्पर्यसिद्धिं व्यधात् ॥

---

R. No **3418.**

Paper. 10⅝ × 9¾ inches. Foll. 64. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nambiyōṭṭan-Baṭṭeripād, Avur-mana, Oorakam post, Cochin State.

**भारतकथा.**

BHĀRATAKATHĀ.

Same work as that described under R. No. 2809 ante, wherein see for the end.

Incomplete.

**Beginning:**

अत्रेरीक्षणशुक्तिमौक्तिकमणेर्देवात्सुधादीधितेः
ताराग्रामभवत्पुरा विबुधबृन्दानन्ददाता बुधः ।

मासान्त्वक्रमनष्टदुष्टमहिलादेहादिलादात्मजो
जातस्तस्य पुरूरवास्सुरवधूनेत्रान्तकान्ताकृतिः ॥

* * * *

तामावसन्नसुरवीरमदापहारिबाहापदानविहतज्वरनिर्जरेन्द्राः ।
धर्माध्वनीनचरिताश्चतुरर्णवान्तविश्रान्तशासनगिरः कुरवो नरेन्द्राः ॥
तत्सन्ततौ शन्तनुनामधेयश्शशास राजा सुचिरं पुरीं ताम् ।
असम्मितैश्वर्यवतो विचित्रं यस्यातपत्रं सितमेकमेव ॥

स च चण्डकरभुजदण्डमण्डनायमानमण्डलाग्रसन्दर्शनसमयसमुज्जृम्भमाणसाध्वसोद्रेकसमुपदिष्टपलायनपरमोपदेशपरिरक्षितगात्रमात्रकृतार्थीकृतानिखिलारातिरवनीपतिः

* * * *

पिपासया प्रेर्यमाणो भागीरथीकूलमाससाद ।
निषेदिवान् क्वापि शिलातलान्ते निषेव्यमाणस्सुरसैस्समीरैः ।
सा तत्र मूर्ता चलदुत्तरीयं(य)प्रकाशितकस्तनु(न)मुद्वहन्ती ॥
अतिष्ठत स्मेरमुखेन्दुरस्मै धनुष्मते पुष्पशरोपमाय ।

---

## R. No. 3419.

Paper. 10⅜ × 9⅜ inches. Foll. 184. Lines, 20 in a page. Dēvanāgarī and Malayalam. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Jñayam-Valiya-Koccunni-Raja Avargal, Cranganore, Cochin State.

Fol. 184 is left blank.

### अष्टाङ्गहृदयव्याख्या.
### AṢṬĀṄGAHṚDAYAVYĀKHYĀ.

Similar to the work described under R. No 3266 ante.

Contains the Adhyāyas 1 to 24 complete and 25th Adhyāya of the Uttarasthāna incomplete.

**Beginning:**

प्रणम्य गुरुपादाब्जमष्टाङ्गहृदये मया ।
उत्तरस्थानमात्रस्य व्याख्या संलिख्यतेऽधुना ॥
अल्पप्रज्ञोऽपि संमोहादर्थरत्नं सुदुर्लभम् ।
गम्भीरे वाहटाम्भोधौ विचेतुं प्रयतेतराम् ॥

कथ्यते मन्दबुद्धीनां सिद्धये प्रागिहान्वयः ।
पश्चात्पदार्थभावार्थौ द्रव्यभाषा च केरली ॥
अनिश्चये निश्चयाय तन्त्रान्तरमपि क्वचित् ।
व्याख्यान्तराभिप्रायश्च सति भेदे तु लिख्यते ॥

कायचिकित्सितादनन्तरं क्रमप्राप्तं बालादिचिकित्सितं विवक्षुरिदानीमुत्तराख्यं स्थानमारभते। तत्र प्रथमं बालचिकित्सायामुत्पन्नस्य प्रतिकारविधानादनुत्पत्तेरेवा(वो)पायका(क)रणं श्रेयस्करमिति बालस्य रोगोद्भवप्रतिषेधविधायकस्य बालोपचरणीयाध्यायस्य पूर्वमारम्भः । अथात इत्यादि । बालस्योपचरणाय वक्ष्यमाणोल्बविशोधनबलातैलपरिषेकाद्युपचाराय हितं बालोपचरणीयं, शेषं पूर्ववत् ।

* * * *

**Colophon :**

इत्युत्तरे प्रथमोऽध्यायः ॥

**End :**

तस्मात्तस्योत्तमाङ्गस्य शिरसः रक्षायां तद्गतरोगप्रशमन इत्यर्थः । आदृतः दत्तावधानः भवेत् । भिषगिति शेषः ॥

**Colophon :**

इत्युत्तरे चतुर्विंशोऽध्यायस्समाप्तः ॥

द्वेधा निजागन्तुतया हि रोगा निजप्रधानाः कथितास्तु पूर्वम् ।
आगन्तुभूयिष्ठमुदार्यतेऽस्मात् सलक्षणं सम्प्रति शल्यतन्त्रम् ॥

पूर्वं निजप्रधानानां रोगाणां निदानचिकित्सितान्युक्त्वा इदानीमूर्ध्वाङ्गचिकित्सिता(त्) शालक्यतन्त्रादनन्तरं निजागन्तुविकारमिश्रं शल्यतन्त्रं ब्रूते । तत्र शल्यतन्त्रे वक्ष्यमाणानां रोगाणां व्रणप्रायत्वात् ।

* * * *

संवृतत्वादिदीर्घकालानुबन्धान्तमेतत् सर्वं दुष्टव्रणाकृति दुष्टव्रणस्य चिह्नं वातादिदोषानपेक्षं सामान्यलि.

---

R. No. **3420.**

*Paper.* 10⅛ × 9⅛ inches. Foll. 15. Lines, 20 in a page. Grantha, Dēvanāgarī and Malayalam. Good.

Transcribed in 1920–21 from a MS. of the Vanamamalai-Maṭham, Vānamāmalai (Nanguneri), Tinnevelly district.

(a) लक्ष्मीमङ्गलदीपिका.

LAKṢMĪMAṄGALADĪPIKĀ.

Foll. 1a—5a. Foll. 5b and 6 are left blank.

Similar to the work described under R. No. 2382 ante. By Vīrarāghava of Vādhūlagōtra.

Complete.

**Beginning:**

ओं नमो भक्तिसाराय व्यवसायात्मने हरेः ।
दैत्यान् प्रच्छन्नदैत्यान् वा शस्त्रैश्शास्त्रैर्विधून्वते ॥
रूपैर्याभ्यामिदं व्याप्तं यौ रक्षणविचक्षणौ ।
ताव(तयोः)ज्ञातप्रसादैका तत्प्रसाद्यः परोऽवताम् ॥

श्रियः पत्नीत्वेन स्वयमनुमतिप्रेरणकृता
कृतारम्भः स्वैरं कृतनिखिललोकोदयलयः
महान् पूर्णो नेता महितमहिमा मङ्गलवपु-
र्जगद्देहस्त्राता जयतु वरदो निस्समगुणः ॥

ईष्टे पत्नीत्ववेषाज्जगत इयमिति प्राहुराचार्यपादाः
तस्मादैश्वर्यमस्यास्त्वकामितृकलितं तादृगेवान्यदस्याम् ।
तेनास्तं स्वामिसाम्यं नियमनविषये भूरिमानैर्विरुद्धं
सैषा श्रीवैभवोक्तिः श्रुतिबलवशतः संश्रयेदान्यपर्यम् ॥

एकश्शा(काशा)न्तेति शास्ति प्रकटमनितरामैश्वरीं विश्वनेतुः
नैतं श्रौतं नियोगं क्वति पतति गिरः स्वाम्यमौचित्यरूपम् ।
गन्धद्वारेति मन्त्रस्स्फुटतरपठितः किं च भूसूक्तमध्ये
तेन क्षोणीश्वरी स्याच्छ्रुतिशिखरगुरुश्चाह तादृक्त्वमस्याः ॥

**End:**

शब्दस्वारस्यबाधां द्वयगुणविहतेस्सम्प्रदायोपरोधात्
अर्थस्वाभाव्यदौस्थ्यादपि परकुहनाकल्पिताः कल्पभेदाः ।
सम्यङ्न्यायादिमूलप्रकटनकलनोद्वेलवातूलजाले
तूलायन्ते यदेतच्छ्रवणमननतः प्राप्तमस्मद्गुरुभ्यः ॥

**Colophon:**

इति श्रीवाधूलवीरराघवकृतिषु लक्ष्मीमङ्गलदीपिका सम्पूर्णा ॥

Transcribed in 1920-21 from a MS. of M.R.Ry. Tippan-Nambādrippād, Ponnūr Kotta-mana, Perumbavur post, Travancore State.

(b) केरलाचारः.

KĒRALĀCĀRAḤ.

Foll. 7a—8a. Fol. 8b gives the name of the owner of the MS.

A brief summary of the 64 peculiar customs, religious and secular enjoined by Śaṅkarācārya to be observed in the Kērala country.

**Beginning:**

चतुष्षष्टिमनाचारान् केरलेषु वदन्ति हि ।
अन्यत्राचरणाभावादनाचारास्त ईरिताः ॥
धर्मशास्त्राणि सकलान्यालोच्य श्रेयसे नृणाम् ।
श्रीशङ्कराचार्यपादश्चक्रे तान् कृपयान्वितः ॥
वर्जयेद्दन्तकाष्ठानि नित्यस्नाने सचेलताम् ।
स्नानवस्त्रेणाङ्गमार्ष्टीं सन्ध्यां प्राङ्मज्जनात्तथा ॥

**End:**

एकयज्ञोपवीती स्याज्ज्येष्ठो भ्राता गृही भवेत्
अन्नश्राद्धं च क्षत्राद्यैः कार्यं मातुलपैतृकम् ॥
दायं तु भागिनेयेषु सन्यासाश्रमवर्जनम् ।
मृते भर्तरि तद्योषित्कुर्यात् सह मृतिं न च ॥

---

Transcribed in 1920-21 from a MS. of the Naduvil-Matham. Trichur, Cochin State

(c) नृसिंहोत्तरतापिनीयदीपिकाश्लोकाः

NṚSIMHŌTTARATĀPINĪYADĪPIKĀŚLŌKĀḤ.

Fol. 9.

A fragmentary portion of some commentary on Śaṅkarānanda's Nṛsimhōttaratāpinīyōpaniṣad-bhāṣyadīpikā which work has been described under No. 588 of the D.C.S. MSS., Vol. I, Part III.

**Beginning:**

उक्ता मयैषोत्तरतापनीयव्याख्याक्षराणां पदवाक्यगानाम् ।
येन प्रसिद्धोपनिषत्पदानां पुरा कृता वेदचतुष्टयेऽपि ॥
प्रायोऽल्पकालो भुवि देहभाजां विद्यार्थिनां बुद्धिविशुद्धिरल्पा ।
तत्रापि केषांचिदनुग्रमित्वं प्रवृत्तिरेषा तदनुग्रहार्थम् ॥
कृता मया वेदचतुष्टयेऽपि प्रसिद्धशाखोपनिषत्पदेषु ।
व्याख्या तया तुष्यतु सर्वजीव आनन्द आत्माद्वय ईश्वरोऽयम् ॥

**End :**

न चात्र सर्वत्र गुणो न दोषो मायामयेऽस्वभ्रममन्तरेण ।
ततो यथा स्याज्जनतोपकार आनन्दबोधेन तथा विधेयम् ॥
अहो कृतार्था वयमात्मबोधं सुदुर्लभं शक्रविरोचनाद्यैः ।
प्राप्ता गुरूणामवलोकनेन वेदान्तवाक्यार्थविशेषकेन ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य श्रीशङ्करानन्दभगवतः कृतावुत्तरतापनीयोपनिषद्दीपिका समाप्ता ॥

---

Transcribed in 1920–21 from a MS. of the Puttil-mana, Tirumalkuda, Cochin State.

(*d*) അജാമിളമോക്ഷം.

AJĀMILAMŌKṢAM.

Foll. 10*a* – 15*b*.

See the Malayalam Part of this Triennial Catalogue.

---

## R. No. 3421.

Paper. $10\frac{3}{4} \times 9\frac{3}{8}$ inches. Foll. 20. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920–21 from a MS. of the Samsthanam Library, Bobbili.

Fol. 20 is left blank.

उत्सवसङ्ग्रहः, आन्ध्रटीकासहितः.

UTSAVASAṄGRAHAḤ : WITH TELUGU COMMENTARY.

Similar to the work described under R. No. 3286 ante.

Incomplete.

**Beginning :**

वैशाखशुद्धद्वितीयायां राम्युत्सवानन्तरं चन्दनलेपोत्सवप्रारम्भः । तद्यथा—विष्वक्सेनपूजा, पुण्याहवाचनं, पुष्पाङ्कुरारोपणम्, इडा[ह]वाचनं, वास्तुपूजा, योगीश्वरपूजा, ब्रह्ममण्डलम्, अधिवासमण्डलम्, अग्निप्रतिष्ठापनम्, अग्नेर्लघुवैष्णवत्वसिद्धिः, अङ्कुरारोपणहोमः ।

* * * *

तृतीयायामरुणोदयकाले चन्दनपात्रस्थापनं, मूलेन प्रोक्षणं, भगवतः षोडशोपचारपूजा, श्रीसूक्तेन भगवतस्सर्वगात्रे श्री चन्दनानुलेपनम् ।

* * * *

**Colophon :**

पाञ्चरात्रे कपिञ्जलसंहितायां देवदीक्षाविधिः समाप्तः ॥

**End :**

एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
वञ्जुला नाम सा ज्ञेया कोटियज्ञफलप्रदा ॥ इति ।

त्रिदिनस्पृग्विषये एकादश्यादित्रिदिनस्पृग्बोधकवचनं यथा वा न सम्भवति, तद्वदष्टम्यादिसम्बन्धबोधकवचनं दशनिर्णयादौ उपात्तं चेत् तत्प्रामाणिकं; नो चेत् अप्रामाणिकमिति प्रतिभाति । तिथिवेधाविषये उत्तर-तिथिवेधा पूर्वतिथौ, पूर्वतिथिवेधा उत्तरतिथौ, इति व्यवस्थापितः न तु विषमवेधाबोधकवचनम्; तस्यामूलकत्वात्, क्रमविरोधात्, परिदृश्यमान-सम्प्रदायविरोधाच्च तदनादरणीयम् ॥

* * * *

प्रणयः कलहः(हश्च) स्याद्युद्धारम्भम(स्त)तः परम् ।
सन्धानमुभयोः कुर्यात् क्षम्यतामिति चोच्चरन् ॥

**Colophon :**

इति सारसमुच्चये ॥

---

### R. No. 3422.

Paper. 10¾ × 9¾ inches. Foll. 110. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. V. N. Nārāyaṇa-Nambūdiri, Vaidyamaṭham, Tritala post, Malabar district.

Foll. 109*b* and 110 are left blank.

सुश्रुतव्याख्या.

SUŚRUTAVYĀKHYĀ.

A commentary on the Suśruta, which work has been described under No. 13101 of the D.C.S. MSS., Vol. XXIII.

Wants the beginning and breaks off in the 46th Adhyāya.

**Beginning :**

उक्तं च विस्तृतस्य च कुर्याद्व्याख्यां वाक्यस्य . . . . शोथहृल्लेश हिक्कुभिः

* * * *

(अथातो वे)दोत्व(त्पत्ति ना)माध्यायं व्याख्यास्यामो यथो(वाच भगवान् धन्वन्तरिः सुश्रुताय)

* * * *

एवं शास्त्रं समासतः परिसमाप्य तत्प्रभावख्यापनार्थमाह— स्वयम्भुवा प्रोक्तमिति । इति हस्माह भगवान् धन्वन्तरिः । एतदतिकान्तापेक्षणं स्तुत्यर्थम् । उक्तं च—

आयुर्वृद्धिं यशो भाग्यं कार्यसिद्धिमविघ्नताम् ।
लभ्यते शास्त्रकर्तॄणामृषीणां बहुसंस्तवात् ॥

**Colophon:**

इति प्रथमोऽध्यायस्समाप्तः ॥

**End:**

एतावत् षाडवपानकयोरन्तरमिति । एषामपि द्रवद्रव्यत्वादिहोपदेश इति ॥

**Colophon:**

इति पञ्चचत्वारिंशोऽध्यायस्समाप्तः ॥

अथातोऽन्नपानविधिमिति । पेयद्रव्यप्रसङ्गादन्नपानविध्यारम्भः सम्बन्धः । द्रव्यरसवीर्यविपाकनिमित्ताः क्षयस्थानप्रकोपाः दोषाणां यस्मात् भवति तस्मात् द्रव्याण्युपदेशतोऽन्नपानविधिमुपदिशतु ।

* * * *

सृष्टिः सर्गः सृष्टमित्यनर्थान्तरम् । विगतं सृष्टं ययोस्तौ विसृष्टौ, बद्धपुरीषावित्यर्थः । मूत्रापेक्षं वा विसृष्टत्वम् । उक्तं च भोजे ।

---

## R. No. 3423.

Paper. 10⅜ × 9⅜ inches. Foll. 178. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS., of M.R.Ry. Vīrabhadramiśra-Gāru, Bodagoda, Ganjam district.

### कालसर्वस्वम्.

### KĀLASARVASVAM.

Foll. 1*a*—173*a*. Fol. 173*b* contains the name of the owner of the MS. Fol. 174 is left blank. Foll. 175—178 give the contents of this work.

Similar to the work described under No. 3108 of the D.C.S. MSS., Vol. VI. By Kṛṣṇamiśra of Kautsa family and who, in the beginning of the work, salutes Rāma and Siddhēśa.

Apparently complete.

**Beginning:**

सग्रहणं पश्चाङ्गं स्फुटमभिधायाथ रामसिद्धेशौ ।
नत्वा कृष्णसुधीशः कुरुते सत्कालसर्वस्वम् ॥

ननु कालनिर्णयार्थं चेदयं ग्रन्थ आरभ्यते तर्हि वृथा कालस्य प्रत्यक्षाद्यगम्यत्वेनाप्रमाणत्वात् । अत एव कपिलमुनिः प्रकृत्यादीनि पञ्चविंशतितत्त्वान्युक्त्वा तमुपेक्षितवान् । अथ यदि प्रसिद्धस्तर्हीश्वरात्मक एव सः । शिरोमण्यादिमहातार्किकैः तथा निर्वचनात् ।

अनादिरेष भगवान् कालोऽनन्तोऽपरः परः । इति कौर्माच्च; नैवम्—षष्ठद्रव्यत्वेन कणादमुन्युक्तत्वात् । भूतानामन्तकृत्कालः कालोऽन्यः कलनात्मकः—इति वचनाच्च ।

* * * *

**Colophon:**

इति कालसर्वस्वे तन्त्य(?) योगादिस्मार्तानुष्ठानप्रकरणं समाप्तम् ॥

**End:**

इत्थं सनकश्रीरामतारकवैष्णवानामाचारस्सङ्क्षेपाद्वर्णितः ।
स्मार्ताचारस्थितिं किंचिदतिदिश्येह वैष्णवे ।
वैष्णवस्यं तथा स्मार्तं यत्प्रोक्तं विस्तरान्मया ॥
षोडशानां तिथीनां च द्वैधेऽनुष्ठाननिर्णयः ।
स्मार्तवैष्णवयोः प्रोक्तः स योगो लाघवान्मया ॥

**Colophon:**

इति श्रीमत्कौत्सकुलकैरवशरन्निशाकरन्यायवैशेषिकशेषभाष्यादिशास्त्राकूपारपारङ्गमसाहित्यसङ्गीतज्योतिश्च . . . . . सर्वङ्कषमहामहोपाध्यायकविकोविदकृष्णमिश्रकृतौ कालसर्वस्वे वैष्णवप्रकरणं समाप्तम् ॥

---

**R. No. 3424.**

Paper. $10\frac{3}{8} \times 9\frac{1}{4}$ inches. Foll. 20. Lines, 20 in a page. Grantha and Malayalam. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Harikṛṣṇarājaguru, Gaṅgapuraśāsanam, Dharakota, Ganjam district

(a) नृसिंहशतकम्.

NṚSIMHAŚATAKAM.

A eulogy in 100 stanzas addressed to God Nṛsimha, the man-lion incarnation of Lord Viṣṇu: by Gaṅgādhara of Kutsa family.

Complete.

**Beginning:**

चण्डब्रह्माण्डभाण्डभ्रमणभरबृहद्दोषनिर्घातदैर्घ्यैः
दुर्दैत्यव्याघ्रशीघ्रप्रथम(मथ)नकथनं सर्वदिक्षु प्रकुर्वन् ।
कौटिल्यक्रूरदंष्ट्रोत्कटचटुलनटत्प्रह्वजिह्वामहोल्कः
प्रह्लादाह्लादहेतुर्दहतु मम महद्वंहसांहो नृसिंहः ॥
नैष्ठुर्यौजस्विचण्डत्रिदशगिरिमहादण्डसन्ताड्यमान-
ब्रह्माण्डातोद्यभाण्डोड्डमररवसुहृद्भावसम्भावनीयः ।
रुष्टेन्द्रद्वेष्टृमुष्टिद्रुघणहतसभामण्डपस्तम्भगर्भा-
दाविर्भूतो विभूत्यै भवतु नरहरेरादिघोषो विशेषात् ॥

**End:**

क्षिप्रं सर्पापसर्प व्र(प्र)जवनगज ते विद्रव्यं(व)च्छिद्रदेशा-
दद्रेर्निर्गच्छ तुच्छद्रविणमहिमदादच्छभल्ल प्रगच्छ ।
मा सिंहत्रासरंहः शरभ सर भयं याहि शार्दूल दूरा-
दाहा जिह्वाचलं नश्चपलयति पतश्चित्रपञ्चास्यमूर्तेः ॥
कश्चित्कौत्सववंशकैरववनीप्राकाशराकापतिः
कृत्वा मर्त्यहरेरमर्त्यकलितां श्लोकैश्शतैर्मौक्तिकैः ।
मालां दूषणदूरणाय गुणवद्विद्वानशाणार्चितां
सत्कण्ठार्पणतो जगाम परमानन्दं स गङ्गाधरः ॥

**Colophon:**

श्रीनृसिंहशतकाख्यं खण्डकाव्यं समाप्तम् ॥
इति श्रीनृसिंहशतकं समाप्तम् ॥

---

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa-Nambudirippād, Kūṭalūr-mana, Nareri, Tritala, Malabar district.

(b) ധര്‍മ്മശാസ്ത്രം.

DHARMAŚĀSTRAM.

Foll. 13a—29a. Fol. 20b is left blank.
See the Malayalam part of this Triennial Catalogue.
Incomplete.

---

R. No. 3425.

Paper. 10¾ × 9¾ inches. Foll. 62. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Śrīnārāyaṇa-Rāmavarma-Valiyarāja of Cranganore, Cochin State.

Foll. 5b, 47b, 48, 61b and 62 are left blank.

भारतकथा

BHĀRATAKATHĀ.

Similar to the work described under R. No. 2809 ante.

The author, whose name is not given, says that he was a pupil of Kṛṣṇa and wrote this work at the instance of king Datta-Nārāyaṇa. The author was the son of Datta.

The stanzas herein are so composed as to be sung in different tunes.

Complete.

**Beginning :**

सकलगुणसदन जय हिमदुहितृतनय
जय मदकलभ(व)दन जय जय हरदेव ।
विघ्नहर नित्यमपि वृन्दारकेन्द्रमुनि-
वन्द्याङ्घ्रिपद्म जय जय हर जय देव ॥

* * *

वन्दे वृन्दारकाणामपि वत निकुरुम्बैरलं स्तूयमानं
विद्यासारान्मनोलम्बकपरमगुरोः कृष्णनाम्नः कटाक्षात् ।
इत्थं श्रीदत्तनारायणध(र)णिपतेराज्ञया प्राज्ञकीर्तेः
मोदा(द्यो द)त्तस्यात्मजन्म प्रथयति च कथ भारताख्यां च किंचित् ॥
तस्मादत्यन्तमत्र प्रमुदितहृदयास्सन्तु सन्तो महान्तः
वेदव्यासोऽम्बिकायां सुतमथ धृतराष्ट्राख्यमुत्पाद्य बालम् ।
भूयोऽप्यम्बालिकायामजनयदखिलानन्द(नं) नन्दनं तं
पाण्डुं माण्डव्यशापोपहतमपि यमं क्षत्तृसंज्ञं च दास्याम् ॥

**End :**

श्रीमद्गोवर्धनाख्ये महितपुरवरे सन्निषण्णस्य विष्णो-
रन्तर्मे सन्ततं वात्व(पात्वय) पुरु कृपया हन्त कारुण्यसिन्धोः ।

कृष्णादीनां गुरूणामपि च नरपतेः [श्री]दत्तनारायणस्य
आज्ञाशक्त्यापि चैवं रचितमिह मया पाण्डवानां चरित्रम् ॥
इति अभिषेकं(कः) समाप्तम्(ः) ॥

* * * *

धूलीधूसरकुन्तलं तिलकभङ्ग्यातीव भान्तं करा-
न्तोद्यद्वेत्रविषाणवेणुकबलं कालाम्बुदश्यामलम् ।
गोपालार्भकसंवृतं विलसितं काञ्च्या रणत्किङ्किणी-
पालीकान्तमुदारगोपशिशुकं वन्दे परं दैवतम् ॥

**Colophon :**

इति भारतकथा समाप्ता ॥

---

## R. No. 3426.

Paper. $10\frac{5}{8} \times 9\frac{5}{8}$ inches. Foll. 80. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Dāmera Cinna-Bucci-Veṅkaṭa Rao Garu, Pattam.

### सिद्धान्तदीपिका.
### SIDDHĀNTADĪPIKĀ.

A treatise on Advaita-Vēdānta dealing with the following subjects: by Bhavānīśaṅkara, disciple of Raghunāthayatīndra :—

१. नैयायिकवैशेषिकासिद्धान्तभङ्गः.
२. कपिलादिसिद्धान्तभङ्गः.
३. जैमिनीयसिद्धान्तभङ्गः.
४. प्रापञ्चिकपञ्चविधभेदतत्त्वादि - मुखभङ्गः.
५. अविद्यासहकृतस्वतन्त्रब्रह्माद्वैत - वादिमतभङ्गः.
६. वेदान्तसिद्धान्तरहस्यम्.

Complete.

**Beginning :**

रघुनाथयतीन्द्रस्य गुरोश्चरणपङ्कजम् ।
नमाम्यहं सदा भक्त्या भवानीशङ्करोऽन्वहम् ।

इह खलु धर्मार्थकाममोक्षचतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः । न स पुनरावर्तत इत्यादिश्रुतेः, यद्गत्वा न निवर्तन्ते तद्धाम परमं ममे-त्यादि भगवता गीतत्वाच्च । इतरेषां त्रयाणामाविद्यकत्वमेव ।

* * * *

गौतमकणादप्रभृतिभिर्वैदिकैर्दार्शनिकैरङ्गीकृत्य मोक्षप्राप्तये स्वस्वबुद्ध्यनुसारेण जडचेतनद्वारा जीवेश्वरस्वरूपबन्धमोक्षव्यवस्था प्रतिपादिता । अमीषां वादिनां मते जडचेतनविभागः, जीवेश्वरस्वरूपनिर्णयः, बन्धमोक्षव्यवस्था च नोपपद्यत इति तन्निराकरणपूर्वकं स्वतन्त्रमहाद्वैतवादे सर्वमिदं सङ्गच्छत इति अत्रैव निपुणतरमुपपाद्यते । तथा हि—गौतमीयास्तु प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसाधिगम इति वदन्ति ।

* * * *

**Colophon :**

इति सिद्धान्तदीपिकायां नैयायिकवैशेषिकसिद्धान्तभङ्गो नाम प्रथमः परिच्छेदः ॥

**End :**

सत्त्वं त्वत्त्वं महत्त्वं तव परमगुरोरादिशक्तिः पराथाः
पिण्डीकृत्य प्रकृत्या प्रथमरतिर्वीति (?)र्व्योमकालाङ्कवह्निः ।
भूत्वा संसारसृष्टिस्थितिलयनिलयाबादितोयार्णवान्तं
तन्वानो निर्ममेच्छस्त्वमिह विजयसे विष्णुमायावि(भि)भूतः ॥

इत्युक्तत्वादिति ॥

**Colophon :**

इति श्रीप्रकाशविमर्शसामरस्यलक्षणाखण्डानन्दभरितश्रीरघुनाथसरस्वतीयतीन्द्राख्यगुरुचरणकटाक्षलब्धमहाविद्येन श्रीभवानीशङ्करानन्दनाथेन विरचितायां कृतौ वेदान्तसिद्धान्तरहस्यनिरूपणं नाम षष्ठः परिच्छेदः ॥

---

R. No. 3427.

Paper. 10⅝ × 9¼ inches. Foll. 60. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippād, Kūṭalūr-mana, Narori, Tritala, Malabar district.

Fol. 7*a* is left blank.

श्लोकसङ्ग्रहः.

ŚLOKASAṄGRAHAḤ.

A collection of certain select stanzas taken from certain standard works, such as the Śiśupālavadha, Kumārasambhava, Mēghasandēśa, Śākuntala, Mahāvīracarita, Uttararāmacarita, Anargharāghava, etc.

Incomplete.

**Beginning:**

साधुहिता नियतं ते ये कर्तुं जगति पण्डिता हि यतन्ते ।
सा तेनाक्रमितारं मृतमप्यन्वेति धाङ्गना क्रमितारम् ॥
विफलेहानामनृणां जातिमकृत्वा पितामहानामनृणाम् ।
सुमनस्सेवनमन्तर्गत्वा बहुमन्यते रसेव नमन्तः ॥

* * * *

क्षतात्किल त्रायत इत्युदग्रः (. . .) पिण्डेष्वनास्था खलु भौतिकेषु ॥
असम्भृतं मण्डनमङ्गयष्टेः (. . .) बाल्यात्परं साधु वयः प्रपेदे ॥

* * * *

विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा ।
अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते ॥

* * * *

**End:**

अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ॥

* * * *

कः खल्वनुन्मत्तोऽन्यप्रस्तावेऽन्यदभिदध्यात् । यस्य न सविधे दयितेत्यादि.

---

### R. No. 3428.

Paper. 10⅝ × 9⅝ inches. Foll. 105. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippād, Kūṭalūr-mana, Nareri, Tritala, Malabar district.

(a) आत्मज्ञानोपदेशविधिः.

ĀTMAJÑĀNŌPADĒŚAVIDHIḤ.

Foll. 1a—4a.

Same work as that described under R. No. 2946(a) ante.

Complete.

---

(b) आत्मज्ञानोपदेशविवरणम्.

ĀTMAJÑĀNŌPADĒŚAVIVARAṆAM.

Foll. 4b—21a.

A commentary on the Ātmajñānōpadēśa, described under subdivision (a) of the same number: by Anantarāmabhagavat, disciple of Kṛṣṇarāmapūjyapāda.

Complete.

**Beginning:**

जगदुदयस्थितिसंहतिमूल विपुलचिदेकरसं निरवद्यम् ।
प्रणतजनार्तिहरं हरिमीशं हृदयनिवासमहं प्रणतोऽस्मि ॥

आत्मज्ञानप्रकरणं विषमार्थं क्वचित्क्वचित् ।
तस्य सङ्क्षेपतो व्याख्या क्रियते सम्प्रदायतः ॥

अथ यदसन्दिग्धमविपर्यस्तमहं कर्ता भोक्ता प्रमातेत्येवमाद्यनेकार्थकलुषितं व्यावहारिकं रूपमपरोक्षतया सर्वप्राणिनां प्रसिद्धतरं यद्यपि न तत्प्रेक्षावन्निरूपणगोचरः; तथापि यदस्य निर्मृष्टनिखिलकर्तृत्वादिक्लेशानुषङ्गनिरतिशयानन्दसन्दोहमशेषलौकिकप्रमाणव्यवहारातीतमुपनिषद्भिरेवातद्व्यावृत्त्या प्रतिपाद्यमानमात्मप्रकाशं कापिकरूपं तदनवसितमिति तत्प्रतिपादनाय परमकृपामूर्तिना भगवता भाष्यकारेण

* * * *

आत्मज्ञानाख्यप्रकरणं प्रणीतम् । तत्र प्रथमं देहादीनामनात्मत्वं प्रतिपाद्यते, तदनन्तरमात्मनः कूटस्थचिन्मात्रत्वं, तदनन्तरमात्मन्यवस्थात्रयप्रतिभासस्याविद्यानिमित्तत्वं, तदनन्तरमात्मन्यवस्थात्रयविनिर्मुक्ताद्वितीयप्रत्यग्रूपविज्ञानघनत्वमिति । तत्रापिशब्देनाविघ्नग्रन्थपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च मङ्गलाचरणं करोति । प्रसिद्धं हि मङ्गलत्वमथशब्दस्य ।

* * * *

यद्येवं देहादिष्वनात्मस्वात्मत्वाशङ्का कुत इति चेदिति परिहरति—द्रष्टुर्दृश्य" विवेकाभावादिति । द्रष्टुः स्वरूपापरिज्ञाननिबन्धनेनेत्यर्थः ॥

**Colophon:**

आत्मज्ञानविवरणे प्रथमः खण्डः ॥

**End:**

एवं वेदान्तानुशासनमिति । तदिदमप्येतर्हि य एवं वेद, अहं ब्रह्मास्मीति स इदं सर्वं भवतीति तमेवं विद्वानमृत इह भवति नान्यः

पन्था विद्यतेऽयनायेत्यादिवेदान्तानुशासनं प्रमाणमित्यर्थः । वेदान्तानुशासनं वेदान्तानुशासनमिति पदाभ्यासः प्रकरणपरिसमाप्तिं द्योतयति ॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजककृष्णरामपूज्यपादशिष्य (अन्तरारामभगवता) विरचितायामात्मज्ञानटीकायां चतुर्थः खण्डः ॥

Foll. 21*b*—25*b* give the Saṅgītaviṣaya.

---

(*c*) स्वात्मयोगप्रदीपः, सव्याख्यः.

SVĀTMAYŌGAPRADĪPAḤ WITH COMMENTARY.

Foll. 26*a*—99*a*.

A treatise on the Advaita-Vēdānta. It is followed by a commentary by Amarānanda, son of Kumāra and disciple of Nirupamabōdha who was himself the discible of one Amarānandayōgīndra.

Deals with the following Prakaraṇas :—

१. सद्विंशतिका.
२. चिद्विंशतिका.
३. आनन्दविंशतिका.
४. महावाक्यार्थविंशतिका.
५. देवताविंशतिका.
६. योगविंशतिका.

This commentary is called Prabōdhinī.

Complete.

**Beginning :**

नमस्याम्यमरानन्दयोगीन्द्रं परमं गुरुम् ।
यन्नामधारिणं मामप्याहुर्योगीश्वरं जनाः ॥
वरं गुरुं चानुपमसुखरूपं यतीश्वरम् ।
नमामि नाम्ना योऽर्थाच्च जगदाराध्यतां गतं(तः) ॥
गुरुं च श्रीनिरुपमबोधविश्वेश्वरं अये ।
यत्कटाक्षेक्षणादासं स्वात्मयोगप्रदीपवत् ॥
श्रीरङ्गनाथविश्वेशप्रत्यगात्मैक्यदर्शके ।
स्वात्मयोगप्रदीपे स्वे व्याख्यां कुर्वे प्रबोधिनीम् ॥

अथ योगीश्वरो वेदान्तसारसङ्ग्रहभूतं स्वात्मयोगप्रदीपाख्यं प्रकरणं प्रारभमाणश्श्रोतृजनमनस्समाधानार्थं स्वग्रन्थप्रतिपाद्यं स्वगुरुदेवतात्मकं वस्तु सङ्क्षेपेण निर्दिश (विनिर्दिश)न् तन्नमस्काररूपमङ्गलाचरणं प्रारिप्सिताविघ्नपरिसमाप्तिप्रचयगमनफलकं शिष्टाचारसिद्धं वाक्येनादौ निबध्नाति शिष्यशिक्षार्थे—

(मू.)—

स्फुरितसकलजन्मस्थानभा(हा)नैक्य(नेति)लीलं
श्रुतिभिरतदुदासाह्लक्षितं स्वप्रकाशम् ।
सदमलसुखतान्द्रं प्रत्यगात्मानमेकं
गुरुनिरुपमबोधं विश्वनाथं नतोऽस्मि ॥

सकलस्य जगतो जन्म च (स्थानं) स्थितिश्च(हानं) स्वकारणैरेकीभावलक्षणो लयश्चैषां प्रकाशनं चेत्येवमादिव्यापाररूपा लीला स्वप्रयोजनानुद्देशन् स्वतन्त्रचेष्टा यस्मिन् मायाविन इवेन्द्रजालसृष्ट्यादिका समुल्लसिता तथोक्तम् ।

* * * *

**Colophon:**

इति स्वात्मयोगप्रदीपबोधिन्यां सद्दिश(ति)काप्रकरणं प्रथमं समाप्तम् ॥

**End:**

योगी व्याख्यन्निरुपमबोधशिष्यः कुमारजः ।
स्वात्मयोगप्रदीपे स्वे षष्ठीं श्रीयोगविंशिकाम् ॥
सच्चिदानन्दवाक्यार्थदेवतायोगविंशिका ।
प्रबोधितः स्वात्मयोगप्रदीपस्स्वात्मदृष्टये ॥
श्रुतिस्मृतीतिहासादिवाक्यान्यत्रा(न्येता)न्यदद्दिशम् ।
व्याख्येयमूलभूतानि विद्वत्प्रत्ययसिद्धये ॥

इति श्रीमन्निरुपमबोधनाम्ने स्वतेजसे अनन्तसच्चिदानन्द(न्द)रूपपरमात्मने इति समाप्तम् ॥

**Colophon:**

इति श्रीमन्निरुपमबोधशिष्यस्यामरानन्दयोगीश्वरस्य कृतौ स्वात्मयोगप्रदीपप्रबोधिन्यां षष्ठी योगविंशिका समाप्ता ॥

Foll. 101*a*, 102*a*, 103*a*, 104 and 105*a* contain the portions of Svātmajñānavivaraṇa. Foll. 26*b*, 99*b*, 100, 102*b*, 103*b* and 105*b* are left blank.

R. No. 3429.

Paper. 10¾ × 9¾ inches. Foll. 76. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Valiyarāja of Kottakal, Malabar district.

Foll. 75 and 76 are left blank.

कादम्बरीटिप्पणी.

KĀDAMBARĪṬIPPAṆĪ.

A short commentary on Bhaṭṭabāṇa's Kādambarī, which work has been described under No. 12382 of the D.C.S. MSS., Vol. XXI.

Complete.

**Beginning:**

प्रणम्य वरदं देवं वल्लवीजनवल्लभम् ।
कादम्बरीपदार्थानां क्रियते टिप्पणं मया ॥

कादम्बरीकथामारिप्सुना भट्टबाणेन प्रथममिष्टदेवतानमस्कारः क्रियते—रजोजुष इत्यादिना श्लोकत्रयेण । प्रथमं ब्रह्मणे नमः । अज इति । जननपरिणामनिधनरहितं परं ब्रह्मोच्यते । त्रिगुणात्मने जगत्सिसृक्षया गृहीतसत्त्वरजस्तमोरूपाय प्रजानां सृष्टिविधौ रजोजुषे रजोगुणं सेवमानाय चतुर्मुखरूपायेत्यर्थः ।

* * * *

आसीदित्यादि । अशेषनरपतिशिरस्समभ्यर्चितशासनः शासनं लेख्यं, शासनं निग्रहे लेख्ये—इति वै(वैजयन्ती) । प्रतापानुरागावनतं प्रतापेनानुरागेण चावनतम् ।

* * * *

तदसम्भाव्यं तन्मरणं मे न सम्भवेदित्यर्थः ॥

**Colophon:**

इति कादम्बरीपूर्वस्य व्याख्या समाप्ता ॥

**End:**

नैगमजनः नगरवासी जनः; निगमो निश्चये वेदे पुरे वणिक्पथे इति वै । रमणीयता रम्यता । महिमा विभवस्य महत्त्वम् । आनन्दस्य परां कोटिं प्रकर्षमगमन् । इतिशब्दस्समाप्तिवाचकः; इति हेतुप्रकरणप्रकारादिसमाप्तिषु—इत्यमरसिंहः ॥

**Colophon:**

इति कादम्बरीव्याख्या समाप्ता ॥

R. No. 3430.

Paper. 10⅜ × 9⅝ inches. Foll. 42. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippād, Kūṭalūr-mana, Narori, Tritala, Malabar district.

(a) तरुणभारतम्.

TARUṆABHĀRATAM.

A short poem in 64 stanzas, narrating the main story of the Mahābhārata.

Complete.

**Beginning:**

ये जातास्सोमवंशे कृतजतुभवनैर्धार्तराष्ट्रैर्निरुद्धा
हत्वा रक्षो हिडिम्ब(ाभिध)मपि च हठाद्द्रौपदीमुद्वहन्तः ।
इन्द्रप्रस्थं प्रपन्नास्समयहनन(त)स्तीर्थगप्राप्तदार-
श्वेताश्वा दिग्जयेनाहृतमहितधना राजसूयं च कृत्वा ॥

द्यूते त्यक्त्वाथ राज्यं सकलमथ वने द्वादशाब्दानुषित्वा
गूढं मात्स्यालयस्था यदुवरविहितां सन्धिमप्राप्नुवन्तः ।
सप्ताक्षौहिण्युपेता युधि समधिगतैकादशाक्षौहिणीकान्
भीष्मादीनाशु हत्वा समधिगतधराः पाण्डवास्ते जयन्ति ॥

राजाभूत्सोमवंशे सहजयुगयुतः पाण्डुरित्यस्य जाये
कुन्ती माद्री च सोऽगाद्वनमथ शरविद्धैण(रूप)र्षियुग्मात् ।
शापं प्राप्यानपत्योऽलभत मुनिवरप्राप्तमन्त्रस्वकान्ता-
सम्यक्पूजाप्रसीदद्यममरुदमरेशाश्विनः पञ्च पुत्रान् ॥

**End:**

दृष्ट्वासौ तत्र दुर्योधनमतिकुपितो देवदूतेन गच्छन्
सोदर्याणां समीपं श्रुतविविधवचा वैतरण्यास्समीपे ।
स्वं स्वं स्थानं गतान् प्रेक्ष्य च पुनरनुजान् धर्मवाक्याद् धुनद्यां
स्नात्वा दिव्याकृतिस्सन् सह सुरनिवहैर्मोदमानो न्यवात्सीत् ॥

* * * *

चतुष्षष्ट्या श्लोकैरिति विरचितं पार्थचरितं
पवित्रं पापघ्नं पठति मनुजो यस्त्वनुदिनम् ।

सुधर्मिष्ठां बुद्धिं रिपुविनशनं चारुकवितां
श्रियं कीर्तिं स्वर्गं झटिति लभते मुक्तिमपि च ॥

**Colophon:**

तरुणभारतं समाप्तम् ॥

---

(b) सङ्क्षेपरामायणम्.

SANKṢEPARĀMĀYAṆAM.

Foll. 9a—12b.

A brief narration of the story of the Rāmāyaṇa.

Complete.

**Beginning:**

यो जज्ञे सूर्यवंशे दशरथतनयो योऽप्युपा(यं)स्त सीतां
योपा(वा त)त्याज राज्यं वनभुवि सचरान् यश्च जघ्ने खरादीन् ।
योऽलावीद्वालिनं द्राङ्महति जलनिधौ यश्च सेतुं व्यतानीत्
यो युद्धे सानुबन्धं दशमुखमवधीत् सोऽवताद्राघवो वः ॥
राजाभूत्सूर्यवंशे दशरथ इति तस्याभवन्धर्मपत्न्यः
तिस्रोऽपुत्री निशम्य स्वतनयजननोपायमाप्तात्सुमन्त्रात् ।
आनाय्याथर्श्यशृङ्गं तदु(दनु)वचनतस्तस्य कृत्वाश्वमेधं
पुत्रीयामिष्टिमाचात्रिदशपतिसखस्तोषयामास देवान् ॥

**End:**

यद्वागुज्ज्वलशिल्पबन्धविमलोद्दामा गुणैरन्विता
रम्याप्तेश्वरशुद्धभावविमलो यो यन्मनोऽचिन्तिते ।
चन्द्रेणा(ना)नलराजर(द)क्षितिकृते क्षोणिं विनीतं भृशं
शम्भौ सोऽयमुदाररामचरितं तारं वितेने कृशः ॥
यो भूत्वा सूर्यवंशे कुशिकसुतमखं पालयित्वा गृहीत्वा
सीतां त्यक्ताभिषेको विपिनमुपगतो भ्रातृहापेतसीतः ।
कृत्वा सुग्रीवसख्यं हतकपिरुदधौ सेतुमाबध्य हत्वा
पौलस्त्यं प्राप्य सीतां पुरमगमदमुं सानुजं राममीडे ॥

**Colophon:**

सङ्क्षेपरामायणं समाप्तम् ॥

(c) पुरुषार्थदशकम्.

PURUṢĀRTHADAŚAKAM.

Foll. 13a—14a. Fol. 14b is left blank.

Ten Stanzas inculcating on the mind the unreality of the phenominal universe and the necessity of contemplating upon the Supreme Brahman. by Bhartṛhari.

Wants the beginning.

**Beginning:**

तस्मादनन्तमजरं परमं विकासि
तच्चित्त चिन्तय किमेभिरसद्विकल्पैः ।
यस्यानुषङ्गिण इमे भुवनाधिपत्य-
भोगादयः कृपणलोकमता भवन्ति ॥

**End:**

मातर्मेदिनि तात मारुत सखे तेजस्सुबन्धो जल
भ्रातर्व्योम निबद्ध एष भवतामन्त्यः प्रणामाञ्जलिः ।
युष्मत्सङ्गवशोपजातसुकृतोद्रेकस्फुरन्निर्मलं
ज्ञानोपाससमस्तमोहमहिमा लीये परब्रह्मणि ॥

**Colophon:**

इति पुरुषार्थप्रकरणम् ॥
इत्याचार्यभर्तृहरिप्रणीतं पुरुषार्थदशकं समाप्तम् ॥

---

Transcribed in 1920-21 from a MS. of the Naḍuvil-maṭham, Trichur, Cochin State.

(d) रहस्यगोपालमन्त्रचिन्तामणिः.

RAHASYAGŌPĀLAMANTRACINTĀMAṆIḤ.

Foll. 15a—41a. Foll. 41b and 42 are left blank.

On the procedure to be adopted in reciting the Mantra-formula addressed to God Gōpāla; by Vāsudēva, who, in the beginning of the work, praises Kṛṣṇalīlāśuka, Bhavatrāta, Rāghavānanda, Mādhava, Śaṅkarācārya, and Nārāyaṇācārya.

Complete.

**Beginning:**

श्रियं पुष्णन्तु मे वाचां श्रीगणेशाङ्घ्रिरेणवः ।
हेतवः पुरुषार्थानां सेतवो विघ्नवारिधेः ॥

जटाकलितबालेन्दुस्यन्दमानामृताप्लुतम् ।
जनिमृत्युहरं वन्दे जगत्कारणमीश्वरम् ॥

* * * *

श्रीगुरूणां शिवाद्यानां प्रणौमि चरणावलिम् ।
यत्प्रसादादिदं विश्वमविश्वास्यमभन्मम ॥
कृष्णलीलाशुकश्रीमच्चरणाम्भोजनिस्सृताम् ।
यतीन्द्रमधुपव्रातवेष्टितां धूलिमाश्रये ॥
भक्तत्रातगुरोः पादनव(ख)चन्द्रान् प्रणौम्यहम् ।
येषां प्रसादतः कार्ष्णी ज्योत्स्ना भुवि विराजते ॥
नमः श्रीराघवानन्दसूरिपादाय नित्यशः ।
भक्तानामाशयध्वान्तसंभेदनपटीयसे ॥
तस्यै श्रीमाधवीयाङ्घ्रिनखरत्नत्विषे नमः ।
या दर्शयति भक्तानामन्तः कार्ष्णां तनुं सदा ॥
श्रीमच्छङ्करपादाब्जयुगलोत्थान् रजःकणान् ।
भक्तान्तरतमःपङ्कशोषणान् प्रणमाम्यहम् ॥
श्रीमन्नारायणाचार्यपादपङ्केरुहोत्थितान् ।
वहामि शिरसा पांसूनज्ञानोच्चाटनौषधान् ॥
श्रीमद्रहस्यगोपालमन्त्रचिन्तामणेर्विधिः ।
कथ्यते वासुदेवेन सम्प्रदायक्रमागतः ॥
यद्यप्यनेन महतां काचिन्नोपकृतिर्भवेत् ।
तथापि मन्दबुद्धीनां गुरूक्तापि स्मृतिः फलम् ॥
स्नातो निर्मलसूक्ष्मशुद्धवसनो धौताङ्घ्रिपाण्याननः
स्वाचान्तस्सपवित्रमुद्रितकरः श्वेतोर्ध्वपुण्ड्रोज्ज्वलः ।
प्राचीदिग्वदनो निबध्य सुदृढं पद्मासनं स्वस्तिकम्
आसीनः स्वगुरून् गणाधिपमथो वन्देत बद्धाञ्जलिः ॥

* * * *

श्रीगोपालकमन्त्रस्य श्रीनारद ऋषिस्स्मृतः ।
गायत्री छन्द इत्युक्तं श्रीकृष्णो देवता मतः ॥

**End:**

हालाहलाभिषमिदं सुखचित्सुधाब्धेः
संभूतमात्मन उदारतमोऽनुषङ्गात् ।

संसारदुःखमखिलं सकलेश्वरो नः
(संहत्य) साधयतु सौख्यमखण्डबोधात् ॥
एतन्मनोरमिततेजस आनिपातं
गोपालकस्य वरवर्णसुधार्णवोत्थम् ।
यस्स्तोत्रमौक्तिकमनन्यरतिर्दधाति
कण्ठे स याति सकलेश्वरसामरस्यम ॥

**Colophon:**

श्रीरहस्ये षष्ठः पटलः ॥

The scribe adds—

अमृतपुरपुराख्यो वासुदेवाभिधानो
गुरुगुरुकरुणाया भाजनत्वं प्रपन्नः ।
अरचयदतिगुह्यं गुह्यगोपालकल्पं
कलिकलितमतीनां भुक्तिदं मुक्तिदं च ॥

अथ चक्रन्यासं कुर्यात् ॥

---

R. No. 3431.

Paper. $10\frac{3}{4} \times 9\frac{3}{8}$ inches. Foll. 42. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Dhanyamrāju Sūryabhagavānuḍu Pantulugāru of Vizianagram, Vizagapatam district.

नित्योत्सवनिबन्धः.

NITYŌTSAVANIBANDHAḤ.

Same work as that described under No. 5668 of the D.C.S. MSS., Vol. XII, and R. No. 2462 ante, wherein see for the beginning. By Umānandanātha, disciple of Bhāsurānandanātha.

Contains the Ullāsas four to six complete and the seventh incomplete:

| | |
|---|---|
| ४. प्रौढोल्लास. | ६. उन्मनोल्लास. |
| ५. तदन्तोल्लास. | ७. अनवस्थोल्लास. |

**End:**

पूर्णमनोरथैस्सुखी विहरेदेतदेव विश्रान्तिमभिलषतोऽप्ययमेवोपास्तिक्रम इति शिवम् ॥

**Colophon :**

इति श्रीमद्भासुरानन्दनाथचरणारविन्दमिलिन्दायमानमानसेनोमानन्दनाथ-(थेन) निर्मितेऽभिनवे कल्पसूत्रानुसारिणि नित्योत्सवे निबन्धे पराक्रमनिरूपणं नामोन्मनोल्लासष्षष्ठस्सम्पूर्णः ॥

नत्वा श्रीभासुरानन्दनाथपादाम्बुजद्वयम् ।
नन्दत्युमानन्दनाथोऽनवस्थोल्लासकल्पनात् ॥
साधारणो यत्र सर्वोपास्यानां क्रम ईरितः ।
आरम्भोल्लासनीतौ स्यादिह दीक्षा पृथक् पृथक् ॥

* * * *

तल्लब्धं षट्त्रिंशति(त्) सङ्ख्यया भक्तश्चेच्छिष्टः गतसंवत्सरो भवति । तल्लब्धं षट्त्रिंशति(त्) सङ्ख्यया भक्तश्चेच्छिष्टः परिवृत्तिर्भवति । तल्लब्धं युगो भवति—इत्यहर्गणः अष्टाङ्गप्रकारः.

---

R. No. **3432.**

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 62. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Āttān Vēṅkaṭācāriyar, Mēlattirumaḷigai, Alvdrtirunagari, Tinnevelly district.

Foll. 61*b* and 62 are left blank.

**सर्वार्थसिद्धिव्याख्या—तात्पर्यप्रकाशिका.**

SARVĀRTHASIDDHIVYĀKHYĀ : TĀTPARYAPRAKĀŚIKĀ.

A commentary on Vēdāntadēśika's Sarvārthasiddhi, which work has been described under No. 4900 of the D.C.S. MSS., Vol. X; by Śrīnivāsācārya alias Mahācārya of Vādhūlagōtra, disciple of Samarapuṅgavācārya of the same Gōtra

Complete, but wants the middle portion (being the end of Buddhisara and the beginning of Adravyasara).

**Beginning :**

लक्ष्मीनाथमुखान् नत्वा गुरून् समरपुङ्गवम् ।
सर्वार्थसिद्धिगूढार्थविवृतिः क्रियते मया ॥

वेदान्ताचार्यापरनामधेयः श्रीमद्वेङ्कटनाथार्यो मुमुक्षुजनतत्त्वावबोधार्थं तत्त्वमुक्ताकलापाख्यग्रन्थेन तत्त्वानि परीक्ष्य तत्त्वमुक्ताकलापं स्वयमेव विवरीतु-

कामः प्रारिप्सितविघ्नपरिसमाप्त्यादिकामः स्वगुरुपरम्पराप्रधानयतीन्द्रस्तुत्यात्मकं मङ्गलमारचयति—जयतीत्यादिना । चिकीर्षितस्य प्रेक्षावदुपादेयत्वज्ञापनार्थं प्रयोजनं दर्शयति—ताराकल्प इति । तारः स्फुरन्नाकल्पो भूषणमित्यर्थः । स्फुरत्तया दुष्प्रापतया च नक्षत्रतुल्य इति वार्थः ।

**End**:

इत्यमित्यादि श्लोकं संघटयति—इत्यमनेन प्रबन्धेनेत्यादिना ।

श्रीभाष्यकारस्तुतिरूपस्य गाथा ताश्रगतानामितिश्लोकस्य प्रयोजनमाह—सर्वमङ्गलसिद्ध्यर्थमित्यादिना । मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि कर्माणि प्रथन्त इति हि स्मरन्ति । तस्मादन्तेऽपि मङ्गलाचरणं समञ्जसमिति भावः ॥

**Colophon**:

इति श्रीमद्वाधूलकुलतिलकसमरपुङ्गवाचार्यपादसेवासमधिगतशारीरकभाष्यहृदयेन महाचार्यापरनामधेयेन वाधूलश्रीनिवासेन विरचितायां सर्वार्थसिद्धितात्पर्यप्रकाशिकायामद्रव्यसरः पञ्चमस्समाप्तः ॥

---

B. No. 3433.

Paper. 10¾ × 9⅜ inches. Foll. 68. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Paravastu Gōvindācāryulugāru, Devada, Singavarapukota taluk.

Fol. 68*b* is left blank.

## लिङ्गधारणचन्द्रिका
## LIṄGADHĀRAṆACANDRIKĀ.

Deals with the wearing of the Liṅga by the followers of the Vīra-Śaiva religion. By Nandīśvara, son of Mahēśārādhya alias Śarabhēśvara and brother of Īśvara and Śarabhēśvara.

Complete.

**Beginning**:

आधारादिसमस्तचक्रनिचये यो हंसरूपश्शिवो
नित्यानन्दगुरुप्रसादविभवाद्भावादिसंज्ञोऽभवत् ।
आचारादिविभेदतः पुनरसौ षड्लिङ्गरूपोऽभवत्
तस्मै श्रीगुरुरूपिणे गिरिसुतानेत्रे नमः कुर्महे ॥

मामके दहराम्भोजे शारभं पादपङ्कजम् ।
विघ्नान्धकारमार्ताण्डमण्डलं सततं भजे ॥

कर्मब्रह्मविचारशास्त्रनिचयस्रोताय(च्छ)वाग्वैभवं
लिङ्गाङ्गस्थलतत्त्वबोधकगिरामापादने षण्मुखम् ।
विद्वन्मत्तगजेन्द्रकुम्भदलने कण्ठीरवाडम्बरं
विघ्नध्वान्तरविं नमामि शिरसा महेश्वराख्यं गुरुम् ॥

वेदशास्त्राण्यनालोच्य केचित्पण्डितमानिनः ।
धारणं शिवलिङ्गस्य नाङ्गीचक्रुरमर्षतः ॥

स्वयंवरे वरं देही करोमि भवदाज्ञया ।
तेषां निराससिद्ध्यर्थं लिङ्गधारणचन्द्रिकाम् ॥

ते खल्वेवमाहुः—

लिङ्गधारणं तावन्न वैदिकजनपरिग्राह्यम्, अवैदिकत्वात् । वैदिकत्वे हि वेदवेदान्तवाक्यप्रतिपाद्यत्वं नियामकम्, न हि तत्र तदन्यतरं पश्यामः । न वा वेदमूलकस्मृत्यादिगम्यत्वं, मन्वादिस्मृतिषु तत्प्रापकवचनादर्शनात् ।

**End :**

लिङ्गेऽपि—

लिङ्गाङ्गसङ्गिनि मृते निक्षिपेदुत्तरक्रियाम् ।
कुर्वीरंश्चैव तत्त्वोक्तां शिष्यपुत्रादयो गुह ! ॥ इति

शङ्करसंहितावचना . . . . . कारेण सर्वमप्यवसानकृत्यं कर्तव्यमेवेति सर्वं समञ्जसमिति ॥

**Colophon :**

इति श्रीमदद्वैतविद्याचार्यमल्लनपण्डिताराध्यवंशसुधापारावारराकानिशाकर-श्रीशरभनाराध्यमहेशाराध्यस्य सूनोरीश्वरशरभेश्वराख्यभ्रातृकृपाकटाक्षवीक्षण-पूर्वकप्रेरणालब्धग्रन्थकरणप्रवृत्तिमतो नन्दिकेश्वरस्य कृतौ लिङ्गधारणचन्द्रि-कायां निरूपणीयं सर्वं संपूर्णम् ॥

शरभेश्वरपुत्रेण महेशाराध्यसूनुना ।
नन्दीश्वरेण रचिता लिङ्गधारणचन्द्रिका ॥

शरभेश्वरपादाब्जन्यस्तधीर्नन्दिकेश्वरः ।
शरभेशाज्ञया चक्रे लिङ्गधारणचन्द्रिकाम् ॥

---

R. No. 3434.

Paper. 10⅜ × 9⅜ inches. Foll. 28. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Tippan Nambūdirippād, Ponnūrkoṭṭa-mana, Perumbavore post, Travancore State.

Fol. 28 is left blank.

स्पन्दनिर्णयः.

SPANDANIRṆAYAḤ.

A commentary on Vasugupta's 'Spandasūtra', which deals with Kashmerian Śaivism: by Kṣēmaraja, pupil of Abhinavagupta alias Mahāmahēśvarācārya who was himself the disciple of (Utpaladēva) the author of the Pratyabhjñā also called Īśvarapratyabhijñāsūtras. At the end of the work the commentator states that he wrote this commentary at the request of his disciple Śūra.

Complete in four Spandas, i.e., (1) Svarūpaspanda, (2) Sahajavidyōdayaspanda, (3) Vibhūtispanda, and (4) Saṁvitspanda.

**Beginning:**

शूमिश्चिद्घनतोन्मेषसाराचिदनता निमज्जनभूमिरपि विश्वोन्मेषरूपापदागमे—

लेलिहाना सदा देवी सदा पूर्णा च भासते ।
ऊर्मिरेषापि बोधाब्धेः शक्तिरिच्छात्मिका विभोः ॥ इति ।

श्रीमान्महेश्वरोऽपि स्वातन्त्र्यशक्त्या शिवमन्त्रमहेश्वरमन्त्रेश्वरमन्त्रविज्ञानाकलप्रलयाकलसकलान्तां भूमिकां तद्वेद्यभूमिकां च गृह्णानः पूर्वपूर्वरूपतां भित्तिरूपतया स्थितामप्यन्तस्स्वरूपप्रच्छादनक्रीडया निमेषयन्नेवोन्मेषयत्युत्तरोत्तररूपतामवरोहक्रमेणारोहक्रमेण तूत्तरोत्तररूपतां निमेषयन्नेव ज्ञानयोगिनामुन्मेषयति पूर्वपूर्वरूपताम् ।

* * * *

**Colophon:**

इति श्रीस्पन्दनिर्णये स्वरूपस्पन्दः प्रथमो निष्पन्दः ॥

**End:**

लब्ध्वाप्यलभ्यमेतज्ज्ञानधनं हृद्गुहान्तकृतनिहितेः ।
वसुगुप्तवच्छिवाय हि भवति सदा सर्वलोकस्य ॥

एतच्छास्त्रोक्तमेतज्ज्ञानमेव पुरुषार्थं प्रति हेतुत्वाद्धनमलभ्यमपि दुष्प्रापमपि लब्ध्वा शाङ्क(ङ्क)रस्वप्नोपदेशसारं शिलातलादवाप्य प्रकाशविमर्शात्मकं हृदयमेव विश्रान्तःप्रवेशावकाशप्रदत्वाद्गुहा तस्यामन्तेन निश्चयेन कृता निहितिः स्थापना येन अर्थात्तस्यैव ज्ञानघनस्य तस्य स्वामिनः श्रीवसुगुप्ताभिधानस्य गुरोर्यथैव तत् शिवाय जातं तद्वदधिकारिनियमसङ्कोचाभावात्सर्वलोकस्यापि हृद्गुहान्तःकृतनिहितेर्यत्नादसामयिकाद् गोपयतः दृढप्रतिपत्त्या च स्वात्मीकुर्वतः सदा शिवाय भवति नित्यशङ्करात्मकस्वस्वभावसमावेशलाभाय संपद्यत इति शिवम् ।

* * * *

अनन्तापारटीकाकृन्मध्ये स्थितिममृष्यता ।
विवृतं स्पन्दशास्त्रं नो गुरुणा नो मयास्य तु ॥
विशेषलेशसन्दोहे दर्शितः पूर्वमद्य तु ।
रुद्रशक्तिसमावेशशालिनश्शिवरूपिणः ॥
शूरनाम्नः स्वशिष्यस्य प्रार्थनातिरसेन तत् ।
निर्णीतं क्षेमराजेन स्पा(स्फा)रान्निजगुरोर्गुरोः ॥

येषां नो धिषणोपदेशविशदास्सद्देशिकैर्दर्शिताः
श्रीमच्छाम्भवशातनोपनिषदा येषां न भग्नो भ्रमः ।
येनास्वादितपूर्विणो मृदुधियश्श्रीप्रत्यभिज्ञामृतं
तेनात्राधिकृताः परैः पुनरिदं पूर्णाशयैश्चर्व्यताम् ॥

शिवादिक्षित्यन्तो विततविनतो योऽध्वविभवः
स्फुरन्नानासर्गस्थितिलयदशाचित्रिततनुः ।
इयद्विश्वं यस्य प्रसरकणिकासौ विजयते
परस्संवित्स्पन्दोऽलसदसमसौख्यायतनभूः ॥

Colophon :

इति समाप्तोऽयं श्रीस्पन्दनिर्णयः ॥

कृतिः श्रीप्रत्यभिज्ञाकारप्रशिष्यस्य महामहेश्वराचार्यश्रीमदभिनवगुप्तनाथदत्तोपदेशस्य श्रीक्षेमराजस्य इति शिवम् ॥

R. No. 3435.

Paper. 10⅝ × 9⅜ inches. Foll. 142. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Koṭikalapūḍi Cinakōdaṇḍarāmayya, Bobbili.

(*a*) ज्योतिस्सारः.

JYOTISSĀRAḤ.

Foll. 1*a*—95*a*.

An astrological treatise dealing with the following Prakaraṇas :—

१. तिथिवारादिसंज्ञाकथनम्.
२. प्रथमार्तवनिरूपणम्.
३. गर्भाधानादिमुद्रिकारोपणान्तकथनम्.
४. द्वन्द्वविवाहादिनववधूप्रवेशकथनम्.
५. पुरसद्मनिर्माणादिकथनम्.
६. जलकुम्भादिनानामुहूर्तच्छुरिकाबन्धनयात्राध्यायकथनम्.
७. वापीकूपतटाकादिप्रतिष्ठासमेतराजाभिषेककथनम्.
८. ग्रहणसङ्क्रान्तिपुण्यनिर्णयोत्पातकथनम्.
९. पितृप्रकरणपुनर्दहनाशौचादिकथनम्.

By Sōmēśa of the Tāta family.

Breaks off in the ninth Prakaraṇa (ending with the stanza –

श्वशुरस्य गुरोर्वापि मातुलस्य महात्मनः ।
ज्येष्ठभ्रातुश्च पुत्रस्य ब्रह्मनिष्ठस्य मा(भो)जनम् ॥)

**Beginning :**

श्रीशं गणेशं ब्रह्माणं महे(शं) च रविं गुरुम् ।
नत्वा सङ्क्षिप्य सोमेन ज्योतिस्सारो विधीयते ॥
ज्योतिश्शास्त्रसमुद्रात्तु सारमादाय यत्नतः ।
बालानां बोधनायास्मिन्गर्भाधानादि लिख्यते ॥

आदौ तिथीश्वराः—

तिथीशाः क्रमशो वह्निर्धाता गौरी गणाधिपः ।
सर्पः स्कन्दो रविश्शम्भुर्दुर्गा धर्मश्च विश्व(श्रु)तः ॥
हरिः स्मरः कलिश्चन्द्रः पितरः पारकीर्तिताः ।

* * * *

**Colophon:**

इति श्रीज्योतिस्सारे तातासोमेशविरचिते तिथिवारादिसंज्ञाकथनं नाम प्रथमं प्रकरणम् ॥

**End:**

रुदन्त्यकस्मादन्योऽन्यं निशि तारागृहक्षयः ।
महैर्गृहपतेर्नाशः ग्रामे ग्रामाधिपस्य च ॥

एतदुत्पातदर्शने शान्तिं कुर्यात् ॥

**Colophon:**

इति ज्योतिस्सारे तातासोमेशविरचिते ग्रहणसङ्क्रान्तिपुण्यनिर्णयोत्पातकथनं नामाष्टमप्रकरणम् ॥

तातानां पितृप्रकरणं पुनर्दहनम् । अथ पितृप्रकरणम्—

नन्दां चतुर्दशीं भद्रां तिथिं शुक्रारवासरौ ।
विषमाङ्घ्र्यङ्घ्रिमं च त्यक्त्वान्यर्क्षेऽन्यवासरे ॥
अनस्तके गुरौ शुक्रे न वार्धक्ये न शैशवे ।
कृष्णपक्षे चापराह्णे पापखेटे बलान्विते ।
तत्पुनर्दहनं कार्यं चन्द्रताराबलाधिके ॥

* * * *

अथ पितृप्रकरणप्रसङ्गादाशौचविधिर्निर्णीयते—

यावत्सूतकमस्पृश्या माता प्राक् स्नानतः पिता ।
अन्येषां तु सगोत्राणामस्पृश्यत्वं न सूतकः ॥
जातेऽपत्ये(त्ये) पितुः स्नानं सचेलं तु विधीयते ।

* * * *

पितृशेषा(न्न)भोजनम्—

श्वशुरस्य गुरोर्वापि मातुलस्य महात्मनः ।
ज्येष्ठभ्रातुश्च पुत्रस्य ब्रह्मनिष्ठस्य भा(भो)जनम् ॥

---

(*b*) लीलावती.

**LĪLĀVATĪ.**

**Foll. 95*a*—132*b*.**

Same work as that described under No. 13477 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

Foll. 132b—133b contain a few stanzas of Naiṣadha with commentary. Foll. 134—141 contain several horoscopes. Fol. 142a gives the name of the owner of the original MS. Fol. 142b is left blank.

---

R. No. 3436.

Paper. 10⅝ × 9⅜ inches. Foll. 172. Lines, 20 in a page. Dēvanāgari Good.

Transcribed in 1920-21 from a MS. acquired through M.R.Ry. K. C. Vēnkaṭasubrahmaṇya Śāstri, Sanskrit Pandit, Iriññālakkuḍa, Tiruppanattura post, Cochin State.

Fol. 172b is left blank.

वाधूलवृत्तिरहस्यम्.

VĀDHŪLAVṚTTIRAHASYAM.

Deals with the procedure relating to the performance of religious rites and ceremonies by the followers of Vādhūlasūtra: by Saṅgamagrāmavāsin.

Breaks off in the VIII Adhyāya (ending with the words श्रेयान स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् —परधर्मेण जी . . . . )

**Beginning:**

नीलोत्पलदलश्यामं नीरजायतलोचनम् ।
क्वणत्किङ्किणि नृत्यन्तं नमस्यामो रमापतिम् ॥
वाधूलकं महाप्राज्ञं वृत्तिकृत्प्रमुखान् गुरून् ।
मन्वादीन् सूत्रकारांश्च विघ्नेशस्कन्दभास्करान् ॥
गिरं देवीं श्रियं शम्भुं प्रणम्याथ मयाधुना ।
वाधूलकल्पितस्मार्तप्रयोगोऽयं निबध्यते ॥
प्रयोगस्त(?)न पूर्वस्यां प्रयोगा बहुधोदिताः ।
समाचारानुसारेण प्रयोग इह कीर्त्यते ॥
गृह्यकल्पसमाचारस्मृतिशास्त्रानुसारतः ।
पुरुषस्येह यत्कृत्यं तच्च लेशेन वर्ण्यते ॥

चत्वारिंशद्धि संस्कारा अष्टावात्मगुणाश्च ये ।
तैस्समेतो द्विजो विद्वान् ब्रह्म प्राप्नोति शाश्वतम् ॥
ऋणत्रयसमायोगात्त्रियोगात्करणं मतम् ।
ब्रह्मचर्यस्य यज्ञानां प्रजोत्पादनकर्मणाम् ॥
निषेकादिश्मशानान्तस्संस्कारस्स्मृतिचोदितः ।
द्विजातेरपि तु स्त्रीणां नित्य एषोऽवगम्यते ॥

* * * *

**Colophon:**

इति सङ्गमग्रामवासिमिश्रविरचिते नारायणीये बाधूलगृह्यागमवृत्तिरहस्ये प्रथमोऽध्यायः ॥

**End:**

आशीःप्रार्थनपर्यन्तं कृत्वा भुञ्जीत बान्धवैः ॥

**Colophon:**

इति सङ्गमग्रामवासिमिश्रविरचिते नारायणीये बाधूलगृह्यागमवृत्तिरहस्ये सप्तमोऽध्यायः ॥

अन्वाहिकप्रसङ्गेन श्राद्धकर्म समीरितः(म्) ।
धर्मा(न्) इदानीं वक्ष्यामः पुरुषस्य स्त्रिरवा(या) अपि ।
रक्षेत्स्त्रियं प्रयत्नेन पुरुषो दुर्बलोऽपि सन् ।

* * * *

सद्यः पतति मांसेन लाक्षाय(क्षया)लवणेन च ।
त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयी ॥
आपद्युद्धमया वृत्त्या जीवेदुत्कृष्टवर्णजः ।
न त्वेव ज्यायसीं वृत्तिर्नीचः कुर्यात्तु कर्हिचित् ॥
श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
परधर्मेण जी.

---

## R. No. 3437.

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 36. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Paravastu-Gōvindācāryulugāru, Dēvāḍa, Sūryavarapukōṭa, Tanuku.

Fol. 36*b* is left blank.

उत्तररामायणचम्पूः.

UTTARARĀMĀYAṆACAMPŪḤ.

Similar to the work described under No. 12219 of the D.C.S. MSS., Vol. XX. By Rāmānuja, son of Prasannavaradācārya.

Name of the scribe—Nṛsiṁha, son of Sōmēśvarapaṇḍita and pupil of Kāmēśvarapaṇḍita. Date of transcription—Tuesday, the 8th day of the dark fortnight of the lunar month Jyēṣṭha in the year Siddhārthin

Complete.

**Beginning :**

श्रीरामायणमुत्तरं रचयितुं चम्पूं यथाशक्त्यहं
सन्नद्धोऽस्मि दयाघनैर्बुधजनैस्सन्दृश्यतां सादरम् ।
मीमांसा हि विनिर्मिता त्रिभिरमूभ्रेतावति(षापरे रसं(रसु)त्वजे
दे(त्ये)वं भोजकवीन्द्रलक्ष्मणगिरां रामानुजोक्तिः परा ॥

भोजेन लक्ष्मणबुधेन च पञ्चकाण्डी यत्काण्डयोः कलितयोरहमुत्तरस्य ।
चम्पूं करोमि रचयन्ति हि गोपुरादेर्न्यूनस्य पूरणमुदारधियो जगत्याम् ॥
प्राप्तराज्यमथ मैथिलीपतिं वीक्षितुं कलशसम्भवादयः ।
रावणारिमभिजग्मुरादराच्छ्रीयुतो हि सकलैरुपास्यते ॥

प्रत्युद्गता मुनिजनाः प्रभुणा रघूणां पाद्यार्हणप्रभृतिभिः परिपूर्ण(ज्य)मानाः ।
अध्याश्रिता विविधमान(स)नमादरेण रामस्स(मं स)युञ्जत विनीतिमुपासितुं ते॥

अथ विविधसामन्तधरणीधरशिखरनिरन्तरक्रियासमभिहारसङ्घर्षकैतवशाणसङ्घषणनिरन्तरायविसृमरातिरःकिरणमणिगणरमणीयपादपीठम् ।

• • • •

प्रशस्य पौलस्त्यमुखविलयाख्यायिकया वाक्यपरम्परया चरित्रस्तोत्रं विस्तारयामासुः ।

**End :**

वाल्मीकिवागमृतपानविशुद्धभावैः भोजादिभिर्वि(र)चिताः कतिचित्प्रबन्धाः ।
कश्चिन्मयेति स च चित्रमुडुप्रचारे खद्योतकश्चरति किं न दिशावकाशे ॥
श्रीमद्वधूलकुलवारिधिपूर्णचन्द्रश्रीमत्प्रसन्नवरदानुजनन्दनेन ।
रामानुजेन कविना रचितो यथामत्याज्ञामनुष्य वहतोत्तरकाण्डचम्पूः ॥
रामायणाब्धिसञ्जातं रामचन्द्रकथामृतम् ।
सुखेन सुधियां पातुं चम्पूरेष विनिर्मितः ॥

**Colophon:**

इति श्रीमत्प्रसन्नवरदाचार्यपादपङ्कजसेविना तदनुजशरणाम्बार्यतनूजेन रामानुजदासेन विरचितो रामायणोत्तरकाण्डचम्पूस्समाप्तः ॥

The scribe adds:

सिद्धार्थ्यब्दे ज्येष्ठमासे च कृष्णे पक्षेऽष्टम्यां भौमवारे नृसिंहः ।
मध्याह्नेऽसावादिकाव्ये बुधार्थं चम्पूं काण्डस्योत्त(र)स्यालिलेख ॥
श्रीवाधूलसगोत्रसम्भवमहावादीभपञ्चानन-
श्रीकामेश्वरपण्डितोत्तमकृपावीक्षाप्तविद्योत्तरः ।
श्रीसोमेश्वरपण्डितस्य तनयः श्रीनारसिंहाह्वयः
श्रीरामानुज(चण)चम्पुमालिखितवान् गौरीशशिष्याग्रणीः ॥

मया विलिखिता चम्पूरेषा गौरीशसेविना ।
एनां पश्य(श्य)न्तु विबुधास्सादरं मय्यनुग्रहात् ॥

---

## R. No. 3438.

Paper. $8\frac{1}{2} \times 6\frac{1}{2}$ inches. Foll. 40. Lines, 14 in a page. Dēvanāgarī and Malayalam. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Paliyattu Acchan, Chennamangalam, Parur post.

### आश्चर्यचूडामणिव्याख्या.
### ĀŚCARYACŪḌĀMAṆIVYĀKHYĀ.

Foll. 1a—32b.

A commentary on the Āścaryacūḍāmaṇi of Śaktibhadra which work has been described under No. 12496 of the D.C.S. MSS., Vol. XXI.

Wants the beginning in the fifth Act and the end in the seventh Act.

**Beginning:**

अयमभिप्रायः—एकं वानरं हत्वान्यं वानरमुपास्ते राम इत्ययं जनप्रवादः श्रुत एव; नैतावन्मात्रेण रामस्य गौरवं भवतीति । तदेवेत्येवकारेण वालिहननस्य बहुमन्तव्यत्वयोगो व्यावर्त्यते । वालिनः पराक्रमे विचार्यमाणे सति तद्धननं बहुमन्तव्यमेवेति भावः ।

* * * *

अनेनैव वचनेन कविनोत्तराङ्के सीतादुःखविमोचनहेतुर्हनूमत्प्रवेशस्सूचितः ॥

**Colophon:**

आश्चर्यचूडामणिनाटकेऽस्मिन् स पञ्चमाङ्को विवृतो गुरूणाम् ।
प्रसादमाश्रित्य तथोत्तराङ्को व्याख्यास्यतेऽस्माभिरनन्यचित्तैः ॥

उत्तराङ्कः—

अत्रापि चतुर्थाङ्कवद्विष्कम्भादि विनाङ्क एवारभ्यते । अनन्तरेऽङ्के वानरसैन्यं सञ्चरतीत्यत्र वानरसैन्यस्य सीतावृत्तान्तपरिज्ञानार्थमुद्यमस्सूचितः । तत्र हनूमदुद्यमस्य फलपर्यन्तत्वात् तत्प्रवृत्तिरस्मिन्नङ्केऽधिक्रियते—मैनाक-मिति । अहं लङ्कां प्राप्तोऽस्मि । दुरासदेप्सिततमलङ्काप्राप्तिनिर्देशेनानन्दा-तिशयो गम्यते ।

**End:**

मया दृष्टो देव इति वचनामृतपानेनात्यन्तं हृष्टा सीता श्रेयांसि बहु-विघ्नानीतिन्यायेन पुनरप्यदर्शनाशङ्कातं(तत्) दर्शनं दृढीकर्तुमौत्सुक्याति-शयेन भूयोऽपि तदेव श्रोतुं च तदुक्तमेवार्थं प्रश्ने(श्न)रूपेणानुवदति—सत्यं तव नयनाभ्यामिति । दृष्ट इति शेषः । नयनयोर्दर्शनकरणत्वाव्यभि-चारेऽपि.

Foll. 33*a*—40*a* contain a portion of the Malayalam commentary on this work. Fol. 40*b* is left blank.

---

R. No. 3439.

Paper. 10¾ × 9⅜ inches. Foll. 144. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Gōdavarmarāja of Cranganore, Cochin State.

Foll. 143*b* and 144 are left blank.

कृष्णविलासः, बालपाठ्याख्याख्यासहितः.

KṚṢṆAVILĀSAḤ WITH THE COMMENTARY BĀLA-PĀṬHYĀ.

A poem in seven Sargas, by Sukumāra, describing the story of Śrī-Kṛṣṇa. The work is followed by a commentary by Gōvinda, who lived in a village called Tāmrapattra, and who was the pupil of Gōpāla and Mādhava.

Complete in seven Sargas.

**Beginning:**

अस्ति यन्मस्तकं हस्तिनो मस्तवद्वस्तुतस्संस्तुतं विघ्नविध्वस्तिकृत् ।
तत्तु मे दैवतं हृत्तटे वर्ततां वस्तुतः प्रस्तुतस्यास्तु च स्वस्तिकृत् ॥

* * * *

श्रीवैष्णवाग्रसरवारिजसत्तमौ तौ गोपालमाधवगुरू मम हृद्यतेताम् ।
अज्ञानकल्मषमहाम्बुनिधौ परागस्सेतूयते महितयत्पदपङ्कजोत्थः ॥
काव्यं यशसेऽर्थकृते (. . .) कान्तासंमिततयोपदेशयुजे ॥
अस्माद्वचनाद्यशसां मूलं निश्चित्य काव्यनिर्माणम् ।
निरमात्सुकुमारकविश्श्रीकृष्णविलाससंज्ञितं काव्यम् ॥
बालपाठ्याभिधा काचिदस्य व्याख्या विरच्यते ।
ताम्रपत्रालयस्थेन गोविन्देन यथान्वयात् ॥
सुकुमारसरस्वती रसार्द्रा हरिलीलामनुरुध्य जेजयीति ।
मलिनापि विगाहनादमुष्यां विमलास्या न कथं मदीयवाणी ॥

* * * *

(मू.)—

अस्ति श्रियस्सद्म सुमेरुनामा समस्तकल्याणनिधिर्गिरीन्द्रः ।
तिष्ठन्निदं विश्वमनुप्रविश्य स्वेनात्मना विष्णुरिवोर्जितेन ॥

(व्या.)—

अस्तीत्यादि । श्रियस्तत्तद्विशिष्टपदार्थजन्यशोभायाः अन्यत्र लक्ष्मी-
देव्याः (नि.)—

"श्रीर्वेषरचना शोभा भारती सरलद्रुमे ।
लक्ष्म्यां त्रिवर्गसम्पत्तिविषोपकरणेषु च ॥"

इति मेदिनी । सद्म निवासः ।

* * * *

**Colophon:**

इति बालपाठ्ये प्रथमस्सर्गः ॥

**End:**

(मू.)—

ऋतुगणमिति निर्विशन्नजस्रं व्रजवनिताजनसेवितोपकण्ठः ।
अरमत सह सीरिणा स शौरिस्सुरजनकार्यविधानसावधानः ॥

**Colophon:**

इति सुकुमारकृतौ श्रीकृष्णविलासे सप्तमस्सर्गः समाप्तः ॥

(व्या.)—

ऋत्विति । इत्येवमजस्रमसकृदृतूनां वसन्तादीनां गणं निर्विशन् उपभुञ्जानः । व्रजवनिताजनसेवितोपकण्ठः गोपस्त्रीपरिवेष्टितान्तिकः । (नि.)—उपकण्ठान्तिकाभ्यर्ण—इत्यमरः । स शौरिः सीरिणा सह सुरजनस्य यत् कार्यं दुष्टनिग्रहादि । तस्य विधाने सहावधानेन सावधानस्सन् । (सू.)-वोपसर्जनस्येति सहस्य सभावः । अरमत चिक्रीड । रमतेर्लङ् ॥

**Colophon:**

इति बालपाठ्ये सप्तमस्सर्गः ॥

---

R. No. **3440.**

Paper. 10¼ × 9¾ inches. Foll. 99. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Nārāyaṇabhārati Kappiyar Svāmigaḷ, Trichur, Cochin State.

(*a*) तर्कभाषाव्याख्या—चेन्नुभट्टीया.

TARKABHĀṢĀVYĀKHYĀ: CENNUBHAṬṬĪYĀ.

Foll. 1*a*—93*b*.

Same work as that described under No. 4126 of the D.C.S. MSS, Vol. VIII. By Cennubhaṭṭa, son of Sarvajñaviṣṇudēvārādhya. The work is also called Tarkabhāṣāprakāśa.

Complete.

---

(*b*) चेन्नुभट्टीयनिरुक्तिविवृतिः.

CENNUBHAṬṬĪYANIRUKTIVIVṚTIḤ.

Foll. 94*a*—99*b*.

A commentary on the Cennubhaṭṭa's Nirukti: by Viṣṇubhaṭṭa, pupil of Cennubhaṭṭa.

Complete.

**Beginning:**

विघ्नान्धकारमार्तण्डं गजवक्त्रं दयानिधिम् ।
नत्वा वागीश्वरीं बोधमुद्रापुस्तकधारिणीम् ।
मूर्जेल चेन्नुभट्टार्यशिष्यो विष्णुस्सतां मतः ।
विरचि(च्यते) निरुक्तिस्तु चेन्नुभट्टीयसंस्थितः ॥

द्रव्यत्वं नाम गगनारविन्दसमवेतत्वे सति नित्यगन्धासमवेतं समवेतद्रव्यमित्युक्ते सत्तायामतिव्याप्तिरत उक्तं समवेतमिति । तावत्युक्ते व्याघातः; अत उक्तं गन्धेति । तथापि संयोगादावतिव्याप्तिरत उक्तं नित्येति (?) ।

**End:**

अभावो नामासमवायित्वे सतीति । असमवाय इत्युक्ते द्रव्यादिपञ्चकेऽतिव्याप्तिरत उक्तमसमवायीति । तावत्युक्ते समवायेऽतिव्याप्तिरत उक्तमसमवाय इति ॥

निरुक्तिविवृतिर्बालबोधवैशद्यकारिणी ।
दोषसम्भावनाहीना सादरं दृश्यतामियम् ॥

**Colophon:**

इति चेलुभट्टीयनिरुक्तिविवृतिः विष्णुभट्टविरचिता समाप्ता ॥

* * * *

इति निरुक्तिस्समाप्ता ॥

---

R. No. 3441.

Paper. 10⅝ × 9⅜ inches. Foll. 96. Lines, 20 in a page. Dêvanâgarî. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Payyuru Pattêri, Kunnankulam post, Cochin State.

Fol. 96 is left blank.

कणादसूत्रनिबन्धः—तर्कसागरः.

KAṆÂDASÛTRANIBANDHAḤ: TARKASÂGARAḤ.

A commentary on the Vaiśêṣikasûtras of Kaṇâda: by Śrîkṛṣṇarâja of Yadu family.

Incomplete.

**Beginning:**

प्रणम्य गौरीशमचिन्त्यशक्तिं सर्वज्ञमज्ञानतमःप्रदीपम् ।
कणादसूत्रस्य मया निबन्धो विधीयते शङ्करकिङ्करेण ॥

ततश्चानन्तर्यं न यतः कुतश्चित् अथशब्देन समर्पणीयं वैयर्थ्यात् । न हि यत्किञ्चिदानन्तर्यं धर्मव्याख्यानस्य क्वचिदुपयुज्यते । तस्मादानन्तर्यमात्रवाचकोऽप्ययमथशब्दः ईश्वरप्रणामानन्तर्यपर इति युक्तम् ।

* * * *

तदेवं प्रथमसूत्रेण शास्त्रप्रतिपाद्यौ धर्माधर्मौ दर्शितौ । द्वितीयसूत्रेण तु स्वर्गापवर्गनरकपक्षीकारेण धर्माधर्मयोः प्रमाणं दर्शितम् । तृतीयसूत्रेण तु स्वर्गापवर्गनरकेष्वाम्नायः प्रमाणमभिहितमिति त्रिसूत्री व्याख्याता । यद्वा प्रथमसूत्रेण शास्त्राभिधेयधर्ममभिधाय यतोऽभ्युदयनिश्श्रेयससिद्धिः स धर्म इति द्वितीयसूत्रे प्रयोजनं प्रतिपाद्यते ।

* * * *

यतोऽभ्युदयनिश्श्रेयस इत्येतावतैव चरितार्थे सिद्धिग्रहणं मङ्गलार्थमिति ॥

**Colophon**:

इति श्रीयदुकुलकमलकलिकाविकासभास्करभूपाललालितमहाराजाधिराजश्रीकृष्णभूपालविरचिते तर्कसागरनाम्नि वैशेषिकसूत्रवार्तिके त्रिसूत्रीव्याख्या समाप्ता ॥

अथातो धर्मं व्याख्यास्याम इति सूत्रेण प्रमेयमात्रं व्याख्येयतया प्रतिज्ञातम् । तथा हि—यदा तावद्धर्माधर्मव्याख्यानं सूत्रार्थः । तदा धर्माधर्मतया तदुत्पादकतया ।

**End**:

अस्तु वा गुणवत्त्वात्यन्ताभावादिरेकैक एव साध्यः । न चात्राप्रसिद्धविशेषणत्वम् । दोषसाध्याप्रसिद्धावपि तदभावस्य गुणत्वादेव तत्रावगन्तुं शक्यत्वेन व्यतिरेकग्रहणोपपत्तेः । नापि व्यतिरेकासम्भवः; गुणत्वात्यन्ताभावात्यन्ताभावस्य गुणत्वादेर्गुणादिष्वेकैकस्य सम्भवात् ।

---

R. No. **3442**.

Paper. 10⅜ × 9⅜ inches. Foll. 32. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kōṭalūr-mana, Nareri, Tritala, Malabar district.

**विष्णुविलासः.**

**VIṢṆUVILĀSAḤ.**

A treatise in verse describing the miraculous deeds of God Viṣṇu in His nine incarnations; by Rāmapāṇipāda, pupil of Nārāyaṇabhaṭṭa.

Contains the Sargas one to eight complete.

**Beginning**:

चकास्ति पूर्णासरितस्तटे शुभे निकेतनं यस्य जयन्तमङ्गलम् ।
सनातनश्चेतासि नः प्रकाशतः स नारसिंहं वपुरास्थितो हरिः ॥

महासुरोरस्स्थलशोणितस्पृशां जयन्ति यत्पाणिरुहां मरीचयः ।
विशालबालातपपुञ्जपूर्णिताः प्रगेतनेन्दुद्युतिकन्दला इव ॥

* * * *

करोतु नारायणभट्टदेशिकप्रसादनिर्दोषतुषारदीधितिः ।
मदन्तरिन्दूपलमुक्तिमाधुरीझरीपरिष्यन्दितयन्दि (?) सुन्दरम् ॥
नवाम्बुदश्यामलकोमलत्विषो नवावतारानुकीर्तये हरेः ।
नवार्थकुप्तिः पुनरस्तु वा न वा न वामतां यान्ति बुधा विमत्सराः ॥
अभूदमर्त्यारिरमित्रजैत्रया श्रिया हयग्रीव इति प्रतापवान् ।

* * * *

**Colophon:**

इति रामपाणिपादविरचिते श्रीविष्णुविलासे मत्स्यावतारो नाम प्रथमस्सर्गः ॥

**End:**

एवं भूदारहारी पुनरखिलय(दु)व्रातसंहारहारी
हेतुं व्याधास्त्रवेधं कमपि हि क(ल)येस्त्यक्तवा(ना)त्मदेहम् ।
सान्द्रा(न)न्दं पतन्तं निजमजवळजित्सेवितः प्राविशद्यः
सम्मदस्सम्प्रदद्यात्स(वि)भुरखिल . . . . . . . . ॥

**Colophon:**

इति रामपाणिपादविरचिते श्रीविष्णुविलासे बलकेशवावतारो नामाष्टमस्सर्गः ॥

---

## R. No. 3443.

Paper. 10¾ × 9¼ inches. Foll. 56. Lines, 20 in a page. Dêvanāgari Good.

Transcribed in 1920–21 from a MS. of the Sanskrit College Library, Tiruppaṇattura, Cochin State.

Fol. 52 is left blank.

### श्लोकमाला (रामायणम्).
### ŚLOKAMĀLĀ (RĀMĀYAṆAM).

Same work as that described under R. No. 3107 ante.

Contains only the first two Parichhadas in the Uttarakāṇḍa.

**Beginning :**

रामो मनोहरतु(तनु)र्नलिनायताक्षो नीलेन्द्रवृन्दवदमेयतरात्मकान्तः
रेजेऽभिषिक्त उभ(द)यद्रविभे ससीतस्सिंहासने निहतपङ्क्तिमुखो मुकुन्दः ॥
विध्वस्तभक्तभवबन्धमुदारविद्यासन्धामवायुतमुखाखिलपूज्यमानम् ।
मध्वार्यशास्त्रपठितीसुहृदोवि(ऽपि)लोपामुद्रेशमुख्यमुनयस्तु सिषेविरे तम् ॥

* * * *

**Colophon :**

इत्युत्तररामायणे श्लोकमालायां प्रथमः परिच्छेदः ॥
अथैकदा सहजवरैश्च मन्त्रिभिर्हताशरो हरिरवसत्सभान्तरे ।
तदामलाश्च्यवनमुखा महर्षयस्समागता रघुपतिदर्शनार्थिनः ॥

**End :**

व्याप्तश्चिचेत्यवृन्देष्वमितगुणनिधिर्योऽप्रमेयस्समेषु
श्वेतद्वीपेऽतिरम्ये कृतवसतिरनन्तासने चातिकान्ते ।
श्रीवैकुण्ठेतिमुख्ये निखिलनिगमगीतोरुमाहात्म्यशाली
सीतामङ्के दधानस्सुखमभिरमते मङ्गलश्रीस्स रामः ॥

---

## R. No. 3444.

Paper. $10\frac{3}{8} \times 9\frac{1}{2}$ inches. Foll. 146. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdiri, Kaimmukku-mana, Pudukkadu post, Cochin State.

### बोधायनस्मृतिव्याख्या—अमला.

### BŌDHĀYANASMṚTIVYĀKHYĀ : AMALĀ.

A commentary on the Bōdhāyanasmṛti : by Paramēśvaraparivrājaka.

Contains the Praśnas one and two complete and 1—27 Adhyāyas in the third Praśna.

**Beginning :**

नारायणं नमस्कृत्य देवं त्रिभुवनेश्वरम् ।
ब्रह्माणं च हरं चैव तथा देवी सरस्वतीम् ॥
मन्वादीन् सूत्रकारांश्च आचार्यं गुरुमेव च ।
प्रारभ्यते मया व्याख्या स्मृतेर्बोधायनस्य तु ॥

को हि सम्बन्धः कथ्यते? चतुर्दश विद्यास्थानानि शिष्टैरभिमतानि कानि? तान्युच्यन्ते—"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥" इत्येवं धर्मशास्त्रमपि तेषु परिगणितमत इदमारभ्यते।

* * * *

इदानीं ग्रन्थो व्याख्यायते—उपदिष्टो धर्मः प्रतिवेदम्। उपदिष्टः प्रदर्शितः कः? धर्मः। धर्म इति क्रिया भण्यते। प्रतिवेदं वेदं वेदं प्रति प्रतिवेदम्। वेद इत्यतीन्द्रियवस्तुलिङ्गकृतनित्यो ग्रन्थराशिरुच्यते।

* * * *

**Colophon**:

इति परमेश्वरपरिव्राजकस्य कृतावमलायां वृत्तौ प्रथमोऽध्यायः ॥

* * * *

पञ्चदश्यां सर्वां विद्यां व्याकरणतर्कादिलक्षणामपि न पठेत् नापि स्मरेत् ॥

**Colophon**:

इति परमेश्वरपरिव्राजकस्य कृतौ अमलायां वृत्तौ एकादशोऽध्यायः ॥

प्रथमः प्रश्नस्समाप्तः ॥

**End**:

पर्वणि केशश्मश्रुलोमनखवापनं व्याख्यातमेतत् ॥

**Colophon**:

परमेश्वरपरिव्राजकस्य कृतावमलायां वृत्तौ द्वाविंशोऽध्यायः ॥

द्वितीयः प्रश्नः समाप्तः ॥

सम्प्रत्युक्तानां विधिप्राशनाय प्रकरणमारभ्यते—यथो एतत् षण्णिवर्तीनीति। अनेन प्रथमां व्यपदिशति।

* * * *

**Colophon**:

इति परमेश्वरपरिव्राजकस्य कृतावमलायां वृत्तौ सप्तविंशोऽध्यायः ॥

भूयोऽपि पापापनुत्त्युपायप्रदर्शनार्थमेव प्रकरणमारभ्यते—चान्द्रायणं चासकृच्चोदितम्।

* * * *

गुणलक्षणमिति च स्मृतिः। वेदाभ्यासश्च पञ्चधा ॥

R. No. 3445.

Paper. 10⅞ × 9⅜ inches. Foll. 60. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from two MSS. belonging to M.R.Ry. Nīlakaṇṭha Nambūdirippād, Kūṭalūr-mana, Narari, Tritala, and M.R.Ry. Nīlakaṇṭha Nambūdirippād, Kaṇṇūr-mana, Ottapalam, Malabar district.

Fol. 60*b* is left blank.

श्रीरामविजयः.

ŚRĪRĀMAVIJAYAḤ.

A poem describing the story of Rāma. The author, whose name is not given, was a disciple of Aruṇācalanātha.

Contains the Sargas one to seven complete and breaks off in the eighth Sarga.

**Beginning:**

अस्तु श्रिये वस्तु निरस्तविघ्नं स्विद्यत्कपोलं मदकर्दमेन ।
हस्तोदरोदञ्चितमातुलुङ्गं हस्तिप्रवीराननमन्वहं नः ॥

* * * *

वल्मीकजाद्यैः कविनायकेन्द्रैस्तीर्णे चरित्राम्बुनिधौ रघूणाम् ।
पत्युर्मदीया रसना वराकी तितीर्षया सम्प्रति बम्भ्रमीति ॥

* * * *

अभूदभूमिर्वचसां प्रभावैः निधिर्गुणानामवधिर्दयायाः ।
सूर्यान्वये पङ्क्तिरथाभिधानः सखा मघोनः प्रथितो नरेन्द्रः ॥
यस्मिन् प्रवीरे युधि कर्षति ज्यां विहाय तामेव भिया महत्या ।
ऊर्बुद्विषन्तो गिरिकन्दरासु पलायमाना मृगनिर्विशेषम् ॥

* * * *

**Colophon:**

इति श्रीरामविजयकाव्ये प्रथमस्सर्गः ॥

**End:**

शोणाचलेन्द्रकरुणापरिणामविनिर्मिते ।
श्रीरामविजये काव्ये सर्गोऽयं सप्तमोऽत्यगात् ॥

**Colophon:**

सप्तमस्सर्गस्समाप्तः ॥

अथाष्टमस्सर्गः—

खरादिदावानलकीलमालया खरांशुवंशाभरणायमानया ।
अकारि वासः कलया मुरद्विषः सकान्तया पञ्चवटीवने सुखम् ॥

* * * *

निवापतोयं समवे जटायुषे दिदेश पित्राप्यनवाप्तमादरात् ।
परार्थलाभाय निराकृतायुषि त्रिविष्टपं जग्मुषि. . . . . . ॥

---

R. No. 3446.

Paper. 10⅜ × 9⅝ inches. Foll. 98. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdiri, Kaimukku-mana, Pudukkadu post, Cochin State.

Fol. 98*b* is left blank.

आश्वलायनश्रौतप्रयोगकारिका.

ĀŚVALĀYANAŚRAUTAPRAYŌGAKĀRIKĀ.

The Kārikās (verses) describing the procedure to be observed by the followers of Āśvalāyanasūtra in the performance of sacrifices.

Wants the beginning; otherwise complete.

**Beginning:**

. . स्तश्च कपालकार्यमथ वा पर्यग्नये चोद्धृतः
शान्तश्चेदखिलाग्निहोत्रहवने स्वस्वोक्तकार्यात्पुरा ॥
अबाधि(ध्याहि)ताग्निशमने तु न रोपणं स्या-
त्कुत्रापि तत्करण आहितिरेव कार्या ।
अबाधि(न्वाहि)तेषु युगपत्प्रशमं गतेषु
व्यस्तोदये सति च नाहितकर्म कार्यम् ॥
दर्शादीष्टिषु तूपरीह मनुना शाखा च बर्हिस्तथा
सान्नाय्यादि च सादितं यदि पतेत् ब्रह्मप्रतिष्ठेति तत् ।
स्वस्थाने प्रणिधाय च स्रुवहुति ब्रह्मप्रतिष्ठेत्यृचा
कर्तव्या परिधिष्वपि प्रचलितेष्वेवं बुधाः कुर्वते ॥

**End:**

याम्याग्नेश्शमनोक्तचित्तकरणोचान्ते पराग्ने पुरा
पौरस्त्यानयने(च)पश्चिमगतं प्राग्वत्समुत्पादयेत् ।
तस्माद्याम्यपुरोगतौ(?) विरहतुस्याद्यामवह्नौ चतु-
र्होता ब्राह्मण एक इत्यपरगे प्राच्ये तु षड्ढोमकाम् (?)

**Colophon:**

इति श्रौतप्रयोगकारिका समाप्ता ॥

R. No. **3447.**

Paper. 10⅝ × 9⅜ inches. Foll. 176. Lines, 20 in a page. Malayalam. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Muṇḍōḷi Nārāyaṇa Nambiyār, Kaimūr village, Trichur, Cochin State.

Foll. 66*b*, 67 and 176*b* are left blank.

अष्टाङ्गहृदयव्याख्या—शशिलेखा.

AṢṬĀṄGAHṚDAYAVYĀKHYĀ : ŚAŚILEKHĀ.

A commentary on the Aṣṭāṅgahṛdaya, which work has been described under No. 13072 of the D.C.S. MSS., Vol. XXIII; by Indu.

Begins in the 141st stanzas of the Sūtrasthāna, and contains the Śārīrasthāna and Nidānasthāna complete.

**Beginning:**

वन्दे गिरीशं गिरिजासमेतं कैलासशैलेन्द्रगुहागृहस्थम् ।
अङ्के निषण्णेन विनायकेन स्कन्देन चात्यन्तसुखायमानम् ॥

आहारमुक्त्वा तत्संस्कारोपयोगित्वान्मिथ्याहारोद्भवरो(?) विष्यन्दीत्यादिना । पांसूत्थान्तानां सर्वेषां लवणानां सामान्यगुणः ।

* * * *

एवं स्नानादिना कृतेन शीघ्रं वपुषः कायस्य धाम तेजश्शुक्राख्यं पुनरेति । सुरक्षितं सुविहितमप्यन्नपानममात्रया सेवितमाहारो रोगाय मरणाय ह भवत्यतो मात्राप्रदर्शनार्थमध्यायं व्याख्यास्यामः मात्राशीनीत्यादिना ॥

* * * *

**Colophon:**

इति इन्दुविरचितायामष्टाङ्गहृदयव्याख्यायां शशिलेखायां त्रिंशोऽध्यायः ॥
इति सूत्रस्थानं समाप्तम् ॥

**End:**

अतीतसंवत्सरास्सन्तः प्रयत्नेनाप्युपचर्यमाणा दुस्साधा असाध्या एव वा भवेयुः । अतोऽवश्यमुपलक्षयेत् । आवृतानां वायूनामुपेक्षणाद्विद्रध्यादयो भवेयुः । अतो नोपेक्षेतेति ॥

**Colophon:**

इतीन्दुविरचितायामष्टाङ्गहृदयव्याख्यायां (शशिलेखायाम्) निदानस्थाने षोडशोऽध्यायः ॥

समाप्तं चेदं निदानस्थानम् ॥

## R. No. 3448.

Paper. 10¾ × 9⅜ inches. Foll. 148. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Rāmakṛṣṇarājaguru, Gaṅgāpuraśāsanam, Dharakota, Ganjam district.

नामनिर्मलदर्पणम्.

NĀMANIRMALADARPAṆAM.

A grammatical treatise written after the model of and in accordance with Pāṇini: by Lakṣmīdhara, son of Nṛsiṁhōdgātṛ, who lived in the Gaṅganārāyaṇa country (Puri).

Contains the Daśagaṇi portion in the Uttarakhaṇḍa.

**Beginning:**

तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर ।
यादृशोऽसि महादेव तादृशाय नमो नमः ॥
नमो गणेश विघ्नेश गिरिजानन्दन प्रभो ।
मम विघ्नं निहत्याशु सर्वसिद्धिप्रदो भव ॥
गङ्गानारायणे नाम्नि देशे श्रीपुरुषोत्तमे ।
वेदाङ्गविद्भिर्विप्रैश्च निवासं पूरिते पुरे ॥
परम्पराक्रमेणैव पितृभिः स्वकुलोद्भवैः ।
कुर्वता जातुकर्णस्य गोत्रोत्पन्नेन धीमता ॥
नृसिंहोद्गातृपुत्रेण लक्ष्मीधरद्विजन्मना ।
क्रियते बालबोधाय नामनिर्मलदर्पणम् ॥ त्रिभिः कुलकम् ।

प्रकृतिरित्यादि । सा वैयाकरणाभिमता आद्या प्रकृतिः प्रत्ययमवधार्य कृत्वा वा यः पूर्वमुपादीयते शब्दः सा प्रकृतिरिति वा । प्रकर्षेण नियमेनास्मात्प्रत्ययः क्रियते इति प्रकृतिरिति वा । भू-इत्यादि धातुः ।

* * * *

**Colophon:**

इति मिश्रप्रक्रिया भ्वादीनां समाप्ता ॥

**End:**

यथाहुः—

क्रियावाचित्वमाख्यातुमेकैकार्थो निदर्शितः ।
प्रयोगतोऽवगन्तव्या अनेकार्था हि धातवः ॥

सर्वेऽपि सूत्रव्याख्यानपक्षाः प्रामाणिकत्वादिष्टा ज्ञेयाः ॥

श्रीरामेत्यादि ॥

**Colophon:**

समाप्तोऽयं चुरादिगणः ॥

इति लक्ष्मीधरोद्गातृकृता (नाम)निर्मलदर्पणं नाम आख्यातपदा- व्याख्या समाप्ता ॥

The scribe adds—

नीलकण्ठाभिधानेन कविराजेन धीमता ।

लिखितं पुस्तकमिदं पुत्रस्याध्ययनेच्छया ॥

---

R. No. 3449.

**Paper.** 10⅜ × 9⅜ inches. Foll. 152. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Paiyūr Pattōri, Kunnamkulam post, Cochin State.

## अजिताव्याख्या—विजया.

## AJITĀVYĀKHYĀ : VIJAYĀ.

Same work as that described under R. No. 3278 ante. By Anantanārāyaṇa alias Ajitācārya.

Contains from the first Pāda of the first Adhyāya to the end of the fourth Adhyāya; but wants the beginning of the second Pāda and the end of the fourth Pāda. The name Nyāyapārāyaṇa, found in the heading of the MS., is apparently wrong.

---

R. No. 3450.

**Paper.** 10¼ × 2¼ inches. Foll. 72. Lines, 20 in a page. Dēvanāgarī and Malayalam. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Gōdavarmarājā, Chalūrkōvilakam, Chalūr.

## वास्तुविद्या, केरलव्याख्यासहिता.

## VĀSTUVIDYĀ WITH MALAYALAM MEANING.

A treatise dealing with the construction of houses and the minor matters connected with it, such as the kind of stone and other materials to be used. The text is accompanied by meaning in the Malayalam language.

Complete in 16 Adhyāyas.

Date of transcription—Tuesday, the 15th day of the solar month Mithuna in the Kollam year 982.

**Beginning:**

गजास्यमगजापुत्रं विघ्नाद्रिभिदुरं शिवम् ।
नमामि वचसां देवीं मन्दारकुसुमप्रभाम् ॥
प्रणम्य विश्वकर्माणं शिल्पिनां परमेश्वरम् ।
वास्तुविद्यां प्रवक्ष्यामि यथाशक्ति समासतः ॥ इति ।

* * * *

നത്വാ ഗുരും വിഘ്നരാജം വിശ്വകർമ്മാണമീശ്വരം |
താൽപര്യം വാസ്തുവിദ്യായാ ലിഖിതും തുനിയുന്നു ഞാൻ ||

വാസ്തുവിദ്യയാകുന്ന ഗ്രന്ഥത്തെ ചമപ്പാൻ തുടങ്ങുന്ന ആചാര്യൻ തന്റെ ഇഷ്ടദേവതാനമസ്കാരവും ചികീർഷിത പ്രതിജ്ഞയും ചെയ്യുന്നു.

* * * *

**Colophon:**

इति वास्तुविद्यायां साधनकथनं नाम प्रथमोऽध्यायः समाप्तः ॥

**End:**

एवं देवालयादौ च हाटकादिभिरेव वा ।
स्वर्णादिलोहमानं तु ज्ञेयं द्रव्यानुसारतः ॥

* * * *

**Colophon:**

इति वास्तुविद्यायां षोडशोऽध्यायः समाप्तः ॥

---

## R. No. 3451.

Paper. 10¾ × 9¼ inches. Foll. 194. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of the Sanskrit College Library, Tiruppaṇattura, Cochin State.

प्रपञ्चसारार्थदीपः.

**PRAPAÑCASĀRĀRTHADĪPAḤ.**

A commentary on Śaṅkarācārya's Prapañcasāra, which work has been described under No. 7939 of the D.C.S. MSS., Vol. XV: by Nārāyaṇa, disciple of Ānandaśaila.

Contains the Paṭalas 1—20 only.

**Beginning:**

सकलविश्वसमुद्भवपालनक्षयतिरस्कृतिमुक्तिविधायिनी ।
हरतु मूर्तिरघानि शिवस्य मे हिमकरोष्णकराग्निदृगश्चिता ॥

* * * *

योऽयं पुनस्समवतीर्य धरातलेऽस्मिन्
गौरीपतिः करुणया विपुलान् प्रपञ्चान् ।
सङ्कृह्य सारमकरोन्मनुतन्त्रमीक्ष्यं
तं भावयामि भगवच्चरणं दधानम् ॥
काले शिवः क्रमवशान्(त्) कलिदोषदुष्टे
यत्सम्प्रदायरहितं तदपेक्ष्य भूयः ।
क्षोण्यामवातरदशेषजगद्धितार्थी
श्रीशङ्कराख्यममलं गुरुमाश्रये तम् ॥
यस्य भ्राजद्विमलयशसो मोक्षलक्ष्म्याः पराया
नाम्नैवाशु प्रवरमुनयः पात्रतां यान्ति तस्य ।
वाणीं श्रीमद्वदनकमले बिभ्रतस्स्वच्छमूर्ते-
रानन्दाद्रेश्चरणकमलद्वन्द्वलक्ष्मीं भजेऽहम् ॥

तत्सौरभानन्दितचञ्चरीको विशिष्टतन्त्राणि मुहुर्विलोक्य ।
प्रपञ्चसारस्य विवक्षितार्थं प्रदर्शयन्तीं कृतिमातनोति ॥

इह खलु निखिलाम्नायार्थसारभूतं प्रपञ्चसारं चिकीर्षुर्भगवानाचार्यः प्रारिप्सितपरिसमाप्तिमत्यूहविध्वंसनविषये स्वरससंवित्स्वरूपपरदेवतानुस्मृति-पूर्वकमाशीर्वादलक्षणमङ्गलाचरणमुखतस्सं . . . विषयादिचतुष्टयमपि सूचयति—अकचटतपयाद्यैरिति । शारदा वश्श्रेतसः परिशुद्धिं वितरत्विति सम्बन्धः । सा हि सकलवर्णपरिकल्पितदिव्यदेहेत्याह—पूर्वार्धेन । निमित्तोपादानादीनामभेददर्शनादन्योपादानमिति शङ्कामपाकरोति—विश्वयोनिरिति ।

* * * *

**Colophon:**

आनन्दशैलचरणाम्बुजषट्पदेन
नारायणेन रचिते रुचिरेऽर्थदीपे ।
गीर्वाणशाखिनि समस्तसमीहितानां
सम्पूर्ण एष पटलः प्रथमो यथावत् ॥

**End :**

निगदितक्रमाराधकेन स्तुतिरपि जप्येत्याह—एषां योगविधीनामिति । तामेव दर्शयति—प्रसीदेति । एवमर्चनाद्यैः विष्णुं भजन्मर्त्यो विष्णुरेव भवेदित्युपसंहरति—इति हवनेति ।

**Colophon :**

आनन्दशैलचरणाम्बुजषट्पदेन
नारायणेन रचिते रुचिरेऽर्थदीपे ।
गीर्वाणशाखिनि समस्तसमीहितानां
युक्तेन विंशतिरयं(तमः) पटलस्समाप्तः ॥

विंश[ति]पटलस्समाप्तः ॥

---

## R. No. 3452.

Paper. 10⅞ × 9⅞ inches. Foll. 816. Lines, 20 in a page. Telugu. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. S. P. V. Narasimhasvāmi, Vizagapatam.

Bound in three volumes.

### नामलिङ्गानुशासनम्, सव्याख्यम्.
### NĀMALIṄGĀNUŚĀSANAM WITH COMMENTARY.

A commentary on the Nāmaliṅgānuśāsana, which work has been described under No. 1620 of the D.C.S. MSS., Vol. III : by Bṛhaspati alias Śrīrāmamakuṭamaṇi.

Breaks off in the III Kāṇḍa (ending with the words परिपणो वणिजां मूलधनम् ).

**Beginning :**

अध्यास्ते यस्सर्वं ध्रुव ईश्वर इत्यगोचरो वचसः ।
अहमिति संविद्विषयः पुरुषः स परः पुरातनो जयति ॥

अभीष्टदेवतानमस्काराद्युपनीतमदृष्टं हि विघ्नापरनामकसाध्यप्रतिबन्धकाधर्मतिरोधानद्वारा प्रारिप्सितं परिसमापयतीति प्रामाणिकं मतम् । अतो निष्प्रत्यूहप्रारिप्सितपरिसमाप्तिहेतुविशिष्टदेवतासङ्कीर्तनाद्विशिष्टादृष्टमुत्पिपादयिषुर्ग्रन्थकारः प्रथमं नमस्कारश्लोकं निबबन्ध—यस्य ज्ञानदयासिन्धोरिति ।

* * * *

उक्तं स्वर्व्योमदिक्कालधीशब्दादिस(वाकृछब्दादि) नाट्यकम् ।
पातालभोगिनरकवारि चैषां हि सङ्गमम् ॥

उक्तवर्गान् सङ्ग्रहश्लोकेनोपसंहरति—उक्तमित्यादिना ॥

* * * *

**Colophon:**

इति महन्तापनीयचक्रवर्तिराजपण्डितश्रीराममुकुटमणिकृतायां टीकायाममरसिंहस्य प्रथमः काण्डः ॥

**Colophon:**

इति शूद्रवर्गविवरणं समाप्तम् ॥

**End:**

इति महिलायनीयकहि(वि)चक्रवर्तिराजपण्डितसार्वभौमकविपण्डितचूडामणिमहाचार्यमुकुटमणिश्रीमद्बृहस्पतिकृतायाममरकोशपञ्जिकायां पदचन्द्रिकाख्यायां भूम्यादिकाण्डो द्वितीयः ॥

विशेष्यलिङ्गै(निघ्नैः)स्सङ्कीर्णैर्नानार्थैरव्ययैरपि ।
लिङ्गादिसङ्ग्रहैर्वर्गाः सामान्ये वर्ग[सर्ग]संश्रयाः ॥

वक्ष्यमाणेऽत्र सामान्ये सामान्यकाण्डे विशेष्यनिघ्नादिभिः पञ्चभिः वर्गा वक्ष्यन्ते । ते च न स्वतन्त्राः; किं तु वर्गाः । पूर्वोक्तस्स्वर्गादिवर्गः संश्रयः आश्रयो येषां तादृशाः ।

* * * *

स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च ।

स्त्रीकट्यां वस्त्रबन्धः स्त्रीकटीवस्त्रबन्धः तत्र ॥ परिपणो वणिजां मूलधनम्.

---

R. No. **3453.**

Paper. 10¾ × 9¾ inches. Foll. 164. Lines, 20 in a page. **Dêvanâgarî.** Good.

Transcribed in 1920–21 from a **MS.** of the **Naduvil-Matham,** Trichur, Cochin State.

Fol. 164 is left blank.

**इष्टसिद्धिः.**
**ISTASIDDHIH.**

A standard work, rare and old, in Advaita-Vēdānta, dealing with the fundamentals of Advaita, more especially with the doctrine of Avidyā: by Vimuktātman, disciple of Avyayātman. The work is referred to in the Advaitasiddhi.

Complete in eight Adhyāyas.

**Beginning:**

यानुभूतिरजामेयानन्तात्मानन्दविग्रहा ।
महदादिजगन्मायाचित्रभित्ति नमामि ताम् ॥
इष्टानिष्टाप्तिहानीच्छोस्तत्सिद्धिर्यद्दृशा श्रुतेः ।
तन्मानत्वेष्टसिद्ध्यर्थं विवृणोम्यात्मसन्दृशे ॥

येति । स्वतस्सिद्धतां द्योतयति अनुभूतेरनुभाव्यत्वे घटादिवदननुभूतित्वप्रसङ्गात् । न च स्वतस्सिद्धस्य प्रागभावादयः स्वतोऽन्यतो वा सिध्यन्ति । अतोऽजा अतोऽस्या नान्येऽपि भावविकाराः । जन्मादित्वाद्येषां चैत्यानां च न चिद्धर्मत्वं रूपादिवत् अतोऽमेया । नास्यामेयो धर्मोऽप्यस्तीत्यर्थः । अतोऽनन्ता । अनन्तस्यापि मेयत्वेऽतद्धर्मत्वात् ।

* * * *

आत्मैव सम्यक् प्रमाणवस्तु नान्यत् किंचिदपि स्थितम् ।

**Colophon:**

इति श्रीमदव्ययात्मभगवत्पूज्यपादशिष्यस्य विमुक्तात्मभगवतः कृताविष्टसिद्धौ प्रथमोऽध्यायः समाप्तः ॥

**End:**

आत्मैको निष्क्रियोऽनन्तोऽद्वयोऽनुभवविग्रहः ।
अतमस्तत्र आत्मस्थो ज्योतिषां ज्योतिरात्म(त्म)भाः ॥
सर्वेष्टः परमानन्दो वेदान्तात्मप्रमाणकः ।
इत्येषोऽर्थो विशेषेण मयेष्टो वेदविन्मतः ॥
अर्थश्चायमनिर्वाच्यो(च्या) यद्यविद्या भासयति ।
व्यचीचरमविद्यां तामत इष्टार्थसिद्धये ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीमदव्ययात्मभगवत्पूज्यपादशिष्यस्य विमुक्तात्मभगवतः कृताविष्टसिद्धावष्टमोऽध्यायः समाप्तः ॥

समाप्तोऽयं ग्रन्थः ॥

R. No. 3454.

**Paper.** $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 125. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. C. Vāsudēva Sōmayājippāḍ, Vilayūr, Pattambi.

(*a*) अवन्तिसुन्दरीकथा.

AVANTISUNDARĪKATHĀ.

Foll. 1*a*—25*b*. Foll. 5*b* and 9*b* are left blank.

A very small fragment in prose of unknown authorship, apparently describing the story of the Daśakumāracarita ascribed to Daṇḍin. For further details about the work see the Peripatetic Party's Report for 1916–17 to 1918–19.

Incomplete.

**Beginning:**

हिरण्यगर्भमीशानमाद्यं पुरुषं हरिम् ।
त्रीनप्यसत्यनानात्वान् वन्दे विश्वशरीरिणः ॥
ह्यो रामायणं नाम यन्मुखान्मधु नि(स्सृतम्) ।
. . . . . . . . . . . . . . . . . . . . ॥
. . . . . . ष चैतन्यं महाभारतविद्यया ।
अर्पयामास तत्पूर्वं यस्तस्मै मुनये नमः ॥
बभूव जिह्वाभिनयः कवीनां यदनुग्रहात् ।
अनुशासितृशब्दानां तन्नमामि . . : . ॥
. . . . . . . . . . . . . . . वराः ॥
येषां जगत्त्रयालेख्यविचित्रा(:)चित्रभित्तयः ।
सुबन्धुः किल निष्क्रान्तो बिन्दुसारस्य बन्धनात् ॥
तस्यैव हृदयं बद्ध्वा वत्स . . . . . . . ।
. . . . . . . . . . . तमानवदेवया ॥
गोमुखान्वितया जातिः का बृहत्कथयोज्झिता ।
स नारायणदत्ताया देवदत्ताश्रया कृतिः ।
मूलदेवोदित . . . . . . . . . . . . . ॥
(शू)द्रकेणासकृज्जित्वा स्वच्छया खड्गधारया ।

जगद्भूयोऽप्यवष्टब्धं वाचा स्वचरितार्थया ।
अप्यतिक्रम्य लोकस्य श्रुतिवर्त्मनि . . . ॥
सुविभक्तमुखाद्यङ्गैर्व्यक्तलक्षणवृत्तिभिः ।
परेतोऽपि स्थितो भासश्शरीरैरिव नाटकैः ।
राज्ञा श्रीसर्वसेन . . . . . . . . . . ॥
. . . . . . . . . . . . ता विजयं हरेः ।
सेतुरूपेण तिष्ठन्तो लोके सद्वस्तुदर्शिनः ॥
षट्पञ्चाशत्प्रमाणत्वं गता नः कविपुङ्गवाः ।
स्वय . . . . . . . . . . . . . . . . ।
. . . . . . . . . क्रियान् भारोऽवगच्छतः ॥
लिप्ता मधुद्रवेणासन् यस्य नि . वगा गिरः ।
तेनेदं वर्त्म वैदर्भं कालिदासेन शोधितम् ॥
चक्षु . . . . . . . . . . . . . . . . ।
व्याप्तुं पदत्रयेणापि यश्शक्तो भुवनत्रयम् ।
तस्य काव्यत्रयव्याप्तौ चित्रं नारायणस्य किम् ॥
सर्वतोमुखमप्याद्यं कविम . . . . . ।
. . हस्तोऽप्यनुन्मत्तः कवीनां चक्रवर्तिनः ।
भिन्नस्तीक्ष्णमुखेनापि चित्रं बाणेन निर्व्यथः ॥
व्याहारेषु जहौ लीलां न म . . . . . . . ।

* * * *

नितम्बिनीकदम्बकनितम्बबिम्बप्रलम्बितमञ्जुशिञ्जानकाञ्चीदामा काञ्चीपुरी नाम राजधानी । यया सह

* * *

रोहिणीव बुधभावनस्यारुन्धतीव शक्तिगुरोरमुष्योऽपि वल्लभा देवी वसुमती नाम ।

**End:**

तं हतशेषं सार्थमादाय चे(चैते) नैव तस्याः क्षेमप्राप्तं प्रहारवर्माणमकथयदिमं च बालकमदु(नु)पलभ्य दुहितुरस्यापि

Transcribed in 1920–21 from a MS. of M.R.Ry. K. V. Paramēśvaravādyār Nambūdiri, Achipura, Kottakkal, South Malabar district.

(b) अवन्तिसुन्दरीकथासारः.

AVANTISUNDARĪKATHĀSĀRAḤ.

Foll. 26a–124a. Foll. 124b and 125 are left blank.

A narration in verse of unknown authorship of the **Avantisundarī katha**, which work has been described under sub division (a) of this number.

Incomplete.

**Beginning:**

वन्दे मन्दाकिनीवारिमकरन्दपरिप्लुतम् ।
सानन्दसुरनेत्रालि मुकुन्दपदपङ्कजम् ॥

* * * *

जयत्यखिलसम्प्राप(त्माप्य)रत्नराशिसमुद्भवः ।
भारतामृतसम्भूतिः पाराशर्यपयोनिधिः ॥

* * * *

कविताभुत्सहे वोढुमहो मोहपरम्परा ॥
सत्कथाकथनप्रीत्या तथापि कथयाम्यहम् ।
कथामवन्तिसुन्दर्याः कथामनतिविस्तराम् ॥

अस्ति प्रासादविस्तारग्रस्तव्योमान्तरा पुरी ।
काञ्चीपुराख्या कल्याणी ककुभा कुम्भजन्मनः ॥

यातत्यविगलद्भोगैरसङ्ख्यवसुभिर्जनैः ।
भोगवत्यमरावत्योर्न्यक्कुर्वाणेव गर्विता ॥

तस्यां जज्ञे बुधव्रातध्वस्ताखिलविपल्लवः ।
पल्लवेषु महीपालसिंहविष्णुरिति श्रुतः ॥

* * * *

देवस्त्वनुगृहीतोऽस्मि श्रूयतामवधानतः ।
अस्त्यानन्दपुरं नाम प्रदेशे पश्चिमोत्तरे ॥

आर्यदेशशिखारत्नं तत्रासन् बहवो नृपाः ।
ततोऽभिनिरसृता काचित्कौशिकी ब्रह्मसन्ततिः ॥

* * * *

अस्यां नारायणस्वामिनाम्ना नारायणोदरात् ।
दामोदर इति श्रीमानादिव . . वाभवत् ॥
स मेधावी कविर्विद्वान् भारवि:(विं) प्रभवं गिराम् ।
अनुरुध्याकरोन्मैत्रीं नरेन्द्रो विष्णुवर्धनीम् ॥

* * * *

वहतः पैतृकीं वृत्तिं तस्यासीत्तनयत्रयम् ।
मनोरथाह्वयस्तेषां मध्यमो वंशवर्धनः ॥
ततस्तनूजाश्चत्वारस्तस्य वेदा इवाभवन् ।
श्रीवीरदत्त इत्येषामुत्तमस्तत्त्ववेदिनाम् ॥
यवीयानस्य च श्लाघ्या गौरी नामाभवत्प्रिया ।
ततः कथंचित्सा गौरी द्विजाधिपशिखामणेः ॥
कुमारं दण्डिनामानं व्यक्तशक्तिमजीजनत् ।
स बाल एव मात्रा च पित्रा चापि व्ययुज्यत ॥

* * * *

अस्मिन् विज्ञाप्यमस्माकमनुग्राह्योऽस्मि यद्यहम् ।
प्रार्थनां वितथीकर्तुं प्रभवो न भवादृशाः ॥
महामल्लपुरे देवः स्वैरं वारिधिसन्निधौ ।
आस्ते मुकुन्दस्सानन्दं फणीन्द्र इव मन्दिरे ॥
भग्नः केनापि तस्यासीत्कारणेन मुरद्विषः ।
मणिबन्धो महाबाहुः स मया सन्धितोऽधुना ॥
तदालोकितुमर्हन्ति भवन्तः साधु वा न वा ।
एतावता प्रयासेन प्रसादातिशयोऽस्तु नः ॥

* * *

मित्राणि मातृदत्ताद्याः केरलेभ्यो द्विजोत्तमाः ।
त्वद्दर्शनार्थमायातास्तस्मिन् सन्निदधत्यमी ॥

* * * *

पृथुकान्तिमवन्तिसुन्दरीति प्रथितां विक्रमरक्तराजहंसाम् ।
सरसां रहसि प्रियामिवार्द्रामुपलेभे पुरुषोत्तमप्रसादात् ॥
मुक्त्वा शय्यां मिलितपुलकव्रातमुत्थाय भूयः
प्राप्तानन्दो . रतिसमये प्राप्त . नां क्रियाणाम् ।

स प्रारेभे सपदि सकलां स्वमलब्धां सुहृद्भ्यः
शुश्रूषुभ्यः पृथुमदकथां विस्तरेणाभिधातुम् ॥

**Colophon:**

इत्यवन्तिसुन्दरीकथासारे प्रथमः परिच्छेदः ॥

**End:**

इत्येनां तदनु विसृज्य सोपचारं
यत्रास्य प्रियजनदर्शनोत्सवोऽभूत् ।
आनन्दस्तिमितमना विनोदनार्थी
तं देशं ससुहृदुपाययौ कुमारम्(:) ॥

**Colophon:**

इत्यवन्तिसुन्दरीकथासारे षष्ठः परिच्छेदः ॥

अथालोक्य द्विजं कंचित्प्रद्वारे देवमन्दिरे ।
सज्जं प्रायोपवेशाय प्राप्यैनं नाम पृच्छतः ॥
अकस्मात्किमयं कापरत्यक्तात्मं को भवानिति ।
पृष्टः प्रायोपविष्टाभ्यां ताभ्यां भूतार्थमभ्यधात् ॥
अग्रहारोऽस्त्यगस्त्याशाभूषणं चोलभूमिषु ।
व्याघ्रग्रामाह्वयस्सोऽयं तद्देशाभिजनो जनः ॥
विप्रो विद्येश्वराभिख्यो . . . . कृतोऽप्यहम् ।

. . . .

चिन्तामयेन म्रियते पुरायमित्येवमेनामपि पारियात्रः ।
कुर्याममित्रान्ततयेति मत्वा तां मत्तकालाय निनाय कन्याम् ॥

---

R. No. 3455.

Paper. 10⅜ × 9⅝ inches. Foll. 142. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920–21 from a MS. of M.R.Ry. Mānavikrama Anujan Kuññuṇṇirāja (third Rāja), Padiññārekōvilakam, Calicut, Malabar district.

Fol. 142*b* is left blank.

बृहज्जातकम् , सव्याख्यानम्.

BṚHAJJĀTAKAM WITH COMMENTARY.

Same work as that described under R. No. 2806 ante, wherein see for the beginning. This commentary is also called Naukā.

Contains the Adhyāyas 4—23 complete and the 24th incomplete.

**End:**

लग्ने चतुर्थे षष्ठे सप्तमे अष्टमे दशमे वा स्थिते सति शेषा ग्रहा बलहीनाश्चेत् मोक्षः स्यादित्यर्थः ॥

**Colophon:**

इति होराविवरणे निर्याणाध्याये त्रयोविंशः ॥

विज्ञानजन्मसमयानां तात्कालिकलग्नग्रहस्थितिवशेन जननादिनिर्याणान्तसमयसम्भवफलविशेषफलानि प्रदर्श्येदानीमविज्ञातजन्मनां विपृच्छानां(च्छतां) इष्टजातकवल्लक्षणकथनाय तदुपादानभूतनष्टजातकज्ञानोपायप्रदर्शनमारभ्यते चतुर्विंशाध्यायेन । तत्र प्रथमं तदितिकर्तव्य(ता)माह—

आधानजन्मापरिबोधकाले संपृच्छतां जन्मपदे विलग्नात् ।
पूर्वापरार्धे भवनस्य विद्यात्भानावुदग्दक्षिणगे प्रसूतिम् ॥ इति ।

* * * *

चित्रादितारकाद्वन्द्वं यदा पूर्णेन्दुसंयुतम् ।
तदा चैत्रादयो मासाः त्रिभिष्षष्ठान्त्यसप्तमाः ॥ इति ।

प्रश्नकालचन्द्रे नवभिर्गुणिते नवांशराशिस्फुटं भवति । तत्र यन्नक्षत्रं वर्तते ।

---

R. No. 3456.

Paper. 10¾ × 9¼ inches. Foll. 188. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of the Samsthānam Library, Bobbili.

Foll. 147*b*, 170, 171*b*, 187 and 188 are left blank.

पाञ्चरात्रम्.

PAÑCARĀTRAM.

Foll. 1*a*—186*a*.

A treatise in the Pañcarātrāgama dealing with the following subjects:—

I. शिवरात्रम्.

१. तिथियागवर्णनम्.
२. मन्त्रलक्षणवर्णनम्.
३. मन्त्रवादवर्णनम्.
४. भूतविद्यावर्णनम्.
५. हविर्निवेदनवर्णनम्.
६. पुष्पकथनम्.
७ पत्रभेदवर्णनम्.
८. स्नपनविधिवर्णनम्.
९. उत्सवाध्यायवर्णनम्.
१०. मण्डलविधिवर्णनम्.

II. ऋषिरात्रम्.

१. कालाध्यायवर्णनम्.
२. मुद्राध्यायवर्णनम्.
३. योगाध्यायवर्णनम्.
४. तपोऽध्यायवर्णनम्.
५. पुष्पयागवर्णनम्.
६. बलिदानवर्णनम्.
७. मन्त्रर्षिच्छन्दोविधिः.
८. प्रायश्चित्तविधिः.
९. ब्रह्मकूर्चविधिः.
१०. आयुधलक्षणवर्णनम्.
११. Do.

III. इन्द्ररात्रम्.

१. पूरणाध्यायः.
२. मन्त्रोद्धारः.
३. पुराणाध्यायः.
४. यागविधिः.
५. परिवाराध्यायः.
६ विश्वेश्वरोत्पत्तिः.
७. विष्णुलोकविस्तारः.
८. शिष्यलक्षणम्.
९. आचार्यलक्षणवर्णनम्.

IV. ब्रह्मरात्रम्.

५. आचारविधिः.
६. प्रतिष्ठाविधिः:
७. प्रतिमाविधिः.
८. मातादविधिः.
९. अर्चनाविधिः.
१०. दानविधिः.
११. मन्त्रकोशवर्णनम्.

Contains the Śivarātra, Ṛṣirātra, Indrarātra and Brahmarātra.

**Beginning:**

श्रीसनत्कुमार उवाच —

शिवरात्रं प्रवक्ष्यामि यथाह भगवाञ्छिवः ।
तिथियागादि सर्वं तु समासोक्त्या ब्रवीमि तम् ॥

याः पञ्चदश संप्रोक्तास्तिथयश्शुक्ललक्षणाः ।
तासु योगो यथायोग वह्न्यादीनां मयोच्यते ॥
वह्नेरायतनं कुर्यात् वह्नेस्स्थाने विचक्षणः ।
प(प्र)त्यग्द्वारं तथेशाने नान्यत्र तु कथंचन ॥

* * * *

कुर्यात्सर्वप्रयत्नेन मण्डलानि स्वशक्तितः ।
शिवरात्रमिति प्रोक्तमिन्द्ररात्रं ततः परम् ॥

इति शिवरात्रम् ।

**Colophon :**

इति श्रीपाञ्चरात्रे महासंहितायां सनत्कुमारप्रोक्तायां दशसहस्रिकायां शिवरात्रे मण्डलाध्यायो नाम दशमस्सर्गः(अध्यायः) समाप्तः ॥

* * * *

तस्मात्सर्वप्रयत्नेन व्रतेनानेन दीक्षयेत् ।
ऋषिरात्रमिति प्रोक्तं . . . . . . . . . ॥

**Colophon :**

इति श्रीसनत्कुमारप्रोक्ते पाञ्चरात्रे महासंहितायामृषिरात्रे आयुधलक्षणं नाम एकादशोऽध्यायः ॥

ऋषिरात्रं च समाप्तम् ॥

* * * *

मण्डलं दर्शयेच्छिष्यः तस्मान्मण्डललक्षणम् ।
अधिवासक्रियां कृत्वा लिखित्वा चक्रमण्डलम् ॥
. . . . क्रमात्कृत्वा कृत्वा चाग्निं यथाविधि ।
या दीक्षा विधिवत्प्रोक्ता सा दीक्षेति प्रशस्यते ॥
चतुर्विधेषु यागेषु पूर्वो . . . . . . . ।
शुभं भवेच्च शिष्याणां शुभहस्तस्स उच्यते ॥

**Colophon :**

इन्द्ररात्रे आचार्यलक्षणं नाम नवमोऽध्यायस्समाप्तः ॥

**End :**

प्रणवाद्यन्तरूपाश्च सर्वतो मन्त्रसाधकाः
ब्रह्मरात्रं मया प्रोक्तमेतत्सर्वं समासतः ॥

एतद्यशस्यमायुष्यं स्वर्ग्यं धन्यं महाबलम् ।
ब्रह्मणा कथितं पूर्वं श्रुत्वा नारायणात्प्रभुः ॥
तत्प्रसादस्त . . . शिवरात्रमतः परम् ।

**Colophon:**

इति श्रीब्रह्मरात्रे पाञ्चरात्रसारभूते मन्त्रकोशो नाम एकादशोऽध्यायः ॥
ब्रह्मरात्रं सम्पूर्णम् ॥

Fol. 186*b* contains a small portion of the first Adhyaya in Śivarātra.

---

R. No. 3457.

Paper. 10⅜ × 9½ inches. Foll. 130. Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Nārāyaṇa Nambūdiri, Kaimmukku mana, Pudukkadu post, Cochin State.

(*a*) बोधायनश्रौतप्रयोगः.
BŌDHĀYANAŚRAUTAPRAYŌGAḤ.

Foll. 1*a*—96*b*. Fol. 76*b* is left blank.

On the procedure relating to the performance of the sacrificial rituals as described in the Bōdhāyanaśrautasūtras. The commentator, whose name is not given, salutes Bhavasvāmin and others.

Incomplete.

**Beginning:**

यदाननाब्जरसनाकर्णिकारङ्गरागिणी ।
वाग्देवता नरीनर्त्ति पितरं नौमि तं गुरुम् ॥
यदाननाम्भोरुहरङ्गशालान् प्रीत्या नरीनर्त्ति सदाङ्गहद्याः ? ।
कल्पाख्यकल्पद्रुमसम्प्रणेतॄन् बोधायनाख्यान् प्रणमामि मूर्ध्ना ॥
गभीरतत्त्वार्थविदो भवस्वामिमुखान् गुरून् ।
नत्वाग्निकप्रयोगोऽपि यथामति निरुच्यते ॥
पूर्ववृत्तीस्समुच्चित्य सम्प्रदायानुसारतः ।
अग्निर्विकल्प्यते ज्योतिष्टोमे प्राथमिकेऽपि च ॥
* * * *
अतस्स्थलविशे(षो)ऽत्र श्येनाद्याकृतिको मतः ।
अग्निशब्देन तत्रादौ विधेयस्स्येन उच्यते ॥

चतुरश्रा च वक्रा च सा तु श्येनाकृतिर्द्विधा ।
तत्रादौ विहितस्यास्य चतुरश्राकृतीरिह ॥

**End**:

अथ यूपमुपतिष्ठते—आशासान (. . .) तिष्ठतेति । अथ यज्ञायुधानि नैत्यकानि सङ्गृह्य प्रत्यग्गत्वा यजमानगार्हपत्यान्वाहार्याहवनीयमिलने क्रमेण समुप्य(ह्य) स्वस्थाने निधायोद्धननादिक्रमेण पशुसंस्पर्शपातमुष्णोदके सम्यक् प्रक्षालयेत् ।

---

(*b*) काण्वायनधर्मशास्त्रम्.

KAṆVĀYANADHARMAŚĀSTRAM.

Foll. 97*a*—98*a*.

A treatise in Dharmaśāstra describing the duties of the four Āśramas: by Kaṇva.

Complete.

**Beginning**:

काण्वायनकृतं चातुराश्रमधर्मं व्याख्यास्यामः—

ब्रह्मचारिगृहस्थवानप्रस्थपरिव्राजकाश्चत्वार आश्रमा भवन्ति । तत्र ब्रह्मचारिणो नाम चतुर्विधा भवन्ति—गायत्रं, ब्राह्मं, प्राजापत्यं, बृहदिति । तत्र गायत्रं नाम मधुमांसभक्षणादिवर्जितम् ।

**End**:

यतीनामुपशमो नित्यनियमोपवासनादानमेव गृहस्थानां शुश्रूषा चारिणामुपपन्नमात्राहाराश्चातुर्वर्ण्यभैक्षचर्यां चरन्त आत्मानं प्रार्थयन्त आत्मानं प्रार्थयन्ते ॥

**Colophon**:

इति काण्वायनं धर्मशास्त्रं समाप्तम् ॥

---

(*c*) शाण्डिल्यधर्मशास्त्रम्.

ŚĀṆḌILYADHARMAŚĀSTRAM.

Foll. 98*a*—103*b*.

Deals with the following topics:—

१. गर्भाधानादिसंस्कारकथनम्.
२. ब्रह्मचारिधर्मकथनम्.
३. गृहस्थविहितधर्मकथनम्.
४. गृहस्थनिषिद्धधर्मकथनम्.
५. वर्णधर्मकथनम्.
६. देहशोधनसावित्रीजपादिकथनम्.
७. चतुर्वर्णदोषकथनम्.

Complete in seven Adhyāyas.

**Beginning:**

गङ्गातीरे समासीनं शाण्डिल्यमृषिसत्तमम् ।
वेदवेदाङ्गतत्त्वज्ञं सर्वधर्मभृतां वरम् ॥
ऋषयस्तं प्रपद्याथ ते नत्वेदमथाब्रुवन् ।
भगवन् धर्मानाचक्ष्व त्वत्तस्सर्वानशेषतः ॥
श्रुत्वा ज्ञातुं वयं सर्वे काङ्क्षामो द्विजसत्तमान् ।
प्रत्युवाच च शाण्डिल्यः शृणुध्वं मुनिसत्तमाः ! ॥
कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
तत्र धर्मान् प्रपद्येत ब्राह्मणाद्या द्विजातयः ॥
ऋतौ हि गर्भस्याधानं पुंसस्सवनं तत्रिमासिके ।
षष्ठेऽष्टमे वा सीमन्तो जातकर्म च ।
दशमे द्वादशे वापि नामकर्म शिशोर्भवेत् ॥

* * * *

**Colophon:**

इति शाण्डिल्ये धर्मशास्त्रे प्रथमोऽध्यायः ॥

**End:**

यद्वा तद्वा स्वकीयेषु धर्मेष्वेव व्यवस्थिताः ।
अमृतत्वं हि ते यान्ति ब्राह्मणास्स्वात्म शाश्वतम् ॥
धर्मशास्त्रमिदं पुण्यं शाण्डिल्येन सुभाषितम् ।
यः पठेद्ब्राह्मणश्रेष्ठो ब्रह्मसायुज्यमश्नुते ॥

**Colophon:**

इति शाण्डिल्ये सप्तमोऽध्यायः ॥
समाप्तं चेदम् ॥

---

(*d*) सुमन्तुस्मृतिः.

SUMANTUSMṚTIḤ.

Foll. 103*b*—106*a*.

A treatise in Dharmaśāstra narrating briefly the duties of the four castes with expiatory ceremonies for certain wrong acts. It is attributed to Sumantu.

Complete.

**Beginning:**

अथातस्सुमन्त्र न्तु)धर्मं व्याख्यास्यामः—

धर्मज्ञसमयः प्रमाणं वेदाश्च । वेदवेदाङ्गेतिहासपुराणकुलगणजातिदेश-पाषण्डाश्रमश्रोत्रियधर्मकर्मव्यवस्थाप्रवर्तकानामेतेषां तु धर्मकर्मव्यभिचारात् संस्कारो न भवति । तस्मात्तन्निवृत्त्यर्थमिदं शास्त्रं व्याख्यास्यामः ब्राह्मणक्षत्रिय-वैश्यानां प्रवृत्तिका(मा)नां गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणोपनि-ष्क्रामणान्नप्राशनचौलोपनयनव्रतचर्याध्ययनसमावर्तनविवाहयज्ञदानादीनि यज-नयाजनाध्यापन(द)प्रदानप्रतिग्रहं चेति ब्राह्मणवृत्तिः ।

**End**

चान्द्रायणं वयश्शरीरकर्मबलाद्यपेक्ष्य प्रायश्चित्तानि विदध्यात् । एवं कुर्वाणो ब्रह्मणस्सायुज्यं गच्छति सुमन्तोरि(ति) सुमन्तोरिति ॥

**Colophon:**

इति सुमन्तुस्मृतिस्समाप्ता ॥

---

(e) माण्डव्यधर्मशास्त्रम्.

MĀṆḌAVYADHARMAŚĀSTRAM.

Foll. 106a—111b.

A treatise in Dharmaśāstra describing the duties of the four Āśramas, the nature and kinds of pollutions, the different kinds of gifts and certain religious rites and expiatory ceremonies, etc.

Contains the Adhyāyas 1, 2 and 7—12 complete. Adhyāyas 3—6 are wanting.

**Beginning:**

उत्तरे जाह्नवीतीरे पारायणः स्यात् पुरा खलु ? ।
माण्डव्योऽथ ऋषिश्रेष्ठस्तेजसा चित्रभानुवत् ॥
विराजन्तं भृगोर्वंशे जातं द्विजवरं प्रभुम् ।
गत्वा महर्षयस्सर्वे परितोषमनस्विनः ॥
भगवन्नखिलं धर्मं श्रोतुमिच्छामहे वयम् ।
इति विज्ञाप्य प्रणामं कृत्वा तस्यर्षेः पुरतस्तदा ? ॥
तानुवाच ऋषीन् सर्वान् माण्डव्यः प्रीतिसंयुतः ।
धर्मान् सर्वान् प्रवक्ष्यामि शृणुध्वं मुनिसत्तमाः ! ॥
आश्रमाणां तु सर्वेषां गृहस्थाश्रममुत्तमम् ।
त्रयाणामाश्रमाणां तु गृहस्थो योनिरुच्यते ॥

* * * *

**Colophon:**

इति माण्डव्ये धर्मशास्त्रे प्रथमोऽध्यायः ॥

**End:**

आत्मवत्सर्वभूतेषु अनुग्रहपरो भवेत् ।
एतद्वाभिहितं सर्वमृषयस्तत्त्वतश्शुभम् ॥
धर्मशास्त्रमिदं श्रेष्ठं माण्डव्येन तु भाषितम् ।
यः पठेद्ब्राह्मणश्रेष्ठो ब्रह्मसायुज्यमश्नुते ॥

**Colophon:**

इति माण्डव्ये धर्मशास्त्रे द्वादशोऽध्यायः ॥

माण्डव्यीयधर्मशास्त्रं समाप्तम् ॥

---

(*f*) पितामहधर्मशास्त्रम्.
PITĀMAHADHARMAŚĀSTRAM.

Foll. 112*a*—116*b*.

Deals with the procedure to be adopted in cases where there are no witnesses to testify to the truth or oth rwise of a transaction, when there is a dispute between two parties.

Complete.

**Beginning:**

पितामहं समागम्य पर्यपृच्छत भार्गवः ।
भगवन् ब्रूहि तत्त्वेन संशयोऽत्र महान् मम ॥
यस्मिन्नर्थे न विद्यन्ते कथंचित्साक्षिणोऽनघ ।
कथं प्रसिध्यते सोऽर्थस्तन्मे वद पितामह ॥

पितामह उवाच—

शृणु वत्स वचो मह्यं(त्तः)[कानि] पुष्कलार्थं महात्मभिः ।
परस्परविशुद्ध्यर्थं तस्माद्दिव्यानि नामतः ॥

* * * *

घटाग्निरुदकं चैव विषं कोशस्तथैव च ।
तण्डुलाश्चैव दिव्यानि सप्तमस्तप्तमाषकम् ॥

**End:**

उपोषितं शुचिस्नातमार्द्रवाससमागतम् ।
ग्राहयेन्मुद्रिकां तां तु घृतमध्यगतां तथा ॥
प्रदेशिनी तु तस्यास्य परीक्षेयुः परीक्षकाः ।
यदि विस्फोटका न स्युश्शुद्धौ तावन्यथाशुचिः ॥

तप्तमाषकप्रत्ययः ॥

**Colophon:**

पैतामहं समाप्तम् ॥

---

(*g*) बार्हस्पत्यधर्मशास्त्रम्.

BĀRHASPATYADHARMAŚĀSTRAM.

Foll. 116*b*—119*b*.

On the various kinds of gifts and their religious efficacy.

Complete.

**Beginning:**

मघवान् वाडनां(ब्राह्मण) श्रेष्ठं पर्यपृच्छद्बृहस्पतिम् ।
भगवन् केन दानेन स्वर्गतस्सुखमेधते ॥

* * * *

सुवर्णं रजतं वस्त्रं मणिरत्नवसूनि च ।
सर्वं तेन भवेद्दत्तं वसुधां यः प्रयच्छति ॥
फालकृष्टां महीं दद्यात् सुबीजां सस्यमालिनीम् ।
यावत्सूर्यकृता लोकास्तावत्स्वर्गे महीयते ॥

**End:**

श्रोत्रियाय विनीताय कुलीनाय तपस्विने ।
वृत्तस्था[ना]य दरिद्राय सर्वभूतहिताय च ॥
ईदृशाय च विप्राय दत्तमल्पं च वासव ।
कुलानि पुनते वीर सप्त सप्त च सप्त च ॥

**Colophon:**

बार्हस्पत्यं समाप्तम् ॥

---

(*h*) वृद्धशातातपधर्मशास्त्रम्.

VṚDDHAŚĀTĀTAPADHARMAŚĀSTRAM.

Foll. 119*b*—122*b*.

Similar to the work described under R. No. 994(*f*) ante.
Complete.

**Beginning:**

नरसिंहेन सततं निरीक्षितुमितृ(ति) स्मृतिम्(ः) ।
लिखिता सर्वशास्त्राणां पारगेण बृहस्पते ॥
वृद्धशातातपप्रोक्तं स्मृतियुग्मं तु संज्ञितम् ? ।
सङ्क्षेपेण प्रवक्ष्यामि यावदत्रोपलभ्यते ॥
नदीतीरेषु गोष्ठेषु पुण्येष्वायतनेषु च ।
तत्र गत्वा शुचौ देशे ब्रह्मकर्म समाचरेत् ॥
पालाशं पद्मपत्रं वा ताम्रं वाथ हिरण्मयम् ।
सादयित्वा तु तत्पात्रं यत्पात्रं समुदाहृतम् ॥
गायत्र्यैव तु गोमूत्रं गन्धद्वारेति गोमयम् ।
(आप्याय)स्वेति च क्षीरं दधिक्राव्णेति वै दधि ॥
तेजोऽति(सि)शुक्रमित्याज्यं देवस्येति कुशोदकम् ।

**End:**

दुःखेन तप्तेन सुखेन हृष्येत् दानेन वर्तेत सदैव धीरः ।
दाता हि नूनं विदधाति लोके नूनं तथाहं भवतेति पश्यन् ॥

**Colophon:**

इति वृद्धशातातपधर्मशास्त्रं समाप्तम् ॥

---

(*i*) पराशरधर्मशास्त्रम्.

PARĀŚARADHARMAŚĀSTRAM.

Foll. 122*b*—129*a*. Foll. 129*b* and 130 are left blank.

Similar to the work described under No. 2683 of the D.C.S. MSS., Vol. V.

Complete in 12 Adhyayas.

**Beginning:**

पराशरमतं(शास्त्रं) देवतातिथिपूजकम् ।
हुतशेषं तु भुञ्जानो ब्राह्मणो नावसीदति ॥

अपि शाकंपचानस्य शिलोञ्छेनोपजीवितम् ।
जुहा(ह्वा)नस्याग्निहोत्रं च नातिथिर्विमना भवेत् ॥
क्षत्रियस्तु प्रजापालः शस्त्रपाणिः प्रयत्न(ताप)वान् ।
निर्जित्य परसैन्यानि क्षितिधर्मेण पालयेत् ॥
लोहकर्मरतो नित्यं गवां च परिपालनम् ।
वाणिज्यकृषिकर्माणि वैश्यवृत्तिरुदाहृता ॥

* * * *

**Colophon:**

इति प्रथमोऽध्यायः ॥

**End:**

भूतानां च बलिर्देयः सर्वेषां प्रत्यहं ततः ।
सर्वस्य मरणे शान्तिः कोटिहोमे कृते भवेत् ॥
नावमं धर्मशास्त्राणामिदं शास्त्रमनुत्तमम् ।
पराशरमतं वेदं(वेदवेदाङ्ग) सम्मितम् ॥
इदं नित्यमधीयानो द्विजः प्रयतमानसः ।
मुच्यते पातकैः सर्वैः प्रेत्य स्वर्गं च गच्छति ॥

**Colophon:**

पराशरमतं धर्मशास्त्रं समाप्तम् ॥

---

### R. No. 3458.

Paper. 10¾ × 9¼ inches. Foll. 222 Lines, 20 in a page. Grantha. Good.

Transcribed in 1920-21 from a MS. of M.R.Ry. Mōhanarāyagāru, Jalantarakōṭa, Somapeta post, Ganjam district.

Fol. 222 is left blank.

पण्डितसर्वस्वम्.

PAṆḌITASARVASVAM.

A treatise in Dharmaśāstra dealing with the following subjects:—

१. वर्णाश्रमाचारव्यवस्था.
२. देवतिथिनिरूपणम्.
३. शुद्धिकालप्रभा.
४. श्राद्धकालनिरूपणम्.

५. ज्योतिश्शास्त्रप्रकरणम्.
६. विवाहादिप्रकरणम्.
७. दानप्रकरणम्.
८. प्रायश्चित्तविधिः.
९. प्रतिष्ठाप्रकरणम्.
१०. कण्टककृच्छ्रविधिः

Complete.

**Beginning :**

सिन्दूरभूधरसहोदरकान्तिपूरः क्षीराभिरामदरवकरदप्रकारः ।
सन्ध्यारुणस्य नभसस्तरुणेन्दुभाजो भूपान्तरं स्फुरतु मे हृदि विघ्नराजः ॥

ग्रन्थानुक्रमणी—

वर्णाचारं चोपवासादिकालं शौचाशौचे श्राद्धकर्मोडुशास्त्रम् ।
दानं प्रायश्चित्तकल्पं प्रतिष्ठां पर्यायेण व्याहरिष्ये यथावत् ॥

वर्णसङ्ख्यां द्विजातीनां भेदः कर्माणि वृत्तयः ।
क्षत्रविट्छूद्रजातीनां वृत्तयश्चाह्निकक्रियाः ॥
ततस्सङ्करजातीनां लक्षणानि च वृत्तयः ।
नारीणां निजधर्माणि धर्मस्साधारणो नृणाम् ॥
तप्तलोहघटादीनि दिव्यानि कतिचित्ततः ।
अभक्ष्याण्यथ भक्ष्याणि शुद्धिं द्रव्यान्नयोरपि ॥

* * * *

**Colophon :**

इति पण्डितसर्वस्वे शुद्धिनिरूपणं समाप्तम् ॥

**End :**

सर्वपापक्षयार्थं कायेन कण्टकाख्यं कृच्छ्राचरणं प्राप्तम् । तदशक्तौ प्रत्याम्नायत्वेनैका धेनुर्दातव्ये(व्यत्वे)न प्राप्ता । तस्यासम्भवे निष्कपादव्यवस्थया यावद्भवति तावत्परिमितं काञ्चनं तुभ्यमहमित्यादि ॥

**Colophon :**

इति श्रीपण्डितसर्वस्वं नाम ग्रन्थः स(म्पूर्णः) ॥

---

R. No. **3459.**

Palm-leaf. 18 × 1¼ inches. Foll. 17. Lines, 11 in a page. Telugu. Slightly injured.

Purchased in 1920-21 from M.R.Ry. Peddinṭi Śrīnivāsācāryulugāru, Anantakapēṭa, Guntur district.

वैखानससूत्रानुक्रमदीपिका.

VAIKHĀNASASŪTRĀNUKRAMADĪPIKĀ.

Foll. 1a—13b. Fol. 14a contains the Divyasūristōtra. Foll. 14b—17 are left blank.

Same work as that described under R. No 1760 ante. By Vēṅkaṭayōgin, son of Koṇḍamācārya of Kōṭa family.

Contains the Garbhasaṁskāra portion complete.

**Beginning :**

श्रीवेङ्कटेशं मदभीष्टदैवं श्रीमन्नृसिंहं कुलदैवतं मे ।
सूत्रागमाढ्यं विखनोमुनिं च भृग्वादिकान् कल्पकृतः प्रणौमि ॥

. . . . . . . . . . . . . प्रोक्तकर्मणाम् ।
अनुक्रमणिकाया . . . . . . . . . . . ॥

अथाह्निककर्मानुष्ठानं कुर्वन् गृहस्थः पत्न्याः प्रथमरजोदर्शने प्रथमर्तुसंस्कारद्वारा सर्वर्तुसंस्कारसिद्ध्यर्थमृतुसङ्गमनं कर्म कुर्यात् ।

* * * *

धर्मपत्न्यां धर्मप्रजासम्पत्तिसमुत्पादनं करिष्यमाणः पत्न्याः प्रथमऋतौ ऋतुसंस्कारद्वारा सर्वर्तुसंस्कारसिद्ध्यर्थमृतुसङ्गमनाख्यं कर्म करिष्य इति सङ्कल्प्य ।

**End :**

देवं संस्तुत्य नमोऽन्तैः केशवादि(भि)र्द्वादशमूर्तिनामभिश्च प्रणम्यान्तः परिषेकं कृत्वा पायसशेषे पूर्वोक्तप्रकारेण चक्रशङ्खाङ्कनं कृत्वा पत्नीं प्राशयित्वा . . . . . त्वा यथाशक्ति ब्राह्मणान् भोजयेत् । एवं गर्भसंस्कारान् कृत्वा कुमारे जाते जातकर्मोत्थाननामकरणान्नप्राशनप्रवासागमनपिण्डवर्धनचौलाख्यान् संस्कारान् कुर्यात् । तत्तन्मुख्यकाले वा प्रायश्चित्तपूर्वकमुपनयनकाले वा कुर्यात् ॥

**Colophon :**

इति श्रीवेङ्कटेश्वरकरुणाकटाक्षपात्रेण वैखानसकुलपवित्रेण कोटकोण्डमाचार्यपुत्रेण विद्वज्जनविधेयेन वेङ्कटयोगिनामधेयेन लिखितायां वैखानससूत्रानुक्रमदीपिकायां गर्भसंस्कारप्रयोगस्समाप्तः ॥

R. No. **3460.**

Palm-leaf. 17¾ × 1¼ inches. Foll. 106. Lines, 5 in a page. Telugu. Fair.

Purchased in 1920-21 from M.R.Ry. Peddiṇṭi Śrinivāsācāryulugāru, Anantakapōṭa, Guntur district.

Foll. 1, 79*b* and 106 are left blank.

(*a*) वैखानसगृह्यसूत्रम्.

VAIKHĀNASAGṚHYASŪTRAM.

Foll. 2*a*—75*a*.

Same work as that described under No. 5 of M. Seshagiri Sastri's Report, No. 2.

Complete, but with different colophon as given below :—

इति श्रीमदौखेयशाखायां श्रीवैखानसे विखनःप्रोक्तायां मूलगृह्ये प्रेताधानक्रिया नाम सप्तमः प्रश्नः ॥

---

(*b*) वैखानसधर्मसूत्रम्.

VAIKHĀNASADHARMASŪTRAM.

Foll. 75*b*—100*a*.

Same work as that described under No. 5 of M. Seshagiri Sastri's Report, No. 2.

Complete, but with different colophon as found below :—

इति श्रीमदौखेयशाखायां श्रीवैखानसे विखनःप्रोक्तायां मूलगृह्ये भक्ष्याभक्ष्यताम्रादिलोहशुद्धियतिधर्मयतिखननदाहनयतिनाराय(णबलि) अनुलोमप्रतिलोमता . . प्राच्यजन्मवृत्तिर्नाम दशमः प्रश्नः ॥

---

(*c*) वैखानसप्रवरसूत्रम्.

VAIKHĀNASAPRAVARASŪTRAM.

Foll. 100*b*—104*b*.

Same work as that described under No. 5 of M. Seshagiri Sastri's Report, No. 2.

Complete, but with different colophon as given below :—

इति श्रीमदौखेयशाखायां वै(खान)सशाखायां वैखानससूत्रे विखनःप्रोक्तायां मूलगृह्ये अथात ऋषिगोत्रप्रवरविश्वामित्रभार्गवजमदग्निवत्सानां

* * * *

प्रवराणां विवरणं नाम एकादशः प्रश्नः ॥

## R. No. 3461.

Palm-leaf. 17¼ × 1½ inches. Foll. 91. Lines, 8 in a page. Telugu. Slightly injured.

Purchased in 1920-21 from M.R.Ry. Peddiṇṭi Śrīnivāsācāryulu-gāru, Anantakapōṭa, Guntur district.

Foll. 1, 22*b*, 74*b* and 91*b* are left blank. Fol. 91*a* gives the Navagrahādhidēvatāviṣayakaślōkas.

वैखानससूत्रानुक्रमणिका.

VAIKHĀNASASŪTRĀNUKRAMAṆIKĀ.

An index of the Vaikhānasasūtra, which work has been described under No. 5 of M. Seshagiri Sastri's Report, No. 2: by Gōpanācārya of Tenali.

Contains up to the Pāṇigrahaṇasaṁskāra only.

**Beginning:**

अयं मुहूर्तस्सुमुहूर्तोऽस्तु । शुक्लाम्बरधरं . . . शान्तये ॥ तदेव लग्नं . . . स्मरामि ॥ यत्र योगीश्वरः—विदे विखनसे नमः ॥

सूत्राणामन्यसूत्राणां नेत्रं यस्य शिलीमुखम् ।

वैखानसमहाशास्त्रपारगान् सप्तगोत्रजान् ।
वैखानसानहं वन्दे भगवत्कर्मसूचितिम् ॥
नारायणः पिता यस्य यस्य माता हरिप्रिया ।
भृग्वाद्या मुनयश्शिष्यास्तस्मै विखनसे नमः ॥

पृथिव्याः शोभनगृहे अस्मिन् एवङ्गुणविशेषणविशिष्टायां शुभतिथौ अस्याः कुमार्या[याः] यज्जन्मनामधेयायाः प्राजापत्यविवाहाङ्गत्वेनायुष्याभिवृद्ध्यर्थं मम पुत्रिकायां जन्मजन्मनि सुवासिनीजन्मप्राप्त्यर्थं पाणिग्रहणार्थमङ्कुरार्पणमृद्ग्रहणाख्यं कर्म करिष्यमाणस्तदङ्गत्वेन तदादौ शुद्ध्यर्थं वृद्ध्यर्थं शान्त्यर्थमभ्युदयार्थं च महाजनैस्सह स्वस्तिपुण्याहवाचनं करिष्ये ।

**End:**

पतिस्तस्य क्रियान्ते च स्थितया भार्यया सह ।
प्रधानोद्वाहहोमान्तं कृत्वा पूर्ववदाचरेत् ॥

द्वितीयोद्वाहं लौकिकाग्नौ कृत्वा द्वादशाभ्यन्तरस्तु चेत् पूर्वाग्निं निधाय द्वितीयाग्निं प्रज्वाल्य पूर्वाग्नौ समारोप्य भवतं नः, अग्नावग्नीति संयोज्य ताभ्यां हुत्वा नित्यं जुहुयात् ॥

**Colophon:**

श्रीमच्चतुर्वाटिकानन्ताचार्यकृपापात्रश्रीतेनालिगोपनाचार्यनामधेयबुधविर-
चितसूत्रानुक्रमणिकायां पारायणव्रतादिपाणिग्रहणपर्यन्तं पञ्चसंस्कारस्समाप्तः ॥

R. No. **3462.**

Palm-leaf. 17¾ × 1½ inches. Foll. 212. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1920-21 from M.R.Ry. Peddinṭi Śrīnivasācāryulu-gāru, Anantakapāṭa, Guntur district.

Foll. 1, 2, 61, 155 and 209—212 are left blank.

अत्रेयसंहिता (वैखानसी).

ATREYASAṀHITĀ (VAIKHĀNASĪ).

A treatise in the Vaikhānasāgama dealing with the following topics.

Date of transcription—Commenced on the 10th day of the bright fortnight of the lunar month Kārttika in the year Śukla and completed on the 6th day of the bright fortnight of the lunar month Māgha in the same year.

Name of the scribe—Dūsi Narasiṁhācārya, who copied for Perumāḷḷācārya, son of Ratnamācārya of Peddinṭi family. The MS. was copied from the original which belonged to one Kappāka Lakṣmīkāntayya.

१. भूपरीक्षालयविधिः.
२. कर्षणबीजावापनविधिः.
३. आचार्यार्चकपरिचारकादिवृत्तिनिर्णयः.
४. चतुष्षष्टिदेवताविधिः.
५. शिलेष्टकान्यासविधिः.
६. षण्णवतिविमानभेदाविधिः.
७. विमानालङ्कारविधिः.
८. परिवारालयगोपुरप्राकारनिर्णयः.
९. मूर्धेष्टकविधिः.
१०. नवविधपरिचारकार्चकविधिः.
११ अज्ञातगर्भपरीक्षाविधिः.
१२. एकबेरप्रतिष्ठाविधिः.
१३. शिलाबेरस्थापनविधिः.
१४. दारुसङ्ग्रहणविधिः.
१५. बेरशूललक्षणविधि.
१६. शूलस्थापनविधिः.
१७. ध्रुवबेरस्थापनविधिः.
१८. शर्करायालेपनविधिः.
१९. स्थानकासनभेदविधिः.
२०. शिलावर्णविधानम्.
२१. अङ्गुलिसंज्ञाविधिः.
२२. प्रतिमालक्षणविधिः.
२३. कौतुकादिविधिः.
२४. मधूच्छिष्टक्रियाविधिः.
२५. अङ्कुरार्पणविधिः.
२६. आचार्यविधानम्.

२७. द्रव्यसङ्ग्रहणाक्षिरोपणम्.
२८. अक्षिमोचनक्षीराधिवासादिविधिः.
२९. पञ्चाग्निकुण्डलक्षणविधिः.
३०. पञ्चाग्निलक्षणाधारविधिः.
३१. कुम्भध्यानविधिः.
३२. स्नापनहौत्रशंसनविधिः.
३३. पञ्चाग्निहोमविधिः.
३४. रत्नन्यासविधिः.
३५. आचार्यदक्षिणाप्रतिष्ठाफलविधिः
३६. मूर्तिमन्त्रविधिः.
३७. पञ्चमूर्तिविधानम्.
३८. पञ्चमूर्तिप्रतिष्ठाविधिः.
३९. पृथक्प्रतिष्ठावैवाहिकाविधिः.
४०. नित्यार्चनविधिः.
४१. पञ्चमूर्त्यर्चनविधिः.
४२. बलिविधिः.
४३. सर्वदेवार्चनक्रमविधिः.
४४. ग्राह्यपुष्पसमुच्चयविधिः.
४५. हविःपाकविधिः.
४६. नवविधार्चनविधिः.
४७. द्वादशीकल्पविधिः.
४८. परिवारप्रतिष्ठाविधिः.
४९. स्नपनद्रव्यसमुच्चयः.
५०. द्रव्यसङ्ग्रहविधिः.
५१. कलशविधानम्.
५२. नवविधस्नपनविधिः.
५३. चक्ररक्षणप्रतिष्ठाविधिः.
५४. ध्वजारोहणविधिः.
५५. प्रथमदिनोत्सवविधिः.
५६. ऐकाहिकोत्सवविधिः.
५७. वाराहप्रतिष्ठाविधिः.
५८. कर्षणादिनिष्कृतिः.
५९. आविर्भावप्रतिष्ठाविधिः.
६०. अवतारप्रतिष्ठाविधिः.
६१. वासुदेवप्रतिष्ठाविधिः.
६२. चतुर्मूर्तिविधानम्.
६३. गोत्रप्रवरनिर्णयः.
६४. अभिषेकविधिः.
६५. ऊर्ध्वपुण्ड्रविधिः.
६६. कर्षणादिप्रतिष्ठान्तप्रायश्चित्तविधिः.

Complete.

**Beginning :**

(श्री)लक्ष्मीवल्लभमा(मा)रब्धं(ब्धां तां) विखनोमुनिमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

भृगुर(ग्व)त्रिकश्यपमरीचिमहामुनीशाः
शिष्याश्च यस्य जनकस्तु पितामहोऽभूत् ।
यद्दैवताखिलजगद्गुरुमर्चितं तं
शान्तं महाविखनसं मुनिमाश्रयामः ॥

अतः परं प्रवक्ष्यामि भूमेरसम्यक् परीक्षणम् ।
भूपरीक्षणकाले तु यजमानेन भक्तितः ॥
आचार्यं वरयेत्पूर्वं सर्वकार्योपदेशकम् ।
वैखानसेन सूत्रेण निषेकादिक्रियान्वितम् ॥
विप्रं स्वाध्यायसंयुक्तं गृहस्थं लक्षणान्वितम् ।
शौचाचारसमायुक्तं सन्ध्योपासनतत्परम् ॥
अथ तेनैव सूत्रेण नित्यहोमपरायणम् ।
* * * *

**Colophon:**

इति श्रीवैखानसे अत्रिप्रोक्ते समूर्तार्चनाधिकरणे भूपरीक्षालयविधिर्नाम द्वितीयो (प्रथमोऽ)ध्यायः ॥

**End:**

तदाश्रमस्य राष्ट्रस्य सन्त्येव द्रव्यसम्पदः ।
अशुभाश्चापि नश्यन्ति शुभास्तेन भवन्ति च ॥
. . . . . . . . . . . . मनसा स्मरन् ।
सहस्रकृत्वो जुहुयादेष्टव्यं च विशेषतः ॥
परिषद्देवतानां च तत्तन्मन्त्रैर्यथाक्रमम् ।
पूर्ववत्स्थापयेच्चैव शक्तितो दक्षिणां ददेत् ॥

**Colophon:**

इति श्रीवैखानसे अत्रिप्रोक्ते समूर्तार्चनाधिकरणे कर्षणादिप्रतिष्ठान्तप्रायश्चित्तविधिर्नाम षट्षष्टितमोऽध्यायः ॥

---

R. No. **3463.**

Palm-leaf. 17¼ × 1¼ inches. Foll. 60. Lines, 7 in a page. Telugu. Much injured.

Purchased in 1920-21 from M.R.Ry. Peddiṇṭi Śrīnivāsācāryulugāru, Anantakapōṭa, Guntur district.

(a) सत्यतप उपाख्यानम्.

SATYATAPA UPĀKHYĀNAM.

Foll. 1a—3b. Foll. 4a—5b contain a small portion of this work.

On the story relating to Satyatapas who made penance under a banyan tree called Bhadravaṭa, on the banks of the river Puṣpabhadrā, flowing at the foot of the Himālaya mountains.

Complete.

**Beginning:**

हिमवतो ह पादेषूत्तरेषु पुष्पभद्रा नदी वहति । तस्यास्तीरे चित्राशिलास्ति । न्यग्रोधश्च भद्रवटो नाम । तत्राह सत्यतपो नाम ऋषिस्तपोऽतप्यत । स समिधो वृश्चन्नङ्गुलीमवृश्चत् । तस्या अङ्गुलेर्वृक्णायै । भस्मेव चूर्णानिवचव्यशयन्त ।

**End:**

सोऽब्रवीत् । य इदं सत्यतपोमा(पा)ख्यानं ब्राह्मणः श्रद्दधानः पर्वसु ब्राह्मणांच्छ्राव्ययात् । स मासस्य दुष्कृतमवहनात् । ये च ब्राह्मणाश्श्रद्दधाना(अ)शृण्वन् तेऽर्धमासस्येति । तस्मादेवं विदुषेद्माख्यानं ब्राह्मणेन श्रद्दधानेन पर्वसु ब्राह्मणाश्श्राव्याः । ब्राह्मणैश्च श्रद्दधानैश्च श्रोतव्यं दुष्कृतस्यापहत्यै ।

* * * *

गरु(ड)स्य जातमात्रेण त्रयो लोकाः प्रकम्पिताः ।
प्रकम्पिता महिस्सर्वा सशैलवनकानना ॥

इन्द्राविष्णुभ्यां सत्यतपसे च नमो नमः इन्द्राविष्णुभ्यां सत्यतपसे च नमो नमः ॥

Fol. 6 contains the Yājuṣapraviśyahōmamantra portion.

---

(b) वैखानससूत्रव्याख्यानम्— भास्करभट्टीयम्.

VAIKHĀNASASŪTRAVYĀKHYĀNAM: BHĀSKARABHAṬṬĪYAM.

Foll. 7a—40a. Fol. 40b is left blank.

A commentary on Vaikhānasasūtra, which work has been described under No. 5, page 161 of M. Seshagiri Sastri's Report, No. 2: by Bhāskarabhaṭṭa, son of Nṛsiṁhācārya of Gautamagōtra.

Contains the sixth and the seventh Praśnas.

**Beginning:**

अर्चासमाधिमपहाय समाश्रितानां
. . . . . . . . . . दोषहरं दयालुम् ।
अर्घावशेषगुडवारि सदा पिबन्तं
श्रीमङ्गलाद्रिनरकेसरिणं भजामि ॥

ज्ञानानन्दमयं देवं (. . .) हयग्रीवमुपास्महे ॥
(श्री)लक्ष्मीवल्लभमा(भा)द्यं(द्यां) तां विखनोमुनिमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

अथ शारीरसंस्काराणामष्टादशानां च प्रायश्चित्तम् । प्रायो विनाश इत्युक्तं चित्तं सन्धानमुच्यते । (पुनस्तस्यै)व सन्धानं प्रायश्चित्तमिहोच्यते ॥

इति वचनादेव मानुषाद्यकृतस्यान्यथाकृतस्य विपर्यासस्या(र्यासस्या)-नृतस्य सा पुनस्सन्धानं कारकं प्रायश्चित्तं व्याख्यास्यामः ।

* * * *

रत्नन्यासं विधिनान्यत्सर्वं स्यात्पुनस्स्थापनकर्मणि ॥

**Colophon:**

नृसिंहाचार्यसूनुना भास्कराचार्य(सूरिणा) विरचिते वैखानससूत्रव्याख्याने निषेकादिशारीराणां पाकयज्ञानां नित्यार्चनस्य प्रायश्चित्तं षष्ठ[म]पटलः ॥

द्विधा स्याज्जात[क]स्य कर्तव्यसंस्कारो(रान्) निषेकादिजातकसंस्कारान् मृतस्य कर्तव्यसंस्कारान् दहनादिमृतसंस्कारान् वा

**End:**

स्वदेशे तु त्रिरात्रं शङ्खः—
अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च ।
परपू . . . . . . नासु त्रिरात्रं सूतकं भवेत् ॥

The scribe adds—

संवत्सरे प्रमोदूते मासे माघे च शुद्धगे ।
पञ्चम्यां सौम्यवारे च पुस्तकं लिखितं मया ॥
गौतमगोत्रसमुद्भूते(न) नृसिंहाचार्यसूनु च (ना) ।
वेङ्कटाचार्यशिष्येण कृष्णमाख्येन(न) लिख्यते ॥

भास्करभट्टाचार्यविरचिते(तं) वैखानससूत्रव्याख्याने(नं) लिख्यते (खितं समाप्तम्) ॥

Fol. 41 contains a small portion of Vaikhānasasūtramūlagṛhya-vyākhyā.

---

c) प्रायश्चित्तविधिविषयः.

PRĀYAŚCITTAVIDHIVIṢAYAḤ.

Foll. 42*a*—60*b*. Foll. 52*b* and 55 are left blank.

Similar to the work described under No. 3484 of the D.C.S. MSS., Vol. VII.

Incomplete.

**Beginning:**

ज्ञानकृताज्ञानकृतबहिष्कारकृतानां पापानां स्थूलसूक्ष्मक्रमेण प्रायश्चित्तान्याह ।

चण्डालादिभिः खानिताः कूपादयः तेषु अज्ञानेन विज्ञानेन वा स्नानादिकं यदि तत्र कथमित्याशङ्क्याह—

अज्ञानाद्यदि लभ्येत अन्त्य(जा)नां जलं नृणाम् ।
प्रायश्चित्तमिति प्राह पञ्चगव्यं भृगुः पुरा ॥ इति ।

**End:**

प्राणानायम्य मयाचरितस्य सर्वप्रायश्चित्तस्य उदीच्याङ्गशालाहोमं करिष्ये—इति सङ्कल्प्य प्राच्याङ्गशालाहोमवत्कुर्यात् ।

* * * *

आचार्याय यथाशक्ति दक्षिणां दद्यात् । एतत्प्रायश्चित्तं स्वस्वस्य, अशक्तस्य तत्पुत्रादिकैः कुर्यात् ॥

**Colophon:**

इति जीवप्रायश्चित्तविधिस्समाप्तः ॥

ऊनाब्दिकात्परं चैव आब्दिकात्पूर्वमेव च ।
संवत्सरविमोकस्य तिथिशून्य . . . . भात् ॥

पराशरमाधवीये.

---

## R. No. 3464.

Palm-leaf. 15⅜ × 1½ inches. Foll. 92. Lines, 8 in a page. Telugu. Good.

Purchased in 1920-21 from M.R.Ry. Peddinti Śrinivāsācāryulugāru, Anantakapēṭa, Guntur district.

(a) वैखानसगृह्यसूत्रव्याख्या.

**VAIKHĀNASAGṚHYASŪTRAVYĀKHYĀ.**

Foll. 2a—84a. Foll. 1 and 84b are left blank.

Same work as that described under R. No. 1609 ante. By Nṛsiṁha-vājapēyin, son of Mādhavācārya.

Contains the Praśnas one to five only.

---

(b) वैखानसगृह्यसूत्रम्.

VAIKHĀNASAGṚHYASŪTRAM.

Foll. 87a—91b. Fol. 92 is left blank.

Same work as that described under No. 5 of M. Seshagiri Sastri's Report, No. 1.

Contains the sixth Praśna only.

---

R. No. 3465.

Palm-leaf. 16¾ × 1½ inches. Foll. 47. Lines, 7 in a page. Telugu. Good.

Purchased in 1920-21 from M.R.Ry. Paddiṇṭi Śrīnivāsācāryulu-gāru, Anantakapēṭa, Guntur district.

वैखानसापरप्रयोगतन्त्रसरणिः.

VAIKHĀNASĀPARAPRAYŌGATANTRASARAṆIḤ.

Foll. 1a—46a. Foll. 46b and 47a contain the Palāśavidhi and Dahanaprayōga. Fol. 47b is left blank.

On the procedure to be adopted by the followers of the sage Vikhanas in connection with the performance of funeral ceremonies.

Complete.

**Beginning :**

ज्ञानानन्दमयं देवं (. . .) हयग्रीवमुपास्महे ॥
श्रीलक्ष्मीवल्लभाद्यां तां विखनोमुनिमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

सर्वप्रायश्चित्तम् । अथाहिताग्न्यादीनां मृतसंस्कारविधिं वक्ष्यामः— पितुर्मरणसंशये कर्ता स्नात्वा मुमूर्षुमपि स्नापयित्वा श्वेतमृत्तिकादिपरिशुद्धद्रव्येणोर्ध्वपुण्ड्रं धारयित्वा सिकतातले तिलान् दक्षिणाग्रान् स तिलदर्भानास्तीर्य ततो दक्षिणशीर्षं शाययित्वा हरिध्यानं हरिस्मरणं च अवश्यं कारयित्वा प्रणामयेत् । अथ कर्ता प्राणानायम्य सङ्कल्प्य यजमानस्य पितुर्मरणसंशये सर्वप्रायश्चित्तं करिष्ये—इति सङ्कल्प्य ।

**End:**

अथ पिण्डोद्वासनं करिष्ये— इति सङ्कल्प्य शूर्पमन्यत्र निधाय नमो वः पितरः इति नमस्कृत्यास्तु तृप्तिरिति सम्प्रार्थ्य उत्तिष्ठत पितरः इति मध्ये पिण्डानुद्वासयेत् । पिण्डान् नद्यादिजले निक्षिपेत् । खात्वान्तहोमे पितृमुक्तं पितृर्ऋणमित्यन्तहोमं हुत्वाग्निमात्मारोपणं पुण्याहं वाचयित्वा ज्ञातिभिस्सह भुञ्जीयात् (त) । इति पत्न्या वा सपुत्रविधवायाः पितामहपत्न्यादिभिर्योजयेत् । अपुत्रविधवाया भर्त्रा सह योजयेन्नान्यन्नास्तिको ब्रू(या)दिति श्राद्धकर्ता सर्वान् कामानवाप्नोति ॥

**Colophon:**

इति श्रीवैखानससूत्रमतानुसारेणापरप्रयोगसमन्त्रकतन्त्रसरणिः समाप्तः ॥

Date of transcription—Wednesday, the 15th day of the bright fortnight of the lunar month Āśvayuja in the year Paridhāvin.

Name of the scribe—Agnihōtram Narasiṁhācārya.

---

## R. No. 3466.

Palm-leaf. 14¾ × 1¼ inches. Foll. 99. Lines, 6 in a page. Telugu. Slightly injured.

Purchased in 1920–21 from M.R.Ry. Peddiṇṭi Śrīnivāsācāryulu-garu, Anantakapāḷa, Guntur district.

(a) पारमात्मिकोपनिषद्व्याख्यानम्.

PĀRAMĀTMIKŌPANIṢADVYĀKHYĀNAM.

Foll. 2a—91a. Fol. 1 contains again a small portion of this work in the beginning. Foll. 91b and 92 are left blank.

A commentary on the Pāramātmikōpaniṣad: by Śrīnivāsayajvan, son of Gōvindācārya of Kauśikagōtra.

Breaks off in the tenth Anuvāka.

**Beginning:**

यस्सर्वलोकैरपि वन्दनीयस्स्मार्तिं शुभां यच्छति यो नराणाम् ।
तस्मै नमो यः कुलदैवतं नरस्स राघवो मे हृदि सन्निधत्ताम् ॥

श्रीलक्ष्मीवल्लभाद्यां तां विखनोमुनिमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

श्रीविष्णुमानसाज्जातो विष्ण्वागमविशारदः ।
तं वन्दे सूत्रकर्तारं वैष्णवं विखनोमुनिम् ॥

ओं विष्णुस्सर्वेषामधिपतिः परमः पुराणः परो लोकानामजितो जितात्मन् भवते भवाय स्वाहा । व्याप्नोतीति विष्णुः सर्वव्यापक इत्यर्थः ; यच्च किंचि-ज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः — इति श्रुतेः । विश्वव्यापनशीलत्वाद्विष्णुरित्युच्यते बुधैरिति । नन्वादौ तावत्परंज्योतिःपरंतत्त्वपरमात्मादिशब्दा विद्यन्ते चत्वारः पारमात्मिकं भवति । उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम् । अर्थवादोपपत्तिश्च लिङ्गं तात्पर्यनिर्ण-यं(ये) ॥ इति वचनात् त्रयाणां पारमात्मिकत्वमिति चेत् उच्यते ।

* * * *

**Colophon:**

इति श्रीवेङ्कटेशपादाब्जसपर्यासु रतात्मना श्रीमत्कौशिकगोत्रेण गोविन्द-पार्यसूनुना वेदान्तदेशिकेन श्रीनिवासयज्वना विरचित(ते) पारमात्मिकोपनिष-द्व्याख्याने प्रथमानुवाकार्थविवरणं समाप्तम् ॥

**End:**

हर्म्यं निकेतं(तनं) चैव सौधं व्या(वा)सं चय(ः)क्षयम् ।
आलयं मन्दिरं चैव ह(भ)वनावासवाचकाः ॥ इति ।

**Colophon:**

श्रीवेङ्कटेशपादाब्जसमाराधनेन श्रीनिवासाचार्ययज्वना विरचिते पारमात्मि-कोपनिषद्व्याख्याने नवमानुवाकविवरणं समाप्तम् ॥

या गौर्वरिष्ठा सहस्रधारित्री वसुं वसुं वै वसुनीह भद्राः । रेरीजयन्तारजितं रजन्ते स्वाहा । या गौर्वरिष्ठा सहस्रधारित्री विश्वम्भरा वरिष्ठा वा गौः भूत्वा-

* * * *

यद्वास्संजातं यस्सर्वमशिमीशिषे स्वाहा । यस्य परमात्मन इच्छा लोके प्रजा- . . . . . . यतस्सृष्ट्यादिकं सोऽकामयत । बहुस्यां प्रजायेयेत्यादि श्रुतये(तेः) मनसैव जगत्सृष्टिसंहारौ करोति यः तस्यां पक्षक्षपणे क्रियानूद्यं विस्तर इति । लोके.

---

(b) श्रीनिवासदीक्षितीयम्.
ŚRINIVĀSADĪKṢITĪYAM.

Foll. 93a—97b. Fol. 9- contains the Śuddhācamanavidhi. Fol. 99 is left blank.

Same work as that described under R. No. 3477 ante, wherein see for the end. By Śrīnivāsadīkṣita, son of Gōvindācārya of Kauśikagōtra.

Incomplete.

**Beginning :**

श्रीवेङ्कटेशमखिलेशमनन्तमाद्यं
कारुण्यवारिधिमशेषसुरैस्सुवन्द्यम् ।
वन्दे समस्तजगतां स्थितिसृष्टिहेतुं
वैखानसान्मुनिवरान्भृगुकश्यपादीन् ॥
वैखानसकुलोद्भूतं वेङ्कटेशार्चनापरम् ।
वेदान्तदेशिकं वन्दे श्रीनिवासार्यदीक्षितम् ॥
श्रुतिस्मृतिनदीपूर्णं शास्त्रकल्लोलसङ्कुलम् ।
विष्णुभक्त्युदकं शुद्धं वन्दे विखनसार्णवम् ॥
सूत्राणामन्यसूत्राणां नेत्रं यत्र स्थिरीकृतम् ।
सूत्रं वैखानसं वन्दे चतुर्वर्गफलप्रदम् ॥
श्रुतिस्मृतीतिहासाद्यैः प्रतिपादितवैभवाम् ।
परमात्मपरां वन्दे सूत्रोपनिषदं महत् ॥
श्रीमत्कौशिकगोत्रेण गोविन्दार्यस्य सूनुना ।
श्रीवेङ्कटेशपादाब्जमधुपर्यायुतात्मना ॥
वेदान्ताचार्यवर्येण श्रीनिवासाख्ययज्वना ।
श्रुतिस्मृतिपुराणादिसूत्रमार्गानुसारिणा ।
वैखानसस्य सूत्रस्य व्याख्या सम्यक् प्रकाश्यते ।

अथ वैखानससूत्रतात्पर्यचिन्तामणेरविघ्नपरिसमाप्तिप्रचयगमनार्थं स्मृत्याचारसिद्धेष्टदेवताश्रीवेङ्कटेशनमस्काररूपमङ्गलाचरणानन्तरं सत्यत्वादिसमस्तकल्याणगुणविशिष्टात्परब्रह्मणश्श्रीमन्नारायणादुत्पन्नेन विखनसशब्दवाच्येन चतुर्मुखब्रह्मणा प्रणीतस्य वैखानससूत्रस्य सर्वसूत्रोत्तमत्वादेतत्सूत्रोक्तधर्मानुष्ठातॄणामपि सर्वोत्कृष्टतमत्वे च दशविधहेतवो निरूप्यन्ते यथा—अखिलजगत्कारणभूतेन विखनसा प्रणीतत्वात्सर्वसूत्राणामादित्वात्प्रधानादिकर्मोपहितत्वाच्छ्रुतिमार्गानुसारित्वात्समन्त्रकसर्वक्रियावत्त्वात् निषेकादिसंस्कारादिमत्त्वात् अष्टादशशारीरसंस्कारात्मकत्वात्साङ्गक्रियाकलापवत्त्वान्मन्वाद्यैस्स्वीकृतत्वादखिलजगदे-

ककारणभूतश्रीमन्नारायणैकपरत्वाच्च तत्सूत्रोक्तधर्मानुष्ठानवतामेव भगवत्प्रियतम-त्वोपपत्तेरित्यादिभिः सर्वसूत्रोत्तमत्वं तत्सूत्रोक्तधर्मानुष्ठानादेव सर्वेभ्यश्श्रेष्ठतमत्वं च श्रुतिस्मृतिपुराणादिमुखेन प्रतिपिपादयिषुर(णा)खिलजगत्कारणभूतेन विखनस-(स्सं)प्रणीतत्वादिहेतुर्निरूप्यते ।

---

R. No. 3467.

Palm-leaf. 16⅜ × 1¼ inches. Foll. 98. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1920–21 from M.R.Ry. Peddinti Śrinivāsachāryulugāru, Anantakapōṭa, Guntur district.

Foll. 94—98 give the contents of this work. Foll. 12*b*, 69*b* and 93*b* are left blank.

वैखानसागमः.

VAIKHĀNASĀGAMAḤ.

Similar to the work described under No. 5368 of the D.C.S. MSS., Vol. XI. By Marīci.

Deals with the following subjects:—

१. भूपरीक्षालयदेशविभागः.
२. देवतालयबलिविधिः.
३. पञ्चमूर्त्तिप्रतिष्ठाविशेषः.
४. प्रथमशिलास्थापनविशेषः.
३०. कुण्डहोमविधिः.
३१. बलिबेरप्रतिष्ठाविधिः.
३२. पृथक्प्रतिष्ठाविधिः.
३३. पञ्चमूर्त्तिकल्पनाविधिः.
३४. पञ्चमूर्त्यादिप्रतिष्ठाविधिः.
३५. द्वित्रिमूर्तिविमानप्रतिष्ठाविधिः.
३६. पृथक्प्रतिष्ठवैवाहिकविधिः.
३७. नित्यार्चनविधिः.
३८. बल्युपचारार्चनपुष्पहविष्पाकविधिः.
३९. नवपद्पञ्चमूर्त्यर्चनविधिः.
४०. चक्रलक्षणस्थापनाविधिः.
४७. ध्वजारोहणविधिः.
६२. भूपरीक्षादिप्रायश्चित्तम्.
६३. कर्षणादिपुनस्संस्कारविधिः.
६४. ध्रुवबेरादिसंस्कारप्रायश्चित्तविधिः.
६५. प्रतिष्ठाप्रायश्चित्तविधिः.
६६. बलिबेरप्रायश्चित्तविधिः.
६७. स्नपनोत्सवप्रायश्चित्तविधिः.
६८. अस्पृश्यस्पर्शननिष्कृतिः.
६९. पुनर्बालालयविधिः.
७०. ध्रुवबेरप्रायश्चित्तविधिः.
७१. अज्ञातशान्त्यादिसर्वप्रायश्चित्तविधिः.
७२. तन्त्रसङ्करप्रायश्चित्तविधिः.

Contains the Paṭalas 1—4, 30—40, 47 and 62—72 complete.

**Beginning:**

श्रीलक्ष्मीवल्लभाद्यां तां विखनोमुनिमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

मरीचिं प्रति ऋषय ऊचुः—श्रीमन्मरीचिं महामुनिं कुशासने समासीनं सर्वज्ञं जितेन्द्रियं शुद्धं नानालोकनिवासिनस्सर्वे संरक्ता ऋषयस्समागम्यानम्य भगवन् केन मार्गेण कैर्मन्त्रैः कं देवमर्चयन्तः कान् लोकान् गमिष्यन्तीति । श्रीमरीचिरुवाच सुप्रसन्नं नारायणं ध्यात्वाऽभिवन्द्य श्रुत्यनुकूलमार्गेण चतुर्वेदोद्भवैर्मन्त्रैर्देवेशं भगवन्तं नारायणमर्चयेत् ।

* * * *

**Colophon:**

इति श्रीमद्विखनाचार्यकृपापात्रमरीचिप्रोक्तपटलवन्नामधेयदीपिकायां विमानार्चनकल्पे भूपरीक्षालयदेशविभागविधिर्नाम प्रथमः पटलः ॥

**End:**

तत्र श्रोत्रं धूमो नासिकाल्पज्वलिता नेत्रे भस्म, शीर्षमति(पि) ज्ञात्वा श्रोत्रे हृतव्याधिपीडनं चेत् चक्षुष्यन्धत्वा(ता)नासिकायां महारोगं मस्तके सर्वनाशनम् । तस्मात् ज्वलत्यग्नौ जुहुयादित्याह मरीचिः ॥

**Colophon:**

इति श्रीवैखानसागमे मरीचिप्रोक्ते विमानार्चनकल्पे दन्त्रसङ्करप्रायश्चित्ताग्निकार्यविधिर्नाम सप्तत्यन्तद्वि(तीयः) पटलः ॥

---

## R. No. 3468.

Palm-leaf. 17½ × 1¼ inches. Foll. 68. Lines, 6 in a page. Telugu. Slightly injured.

Purchased in 1920-21 from M.R.Ry. Peddinti Śrinivāsācāryulu-gāru, Anantakapēṭa, Guntur district.

Foll. 1, 2, 67 and 68 are left blank.

प्रायश्चित्तशतद्वयीव्याख्या—प्रयोगप्रदीपिका.

PRĀYAŚCITTAŚATADVAYĪVYĀKHYĀ : PRAYŌGA-PRADĪPIKĀ.

Same work as that described under No. 1081 of the D.C.S. MSS., Vol. II. By Bhāskarācārya.

Incomplete.

R. No. **3469.**

Palm-leaf. 17¾ × 1½ inches. Foll. 116. Lines, 7 in a page. Telugu. Much injured.

Purchased in 1920-21 from M.R.Ry. Peddiṇṭi Śrīnivāsācāryulu-gāru, Anantakapōṭa, Guntur district.

(a) वैखानसश्रौतप्रयोगक्लृप्तिः.

VAIKHĀNASAŚRAUTAPRAYŌGAKLPTIḤ.

Foll. 4a—73a. Foll. 1—3 and 73b are left blank.

Same work as that described under R. No. 1759 ante, wherein see for the beginning.

Contains the Praśnas 13—16 and 19 complete.

**End:**

अध्वर्यो यथाशक्ति दक्षिणां ते ददामि । प्रतिगृह्णामि । अथ गृहं गत्वा स्वायतनेऽग्निं प्रतिष्ठापयति । गृहे वा पूर्वोक्तपूर्णाहुतिं कुर्वीतेति केचन । साय मग्निहोत्र सङ्कल्प . . . . . . . होमः । प्रमादाद्यदि रात्रिमतीत्य पूर्णाहुतिः स्यात् तदा तस्मिन्नेव प्रायश्चित्तं हुत्वा पूर्णाहुतिं जुहुयात् सन्तिष्ठतेऽग्निष्टोमोऽग्निष्टोम इति विखनार्थिरुक्तम् ॥

**Colophon:**

पराशरस्यान्वयसम्भवेन वाल्मीकिशिष्यस्य तु गोत्रजेन ।
श्रीकृष्णमार्याध्वरिणा प्रयोगक्लृप्तिः कृतौ स्वीयकृतौ समाप्ता ॥

आत्रेयादिसमस्तगोत्रजननाश्शुद्धा धनाढ्यास्शुभा
ये वैखानससूत्रिणो जगति ये यष्टुं यतन्तां बुधाः ।

श्रीमदौख्येयर्षिप्रोक्ते एकविंशन्महायज्ञप्रबोधकल्पसूत्रे एकोनषष्ट्यधिक-त्रिशत्खण्डात्मके पञ्चाशदधिकपञ्चशतोत्तरचतुस्सहस्रग्रन्थात्मके प्रायश्चित्त-विनियोगो(नाम) एकोनविंशः प्रश्नः ॥

The scribe add—

हायने चित्रभानौ तु पौर्णम्यां मार्गशीर्षके ।
कावेरी(कवेर)तनयोदीच्यां कुम्भघोणस्य प्राग्दिशि ॥

मध्यार्जुनस्य वायव्यां सुखासीनपुरोत्तमे ।
तस्मिन्न(ण्णा)ध्वरीन्द्रेण प्रोक्ता श्रौतीयदीपिका ॥

अग्न्याधानादिसोमान्तप्रयोगस्तु समाप्यते ।

Date of transcription—Wednesday, the 10th day of the bright fortnight of the lunar month Śrāvaṇa in the year Śukla. Name of the scribe—Agnihōtram Narasiṁhācārya, who copied the original MS. for Peddiṇṭi Perumāḷḷayya.

---

(*b*) अग्निष्टोमहौत्रप्रयोगः.

AGNIṢṬŌMAHAUTRAPRAYŌGAḤ.

Foll. 74*a*—115*a*. Foll. 115*b* and 116 are left blank.

Similar to the work described under No. 1113 of the D.C.S. MSS., Vol. II.

Complete.

**Beginning:**

अस्या इष्टेः पञ्चदश सामिधेन्यः । बार्हस्पत्यमाज्यभागा . . . . . . . वै: मृधश्च प्रधानदेवता अग्निः स्विष्टकृत्प्रयाजानुयाजयोऽङ्गदेवता देवा आज्यपाश्च दैवतस्य समाम्नायस्य विताने ।

**End:**

स्विष्टकृतमयाडग्नि यद्द्य विशो . . . या ते अद्य—वौ । इळान्तस्सन्तिष्ठते । संस्थितायां प्रायश्चित्ताहुतिं जुहोति जुहुयाद्वो च मे स्वर इति मन्त्रेणोपतिष्ठते ॥

**Colophon:**

इत्यग्निष्टोमहौत्रप्रयोगः ॥

महाहौत्रप्रयोगः ॥

---

R. No. **3470**.

Palm-leaf. 17¾ × 1 inches. Foll. 57. Lines, 6 in a page. Telugu. Slightly injured.

Purchased in 1920-21 from M.R.Ry. Peddiṇṭi Śrīnivāsācāryulugāru, Anantakapeṭ, Guntur district.

Fol. 1 is left blank.

संहितारत्नाकरः.

SAṀHITĀRATNĀKARAḤ.

Foll. 2*a*—51*b*.

Slightly different from the work described under R. No. 2465 ante.

Contains the Prakaraṇas 1 to 20.

**Beginning :**

अस्योत्सवस्याचार्यऋत्विग्वरणं पूर्वं मृद्ग्रहणविशेषपूजाङ्कुरार्पणं द्वितीयम् । उत्सवादौ स्नपनं द्विगुणाराधनं द्विगुणसाधनं ध्वजदण्डशुद्धिसंस्थापनं तृतीयम् । वास्तुहोमो ध्वजपटप्रतिष्ठा चतुर्थम् ।

* * * *

इति श्रीवैखानसे संहितारत्नाकरे श्रीविष्णुदिव्यागमधर्मशास्त्रे उत्सवप्रथम दिनादिनवमदिनपर्यन्तं क्रियासङ्ख्यानिर्णयो नाम प्रथमः परिच्छेदः ॥

**End :**

**Colophon :**

इति श्रीवैखानसे संहितारत्नाकरे श्रीविष्णुदिव्यागमधर्मशास्त्रे उत्सवदैवत्यादिवर्षदैवत्यान्तप्रकरणं द्वादशम् ॥

अतः परं (प्र)वक्ष्यामि अष्टबन्धविधिं क्रमात् ।
पर्वावक्तेत्स मे तन्तुः द्विविधं बन्धनं क्रमात्(?) ॥

* * * *

**Colophon :**

इति श्रीवैखानसे संहितारत्नाकरे सकलागमसारसङ्ग्रहे भृगुप्रायश्चित्त-विधिस्समाप्तः ॥

* * * *

यद्वा समिधं समारोप्य नित्यं जुहुयात् ॥

**Colophon :**

इति श्रीवैखानसे संहितारत्नाकरे रत्नन्यासदक्षिणादानप्रकरणं चतुर्दशम् ॥

* * * *

तानि मूलानि दर्भांश्चापूपान् व्रीहीन् हस्तेन जुहुयात् । आज्यचरुं पात्रे हे-(णै)व जुहुयात् ॥

**Colophon :**

इति श्रीवैखानसे संहितारत्नाकरे होमद्रव्याधिदेवताप्रकरणं विंशतिकम् ॥

Foll. 51*b*—57*b* contain the Kumbhapūjā, Saptakalaśapūjā, Yāgaśālāprāyaścitta and Kautukabandhanahīnaprāyaścitta.

R. No. **3471**.

Palm-leaf. 16¾ × 1¼ inches. Foll. 80. Lines, 6 in a page. Telugu. Slightly injured.

Purchased in 1920-21 from M.R.Ry. Peddinti Śrīnivāsācāryulugāru, Anantakapēṭa, Guntur district.

Foll. 1 and 80 are left blank.

**वैखानससूत्रव्याख्या—तत्त्वप्रकाशिका.**

VAIKHĀNASASŪTRAVYĀKHYĀ : TATTVAPRAKĀŚIKĀ.

Same work as that described under R. No. 3417 ante. By Narasiṁhācārya, son of Nṛsiṁhācārya of Penumada.

Contains the Phalādhikāra only.

---

R. No. **3472**.

Palm-leaf. 17¼ × 1½ inches. Foll. 62. Lines, 5 in a page. Telugu. Slightly injured.

Purchased in 1920-21 from M.R.Ry. Peddinti Śrīnivāsācāryulugāru, Anantakapēṭa, Guntur district.

Fol. 1a gives the name of the MS. and of the owner. Fol. 1b contains the Pañcayajñalakṣaṇa. Fol. 2 contains the preparation of the Mahābilvādilēhya. Fol. 18 is left blank.

**संहितारत्नाकरः.**

SAṀHITĀRATNĀKARAḤ.

Same work as that described under R. No. 2466 ante.

Contains the Pratiṣṭhāprakaraṇa only.

Fol. 62 contains the Pratiṣṭhāphalaśruti.

---

R. No. **3473**.

Palm-leaf. 16 × 1½ inches. Foll. 53. Lines, 6 in a page. Telugu. Slightly injured.

Purchased in 1920-21 from M.R.Ry. Peddinti Śrīnivāsācāryulugāru, Anantakapēṭa, Guntur district.

(a) **वैखानससूत्रानुक्रमणिका.**

VAIKHĀNASASŪTRĀNUKRAMAṆIKĀ.

Foll. 1a—36a.

Similar to the work described under R. No. 3461 ante. By Tenali Gōpanācārya, pupil of Caturvāṭika Anantācārya.

Wants the beginning. Contains the Pañcagarbhasaṁskāra, Aṣṭasaṁskāra and Śēṣahōma.

**Beginning :**

तानप्यशक्तविषये . . . . . . मुपनयनेन सार्धं जातकर्मोत्थाननामकरणान्नप्राशनप्रवासागमनपिण्डवर्धनचौळोपनयनानीत्यष्ट संस्कारान् . . . . . . विवाहेन साकं पारायणव्रतबन्धविसर्गोपाकर्मसमावर्तनपाणिग्रहणानीति पञ्च संस्कारान् सीमन्तेन सह ऋतुसंगमनगर्भाधानपुंसवनसीमन्तविष्णुबली[ये]ति पञ्च गर्भसंस्कारान् इत्यष्टादश संस्कारान् तदङ्गभूतपुण्याहमङ्कुरार्पणनान्दीमुखवर्षवर्धनपुनराधानप्रतिपत्पक्वस्थालीपाकोत्तरक्रिया अपि तत्तत्प्रायश्चित्तानि वक्ष्यमाणस्तन् सूत्रसरणिक्रमं पुरस्कृत्य, भास्करभट्टविरचितसूत्रव्याख्यानं नृसिंहवाजपेयिकृतसूत्रभाष्यं, सुन्दरराजीयप्रयोग . . . तिं च समीक्ष्य मादृशानामशक्तानां प्रयोगसौकर्यार्थं सूत्रानुक्रमणिकां वक्ष्यामि । अथोपनयनं गर्भाधानादिवर्षे पञ्चमे गर्भाष्टमे नवमे वा कुर्यात् ।

* * * *

**Colophon :**

इति श्रीमच्चतुर्वाटिकानन्ताचार्यकृपापात्रश्रीमत्तेनालिगोपनाचार्यनामधेयबुधविरचितवैखानससूत्रानुक्रमणिकायां निषेकादिविष्णुबलिपर्यन्तं पञ्चगर्भसंस्कारस्समाप्तः ॥

* * * *

ऋतं च सत्यं च देवकृतस्य यन्मे गर्भे तरत्समन्त्रिते प्राजापत्यव्रते ब्रह्मयज्ञजपः ॥

**Colophon**

इति श्रीमच्चतुर्वाटिकानन्ताचार्यकृपापात्रश्रीतेनालिगोपनाचार्यनामधेयबुधविरचितवैखानससूत्रानुक्रमणिकायां जातकाद्युपनयनपर्यन्तमष्टसंस्कारस्समाप्तः ॥

**End :**

तत्रापि प्रभातवेलायां चेदाग्नेयस्थालीपाकौपासनवैश्वदेवब्राह्मणभोजनानां कालाभावे वधूमग्निं च स्वगृहमानीयाग्निकुण्डे निधाय शर्मण्वसित्याव्रतं सङ्कल्प्यार्कोदयात्पूर्वमेव विनाग्न्युपस्थानं निधाय प्रातस्सन्ध्यावन्दनान्ते पूर्ववदाग्नेयस्थालीपाकौपासनवैश्वदेवान्तहोमब्राह्मणभोजनानामन्तेऽग्निं प्रतिष्ठाप्य सपिण्डैस्सह भुक्तं भोजयेत् । तत्रापि विवाहदिनाच्चतुर्थेऽहनि शेषहोमः कर्तव्यः ॥

Date of transcription—Thursday, the 4th day of the dark fortnight of the lunar month Bhādrapada in the year Manmatha.

Foll. 36a—37b contain the Āśīrvādaślōkas, Pūrvaprayōgakārikās, Darbhādilakṣaṇa and Haridrācūrṇaviṣaya.

---

(b) पूर्वमन्त्रप्रश्नभागः.

PŪRVAMANTRAPRAŚNABHĀGAḤ.

Foll. 38a—48b.

Mantras to be repeated in the course of the ceremonies to be performed in relation to a person from conception to death.

**Beginning:**

धाता ददातु नो रयिमीशानो जगतस्पतिः । स नः पूर्णेन वावनत्स्वाहा ॥ धाता प्रजाया उत राय ईशे धातेदं विश्वं भुवनं जजान । धाता पुत्रं यजमानाय दाता तस्मा उ हव्यं घृतवद्विधेम स्वाहा ।

**End:**

शङ्खाय त्वा परिददामि, अनन्ताय त्वा परिददामि अपुराय त्वा परिददामि, मखाय त्वा परिददामि, यमाय त्वा परिददामि, गदाय त्वा परिददामि, वैशंसे त्वा परिददामि, पृथिव्यै त्वा परिददामि, वैश्वानराय त्वा परिददामि, अद्भ्यस्त्वा परिददामि, ओषधीभ्यस्त्वा परिददामि.

Foll. 49a—50a contain the Prājāpatyādivratabandhaprayōga. Fol. 50b is left blank. Foll. 51 and 52 contain the Dattahōmapayōga. Fol. 53 is left blank.

---

R. No. 3474.

Palm-leaf. 16¾ × 1⅜ inches. Foll. 31. Lines, 8 in a page. Telugu. Slightly injured.

Purchased in 1920-21 from M.R.Ry. Peddiṇṭi Śrīnivāsācāryulugāru, Anantakapēṭa, Guntur district.

Foll. 1, 2, 29, 30 and 31 are left blank.

अर्चनानवनीतम्.

ARCANĀNAVANĪTAM.

Foll. 3a—28b.

Same work as that described under R. No. 1607 ante.

Contains the Khaṇḍas one to five only.

Date of transcription—Monday, the 6th day of the dark fortnight of the lunar month Māgha in the year Krōdhana. Name of thes aribe—Vēṅkaṭācārya, eldest son of Agnihōtram Narasiṁhācārya.

---

R. No. 3475.

Palm-leaf. 16¾ × 1¼ inches. Foll. 46. Lines, 8 in a page. Telugu. Much injured.

Purchased in 1920-21 from M.R.Ry. Peddinṭi Śrīnivāsācāryulugāru, Anantakapēṭa, Guntur district.

Foll. 1a—5a contain the Jīrṇabērapartiyāgaviṣaya and Punaḥkarṣaṇādisaṁskāra. Fol. 5b is left blank.

वैखानसागमः—(भृगुसंहिता).

VAIKHĀNASĀGAMAḤ (BHṚGUSAṀHITĀ).

Foll. 6a—28b.

Same work as that described under No. 5367 of the D.C.S. MSS., Vol. XI.

Breaks off in the 6fth Adhyāya.

Foll. 29a—37a give the 10th Paṭala, 11th Paṭala and 35th Paṭala. Fol. 37b is left blank. Foll. 38a—44b contain the Pratiṣṭhāphala, Dhvajadaṇḍapaṭaprapāmaṇṭapa, Bhēryādipūjā, Puṣpabali, etc. Foll 45 and 46 contain a portion of the Saṁhitāratnākara.

---

R. No. 3476.

Palm-leaf. 18 × 1¼ inches. Foll. 14. Lines, 8 in a page. Telugu. Very much injured.

Purchased in 1920-21 from M.R.Ry. Peddinṭi Śrīnivāsācāryulugāru, Anantakapēṭa, Guntur district.

Fol. 2b gives the Balikṣēpavidhi. Fol. 3 contains the Kumbhapūjā and Agnipraṇayana. Foll. 1 and 2a are left blank.

मूर्तिकलान्यासः.

MŪRTIKALANYĀSAḤ.

Foll. 4a—13a. Foll. 13b and 14 are left blank.

On the details of procedure to be observed in connection with the consecration of the image of Goddess Lakṣmī.

Incomplete.

**Beginning:**

पूर्वोक्तैवङ्गुणविशेषणविशिष्टायां शुभतिथौ लक्ष्मीबिम्बस्य पादस्थानादिसर्वस्थानेभ्य आकृष्य कलश आवाहिता अष्टाचत्वारिंशज्जीवकलाः कलशा-

दाकृष्य लक्ष्मीबिम्बस्य मूर्धस्थानादिसर्वस्थानेषु क्रमेणावाहयिष्ये—

ओं श्री आं क्रों ओं सुवः अं अमृतां चन्द्रजीवकलां कलशादाकृष्य लक्ष्मीबिम्बस्य मूर्धस्थाने आवाहयामि । तं नमः श्रीं ओं ।

**End:**

प्राणापानौ तथा व्यानउदानौ च समानतः ।
नागाश्च कूर्मकृकरदेवदत्तधनञ्जयाः ॥

प्रत्यक्षप्राणनिलयवायोर्दश कलाः स्मृताः ।
धूम्रोष्णज्वलिनीज्वाला विस्फुलिङ्गी च सुश्रियः ॥

---

## R. No. 3477.

Palm-leaf. 18¼ × 1¼ inches. Foll. 33. Lines, 8 in a page. Telugu. Slightly injured.

Purchased in 1920-21 from M.R.Ry. Peddinti Srinivāsācāryulu Gāru, Anantakapeta, Guntur district.

(*a*) श्रीनिवासदीक्षितीयम्.

ŚRĪNIVĀSADĪKṢITĪYAM.

Foll. 1*a*—26*a*. Foll. 26 and 27 give the Nārāyaṇaparattvanirūpaṇa and Vaikhānasācāryalakṣaṇa.

Same work as that described under R. No. 3466 ante, wherein see for the beginning.

Contains the following subjects:—

१. विखनोमुनिसृष्टिः.
२. विखनोबन्धुनिरूपणम्.
३. भगवदाराधकत्वसमर्थनम्.
४. गर्भवैष्णवस्वरूपवर्णनम्.
५. प्रकारान्तरेण विखन—उत्पत्तिवर्णनम्.
६. ब्रह्मजननवर्णनम्.
७. इतिहासपुराणादिसिद्धविखनोजन्मकथनम्.
८. वैष्णवत्रैविध्यवर्णनम्.
९. वैखानसपारम्यकथनम्.
१०. वैखानसवानप्रस्थधर्मकथनम्.
११. पञ्चरात्रोत्पत्तिकथनम्.
१२. अमूर्तसमूर्तार्चनकथनम्.
१३. अन्यद्विजस्पर्शप्रायश्चित्तकथनम्.
१४. पञ्चकालपरायणत्वकथनम्.
१५. नारायणपरत्वनिरूपणम्.
१६. जातिकुलाचारकथनम्.
१७. वैखानसपारमैकान्त्यवर्णनम्.
१८. भगवत्प्रियत्वसमर्थनम्.

**End:**

अखिललोकजीवनार्थमर्चावतारः । तत्रापि नारायणैकपरत्वाभावात् बोधायनस्य ।

नारायणैकनिष्ठा ये सात्त्विकास्तान् निबोधत ।
पुरुषा राजसाश्चैव नानादैवतयाजिनः ॥
बाह्यनिर्दैवताश्चै(ताश्चै)त्र तामसाः परिकीर्त्तिताः ।
रजस्तमोऽभिभूतानां न तु मोक्षः कथञ्चन ॥ इति ॥

आपस्तम्बादीनां किञ्चिदपि परमैकान्तित्वं भगवत्प्रियतमत्वं च नोपपद्यते । अत एव श्रीमद्वैखानसानां परमैकान्तित्वं भगवत्प्रियतमत्वं चोपपद्यत इति सर्वं प्रतिपादितम् ॥

---

(*b*) आनन्दसंहिता.

ĀNANDASAṀHITĀ.

Foll. 28*a*—33*a*.

Same work as that described under No. 14758 of the Supplemental D.C.S. MSS. Vol. XXVI.

Contains the Adhyāyas one to five only.

Date of transcription:—Wednesday the third day of the dark fortnight of the lunar month Bhādrapada in the year Śrīmukha. Name of the scribe:—Agnihōtram Narasiṁhācāryulu.

Fol. 33 gives the Vaikhānasapāramya and Vaikhānasācāryaślōka.

---

## R. No. 3478.

Palm-leaf. 13¾ × 1½ inches. Foll. 161. Lines, 6 in a page. Telugu. Good.

Purchased in 1920-21 from M.R.Ry. Ballamudi-Dakṣiṇāmūrti-Śastrigāru, Chicacole, Ganjam district.

Foll. 1, 2, 72*b* and 136*b*—161*b* are left blank.

ब्रह्मसूत्रवृत्तिः—मिताक्षरा.

BRAHMASŪTRAVṚTTIḤ: MITĀKṢARĀ.

Same work as that described under R. No. 1675 ante: by Annambhaṭṭa, son of Tirumalācārya of Rāghavasōmayājin's family and of Kauśika gōtra.

Complete, but wants the third Adhyāya.

The scribe adds—

प्रभवाब्दे तु श्रावण्यां कृष्णपक्षे शुभप्रदे ।
त्रयोदश्यां भौमवारे मुदेऽतीव मयालिखत् ॥

---

R. No. 3479.

Palm-leaf. 13¾ × 1½ inches. Foll. 6. Lines, 5 in a page. Telugu. Slightly injured.

Purchased in 1920–21 from M.R.Ry. Ballamudi-Dakṣiṇāmūrti-Śāstrigāru, Chicacole, Ganjam district.

पञ्चरत्नमालिका—मुमुक्षुजनकल्पवल्लीव्याख्यासहिता.

PAÑCARATNAMĀLIKĀ: WITH THE COMMENTARY MUMUKṢUJANAKALPAVALLI.

Same work as that described under No. 4632 of the D.C.S. MSS., Vol. IX.

Wants the first stanza and the colophon which is different is given below.

इति श्रीमच्छङ्करगुरुवर्यविरचिता पञ्चरत्नमालिका मुमुक्षुजनकल्पवल्ली-(सहिता) परिसमाप्ता ॥

---

R. No. 3480.

Palm-leaf. 14 × 1¼ inches. Foll. 134. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1920–21 from M.R.Ry. V. Ranganātha Ayyangar, Sattur, Ramnad district.

Fol. 1 is left blank.

त्रिशिरःपुरमाहात्म्यम्.

TRIŚIRAḤPURAMĀHĀTMYAM.

This forms a part of the Sanatkumārasamhitā of the Skāndapurāṇa and treats of the holiness and religious importance of Triśiraḥpura (Trichinopoly).

Breaks off in the 64th Adhyāya with the words पितरं मोचयामास स्वपुण्यहरणादघात्).

**Beginning:**

शुक्लाम्बरधरं विष्णुं ( . . . ) सर्वविघ्नोपशान्तये ॥

नैमिशारण्यनिलया मुनयश्शौनकादयः ।
अष्टाङ्गयोगनिरता ब्रह्मज्ञानैकतत्पराः ॥

* * * *

इति पृष्टस्तदा सूतो नैमिशारण्यवासिभिः ।
वक्तुं प्रचक्रमे नत्वा व्यासं स्वगुरुमादितः ॥

सूत उवाच—

सम्यक् पृष्टमिदं विप्रा युष्माभिर्जगतो हितम् ।
रहस्यमेतद्युष्माकं वक्ष्यामि शृणुतादरात् ॥
मया नोक्तमितः पूर्वं कस्यापि मुनिपुङ्गवाः ।
मनो नियम्य विप्रेन्द्राश्शृणुध्वं भक्तिपूर्वकम् ॥
अस्ति दक्षिणदिग्भागे त्रिशिरश्शैलनामकम् ।
शेषवाय्वोश्च संवादादागतं पुण्यमुत्तमम् ॥
अनेकरत्नखचितं कावेर्या दक्षिणे तटे ।
क्षेत्राणामपि सर्वेषां तीर्थानामपि चोत्तमम् ॥
दृष्टमात्रेण शैलाग्रं मुक्तिस्संसारसागरात् ।
परमेशेऽतिभक्तिस्स्यात्तया पुण्यसमृद्धिता ॥
कर्मणस्त्रिविधस्यापि सिद्धिस्स्यान्नात्र संशयः ।

* * * *

**Colophon:**

इति श्रीस्कान्दे सनत्कुमारसंहितायां त्रिशिरश्शैलनाथमाहात्म्ये क्षेत्रवैभवं नाम प्रथमोऽध्यायः ॥

**End:**

स्वयंव्यक्तं लिङ्गमेतत्पुराणं दिव्यज्योतिस्सेवनीयं प्रयत्नात् ।
शैलं चेतल्लिङ्गरूपं जनानां पुण्यैर्लभ्यं पूर्वजन्मार्जितैर्हि ॥

**Colophon:**

इति स्कान्दे महापुराणे त्रिशिरगिरिमाहात्म्ये त्रिषष्टितमोऽध्याय ॥

सूतः—

शिवं भगवता तेन कुम्भजेन महात्मना ।
शिवधर्मानशेषांश्च श्रुत्वा धर्मार्थसंहितान् ॥

परितुष्टस्तदा राजा करिकालमहीपतिः ।
प्रणम्य परया भक्त्या मुनिं स शिवरूपिणम् ॥

* * * *

वर्षे वर्षे व्यतीपाते मार्गशीर्षे नृपोत्तमः ।
महाभिषेकैर्नैवेद्यैर्नानाविभवविस्तरैः ॥
मातृभूतेश्वरः प्रीतस्साधुमाश्चर्यतश्श्रुतम् ।
पितरं मोचयामास स्वपुण्यहरणाद्घात् ॥

---

R. No. 3481.

Palm-leaf. 15 × 1¼ inches. Foll. 95. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1920-21 from M.R.Ry. Ballamudi-Dakṣiṇāmurti-Śastrigaru, Chicacole, Ganjam district.

Foll. 13*b*, 29*b* and 95 are left blank.

ब्रह्मसूत्रार्थदीपिका.

BRAHMASŪTRĀRTHADĪPIKĀ.

A commentary on the Brahmasūtras, written in accordance with the views of Śaṅkara: by Vōṅkaṭa son of Gaurī and Śiva alias Śivarāma of Kauṇḍinyagōtra. The commentator states that he completed this work on the Rathasaptamī, i.e., the seventh day of the bright fortnight of the lunar month Māgha in the year Jaya.

Complete.

**Beginning:**

ध्यात्वा ब्रह्म चिदानन्दं कृत्वा च गुरुवन्दनम् ।
यथामतीमां कुर्वेऽहं ब्रह्मसूत्रार्थदीपिकाम् ॥
भाष्यवृत्त्यादिसद्ग्रन्थानधीत्यालोच्य चासकृत् ।
स्वबुद्धिदार्ढ्यसिद्ध्यर्थं दीपिकेयं विरच्यते ॥
स्थिते भाष्योदधौ दूरे सत्यां वृत्तिसरित्यपि ।
स्वक्षेत्रकुल्यावदियं भूयादन्योपयोगिनी ॥
चराचरस्य जगतः पितरौ नित्यदम्पती ।
प्रावौ गौरीशिवाख्यौ यावभूतां लोकलीलया ॥
तत्सुतोऽहं वेङ्कटाख्यसूरिः कौण्डिन्यगोत्रजः ।
त्वत्प्रेरितधिया ब्रह्मंस्त्वद्विचारपरोऽभवम् ॥

अथातो ब्रह्मजिज्ञासा । तत्र तावदस्य शास्त्रस्य ब्रह्मविषयकत्वादादौ आत्मा वारे द्रष्टव्य इत्यात्मदर्शनफलमुद्दिश्य तत्साधनत्वेन श्रवणं विधीयते । श्रवणं नाम वेदान्तवाक्यानामद्वितीये ब्रह्मणि तात्पर्यनिर्णयानुकूलो न्यायविचारः ।

**End:**

अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् । तयोर्ध्वमायन्नमृतत्वमेतीत्यादिशब्दात् अनावृत्तिश्रुतेः । तदभ्यक्षणेत्यस्मिन्सूत्रे तदुपादानाच्च नावृत्तिशङ्कत्यर्थः । सम्पूर्णसूत्राभ्यासः शास्त्रपरिसमाप्तिद्योतक इति सर्वमतिमङ्गलम् ॥

**Colophon:**

इति ४ ध्यायस्य ४ पादः ॥

इति श्रीकौण्डिन्यवंशपयःपारावारराकासुधाकरशिवरामसूरितनयवेङ्कटपण्डितग्रथितायां ब्रह्मसूत्रार्थदीपिकायां चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः ॥ शास्त्रं समाप्तम् ॥

जयाब्दे रथसप्तम्यां कौण्डिन्यान्वयसम्भवः ।
वेङ्कटाख्यसुधीः स्वार्थं सम्पूर्णां कृतवानिमाम् ॥

---

R. No. 3482.

Palm-leaf. 15¾ × 1½ inches. Foll. 152. Lines, 8 in a page. Grantha. Good.

Purchased in 1920–21 from M.R.Ry. V. Ranganāthayyangar Avargal, Tamil Pandit, Edward School, Ramnad district.

Foll. 1—4. Foll. 151 and 152 are left blank.

शिवभक्तमाहात्म्यम्.

ŚIVABHAKTAMĀHĀTMYAM.

This forms part of the Bhaviṣyōttarapurāṇa and deals in 28 Adhyāyas with the greatness of the devotees of God Śiva.

Complete.

**Beginning:**

शुक्लाम्बरधरं . . विघ्नोपशान्तये ॥ व्यासं वसिष्ठ . प्रभविष्णवे ॥ इन्द्रनील . रघुवीरम् । बुद्धिर्बलं . स्मरणाद् भवेत् ॥ गुरुर्ब्रह्मा . गुरवे नमः ॥ या कुन्देन्दु . जाड्यापहा ॥

आदिमध्यविहीनं हि शैवं तत्त्वं परात्परम् ।
सर्वाधारं निराधारं विक्रियारहितं सदा ॥
सर्वानन्दघनाम्भोधिंत्रिपुरघ्नं महेश्वरम् ।
पार्वतीरमणं वन्दे सततं सकलार्थदम् ॥
सूतं सर्वज्ञमतुलं शैवसिद्धान्तपारगम् ।
व्यासशिष्यं महाप्राज्ञं पुराणार्थविशारदम् ॥
नत्वा हर्षेण संयुक्ताः पप्रच्छुरमितौजसः ।
सूत सूत महाप्राज्ञ व्यासशिष्य महामते ॥
तव वागमृतं पीत्वा तृप्तिर्नैवोपजायते ।
श्रुत्वा सुदर्शनाचार्यवैभवं सुमनोहरम् ॥
तत्कथान्ते कलियुगे प्राप्ते प्रभवनामके ।
अब्दे शिवस्य शापेन कुबेरो वैश्यरूपतः ॥
कावेरीपत्तने प्राज्ञः वसन् शैवशिखामणिः ।
किं चकार महाप्राज्ञस्तस्येशः पुत्रता कथम् ॥
षोडशाब्दावधिर्नीतस्सर्वकर्ता महेश्वरः ।
किं तस्य गेहे कुर्वन् वै ह्यास्ते मध्यार्जुनेश्वरः ॥
तस्य श्वेतवनाभिख्यवणिजो महिमोन्नतिम् ।
वक्तुमर्हसि सूताद्य इति पृष्टो मुनीश्वरैः ॥

* * * *

**Colophon :**

इति श्रीभविष्योत्तरपुराणे शिवभक्तमाहात्म्ये पूर्वभागे यक्षेशस्य शिवशापेन मर्त्यत्वप्रापणं नाम षट्षष्टितमोऽध्याय इति प्रथमोऽध्यायः ॥

**End :**

धूपयित्वा यथान्यायं पुष्पैः कल्पतरूद्भवैः ॥
यक्षकर्दमलिप्तैश्च गन्धैस्सुरभिसंस्कृतैः ।
लेपयित्वा विशेषेण उपमन्युं महामुनिम् ॥
उपहारं ददुस्सर्वे फलानि विविधानि च ।
छत्रचामरसंयुक्तं नृत्तवाद्यसमन्वितम् ॥

आरोप्य शिबिकां दान्तामुपचारपुरस्सरम् ।
पुरप्रदक्षिणं कृत्वा स्वकं गेहमनानियत् ॥
इति श्वेतविपिनस्य सन्मुनेश्चरितं समस्तदुरितोघनाशनम् ।
श्रृणुते पठते(न्ति)विमलाशयास्सदा शिवरूपमेति नहि तत्र संशयः ॥

**Colophon:**

इति श्रीभविष्योत्तरपुराणे शिवभक्तमाहात्म्ये त्रिनवतितमोऽध्याय इति अष्टाविंशोऽध्यायः ॥

शिवभक्तमाहात्म्यं सम्पूर्णम् ॥

---

## R. No. 3483.

Palm-leaf. 18 × 1½ inches. Foll. 217. Lines, 9 in a page. Grantha. Good.

Presented in 1920-21 by M.R.Ry. Sāmam Piccu Ayyangar, Ramnad.

Foll. 1—5. Foll. 114, 209—217 are left blank.

(*a*) रामायणव्याख्या—रामानुजीया.
RĀMĀYAṆAVYĀKHYĀ: RĀMĀNUJĪYĀ.

Foll. 6*a*—103*a*.

Same work as that described under No. 1886 of the D.C.S. MSS., Vol. IV, Part I: by Kuṇḍala Rāmānujācārya.

Contains the Ayōdhyākāṇḍa complete and a small portion in the Āraṇyakāṇḍa.

---

(*b*) रामायणव्याख्या—रत्नमेखला.
RĀMĀYAṆAVYĀKHYĀ: RATNAMĒKHALĀ.

Foll. 104*a*—208*b*.

Same work as that described under No. 1899 of the D.C.S. MSS., Vol. IV, Part I: by Gōvindarāja of Kauśikagōtra.

Contains the Araṇyakāṇḍa only.

Date of transcription:—Thursday, the 29th day of the solar month Aipiśi in the year Kīlaka.

Name of the scribe:—Anantamu.

## R. No. 3484.

Palm-leaf. 17 × 1¼ inches. Foll. 47. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1920-21 by M.R.Ry. Sāmam Picou Ayyangar, Ramnad district.

सामवेदमन्त्रभाष्यम्.

SĀMAVĒDAMANTRABHĀṢYAM.

Same work as that described under No. 68 of the D.C.S. MSS., Vol. I, Part II. By Sāyaṇācārya.

Wants two stanzas in the introductory portion, otherwise complete. Contains the first Prapāṭhaka complete and breaks off in the second Prapāṭhaka.

---

## R. No. 3485.

Palm-leaf. 18¼ × 1⅝ inches. Foll. 47. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1920-21 by M.R.Ry. Naḍādūr Gōpālācāryar, Śrīvilliputtur, Tinnevelly district.

(a) परमुखचपेटिका.

PARAMUKHACAPĒṬIKĀ.

Foll. 1a—19a.

Same work as that described under R. No. 1301 ante. By Mahāmahōpadhyāya Śrī-Kṛṣṇatātācārya, son of Vēṅkaṭaguru of Śrīśaila family.

Complete.

---

(b) णत्वचन्द्रिका.

ṆATVACANDRIKĀ.

Foll. 19b—31b.

Similar to the work described under No. 4887 of the D.C.S. MSS., Vol. X. By the same author as that of the above.

Complete.

**Beginning :**

रघुवंशादुग्धजलधौ जातं सन्तानमाश्रये कमपि ।
अतितुङ्गादपि यस्माद्विनतैरेव्यं फलं करग्राह्यम् ॥
वकुलभूषणपादसरोरुहप्रवणमानससंयमिशेखरम् ।

कलयतो निगमान्तगुरोः पदं कृतधियं करवै गुरवे नमः ॥

लक्ष्मीकुमारतातार्यवंश्यवेङ्कटसद्गुरोः ।
तनयः कृष्णतातार्यस्तनुते णत्वचन्द्रिकाम् ॥

णत्वे परोक्तयुक्तीनां दूषणं सम्यगीरितम् ।
तुष्टये वावदूकानां कल्याप्यष्टि प्रदर्श्यते ॥

इह खलु कारणवाक्यगतानां सद्ब्रह्मात्मादिसामान्यशब्दानां छागपशुन्यायेन समानप्रकरणपठितनारायणशब्दसमर्पिते भगवति विशेषे पर्यवसानम् । ततश्च कारणवाक्यगतशिवादिशब्दानामपि यथायथं रूढ्या योगेन वा भगवत्परत्वमेव, कारणाद्वित्वासम्भवात् ।

**End :**

नारायणशब्दस्य शिवे रूढिः यौगिकत्वेऽपि साधुत्वं वा न सिध्यतीति । तथा च नारमयनं यस्येत्यादिव्युत्पत्त्या शिवपरस्य नारायणशब्दस्य व्याकरणाविहितकार्यघटिततया असाधुत्वमेवेति सर्वं समञ्जसम् ॥

**Colophon :**

श्रीशैलकृष्णसुधिया रचिता णत्वस्य चन्द्रिका सेयम् ।
कलयतु कुवलयमखिलं हृष्टं चामोदमेदुरं च सदा ॥

---

**R. No. 3486.**

Palm-leaf. $14\frac{1}{4} \times 1\frac{3}{4}$ inches. Foll. 50. Lines, 11 in a page. Grantha. Good.

Presented in 1920-21 by M.R.Ry. Naḍādūr Gōpālacārya of Śrīvilliputtūr, Tinnevelly district.

(a) सिद्धान्तकौमुदीव्याख्या—लघुशब्देन्दुशेखरः.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ ; LAGHUŚABDĒNDUŚEKHARAḤ.

Foll. 2a—27b. Fol. 1 is left blank.

Same work as that described under No. 1414 of the D.C.S. MSS., Vol. III ; by Nāgēśabhaṭṭa.

Contains the Strīpratyaya and Kārakaprakaraṇa only.

(b) स्वरपञ्चाशद्व्याख्यानम्.

SVARAPAÑCĀŚADVYĀKHYĀNAM.

Foll. 28a—50b.

Same work as that described under No. 1018 of the D.C.S. MSS., Vol. II.

Incomplete.

---

R. No. 3487.

Palm-leaf. 14⅜ × 1⅝ inches. Foll. 59. Lines, 8 in a page. Grantha. Good.

Presented in 1920-21 by M.R.Ry. Naḍādūr Gōpālacārya of Śrīvilliputtur, Tinnevelly district.

(a) तत्त्वमार्ताण्डः—ब्रह्मसूत्रव्याख्या.

TATTVAMĀRTĀṆḌAḤ: BRAHMASŪTRAVYĀKHYĀ.

Foll. 1a—35a. Fol. 35b is left blank.

Same work as that described under No. 4894 of the D.C.S. MSS., Vol. X; by Śrīnivāsa, son of Śrīnivāsatātācārya and Lakṣmī. The author belongs to the Śrīśaila family and was a pupil of Aṇṇayadīkṣita.

Contains the second Pada (wants the beginning and commences with the words अत एव न द्वितीया, केचित्तु विधेयबहुत्वेऽपि and ends with the words एवं गृहैकत्वमपि । यत्र तु प्रकरण).

---

(b) आनन्दतारतम्यखण्डनम्.

ĀNANDATĀRATAMYAKHAṆḌANAM.

Foll. 36a—51a. Fol. 51b is left blank.

Similar to the work described under No. 4869 of the D.C.S. MSS., Vol. X.

Wants the beginning and the end.

**Beginning:**

यदपि मतं जीवस्वरूपमेव तारतम्यवत् । तदेवानन्दशब्दाभिधेयमित्यामनुष्यमाचतुर्मुखमानन्दतारतम्योपपत्तिरिति ; तन्न विकल्पासहत्वात् । तथाहि—किं मनुष्यादि जीवानां स्वरूपमल्पं ततो मनुष्यगन्धर्वस्वरूपमधिकमित्येवमाचतुर्मुखं स्वरूपतारतम्यम् उत मनुष्येष्वपि केषां चित्स्वरूपमल्पं केषां चिन्महदित्येवं वा? नाद्यः । तथा सति गुरोः तव च विपुलाविपुल-

ज्ञानवतोर्मुक्तावानन्दतारतम्याभावप्रसङ्गात् । नचेष्टापत्तिः साधनतारतम्य-वैयर्थ्यापत्तेः ।

**End:**

अस्मत्पक्षे गुणाद्याश्च तद्वन्तो हि विशेषतः । इत्यनुव्याख्यानकारिकाखण्डस्य तद्वन्त इत्यस्य विवरणे न्यायसुधायां भेदसम्बन्धकार्यकरो हि विशेष इति तदुभयप्रतिनिधिविशेष इत्युक्त्या गुणगुणिनोर्भेदतत्सम्बन्धयोः प्रत्याख्यातत्वात्.

---

(*c*) आनन्दतारतम्यखण्डनम्.

ĀNANDATĀRATAMYAKHAṆḌANAM.

Foll. 52*a*—59*b*.

Same work as that described under No. 4869 of the D.C.S. MSS., Vol. X: by Śrīnivāsācārya of Śaṭhamarṣaṇagōtra.

Complete.

---

R. No. **3488.**

Palm-leaf. 17⅜ × 1¼ inches. Foll. 107. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1920-21 by M.R.Ry. Naḍādūr Gōpālācārya of Śrīvilliputtur, Tinnevelly district.

(*a*) स्वरमनोज्ञमञ्जरी.

SVARAMANŌJÑAMAÑJARĪ.

Foll. 1*a*—54*b*.

Same work as that described under R. Nos. 158(*b*) and 1674 ante: by Narasiṁhasūri, son of Rudrārya.

Complete.

---

(*b*) स्वरमनोज्ञमञ्जरीव्याख्या —परिमलः.

SVARAMANŌJÑAMAÑJARĪVYĀKHYĀ: PARIMALAḤ.

Foll. 55*a*—97*b*. Foll. 98*a*—100*a* contain the Mantrarṣicchandōdēvataviniyōgādiviṣayavacanas. Fol. 100*b* is left blank. Foll. 101—106 give the Taddhita-portion of the Tattvabōdhinīvyākhyā on the Siddhāntakaumudī. Fol. 107 is left blank.

A commentary on the Svaramanōjñamañjarī, described under subdivision (a) of this number, by Girināthasūri, son of Mallinātha of Kōlacala family the famous commentator on the Raghuvamsa, the Kumārasambhava, etc. The commentator was a pupil of Nṛsiṁha, the author of the original work.

Complete.

**Beginning :**

अर्धाङ्गजानिमघरीकृतपञ्चबाणमाशीविषाभरणमार्द्रजटाकलापम् ।
आलोलफालदृशमाहृतकालकूटमालोकयेऽहमनिशं कमपि प्रकाशम् ॥

वर्णी काणभुजीमजीगणदवासासीच्च वैयास-
कीमन्तस्तन्त्रमरंस्त पन्नगगवीगुम्भेषु चाजागरीत् ।
वाचामाचकलद्रहस्यमखिलं यश्चा(यश्चा)क्षपादस्फुरां
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥

मल्लिनाथकवेस्तस्य पुत्रस्तादृग्गुणोदयः ।
अस्ति श्रीगिरिनाथाख्यो विनीतो वेदशास्त्रवित् ॥
सोऽयं नृसिंहविदुषः ख्यातायास्स्वगुरोः कृतेः ।
विधत्ते स्वरमञ्जर्या व्याख्यां परिमलाह्वयाम् ॥

आम्नायनिर्झरतरोः स्वरमञ्जरीयमाविष्कृता प्रतिभया नरसिंहसूरेः ।
ग्राह्योल्लसत्परिमला विबुधैस्समस्तैरासेव्यतामविकलं फलमादधाना ॥
सुकृतमकृत नावं वेदरत्नाकरेऽस्मिन् स्वरतरलतरङ्गे नूत्नशिल्पी नृसिंहः ।
त्वयामिह विहरन्तां वीतशङ्कं विदग्धा नवपरिमलटीकां कर्णधारीं विधाय ॥

अथ ग्रन्थारम्भे तस्याविघ्नपरिसमाप्तिं सम्प्रदायाविच्छेदं चेच्छन्निष्टां विशिष्टां च देवतामभिवादयते—वेदेत्यादि । ईश्वरं वन्द इत्यन्वयः । कीदृशमीश्वरं [येनेश्व]येनेश्वरेण वेदवेदार्थयोस्तत्त्वमशेषं बोधितं विज्ञापितम् ।

* * * *

इतीत्थम् । तेषां स्वराणां सामान्यनिर्देशः कृतः । अत एव विशेषतो निरूप्यन्ते । तत्रापि पूर्वं प्रकृतिप्रत्ययाश्रिताः स्वरा निरूप्यन्त इति ॥

**Colophon:**

इति महोपाध्यायकोलचलमल्लिनाथसूरिसूनुश्रीगिरिनाथसूरिविरचितायां स्वरमञ्जरीव्याख्यायां परिमलाख्यायां प्रथमः परिच्छेदः ॥

**End:**

मानेति । इह लोके अनूचानानामुत्तमानां मानाधिकां गौ . . . . . . . व्यागमव्यसनकर्मभिस्सदाचारैरेधमाना वर्धमाना मानार्थं लक्ष्मीपतिमीशमीश्वरं श्रुतिभिरुपनिषन्मुखैः भिमानाः परिशीलयन्तः । अत एव सुरैः समानाः . . . . सीदन्ति न विपद्यन्त इत्यर्थः ॥

**Colophon:**

इति श्रीमन्महोपाध्यायकोलचलमल्लिनाथसूनुश्रीगिरिनाथसूरिविरचितायां स्वरमञ्जरीव्याख्यायां परिमलाख्यायां प्रकीर्णकाख्योऽष्टमः परिच्छेदः ॥

---

R. No. 3489.

Palm-leaf. 16¾ × 1½ inches. Foll. 155. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1920-21 by M.R.Ry. Naḍādūr-Gōpālācārya of Śrīvilliputtūr, Ramnad district.

अभिनवरामाभ्युदयम्.

ABHINAVARĀMĀBHYUDAYAM.

Foll. 1a—151b. Foll. 152—154 contain a few stanzas of this work. Fol. 155 is left blank.

A poem in 24 Sargas describing the main story of the Rāmāyaṇa: by Abhirāmakāmākṣi, who, in the beginning of the work, praises the following poets:—Vyāsa, Kālidāsa, Bhavabhūti, Bāṇa, Bhāravi, Māgha, Bhōja, Murāri, Harṣa, Maṅkha, Subandhu, Ḍiṇḍima, Acyuta and Vālmīki.

Complete.

**Beginning:**

वस्तु स्तुमो हस्तिवरानन्नं तत् स्वस्तिप्रदं प्रस्तुतकार्यसिद्ध्यै ।
आचक्षते यत्परमादियूनोरक्ष्णोरुपम्राह्ममयातयामम् ॥
श्रियं स पुष्णातु ममानवद्यां . . . . . . . जः ।
नावं तृतीयवर्णमहार्णवस्य नमस्यतां यस्य कटाक्षमाहुः ॥
वशंवदं या बलयैकमुद्रान्यासेन पश्यन्निटलं व्यतानीत् ।
कम्पानदीतीरतपस्विनीं तामम्बामुपासे सहजानुकम्पाम् ॥

* * * *

वाल्मीकिरुन्मीलिततानवाभिर्वाग्भिः कथं वा मम वर्णनीयः ।

वाग्देवताया वसुधावतारविश्रान्तितीर्थं विशदं यमाहुः ॥
उत्तालशब्दोचितचारुपादन्यासा समुल्लासकराभिनीतिः ।
वाग्वैखरी भारतकृत्यधीना व्यासोदिता दीव्यति लासिकेव ॥

कवीशितुर्यस्य वचांसि कालीकर्पूरवीटीसुरभीकृतानि ।
. . . . . . . . . . . . . . कथं नु वर्ण्येत स कालिदासः ॥

सुव्यक्तशाखाद्भुतसूत्रधारभावेन नीता भवभूतिनेव ।
अनानटीन्नाटकसम्प्रदायैरम्भोजभूवक्त्रनटी वधूटी ॥

कर्णानुषक्त . . . . . . . . . . . . विचित्रम् ।
सुहृज्जनाम्ना सुमनोवरेण बाणेन वाणी भवतेरितेयम् ॥

प्रकाशयन्त्यर्जुनभावबन्धं मायाकिरातस्थितिमाननीया ।
भागीरथी भारविभारती . . . . . . . . . . . . . ॥

सतीरलङ्कारविधा प्रपन्ना सत्कामपालाच्युतभावयोगा ।
समग्रशृङ्गाररसा समिन्धे मनोरमा माघकवीन्द्रवाणी ॥

आलोकसंसर्गजमाननेन्दोः वैशेषिकं वागमृतं जनानाम् ।
. . . . न्यः कमलाधिपत्यं स एव तेजस्सविता हि भोजः ॥

समग्रबोधेन सुशब्दसिन्धुं संमथ्य सानन्तगुणाचलेन ।
सुधोपलब्धेव मुरारिणासौ सूक्तिर्विधत्ते सुमनोहितानि ॥

सन्तः पिबन्तः श्रवणाञ्जलिभ्यां सारस्वतं यस्य रसातिरेकात् ।
कम्प्रं शिरश्श्लाघनकैतवेन वहन्ति दूरे वचसां स हर्षः ॥

काव्यप्रपायां सुरभीणि पीत्वा कविव्रजो यस्य वचोऽमृतानि ।
खद्योदितं मुञ्चति घर्म(तापं) सङ्कुचावतामग्रसरस्स मङ्खः ॥

कूपे निमग्ना कुकविव्रजानां मुखाभिधाने मुहुरुद्धृताभूत् ।
वाग्देवताश्लेषवशेन येन सुबन्धुरेवैष सुबन्धुरस्याः ॥

प्रशस्यते यस्य विकुण्ठवादिप्र . . . मो डिण्डिम एव नाम ।
अणीयसी स्तोतुममुं ममोक्तिः कथं प्रगल्भा कविसार्वभौमम् ॥

विद्वन्मणीन्विस्मयकारिणस्तान् विदुस्सदास्यानविभूषणानि ।
अमूर्तियुक्तोऽपि गुणप्रकर्षः परस्य यपु . . . . मेति ॥

सुते विचित्रं सुधियां सुखेन्दुस्सारस्सतक्षीरसमुद्रमेनम् ।
अद्वैतसारोऽच्युत एव जागर्त्यनन्तशय्याधिगमेन यस्मिन् ॥

* * * *

प्राग्भिः कवीन्द्रैर्भणितं प्रबन्धं प्रचोदितो बालतया . . . ।
. . . . . . . . . . . . . किं कर्म नानुक्रियते किशोरैः ॥
अहं विधातुं कृतिमप्रगल्भस्तथापि काकुत्स्थकथाभिधानात् ।
असौ पवित्रीकृतिरात्मनोऽपि पात्रं किमु स्यात्परिहास्यतायाः ॥
मयावगाढा किमु काव्यनाथो . . . . . . योऽयं कृतिनायको मे ।
स एव सन्तारयिताथ रामस्समुद्रबन्द्धा सवितुः कुलीनः ॥
काव्यं कवीन्द्रैः कथितं यदाद्यैः वाल्मीकिपूर्वैरपि वक्तुमेतत् ।
उदारधीर्नाहमुपेत्य भक्तिमुपक्रमे दाशरथेः कथेति ॥
अस्ति त्रिलोकीनिधिरम्बुजानामाकस्मिकस्मेरगुणोपदेष्टा ।
मुकुन्दवेषोहरमूर्तिभेदो वेदोपगीतो भगवान् विवस्वान् ॥

* * * *

अस्मादभूद्विस्मयनीयतेजा राजा मनुर्नाम रसाविडौजाः ।
नरेन्द्रनीतिक्रममातृकासीन्नवा यदीया नयशास्त्रविद्या ॥
आखण्डलीयाममरा इवाज्ञां वेलां पयोधेरिव वीचिमालाः ।
छन्दोगिरस्सत्यमिव प्रजास्ता न लङ्घयन्ति स्म नयं तदीयम् ॥
मनोः कुलेऽस्मिन्नथ माननीये मान्धातृनामा महितो महीन्द्रः ।
महेन्द्रमाक्षिप्य महामहिम्ना समं भुवापि त्रिदिवं शशास ॥

* * * *

**Colophon:**

इत्यभिरामकामाक्ष्याः कृतौ अभिनवरामाभ्युदयनाम्नि काव्ये प्रथमस्सर्गः ॥

**End:**

समजनि मृदङ्गाद्यैर्वाद्यैर्विजृम्भितविभ्रमै-
स्समधिकरवैश्शङ्खैश्शङ्खैश्च पुञ्जितनिस्वनैः ।
प्रमदनदनं स्वैरं प्रारम्भि वारवधूजनैः
रचितभुवनक्षेमे रामाभिषेकमहोत्सवे ॥
अलङ्कुर्वन् भद्रासनमनघरत्नांशु मघव-
न्मणिश्यामो रामो घन इव महामेरुशिखरम् ।

प्रजाबर्हिव्यूहप्रमदनदनानां घटयिता
विचित्रालङ्कारस्फुरितहरिचापो विरुरुचे ॥
भरतधृतसितातपत्रस्सुमित्रासुताभ्यां तदा
विधुतविमलचामरस्तत्र वीरो रघूणां महान् ।
उदयगिरिरिवैष सौवाकरं बिम्बमूर्ध्वं वहन्
पतदमलझरोभयपार्श्वोऽभयो भासते स्माधिकम् ॥

**Colophon :**

इत्यभिरामकामाक्ष्याः कृतावभिनवरामाभ्युदयनाम्नि काव्ये चतुर्विंशति-(तम)स्सर्गः ॥

इत्यभिनवरामाभ्युदयं समाप्तम् ॥

---

R. No. **3490.**

Palm-leaf. 17 × 1¼ inches. Foll. 98. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1920-21 by M.R.Ry. Gōpālacāryar of Śrīvilliputtūr, Ramnad district.

मुक्तावलीव्याख्या—तार्किकसिद्धान्तरत्नमञ्जूषा.

MUKTĀVALĪVYĀKHYĀ : TĀRKIKASIDDHĀNTARATNA-MAÑJŪṢĀ.

Same work as that described under Nos. 3977 and 3978 of the D.C.S. MSS., Vol. VIII, wherein see for the beginning.

Contains up to the Ātmamānasapratyakṣanirūpaṇa.

**End :**

तच्च महादेवोक्तरीत्या न सम्पन्नमतो नेदमभिप्रेतं विश्वनाथस्य . . . . . . इदमपीत्यादिना ग्रन्थकृतैव दर्शितमिति । तत्र बीजान्तरान्वेषणप्रयासः कर्तव्यः । अत एव ज्ञानातिरिक्तं प्रत्यकारणतया . . . . . . . . . . . . . . . तदव्यवहितपूर्वस्य मानसप्रत्यक्ष इत्यादिग्रन्थसन्दर्भस्यापि विशिष्ट.

---

R. No. **3491.**

Palm-leaf. 16⅞ × 1¼ inches. Foll. 148. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1920-21 by M.R.Ry. S. Varadarāja Ayyaṅgār, Ananta-krishnapuram, Tinnevelly district.

प्रमाणसङ्ग्रहः.

PRAMĀṆASAṄGRAHAḤ.

Same work as that described under No. 5316 of the D.C.S. MSS., Vol. XI.

Contains up to the Śrīcūrṇaparipālana and Brahmamēdha portion.

---

R. No. 3492.

Palm-leaf. 15¾ × 1¼ inches. Foll. 160. Lines, 11 in a page. Grantha and Tamil. Good.

Presented in 1920-21 by M.R.Ry. Appāvayyaṅgārsvāmi, Tamil Pandit, Śrīvilliputtūr, Ramnad district.

(a) रामायणव्याख्या—विरोधभञ्जनी.

RĀMĀYAṆAVYĀKHYĀ: VIRŌDHABHAÑJANĪ.

Foll. 1a—18b.

Same work as that described under No. 1895 of the D.C.S. MSS., Vol. IV, Part I. By Brahmavidyādhvarīndra, son of Nṛsiṁha and Bhavānī of Vana family and pupil of Ahōbila.

Incomplete.

---

(b) பெரியதிருமலைநம்பியருளிச்செயல்.

PERIYATIRUMALAINAMBIYARUḶICCEYAL.

Foll. 19a—25b.

See the Tamil Part of this Triennial Catalogue for extracts and description.

Complete.

---

(c) भरतज्यैष्ठ्यनिर्णयः.

BHARATAJYAIṢṬHYANIRṆAYAḤ.

Foll. 26a—35b.

A treatise in prose and verse proving that Bharata was older than Lakṣmaṇa; by Vēṅkaṭārya, son of Śrīnivāsārya.

Complete.

**Beginning:**

लक्षिते भरतो ज्येष्ठो लक्ष्मणो वेति संशये ।
ज्यायोभिर्युक्तिरत्नैस्तज्ज्यैष्ठ्याज्यैष्ठ्यं विविच्यते ॥

तत्र लक्ष्मण एव भरतात् तावज्ज्येष्ठ इति युक्तम् ।

तथा हि—श्रीरामायणे बालकाण्डे षोडशे सर्गे पत्नीनां पायसदानक्रमोक्तिप्रकरणे तावदमी श्लोकाः परिवर्ण्यन्ते—

कौसल्यायै नरपतिः पायसार्धं ददौ तदा ।
अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः ॥
कैकेय्यै चावशिष्टार्धं ददौ पुत्रार्थकारणात् ।
प्रददौ चावशिष्टार्धं पायसस्यामृतोपमम् ॥

* * * *

तदनुरोधेन सुमित्राप्रसवानन्तरमेव कैकेय्याः प्रसव इति सिद्धौ तदनुरोधेन प्रथमोत्पन्नस्य लक्ष्मणस्य पश्चात्तनोत्पत्तिकभरतापेक्षया ज्यैष्ठ्यसिद्धिः ।

**End :**

अत एव—

मातस्तातः क्व यातस्सुरपतिभवनं हा कुतः पुत्रशोकात्
कोऽसौ पुत्रश्चतुर्णां त्वमवरजतया यस्य जातः किमस्य ।
यातोऽसौ काननान्तं किमपि नृपगिरा किं तथासौ बभाषे
मद्वाग्बद्धः फलं ते किमिह तव धराधीशता हा हतोऽस्मि ॥

इत्यादिमहाकविवचनानामाविरोध इति यत्किंचिदेतत् ॥

**Colophon :**

श्रीवाधूलकुलोत्तंसश्रीनिवासार्यसूनुना ।
भणितो वेङ्कटार्येण भरतज्यैष्ठ्यनिर्णयः ॥

Fol. 36 contains Ācaryanirṇaya and fol. 37 is left blank.

---

(d) रामायणव्याख्या—वाल्मीकितात्पर्यदीपिका.

RĀMĀYAṆAVYĀKHYĀ : VĀLMĪKITĀTPARYADĪPIKĀ.

Foll. 38*a*—139*a*.

A commentary on the Śrīmadrāmāyaṇa, which work has been described under Nos. 1806—1876 of the D.C.S. MSS., Vol. IV, Part I: by Nṛsiṁhapaṇḍita, who salutes Saṭhāripu, son of Kāri, Yāmunācārya, Rāmānuja, and several others.

Contains the Prakaraṇas 1—24 complete.

**Beginning :**

श्रीमन्मङ्गलशैलशृङ्गविलसत्क्षीरक्षमावोज्ज्वला-
धस्थानस्थितिमाननुत्तमरमारम्यात्मवक्षस्स्थलः ।
अव्याद्दिव्यतराकृतिश्श्रुतिशिरोवेद्योऽतिहृद्यस्स नः
श्रीमान् वेङ्कटभूमिपस्त्रिजगतीरक्षोरुदीक्षान्वितः ॥
तुङ्गाभङ्गुरमङ्गलाद्रिनिलयो रङ्गत्तरङ्गायिता-
पाङ्गस्सद्गुणतुङ्गतस्सदलमेल्मङ्गासमालिङ्गितः ।
रूक्षप्रेक्षणराक्षसक्षितिवरक्षेपातिदक्षोऽवता
दस्मान्वीक्षणरक्षितादितिसुतश्श्रीवेङ्कटाधीश्वरः ॥
यादोनाथगभीरमादिमकविं यादोऽधिनाथात्मजं
यादोनाथमनन्तसद्गुणततेर्यादोऽधिनाथं नगैः ।
बध्नन्तं भरताग्रजं स्ववचनैराशंसमानं मुदा
वाल्मीकिं तमकल्मषं मुनिवरं वन्दे गिरां सिद्धये ॥
श्रीमत्कारितनूभवं शठरिपुं श्रीयामुनार्यं गुरुं
श्रीरामानुजदेशिकं गुरुवरं श्रीवत्सचिह्नं तदा ।
श्रीवेदान्तिगुरुं निरन्तरमह श्रीवादिभीकृद्गुरुं
धन्यं मान्यवचःप्रपञ्चनिलयं वन्दे गिरां शुद्धये ॥
श्रीमद्वादिभयङ्करान्वयसुधाम्भोधिस्फुरच्चन्द्रमाः
श्रीमद्वेङ्कटदेशिकाग्र्यतनयश्श्रुत्यन्तयुग्मार्थवित् ।
श्रीरामानुजदेशिकोचमलसद्राद्धान्तसंस्थापकः
वेदान्ताख्यगुरुर्ममास्तु सततं श्वश्श्रेयससम्प्राप्तये ॥
श्रीमच्छ्रीशैलपूर्णान्वयजलधिसुधादीधितिर्बोधमुद्रां
बिभ्रद्वाहोबिलार्यप्रथिततनुभवो वेदवेदान्तवेदी ।
दुर्वारखर्वगर्वोकु(त्क)रविमतमतक्षेपणोद्दामशौर्यो
भुवेका(क)श्रीवेङ्कटार्यो जयतु मतिमतामग्रणीरग्रजन्मा ।
श्रुतिस्मृतिपुराणेतिहासादिग्रन्थसङ्गतैः ।
रम्यां वाल्मीकितात्पर्यदीपिकां रचयामहे ॥

इह खलु भगवान्वाल्मीकिरनादिमायया लुप्तस्तस्मान्मायी सृजते विश्वमेत-
त्तस्मिंश्चान्यो मायया सन्निरुद्धः । अनृतेन बाप्रत्यूढास्तेषां सत्यानामनृतमपि-

च नमित्यादिश्रुतिशतजातसिद्धानादिमायापरिमुषितशेमुषीकाणामनादिकर्मवासना-
रुचिप्रकृतिसम्बन्धैः

* * * *

तत्र तत्र तत्तद्व्याख्यातृभिर्व्याख्यातत्वात्, तदनालम्बेन मुनिमनोऽनुगतसुमति-
सम्मतस्य प्रबन्धप्रकाशस्य व्यङ्ग्यस्याभिप्रायचतुर्विंशतिसङ्ख्यासङ्ख्येयतात्पर्या-
र्थाः प्रतिपाद्यन्ते ।

* * * *

**Colophon:**

इति श्रीमदुत्तुङ्गमङ्गलमङ्गलाद्रिनिलयश्रीवेङ्कटेश्वरप्रसादसमासादितसकलनय-
विज्ञानमण्डितश्रीनृसिंहपण्डितविरचितायां वाल्मीकितात्पर्यदीपिकायां प्रथम-
प्रकरणम् ॥

**End:**

इदानीमतिबलरावणनिबर्हणपूर्वकसकलसाम्राज्ये लक्ष्मीविभवसहितस्य पुन-
रयोध्यां प्रत्यागमनवेलायां तत्स्नेहविस्मरणेन तं प्रति कुशलवार्ताप्रेषणम् उदये
सविता रक्तो रक्तश्चास्तमये तथा । सम्पत्तौ च विपत्तौ च महतामेकरूपतेति
सर्वदेशसर्वकालसर्वदशास्वपि महतामैकरूप्यमेव युक्तमिति प्रकटयितुमिति सर्वं
समञ्जसम् ॥

**Colophon:**

इति श्रीमदुत्तुङ्गमङ्गलमङ्गलाद्रिनिलयश्रीवेङ्कटेश्वरप्रसादलब्धसकलनयविज्ञान-
मण्डितश्रीनृसिंहपण्डितविरचितायां वाल्मीकितात्पर्यदीपिकायां चतुर्विंशतितमं
प्रकरणम् ॥

अथ प्रचलितो मारुतस्ततः अयोध्यामागम्य भरतादीन् ।

* * * *

पुरुषैस्सङ्कोचासङ्कोचसमययोस्स्वाश्रितविषये साम्येनैव वर्तनीय इत्येतादृशो
धर्मः—इत्येतादृशचतुर्विंशतिप्रकरणप्रतिपादितचतुर्विंशतितात्पर्यार्थैर्निखिललोको-
पकाराय चतुर्विंशतिधर्मास्तदनुबन्धिनश्चत्वारोऽपि धर्मास्सूक्ष्मया दृशा बुद्धिमद्भि
र्योज्या इत्यलमतिप्रसङ्गेन ॥

* * * *

मङ्गलाद्रितुङ्गशृङ्गमहितदुग्धभूरुहो-
त्सङ्ग(सङ्ग)तालमेलुमङ्ग्या प्रसङ्गतः ।
किङ्करीकृतामरेन्द्रशङ्करा च पाहि मा
वेङ्कटेशसङ्कटीविशङ्कटप्रतापतः ॥

(*e*) रामोत्तरतापिनी.

RĀMŌTTARATĀPINĪ.

Foll. 139*a*—142*b*.

Same work as that described under No. 753 of the D.C.S. MSS., Vol. I, Part III.

Contains the Uttaratāpini portion only.

---

(*f*) विष्णुसहस्रनामावलिः.

VIṢṆUSAHASRANĀMĀVALIḤ.

Foll. 143*a*—159*a*. Foll. 159*b* and 160 are left blank.

Same work as that described under Nos. 9050 and 9052 of the D.C.S. MSS., Vol. XVII: without the Pūrvapīṭhikā.

---

R. No. 3493.

Palm-leaf. 13¾ × 1½ inches. Foll. 101. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1920-21 by M.R.Ry. Appāvayyaṅgārsvāmi, Tamil Pandit, Śrīvilliputtūr, Ramnad district.

रामानुजदिव्यचरितम्.

RĀMĀNUJADIVYACARITAM.

Similar to the work described under R. No. 2239 (*c*) ante. By Vakulabhūṣaṇasūri, son of Śaṭharipuguru of Ātrēyagōtra and disciple of Varadarāja of Vatsa family, the author of the Yatīndrapravaṇa-campu.

Wants the beginning and breaks off in the tenth Stabaka ending with the words—

आविर्बभूव तनयस्य पराशराख्यामीमांसिताच्छ्रुतिमुखादिव तत्त्वबोधम्.

This work is also called Vēdāntabhāskara alias Yatīndracampu.

**Beginning :**

तदा खलु कमलावल्लभवदनकमलसमुल्लासनकर्मठशठमथनकरुणारसपिठ-रकुमतकुठारभगव . . . . . जलनिधिकास्तुमस्य

* * * *

श्रीभूदेवीनाम्नीं कान्तिमत्यपरनाम्नीमशेषतन्त्रधुर्यस्य श्रीमत्केशवार्यस्याजमहा-राजस्य भोजराजतनय(म्) इवेन्दुमतीं प्राणवल्लभां प्रकल्पयामास ।

* * * *

दक्षो लक्ष्मणसूरिः शिक्षायै सर्वशास्त्राणाम् ।
साक्षात्कर्तुमवाञ्छद्दक्षात्क्षुण्णां स काञ्चीं ताम् ॥

**Colophon:**

इति श्रीवत्सकुलतिलकवरदगुरुचरणसरसिजषट्चरणेन श्रीमदत्रिवंशमुक्ताफलशठरिपुगुरुतनूजेन विरचितयतीन्द्रप्रवणचम्पूप्रबन्धेन श्रीवकुलाभरणसूरिणा विरचिते श्रीरामानुजदिव्यचरितालङ्कारे वेदान्तभास्करापरनामधेये श्रीमद्यतीन्द्रचम्पूप्रबन्धे प्रथमस्स्तबकः ॥

श्रीमत्केसरभूषणाख्यविबुधारामे स्वयं प्रोत्थिता
दीव्यन्मूलबलेयमार्यमहिता वाणी तुलस्येधते ।
तस्याः श्रीयतिराजवृत्तमधुभृद्भूयाद्रमाभूपतेः
आद्योऽसौ स्तबको मनोज्ञहृदयोल्लासाय वर्द्धीयसे ॥

**End:**

मदीयपरिचरणधुरीणो भवेति दिव्याज्ञां मालामिव मूर्ध्ना बिभ्राणस्सन्तोषसागरान्तर्वासिभिरन्तेवासिभिस्सहितः शठजनदूरवापं मठमवगाह्याहरहस्त्रयीमिव भगवद्धरिवसनलक्ष्मीमपि विकासयन् व(वा)नशैलादुपागतेन बहुधा समाश्वसितेन तादृशेन कूरेशदेशिकेन सह यथापुरं यतिराजो विरराज ॥

**Colophon:**

इति श्रीवत्सकुलतिलकवरदगुरुचरणसरसिजषट्चरणेन श्रीमदत्रिवंशमुक्ताफलशठरिपुगुरुतनूजेन विरचितयतीन्द्रप्रवणचम्पूप्रबन्धेन श्रीवकुलाभरणसूरिणा विरचिते श्रीरामानुजदिव्यचरितालङ्कारे वेदान्तभास्करापरनामधेये श्रीमद्यतीन्द्रचम्पूप्रबन्धे नवमः स्तबकः ।

श्रीमत्केसरभूषणाख्यविबुधारामे स्वयं प्रोत्थिता
दीव्यन्मूलबलेयमार्यमहिता वाणी तुलस्येधते ।
तस्याश्च स्तबको यतीन्द्रगुणसन्माध्वीभरोऽस्तु स्फुटं
श्रीपत्युर्नवमो मनोज्ञहृदयोल्लासाय वर्द्धीयसे ॥
विद्यासिन्धुस्तदास्ये स हि किल कुरुकाधीश्वरो देशिकेन्द्रो
यत्पद्यस्तप्रसादात्प्रचुररसनिधिं द्राविडाम्नायटीकाम् ।
व्यातेने व्यासतातप्रकटितभणितेर्या सखित्वं समेत्य
स्वोदीतार्थाकृतिभ्यां विलसति नितरां वर्धितश्रीशभक्तिः ॥

* * * *

श्रीमानतो गुरुवरात् गुणपूर्णभार्या-
च्छ्रीरङ्गधामदयितप्रबलप्रसादात् ।
आविर्बभूव तनयस्स पराशराख्यो
मीमांसिताच्छ्रुतिमुखादिव तत्त्वबोधम् ॥

---

R. No. 3494.

Palm-leaf. 16¾ × 1½ inches. Foll. 13. Lines, 7 in a page. Telugu. Much injured.

Presented in 1920-21 by M.R.Ry. Mantravādi Vēṅkaṭasubbayya-gāru, Karaṇam, Gudivada, Bapatla taluk, Guntur district.

परमानन्दतन्त्रम्.

PARAMĀNANDATANTRAM.

Same work as that described under No. 5670 of the D.C.S. MSS., Vol. XII, and R. No. 2257(*d*) ante.

Contains the Udrēkas 15—18 complete and 19th incomplete.

---

R. No. 3495.

Palm-leaf. 16¾ × 1½ inches. Foll. 29. Lines, 7 in a page. Telugu. Much injured.

Presented in 1920-21 by M.R.Ry. Mantravādi Vēṅkaṭasubbayya-gāru, Karaṇam, Gudivada, Bapatla taluk, Guntur district.

(*a*) महालक्ष्मीरत्नकोशः.

MAHĀLAKṢMĪRATNAKŌŚAḤ.

Foll. 1*a*—14*b*.

Same work as that described under No. 8020 of the D.C.S. MSS., Vol. XV. By Śaṅkara.

Contains the Adhyāyas 82—87.

---

(*b*) त्रिपुरसुन्दरीत्रैलोक्यमोहनकवचः.

TRIPURASUNDARĪTRAILŌKYAMŌHANAKAVACAḤ.

Foll. 14*b*—17*b*.

Same work as that described under No. 6335 of the D.C.S. MSS., Vol. XIII.

Complete.

(c) आम्नायस्तवः.

ĀMNĀYASTAVAḤ.

Foll. 17b—18b.

Same work as that described under No. 10707 of the D.C.S. MSS., Vol. XIX: with slight difference in the beginning and the colophon.

Complete.

**Beginning:**

चतुर्भुजां त्रिणयनां कमलासनसंस्थिताम् ।
त्रिशूलं पानपात्रं च गदां जिह्वां च बिभ्रतीम् ॥
लम्बोष्ठीं कम्बुकण्ठीं च समपीनपयोधराम् ।
पीताम्बरां मदाघूर्णां ध्यायेद्ब्रह्मास्त्रदेवताम् ॥

**End:**

यस्त्रिसन्ध्यं पठेद्विद्वानाम्नायस्तवमुत्तमम् ।
सर्वपापविशुद्धात्मा सर्वैश्वर्यसमन्वितः ॥
भुक्त्वा भोगान् यथाकामं सर्वप्रियहिते रतः ।
श्रीविद्यालोकमाप्नोति वेदवाक्यानुसारतः ॥

**Colophon:**

इति श्रीमदुड्ड्याणमहेश्वरतन्त्रे आम्नायस्तवः समाप्तः ॥

---

(d) महालक्ष्मीरत्नकोशः.

MAHĀLAKṢMĪRATNAKŌŚAḤ.

Foll. 18b—22b.

Same work as that described under No. 8920 of the D.C.S. MSS., Vol. XV.

Contains the 86th Adhyāya only.

Foll. 22b and 23a contain the Bagalākalpavidhi. Fol. 23a contains the Śāktaguruparamparāstuti and Gandharvarājamantra.

---

(e) बालास्तवराजः.

BĀLĀSTAVARĀJAḤ.

Foll. 23b—24b.

Same work as that described under No. 10802 of the D.C.S. MSS., Vol. XIX.

Complete as found in the Bhairavayāmala.

Foll. 24b and 25a contain the Śrīcakradhyāna.

(*f*) गुरुपादुकास्तोत्रम्.

GURUPĀDUKĀSTŌTRAM.

Fol. 25.

Same work as that described under No. 10882 of the D.C.S. MSS., Vol. XIX.

---

(*g*) देवीस्वयंवरकल्पः.

DEVISVAYAṀVARAKALPAḤ.

Foll. 25*b*—27*a*.

Similar to the work described under No 8075 of the D.C.S. MSS., Vol. XV.

Complete.

**Beginning:**

त्रिकोणमृतुकोणं च वसुकोणं ततः परम् ।
राज्ञां गृहादिगमनसमये नामसंयुतम् ॥
अष्टोत्तरशतं मन्त्रं जप्त्वा राजगृहं प्रपे(विशे)त् ।
प्राणानपि ददात्त(देता)स्मै तथा राजा न संशयः ॥
त्रिसहस्रं जपेन्मन्त्रं मासार्धं नियतेन्द्रियः ।
स्मरणात्तस्य दातस्य (ता स्यात्) वश्यं नात्र विचारयेत् ॥

**End:**

नवनीतमयं ध्यात्वा सादनावह्निरूपिणीम् ।
आत्मानं योऽसमो ध्यायेत्तामरुद्दलमाप्नुयात् ॥

**Colophon:**

इति श्रीदेवीस्वयंवरकल्पे नानाविधवशीकरणं समाप्तम् ॥

---

(*h*) भैरवाष्टोत्तरशतदिव्यनामामृतस्तोत्रम्.

BHAIRAVĀṢṬŌTTARAŚATADIVYANĀMĀMṚTASTŌTRAM.

Foll. 27*a*—29*b*.

Similar to the work described under No. 9234 of the D.C.S. MSS., Vol. XVII.

Complete as found in the Rudrayamala.

**Beginning:**

मेरुपृष्ठे समासीनं देवदेवं त्रियम्बकम् ।
शङ्करं परिपप्रच्छ पार्वती परमेश्वरम् ॥

श्रीदेव्युवाच—

भगवन् सर्वधर्मज्ञ सर्वशास्त्रागमादिषु ।
आपदुद्धारकं मन्त्रं सर्वसिद्धिप्रदं नृणाम् ॥

* * * *

स एव भैरवो नाम आपदुद्धारको मतः ।
त्वया च कथितो देवो भैरवः कल्प उत्तमः ॥
तस्य नामसहस्राणि प्रयुतान्यर्बुदानि च ।
सारमुद्धृत्य तेषां मे नामाष्टशतकं वद ॥

**End :**

जपेन्मासत्रयं मर्त्यः राजा च वशमाप्नुयात् ।
धनार्थी च सुतार्थी च दारार्थी यस्तु मानवः ॥

**Colophon :**

इति श्रीरुद्रयामले भैरवाष्टोत्तरशतदिव्यनामामृतस्तोत्रं सम्पूर्णम् ॥

---

## R. No. 3496.

Palm-leaf. 14⅝ × 1¼ inches. Foll. 15. Lines, 6 in a page. Grantha. Good.

Presented in 1920-21 by M.R.Ry. V. Rama Śāstrigaḷ, Tiruvannadūr, Tinnevelly district.

लक्ष्मीनृसिंहशतकम्

LAKṢMĪNṚSIṀHAŚATAKAM.

A centum of stanzas in praise of the man-lion incarnation of Lord Viṣṇu: by Sītārāma, son of Raṅguni Nāganātha and a resident of Charapura, a place in the Tinnevelly district.

Date of composition—4948 of Kali.

Complete.

**Beginning :**

श्रीविघ्नेश्वरपादपङ्कजमहं नत्वा गिरां देवतां
वाणीं चापि गुरून् प्रणम्य भजतामिष्टार्थदं चेतसा ।
ध्यात्वा यत्पदपङ्कजं परमितो धर्मादिकान् मानवा
वर्गान् स्तौमि रमापतिं तममलं लक्ष्मीनृसिंहं विभुम् ॥
श्रीमान् शम्भुः परेशः प्रशिथिलनिगमाद्वैतसिद्धान्तकृत्यै
यद्गात्रेणाविरासीदवनितलगुरुश्शङ्कराचार्यवर्यः ।

स्तुत्वा यं यत्प्रसादाखिजदुरितफलप्राप्तिकाले नृसिंहं
लक्ष्मीशं त्वां प्रसन्नं न भवति भुवन कोऽथ स प्राप हर्षम् ॥

**End:**

मया स्यूतां मालां तव नरहरे मौक्तिकशतैः
प्रसादात्ते कण्ठे वरचरितसिन्धोश्शुभतरैः ।
गृहाणोद्धृत्या त्वं इवभजनसूत्रे पदमय-
श्शतानां श्लोकानां विबुधवरलक्ष्मीशकलिताम् ॥
श्रीमद्गौतमगोत्रसिन्धुशशिनः पुत्रेण सीतापते-
र्ध्यानध्वस्तमनोमलस्य शतकं श्रीनारसिंहं कृतम् ।
श्रीमद्रङ्गनिनागनाथविदुषः कान्तं प्रसादात्प्रभोः
सीतारामनीषिणा नरहरेर्दासेन लक्ष्मीपतेः ॥
चत्वारिंशद्युतनवशताधिकचतुस्सहस्त्रेषु कलेः ।
सर्वेषु गतेषु रचितं शतकमिदं श्रीहरेश्शिवदम् ॥

**Colophon:**

श्रीमच्छ रपुरनिवासिना सीतारामपण्डितेन रचितोऽयं ग्रन्थः ॥

अष्टाचत्वारिंशद्युतनवशतयुक्चतुस्सहस्रेषु ।
वर्षेषु गतेषु कलेः शतकं विरचितमिदं नृहरेः ॥

---

R. No. 3497.

Palm-leaf. 16 × 1½ inches. Foll 59. Lines, 8 in a page. Grantha. Fair.

Presented in 1920-21 by M.R.Ry. Lakṣminārāyaṇa Ayyar Avargal, Nāraṇammanspuram, Tinnevelly district.

Foll. 1, 2, 57—59 are left blank.

लीलावतीव्याख्या—कर्मप्रदीपिका.

LĪLĀVATĪVYĀKHYĀ : KARMAPRADĪPIKĀ.

Same work as that described under No. 13484 of the D.C.S. MSS., Vol. XXIV; but the name of the commentator is different as may be seen from the colophon given below:—

एतन्माधवाख्येन रचितं कर्मदीपकं नाम लीलावतीव्याख्यानं सम्पूर्णम्.

Date of transcription—Thursday, the 14th day of the solar month Margaḷi in the year 1026.

## R. No. 3498.

Palm-leaf. 15⅝ × 1½ inches. Foll. 216. Lines, 8 in a page. Grantha. Much injured

Presented in 1920-21 by M.R.Ry. Sāmi-Śrautigal, Nāraṇammapuram, Tinnevelly district.

Fol. 74b is left blank.

### तत्त्वचिन्तामणिप्रकाशव्याख्या—तर्कचूडामणिः.
### TATTVACINTĀMAṆIPRAKĀŚAVYĀKHYĀ : TARKACUḌĀMAṆIḤ.

Same work as that described under No 4102 of the D.C.S. MSS., Vol VIII. By Dharmarājādhvarin of Kaṇḍramāṇikkam, Tanjore district.

Contains from the Anumāna (wants the beginning) to the end of the Vidhivāda.

---

## R. No. 3499.

Śrītāla. 19 × 1½ inches. Foll. 84. Lines, 10 in a page. Telugu. Slightly injured.

Presented in 1920-21 by M.R.Ry. Vājapēyam-Vēṅkaṭarāma-Vādhyār, Villūr, Tirumangalam, Madura district.

Foll. 1 and 84b are left blank.

### नञ्जराजयशोभूषणम्.
### NAÑJARĀJAYAŚOBHŪṢAṆAM.

Same work as that described under R. No. 19 ante. By Narasiṁhakavi alias Abhinavakālidāsa, son and pupil of Śivarāma.

Complete in seven Vilāsas.

---

## R. No. 3500

Palm-leaf. 18 × 1½ inches. Foll. 90. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1920-21 by M.R.Ry. Vājapēyam Vēṅkaṭarāma Vādhyār, Villūr, Tirumangalam, Madura district.

### (a) रामायणसारसङ्ग्रहः, सव्याख्यः.
### RĀMĀYAṆASĀRASAṄGRAHAḤ WITH COMMENTARY.

Foll. 1a—75a. Fol. 75b is left blank.

Same work as that described under R. No. 1734 ante; but with slight difference in the colophon as found below. By Īśvaradīkṣita.

**End :**

भक्त्या रामस्य ये चेमां संहितामृषिणा कृताम् ।
लिखन्ति च महात्मानस्तेषां वासस्त्रिविष्टपे ॥

संहिता संहितातुल्यत्वादादिकाव्यमपि संहितैव ।

**Colophon:**

इति श्रीमदीश्वरदीक्षितीये रामायणव्याख्यानसारसङ्ग्रहे युद्धकाण्डस्सम्पूर्णः॥

Date of transcription—5th day of the bright fortnight of the lunar month Śrāvaṇa in the year Rudhirōdgārin.

Name of the scribe—Gōpāla, younger brother of Ādinūrti Śāstrin and son of Sarvā Kṛṣṇabhaṭṭa.

---

(b) रामायणव्याख्यानम् (सङ्क्षिप्तम्).

RĀMĀYAṆAVYĀKHYĀNAM (SAṄKṢIPTAM).

Foll. 76a—89b. Fol. 90a gives the name of the original MS.

Similar to the commentary described under No. 1901 of the D.C.S. MSS., Vol. IV, Part I.

Imperfect and in disorder.

**Beginning :**

बालकाण्डे—

बहुभिः किमेतदुदितैरहमेवेदं चराचरं विश्वम् ।
शीकरफेनतरङ्गाः सागरजान्यानि नैव वस्तूनि ॥

प्राणसमाहिता । प्राणैस्संयोजिता प्राणतुल्येत्यर्थः । प्राणसमाहिता । तदिति । उपगताः सङ्गतास्समासास्सन्धयस्सन्धिबन्धा अस्मिन् सन्त्युपगतसमाससन्धियोगम् ।

* * * *

अयोध्याकाण्ड आरम्यते—प्रग्रहवान् नियमवान्, श्रुतकल्पः श्रुतकौशलः, निभृतः भारवाही, संवृताकारः गूढाभिप्रायः, संयमकालवित् सङ्ग्रहकालवेत्ता.

**End :**

पुण्यक्षेत्रे पात्रे तीर्थं दर्शनेष्वपि इति . स्वपक्षे पञ्चदश पूर्वोक्ताष्टादशतीर्थेषु मन्त्रिपुरोहितयुवराजवर्जं पञ्चतीर्थानि अव(वि)ज्ञातः अन्योन्यमितरैरप्यविज्ञातैः

* * * *

वाह्यते नीयतेऽनेनेति वाहनम्.

---

## R. No. 3501.

Palm-leaf. 19¾ × 1 inches. Foll. 46. Lines, 6 in a page. Grantha and Tamil. Good.

Presented in 1920–21 by M.R.Ry. Tirumala Ayyangar Avargal, Śrīkāryam, Nambitirumaḷigai, Tirukkōṭṭiyūr, Tinnevelly district.

(*a*) कावेरीस्तोत्रम्.

KĀVĒRĪSTŌTRAM.

Fol. 2. Fol. 1 contains the Vakulabhūṣaṇastōtra and Vāḻitirunāmam of Nammāḻvār, etc.

Similar to the work described under R. No. 673(*c*) ante.

Wants the beginning ; otherwise complete.

**Beginning :**

कावेरीमवगाहिषीय भगवद्भोगान्तरायीभव-
त्कर्मक्लेशफलाशयप्रशमनोद्वेलामलस्रोतसम् ।
जन्तोस्संसरतोऽर्चिरादिसरणिव्यासङ्गभङ्गाय या
लोकेऽस्मिन् विरजेव वेल्लितजला श्रीरङ्गमालिङ्गति ॥

**End :**

यद्विष्णोः पदमतमः परोरजोऽस्यं मुक्तानामनुविरजं विदीप्रमाहुः ।
तत्पुण्यं पुलिनमिदं तयाद्य मध्येकावेरी(रि)स्फुरति तदीक्षिषीय नित्यम् ॥
त्रय्यन्तप्रहतमतीषु वैष्णवानां प्राप्यासु प्रचुरभवश्रमापहासु ।
कावेरीपरिचरितासु पावनीषु श्रीरङ्गे भवनतटीषु वर्तिषीय ॥

**Colophon :**

कावेरीस्तोत्रं संपूर्णम् ॥

---

(*b*) सौम्यजामातृमुनिदिनचर्या.

SAUMYAJĀMĀTṚMUNIDINACARYA.

Foll. 3*a*—4*a*.

Same work as that described under R. No. 173(e) ante.
Contains the Pūrvadinacaryā only.

---

(c) यतिराजविंशतिः.
YATIRĀJAVIṀŚATIḤ.

Foll. 4b—5b.
Same work as that described under R. No. 173(f) ante.
Complete

---

(d) सौम्यजामातृमुनिदिनचर्या.
SAUMYAJĀMĀTṚMUNIDINACARYĀ.

Foll. 6a—7a.
Same work as that described under R. No. 173(e) ante.
Contains the Uttaradinacaryā only.

---

(e) चतुश्श्लोकी.
CATUŚŚLOKĪ.

Fol. 7.
Same work as that described under R. No. 160(a) ante. By Yāmunācarya.
Complete.

---

(f) पराङ्कुशपञ्चविंशतिः.
PARĀṄKUŚAPAÑCAVIṀŚATIḤ.

Foll. 8a—9b.
Same work as that described under R. No. 173(m) ante. By Varadarājadēśika of Vadhūlagōtra.
Complete

---

(g) नक्षत्रमालास्तोत्रम्.
NAKṢATRAMĀLĀSTŌTRAM.

Foll. 10a—11b.
Same work as that described under R. No. 173(n) ante. By Abhirāmavara.
Complete.
Fol. 12a contains the Ślōkadvayam.

---

(h) प्रार्थनापञ्चकम्.
PRĀRTHANĀPAÑCAKAM.

Fol. 12.

Same work as that described under R. No. 173(r) ante.

Complete.

---

(i) देवराजाष्टकम्.

DĒVARĀJĀṢṬAKAM.

Fol. 12b.

Same work as that described under R. No. 174(j) ante. By Kāñcipūrṇa, also called as Tirukkaccinambi.

Complete

---

(j) जितन्तेस्तोत्रम्.

JITANTĒSTŌTRAM.

Fol. 13.

Same work as that described under R. No. 174(i) ante.

Complete.

---

(k) लक्ष्मीस्तोत्रम्.

LAKṢMĪSTŌTRAM.

Foll. 14a—15a.

Same work as that described under R. No. 673(g) ante.

Complete.

---

(l) रङ्गनाथपञ्चरत्नम्.

RAṄGANĀTHAPAÑCARATNAM.

Fol. 15b.

Same work as that described under No. 9375 of the D.C.S. MSS, Vol. XVIII.

Complete.

---

(m) स्तोत्ररत्नम्.

STŌTRARATNAM.

Foll. 16a—19b.

Same work as that described under R. No. 160(t) ante.

Complete.

आळवन्दारुस्तोत्रं सम्पूर्णम् ॥

---

(n) शठकोपप्रपत्तिः.

ŚAṬHAKŌPAPRAPATTIḤ.

Fol. 20.

Same work as that described under No. 10570 of the D.C.S. MSS., Vol. XIX.

Complete.

---

(o) शठकोपमङ्गलाशासनम्.

ŚAṬHAKŌPAMAṄGALĀŚĀSANAM.

Foll. 20b—21a.

Stanzas wishing benediction on Saint Śaṭhakōpa or Nammāḻvār.

Complete.

**Beginning:**

श्रियः कान्ताय कृपया निर्निबन्धप्रवृत्तया ।
गर्भेऽभिषिक्तो यस्तस्मै शठकोपाय मङ्गलम् ॥

असूत यं कारिदेवी पूर्वसन्ध्येव भास्करम् ।
अस्तु दिव्यावताराय मङ्गलं श्रीशठारये ॥

**End:**

श्रीमत्सुन्दरजामातृमुनिमानसवासिने ।
श्रीतिन्त्रिणीनिवासाय शठकोपाय मङ्गलम् ॥

**Colophon:**

शठकोप[ाय] मङ्गलं समाप्तम् ॥

---

(p) यतिराजमङ्गलाशासनम्.

YATIRĀJAMAṄGALĀŚĀSANAM.

Fol. 21.

Same work as that described under No 9698 of the D.C.S. MSS., Vol. XVIII.

Complete.

---

(q) भाष्यकारप्रपत्तिः.

BHĀṢYAKĀRAPRAPATTIḤ.

Fol. 22.

Similar to the work described under No. 9690 of the D.C.S. MSS., Vol. XVIII.

Complete.

**Beginning:**

श्रीशैलगोष्ठिपुरपूर्णकृपोपलब्धरामायणार्थचरमोज्ज्वलपद्यसार
पूर्णार्थयामुनमुनीन्द्रपदाब्जहंस श्रीभाष्यकार चरणौ शरणं प्रपद्ये ॥

**End:**

वेतालभूतशठजित्कलिवैरियोगिवाहादिपादसरसीरुहराजहंस ।
काञ्चीपुरीमुनिकृपारसपूर्णपात्र श्रीभाष्यकारचरणौ शरणं प्रपद्ये ॥

---

(r) वरवरमुनिप्रपत्तिः

VARAVARAMUNIPRAPATTIḤ.

Fol. 23.

Stanzas indicative of the supplicant's self-surrender to Varavaramuni or Maṇavāḷamāmuni, the chief priest of the Teṅgalai Śrī-Vaiṣṇavas.

Complete.

**Beginning:**

लोकार्यदेशिकदयागुणपात्रभूतश्रीशैलनाथगुरुपादसरोजसङ्गात् ।
प्राप्ताम(त्म)सद्गुणशमादिविशिष्टरम्यजामातृयोगिचरणौ शरणं प्रपद्ये ॥

**End:**

यन्निष्ठपावनपयःकणपातलेशा मन्निष्ठपापशतकूलद्वाग्निकल्पाः ।
तौ पुष्टशिष्टजनचित्तकृतौ तु रम्यजामातृयोगिचरणौ शरणं प्रपद्ये ॥

**Colophon:**

मणवाळ(मा)मुनिप्रपत्तिस्सम्पूर्णा.

Fol. 23b contains the Avatāraślōka and Caramaślōka.

---

(s) श्रीरङ्गराजसुप्रभाताष्टकम्.

ŚRIRAṄGARĀJASUPRABHĀTĀṢṬAKAM.

Fol. 24.

Same work as that described under No. 10258 of the D.C.S. MSS., Vol XVIII; without the Phalaśruti stanza.

Complete.

---

(t) गोष्ठीपुरेशप्रपत्तिः.

GŌṢṬHĪPURĒŚAPRAPATTIḤ.

Fol. 25.

Stanzas surrendering one's self to God Saumyanārāyaṇa, a form of Viṣṇu worshipped in Tirukkōṭṭiyūr.

Complete.

**Beginning:**

श्रीवल्लभपदाम्भोजधीभक्त्यमृतसागरम् ।
श्रीमद्गोष्ठीपुरीपूर्णं देशिकेन्द्रं भजामहे ॥

**End:**

श्रीमन् दयाकर निशाकरकान्तवक्त्र सम्पत्सुपूर्णपरिसेवितपादपद्म ।
श्रीविष्णुचित्तकलिवैरिमुखाद्यगीत गोष्ठीपुरेश चरणौ शरणं प्रपद्ये ॥

---

(a) गोष्ठीनाथमङ्गलाशासनम्.
GŌṢṬHĪNĀTHAMAṄGALĀŚĀSANAM.

Foll. 25*b* and 26*a*.

Stanzas wishing benedictions on God Saumyanārāyaṇa, worshipped in Tirukkōṭṭiyūr.

Complete.

**Beginning:**

श्रीमद्रामानुजाचार्यदैवताय दयावते ।
सौम्यनारायणायास्तु गोष्ठीनाथाय मङ्गलम् ॥
गोष्ठीपूर्णहृदम्भोजनिरन्तरनिवासिने ।
अम्भोजदलनेत्राय गोष्ठीनाथाय मङ्गलम् ॥

**End:**

भट्टेशगाथाप्रथमश्रोत्रे सम्पश्यतां सदा ।
आसेचनकरूपाय गोष्ठीनाथाय मङ्गलम् ॥

---

(c) गोष्ठीनाथविजयमङ्गलाशासनम्.
GŌṢṬHĪNĀTHAVIJAYAMAṄGALĀŚĀSANAM.

Fol. 26.

Similar to the above.

Complete.

**Beginning:**

श्रीमद्गोष्ठीपुरीनाथ वर्धतां विजयी भवान् ।
दिव्यं त्वदीयमैश्वर्यं निर्मर्यादं विजृम्भताम् ॥

**End:**

श्रीलक्ष्मणार्यं गुरुमार्यवर्यं विलोक्य कल्याणगुणामृताब्धे ।
कटाक्षपात्रानगतीननन्यान् श्रीसौम्यनारायण देवदेव ॥

श्रीमद्गोष्ठीपुरीपूर्णमङ्गलाशासनात्सदा ।
सौम्यनारायण श्रीमन् मङ्गलानि भवन्तु ते ॥

**Colophon:**

गोष्ठीनाथविजयमङ्गलं सम्पूर्णम् ॥

---

(w) सौम्यनारायणस्तवः.
SAUMYANĀRĀYAṆASTAVAḤ.

Fol. 27.

A eulogy in verse on God Saumyanārāyaṇa.

Complete.

**Beginning:**

यत्राख्यायि पुरूरवस्सुचरितानीतैश्शताङ्गस्थितै-
र्देवैस्तत्र सुशीतलस्थितिजुषां गोष्ठयाह्वये धामनि ।
गोविन्दं नरकस्य नाशनमहं स्तोष्ये गुणाम्भोनिधिं
लक्ष्मीहृद्यतमं महीप्रियतमं तं सौम्यनारायणम् ॥

**End:**

प्रत्याख्यातसरोजनीक्षणरुचा वक्त्रारविन्दश्रिया
प्रत्यादिष्टकुमुद्वतीप्रणयिनं गोष्ठीपुराधीश्वरम् ।
सर्वस्वं वचसामकारणभुवां सौन्दर्यगेहायितं
मन्ये कञ्चन पूरुषं मरतकच्छायाविहाराङ्गणम् ॥

अर्वाञ्चो यत्पदसरसिजद्वन्द्वमाश्रित्य पूर्वे
मूर्ध्ना यस्य स्वयमुपगता देशिका मुक्तिमापाः ।
सोऽयं रामानुजमुनिरपि स्वीयमुक्तिं करस्थां
यत्सम्बन्धादमनुत कथं वर्ण्यते कूरनाथः ॥

Fol. 28 describes the greatness of the Śrīśailēśapadya. Fol. 29*a* contains the Bhagavatparatvādipañcaka and 29*b* Śrīrāmānujastava.

(*w*) पराङ्कुशोत्पत्तिस्तुतिः.

PARĀṄKUŚŌTPATTISTUTIḤ.

Fol. 30.

Eulogistic stanzas on the birth of Parāṅkuśa or Śaṭhakōpa, who was born as the son of Kāri and Naṅgā by the grace of Nambi; a form of God Viṣṇu, worshipped in Tirukkuruṅguḍi; by Rāghavārya.

Complete.

**Beginning:**

श्रीमत्केरलभूपसूर्यकुलजश्रीरामराजात्मजा
श्रीपुत्री शशिवंश्यपाण्ड्यमहिपश्रीकारिराज्ञः प्रिया ।
नङ्गाख्याजनयत्कुरुङ्गडिपुरीस्वामिप्रसादात्सुतं
दिव्यज्ञानयुतं शठारिमकरोन्मारामिधं तत्पिता ॥

**End:**

संवीत्याथ निजात्मजे बहुविधं मत्स्यादिरूपं हरेः
सम्यग्दर्शितमेव तेन कविना चाश्वासितश्चासकृत् ।
पत्या साकमसौ नृपः परिजनैः प्रापात्मनः पत्तनं
पर्यायेण परां गतिं च जगति श्रेयश्च कीर्तिं ययौ ॥

The scribe adds—

श्रीराघवाचार्यकृतिः पराङ्कुशजनिस्तुतिः ।
धीमता सुन्दराह्वेन लिखिता तत्कृपाप्तये ॥

---

(*y*) अष्टश्लोकी.

AṢṬAŚLŌKĪ.

Fol. 31.

Same work as that described under R. No. 171(*d*) ante.

Complete.

---

(*z*) सौम्योपयन्तृमुनिप्रपत्तिः.

SAUMYŌPAYANTṚMUNIPRAPATTIḤ.

Fol. 32.

Similar to the work described under subdivision (*r*) above.

Complete.

**Beginning:**

सौम्योपयन्तृमुनिवर्यपदारविन्दे सम्यक् प्रपत्तिमकरोत्समुदारधीर्यः ।
तत्पौत्रमार्यमभिराममवरं प्रपद्ये सच्चोचरं सकलजीवदयाम्बुराशिम् ॥

श्रीमन् यतीन्द्रचरणप्रवणामलात्मन् श्रीभक्तिशान्तिकरुणादिगुणामृताब्धे ।
सौम्योपयन्तृमुनिवर्य सतां जनानां प्राप्यौ त्वदीयचरणौ शरणं प्रपद्ये ॥

End:

अस्मत्कुलाधिपगुरूत्तमयोगिवर्यवादीन्द्रभीकरगुरोर्महितार्यवर्य ।
सौम्योपयन्तृमुनिवर्य भवत्कृपायाः पात्रं कुरुष्व भगवन् शरणागतं माम् ॥

---

(a-1) सौम्यजामातृमुनिमङ्गलाशासनम्.

SAUMYAJĀMĀTṚMUNIMAṄGALĀŚĀSANAM.

Fol. 33.

Same work as that described under No. 10686 of the D.C.S. MSS., Vol. XIX.

Complete.

Fol. 34 contains the beginning Sūktas of the Ṛgvēda. Fol. 36a—39a give the Mahāsūkta. Fol. 39b is left blank. Foll. 40—43a contain the Vāḻitirunāmam relating to Tirukkōṭṭiyūrnambi. Fol. 43b is left blank. Foll. 44a—45b contain the Mantrapuṣpa. Fol. 46a gives the Vakulābharaṇastuti. Fol. 46b is left blank.

---

## R. No. 3502.

Palm-leaf. 13¾ × 1 inches. Foll. 10. Lines, 5 in a page. Grantha and Tamil. Fair.

Presented in 1920-21 by M.R.Ry. Perumāḷ Vēṅkaṭācāriyar, Watrayiruppu, Srivilliputtur taluk, Ramnad district.

उभयवेदान्तसङ्गतिटिप्पणी.

UBHAYAVĒDĀNTASAṄGATIṬIPPAṆI.

A commentary on a work which explains the connexion between the Divyaprabandha and the Viśiṣṭādvaita-Vēdānta. The author, whose name is not given, salutes Kēsarabhṛt, Śrīnivāsa, Sundarārya and Dāśarathi.

Incomplete.

**Beginning:**

आत्रेयान्वयवार्धिचन्द्रमनघं श्रीचम्पकेशात्मजं
माहाचार्यपदारविन्दयुगलीन्यस्तात्मरक्षाभरम् ।
श्रीमत्केसरभृन्मुनीन्द्रविदितत्रय्यन्तयुग्मं भजे
श्रीवासार्यकृपातरङ्गसहितं श्रीश्रीनिवासं गुरुम् ॥

आत्रेयान्वयसौधमध्यविलसद्ब्रह्मप्रदीपोत्तमं
श्रीमत्सुन्दरवर्यपादकमलद्वन्द्वैकहृद्भूषणम् ।
श्रीशैलार्यकृपातरङ्गविलसद्वेदान्तयुग्माश्रयं
श्रीरङ्गार्यमहं सदा शमदमाद्यावासभूमिं भजे ॥

श्रीरङ्गार्यकृपालब्धत्रय्यन्तार्थपयोनिधिम् ।
दाशरथ्याख्यं च गुरुं मत्सत्ताधायकं भजे ॥

वकुलाभरणादिसूरिणां भग(वद्) विशेष्यान्तर्गतस्वविशेष्यकसमानकालीनज्ञानीयबहुभवनालम्बनेन "தோழீ நாம் மகள்" इत्यादिव्यवहाराः அகப் பொருளாகக்குறும் பகலும் முதலான பாசுரங்கள் वदान्तसारार्थोपबृंहणाः । श्रीमद्रामानुजाचार्याणां ब्रह्मसूत्रार्थनिर्वचनाभिहिताश्च बहवः श्रूयन्ते । अत्र व्यवहारापादने ज्ञानानामानुगुण्यं विचार्यते ।

**End:**

साम्परायिकविद्याया मनःकरणकत्वेऽपि आलम्बनव्यक्तीनां फलाश्रयत्वाभावः विद्यासम्बन्धकृतः वाल्मीकिव्यासपराशरादिभिः समानकालिकानुभवज्ञानावलम्बेन योगज्ञानेन तत्तत्कथा व्याहृताः तत्सर्वधर्मवीर्येण यथावत्संप्रपश्यतीति । किं च "बालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवस्स विज्ञेयस्स चानन्त्याय कल्पते" ॥ इत्यत्राणोरात्मनः आनन्त्यशाब्दितबहुभवनस्य विद्वत्साधारण्यस्फूर्तये अभावाधिकरणश्रुतप्रकाशिकायाम् ।

आत्मनां तु सहस्राणि बहूनि भरतर्षभ ।
योऽङ्गीकुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेत् ॥ इति आत्मशब्दो देहवचन इति च.

---

R. No. **3503.**

Palm-leaf. $16\frac{3}{4} \times 1\frac{1}{4}$ inches. Foll 39. Lines, 6 in a page. Grantha. Good.

Presented in 1920-21 by M.R.Ry. Perumal Venkatacariyar, Varttirayiruppu, Srivilliputtur taluk, Ramnad district.

साङ्ख्यकारिका—साङ्ख्यचन्द्रिकासहिता.

SĀṄKHYAKĀRIKĀ WITH SĀṄKHYACANDRIKĀ.

Same work as that described under R. No. 439 ante. By Nārāyaṇatīrtha, disciple of Rāmagōvindatīrtha and pupil of Vāsudēva.

Complete.

---

R. No. 3504.

Palm-leaf. 15⅜ × 1¼ inches. Foll. 41. Lines, 8 in a page. Grantha. Fair, but 21 leaves are found much injured.

Presented in 1920-21 by M.R.Ry. Perumāḷ Vēṅkaṭācāriyar, Varttirayiruppu, Srivilliputtūr taluk, Ramnad district.

चापमज्जनवैभव:, सव्याख्य:.

CĀPAMAJJANAVAIBHAVAḤ WITH COMMENTARY.

On the importance of bathing and of worshipping God, in the Cāpa or Mārgaḷi month of every year; by Srīrāṅgarāja.

Incomplete—Wants the middle and end.

Date of transcription—In the solar month Kumbha in the year Vikṛti.

**Beginning:**

मुदमातनोतु महिषी मनोहरा वटपत्रतल्पशयनस्य सुन्दरी ।
निजभक्तचित्तनिखिलेष्टदा सदा मम विष्णुचित्ततनया स्ववीक्षणैः ॥

कल्याणमव्याहतमातनोतु बल्याद्यशेषासुरदर्पहन्ता ।
वल्याननाधीशविभीषणेन्द्रान् तुल्यार्थमानोऽकृत यस्य मह्यम् ॥

* * * *

करुणारसपरिणाहसुवरुणालयनयनं मतदूषणमदवारणमदवारणवचसम् ।
शरणागतपरणादरमरुणारुणवसनं कलये हृदि कलिकल्मषहरणं यतिरमणम् ॥

यतिवरवचसि च निपुणः कलि[मलि]मलकुलकरिचयमदमृगरमणः ।
मां तु स मृदुरसपूर्णः च(क्ष)णमवतु सुरङ्गराट्चरणः ॥

क्व च प्रौढा सूक्तिर्हरिहृदयजात्मानमहिमा-
प्रकाशात्मस्या मे मतिरिह तु किंचिद्विषयिणी ।
तथाप्यस्या व्याख्याकरणपरिपाटीमनुसरन्
प्लवेनाम्भोधीन्द्रान् तरितुमहमिच्छामि चपलः ॥

ध्यात्वाचार्यपदाम्भोजं व्याख्येयं रच्यते मया ।
चापमज्जनमाहात्म्यसुतत्त्वार्थप्रकाशिका ॥

इह खलु वरवरमुनिसङ्केतितसप्तगोत्रव्यवस्थावन्तः अत्रिकुलदुग्धजलधि राकासुधाकरायमाणाः अध्यन्तविद्यादुरन्तकान्तारसञ्चारपञ्चाननायमानाः श्री-शैलवर्यकृपासमासादिताशेषविशेषबोधाः गोदाकटाक्षवीक्षणसन्धुक्षिताक्षय्यक-वितारसनिर्भरितान्तःकरणाः श्रीरङ्गार्याः

* * * *

चापमज्जनवैभवाख्यप्रबन्धं चिकीर्षवः प्रारिप्सितप्रबन्धपरिपन्थिप्रत्यूहव्यूह-विध्वंसाय

* * * *

शिष्यशिक्षायै ग्रन्थतो निबध्नन्ति—मुदमिति । स्ववीक्षणैः स्वकीयकटा-क्षवीक्षणैः ।

* * * *

श्रीरङ्गराजदासेन ध्यात्वाचार्यपदाम्बुजम् ।
गोदाया रच्यते चापमज्जनोत्सववैभवम् ॥

* * * *

गोदाया विष्णुचित्तकुमार्याः चापमज्जनोत्सववैभवं चापे धनुर्मासि कर्तव्यं यन्म-ज्जनं होलाधिकरणसिद्धव्रतविशेषः स एवोत्सवः ; नि—मह उद्धव उत्सवः । हर्षजनको व्यापारविशेष इति यावत् । तस्य वैभवं माहात्म्यप्रतिपादक-ग्रन्थः । रच्यते क्रियते ।

**End:**

बहुभक्तियुक्तमनुजैः बद्धः अधिका भक्तयो विश्वासास्ताभिर्युक्ता . . . मनुना . . . . . . ब्रह्मादिदेवा अप्युपलक्ष्यन्ते । निर्गता निर्जगाम । मञ्जुभाषिणीवृत्तम्—सजसाजगौ भवति मञ्जुभाषिणीति लक्षणात् ।

---

R. No. **3505.**

Palm-leaf. $14\frac{1}{4} \times 1\frac{1}{2}$ inches. Foll. 59. Lines, 6 in a page. Grantha. Much injuried.

Presented in 1920-21 by M.R.Ry. Vadhyar Śrinivasa Ayyangar, Ramnad district.

छान्दोग्यपूर्वापरप्रयोगः.

CHĀNDŌGYAPŪRVĀPARAPRAYŌGAḤ.

Similar to the work described under No. 3636 of the D.C.S. MSS., Vol. VII.

Contains the Pūrvaprayōga complete and Aparaprayōga incomplete.

**Beginning:**

अथातस्स्मार्तान् पदार्थाननुक्रमिष्यामः । तत्र प्रथमं मन्त्रपाठक्रमानुसारेण विवाहकर्म ब्रूमहे । ब्रह्मचारी षडङ्गवेदं व्रताद्यनुष्ठानसहितमधीत्य मीमांसया विचारं च कृत्वा[त्वं]विवाहस्नानं च कुर्वती(न्) गुरुणाम्यनुज्ञातस्स्नातकस्सन् पुण्येऽहनि विवाहं कुर्यात् ।

तत्रैवं प्रयोगः—विवाहदिवसात्पूर्वेद्युः पूर्वाह्णे नान्दीमुखश्राद्धं कुर्यात् । स्नात्वा यथोक्तमाचमनं कृत्वा यज्ञोपवीत्यङ्गैस्सहाग्निं प्रत्यभिमुखोऽक्रान्त्यग्निं चाव्यपेत उदगग्रेषु दर्भेषु प्राङ्मुखः पवित्रपाणिरुपविश्य दर्भान् धारयमाणः ।

* * * *

प्रदक्षिणीकृत्य गृहं गत्वा वामदेव्यं गीत्वा शेषं प्राश्नीयात् ।

पितृमेधं व्याख्यास्यामः—पित्रादेराहिताग्नेर्मरणसन्दिग्धेनी(ऽग्नी)न्विहृत्याजस्रान् कुर्यात् ।

**End:**

दाता पुनः पवित्रमादायार्घ्यपात्रे प्रक्षिप्य गन्धपुष्पवासांसि प्रदाय सर्वव्यञ्जनसहितमन्नं च पात्रे प्रदाय पृथिवी ते पात्रमित्युक्त्वालभ्य भोक्तुरङ्गुष्ठमन्ने धार्याय इदं विष्णुरिति विष्णोरन्नं रक्षस्वेति जपित्वापहता इत्यप्रदक्षिणमन्नं परिषिच्य भोजनकाले व्याहृत्यादि जपेत् । पित्र्यवर्जं च भुक्तवति तृप्तोऽसीति पृष्ट्वात्र.

---

R. No. 3506.

Palm-leaf. 17⅜ × 1¼ inches. Foll. 73. Lines, 7 in a page. Grantha. Good.

Presented in 1920-21 by M.R.Ry. S. N. Naḍādūr Vēṅkaṭācārya, Periyaperumāḷ, North Maḍa street, Srivilliputtūr, Ramnad district.

Fol. 1 is left blank

नृसिंहस्तत्कुमारोऽभून्नृसिंह इव मूर्तिमान् ।
परहृद्रेदनं चक्रे न नखैः किंतु बाङ्मुखैः ॥
नृसिंहगुरुपुत्रोऽभूद्वेङ्कटाचार्यभास्करः ।
यत्प्रकाशाद्धृतश्रीका विमतोत्पलमण्डली ॥
तस्माच्च वेङ्कटगुरोर्नरसिंहसूरिः प्रादुर्बभूव निखिलैरवधानभेदैः ।
विद्यावधूटिनटवैशिकसार्वभौमो भूमौ व्यदादनवधि समहामहत्त्वम् ॥
जातस्तस्य प्रियतनुभवश्श्रीनिवासार्यवर्य-
श्श्रीमद्रामानुजकृतिमखस्वामिलब्धेरीरवोक्तिः ।
तस्याभूवंस्तनयमणयो वेङ्कटार्यो नृसिंहाचार्योऽ-
नन्ताह्वयगुरुरिति ख्यातिमुर्व्यामुपेताः ॥

**End:**

अङ्गाङ्गिभावेन सङ्करो यथा—

पद्मासद्मनिबर्हणेन मिलितं पङ्क कलङ्कच्छला-
ल्लक्ष्याकारमपोहितुं हिमकरः श्रीकारिसूनो तव ।
आङ्घ्रिद्वैतनखाकृतिं प्रतिगतो लेभे परं वैभवं
लोकान्तर्विलसत्तमोनिरसनख्यातं सुदर्शोदयम् ॥

अत्र पद्मासद्मनिबर्हणेनेत्यत्र हेतूत्प्रेक्षा कलङ्करूपपातकं प्रत्यहेतोः लक्ष्मीनिवासभूतकमलनिबर्हणस्य हेतुत्वेनोत्प्रेक्षणात् । पङ्ककलङ्कच्छलाल्लक्ष्याकारमित्यत्रापह्नुतिः । छलशब्देन कलङ्के कलङ्कत्वमपह्नुत्य पङ्कत्वारोपादपोहितुमिति । अत्र फलोत्प्रेक्षा चन्द्रस्य तन्मुखरूपतापत्तेस्तदपोहनं फलमित्यफलस्य फलत्वेनोत्प्रेक्षणात् । आङ्घ्रिद्वैतनखाकृतिं प्र.

---

R. No. **3507.**

Śrītāla. $9\frac{1}{4} \times 2\frac{3}{4}$ inches. Foll. 141. Lines, 13 in a page. Grantha and Tamil. Fair.

Presented in 1920-21 by M.R.Ry. S. N. Naḍadur Veṅkaṭācārya, Periyaperumāḷ, North Māḍa street, Srivilliputtūr.

भगवद्गीता, द्राविडटीकासहिता.

**BHAGAVADGĪTĀ WITH TAMIL MEANING.**

Foll. 2*a*—139*b*. Fol. 140*a* contains four stanzas with Tamil meaning. Foll. 1, 140*b*—141 are left blank.

Same text as that described under No 1992 of the D.C.S. MSS., Vol. IV, Part I. By Śrinivāsācārya.

Complete.

---

## R. No. 3508.

Palm leaf. 16 × 1¼ inches. Foll. 34. Lines, 8 in a page. Grantha and Tamil. Fair.

Presented in 1920-21 by M.R.Ry. S. N. Naḍādūr Vēṅkaṭācārya, Periyaperumāḷ, North Māḍa street, Srivilliputtūr.

(*a*) रहस्यत्रयसारार्थसङ्ग्रहः.
RAHASYATRAYASĀRĀRTHASAṄGRAHAḤ.

Foll. 1*a*—24*b*.

A brief summary of the Rahasyatrayasāra of Vēdāntadēśika, which work has been described under No. 971 of the D.C.S. MSS., Vol. II. by Varadanātha, son of Vēdāntācārya.

Contains the Aṣṭākṣarādhikāra, Dvayādhikāra and Caramaślōkādhikāra.

Complete.

**Beginning:**

नमो वरदनाथाय वेदान्ताचार्यसूनवे ।
सर्वतन्त्रस्वतन्त्राय वाजिवक्त्राम्बुधीन्दवे ॥
पद्मानायकपादपद्मयुगलीपर्यायभृङ्गात्मना
चेतो मे चिरपक्षपातविभवादास्वादमासीदतु ।
अध्यात्मश्रुतिदुग्धसिन्धुलहरीसञ्चारसम्भाविते:
हंसश्रीरधिगम्यते सुकृतिभिर्यन्नोल्लसद्बुद्धिभिः ॥
श्रीमद्वरदनाथेन वेदान्ताचार्यसूनुना ।
रहस्यत्रयसारार्थसङ्ग्रहोऽयं प्रकाश्यते ॥

सदाचार्यकटाक्षेण शरणागतस्य रहस्यत्रयसारार्थो नित्यभोग्य इति सच्चोत्तराणां सम्प्रदायो रहस्यत्रयमिति श्रीमदष्टाक्षरो द्वयं चरमश्लोकश्च कथ्यते । तत्र श्रीमदष्टाक्षरे स्वस्वरूपपरस्वरूपादिविज्ञानं प्राधान्येन क्रियते । तेन प्रतिबुद्धस्याधिकारिणश्शरणागतिमन्त्रेण शरणागत्यनुष्ठानप्रकारः प्रकाश्यते ।

* * * *

श्रीमदष्टाक्षरस्यार्थं श्रोतणां प्रतिपत्तये ।
प्राचीकशद्दविस्तारं त्रय्यन्ताचार्यनन्दनः ॥

**Colophon:**

इति रहस्यत्रयसारार्थसङ्ग्रहे श्रीमदष्टाक्षराधिकारः प्रथमः ॥

**End:**

अतो ब्रह्मविदामेव ब्रह्मप्राप्तिरिति सर्वं समञ्जसम् ॥
विमलमतिविशेषाद्वीक्ष्य हेयान् पुमर्थान्
स्थिरविनिहितबुद्धिर्यस्तु कैवल्यमुक्तौ ।
पुनरपि च भवेत्सा संसृतिस्तस्य काले
हरिभजनविपाकान्मुक्तिरेवाथ वा स्यात् ॥
वरुणनिलयकन्यावल्लभस्यैव पादे
शरणवरणवाणीतत्पराणां नराणाम् ।
चरणमनितराणां निर्मलं निर्ममाणां
शरणमिह परत्राप्यन्वहं न प्रतीमः ॥
श्रीमत्त्रय्यन्तसिद्धान्तदेशिकेन्द्रस्य सूनुना ।
रहस्यत्रयसारार्थो वरदार्येण वर्णितः ॥

---

(b) அரங்கேசவெண்பா.

ARAṄGEŚAVEṆPĀ.

Foll. 26a—34a. Foll. 25 and 34b are left blank.

See the Tamil part of this Triennial Catalogue.

This is also called Niticūḍāmaṇi.

Complete.

---

R. No. 3509.

Palm-leaf 13¾ × 1½ inches. Foll. 47. Lines, 10 in a page. Grantha. Good.

Presented in 1920–21 by M.R.Ry. Sadhu Vadhyar Ramayyaṅgar Varttirayiruppu, Srivilliputtur taluk.

श्रीकृष्णपुरक्षेत्रमाहात्म्यम्.

ŚRĪKṚṢṆAPURAKṢETRAMĀHĀTMYAM.

On the greatness and religious sanctity of Śrīkṛṣṇapura (Tirukkaṇṇapuram, Tanjore district); as found in the fifth Khaṇḍa of the Padmapurāṇa.

Complete.

**Beginning:**

सूतपुत्रं समासीनमुपासीना महर्षयः ।
ऊचुः कौतूहलेनेदं नैमिशारण्यवासिनः ॥

ऋषयः—

सूतपुत्र महाबुद्धे पुराणज्ञ महामते ।
श्रुता नो बहवो मन्त्रास्तव वक्त्राद्विनिस्सृताः ॥

* * *

तस्याः कवेरकन्यायास्तीरे दक्षिणपार्श्वतः ।
अतीते योजनयुगे साधिके मुनिसत्तमाः ॥
अत्यर्धयोजने चैव पश्चिमे पूर्ववारिधेः ।
स्थानं कृष्णपुरं नाम कृष्णस्य हृदयङ्गमम् ॥
बहुश्रुतानां विप्राणामावास(:)श्रूयते भुवि ।
महर्षिगणसञ्जुष्टं महाभवनशोभितम् ॥

* * * *

तत्राष्टाक्षरसंसिद्धिर्भविष्यति न चान्यतः ।
तस्माद्यूयमपि क्षिप्रं कृष्णक्षेत्रं गमिष्यथ ॥

पृष्टोऽहं यदिह भवद्भिरादरेण प्रत्युक्तं तदखिलमद्य विप्रवर्याः ।
उक्तांशे स्खलितमपि क्षमध्वमार्याः किं भूयश्श्रवणपदत्वमाप्नुयाद्वः ॥

**Colophon:**

इति पाद्मे पुराणे पञ्चमे खण्डे मन्त्रसिद्धिप्रदेशकथने श्रीकृष्ण(पुर)क्षेत्र माहात्म्ये षण्णवतितमोऽध्यायः ॥

**End:**

भवद्भिरपि विप्रेन्द्राः पुण्यसप्तकसंयुते ।
अष्टाक्षरफलं लभ्यं क्षेत्रे तत्रैव नान्यतः ॥

कृष्णक्षेत्रस्यास्य माहात्म्यमेतत् सर्वं प्रोक्तं यत्तु युष्माभिरुक्तम् ।
श्रोतुं वाञ्छा वर्तते वा किमन्यद्भूयस्तच्चेदुच्यतां तापसाद्याः ॥

**Colophon:**

इति श्रीकृष्णक्षेत्रमाहात्म्ये एकादशशततमोऽध्यायः ॥

---

## R. No. 3510.

Palm-leaf. 14¾ × 1½ inches. Foll. 12. Lines, 9 in a page. Grantha and Tamil. Good.

Presented in 1920–21 by M.R.Ry. Sadhu Sundararāja Ayyangar, Varttirayiruppu, Srivilliputtūr.

गोदामज्जनवैभवम्.

GŌDAMAJJANAVAIBHAVAM.

Foll. 1a—9b.

This is also called Cāpamajjanōtsavavaibhava.

Same text as that described under R. No. 3504 ante. By Śrīrangadāsa.

Incomplete.

**Beginning:**

मुदमातनोतु महिषी मनोहरा
वटपत्रतल्पशयनस्य सुन्दरी ।
निजभक्तचित्तनिखिलेष्टदा सदा
मम विष्णुचित्ततनया स्ववीक्षणैः ॥
कलयतु मयि गोदाकल्पवल्ली कटाक्षान्
वितरतु मम सर्वापेक्षितान्याश्रितस्य ।
स्वपदकमलभाजां सर्वदाभीष्टदायी
वटदलशयनो यन्मौलिमालां बिभर्ति ॥
श्रीरङ्गराजदासेन ध्यात्वाचार्यपदाम्बुजम् ।
गोदाया रच्यते चापमज्जनोत्सववैभवम् ॥
सूक्तिं समग्रयतु नः स्वयमेव गोदा
श्रीरङ्गराजमहिषी करुणाकटाक्षैः ।
माधुर्यवर्णगुणगुम्भनगौरवैर्या
श्लाघिष्यते बहु मुदा विदुषां गणोऽपि ॥
होलाविकरणव्याजव्रतव्याजेन माधवम् ।
तोषयन्ती मनश्चक्रे गोदा स्नातुं सखीजनैः ॥

**End:**

आस्थानमासाद्य सहैव भर्त्रा श्रीरङ्गनाथेन मुदा समेता ।
आराधिता सा गुडमुद्गभक्तमास्वादयामास च तत्र गोदा ॥
आहूय रामानुजमादरेण भ्रातृत्वसम्भावनया तदीयान् ।
सम्भाव्य गोदा शठकोपतीर्थप्रसाददानेन मुदा युयोज ॥

* * * *

ददौ ससृक्त्वा वरनाथयोगिमुखेन तं प्रार्थ्य व्रतोपयोगान् ।
आस्वाद्य मिश्रान् पृथुकान् गुडेन तीर्थादिना सा स्वजनेभ्य एव ॥

Foll. 10*a*—11*b* contain the first Sarga of Raghuvaṁśa with Tamil meaning. Fol. 12 is left blank.

---

R. No. 3511.

Palm-leaf. 16 × 1½ inches. Foll. 61. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1920-21 by M.R.Ry. Kuṭṭinambi Ayyaṅgār Avargal, Tirukkuruṅguḍi, Tinnevelly district.

(*a*) दर्शपूर्णमासप्रयोगः.

DARŚAPŪRṆAMĀSAPRAYŌGAḤ.

Foll. 2*a*—33*b*. Fol. 1 is left blank.

Same work as that described under No. 1088 of the D.C.S. MSS., Vol. II.

Almost complete.

---

(*b*) आधानप्रयोगः.

ĀDHĀNAPRAYŌGAḤ.

Foll. 34*a*—43*b*.

Same work as that described under No. 1101 of the D.C.S. MSS., Vol. II, but with slight difference in the beginning and the end.

Complete.

**Beginning:**

अग्नीनाधास्यमानः कृच्छ्रचान्द्रायणैरात्मानं शोधयित्वा वैराणि प्रशम्य सर्वजनमैत्रीं कृत्वा सर्वकर्मभ्यः पूर्वं सोमेन यक्ष्यमाणोऽग्नीनाधास्ये, सर्वकर्मभ्यः पूर्वं दर्शपूर्णमासा(भ्यां) यक्ष्यमाणोऽग्नीनाधास्ये, सर्वकर्मभ्यः पूर्वमग्निहोत्रं होष्यन्नग्नीनाधास्ये ।

**End:**

येमा अग्मन्नित्यादि यज्ञो बभूव यज्ञशंवमवर्जं ब्राह्मणतर्पणान्तं सिद्ध-मिष्टं सन्तिष्ठते सन्तिष्ठतेऽग्न्याधेयः ॥

---

(*c*) पशुबन्धप्रयोगः.

PAŚUBANDHAPRAYŌGAḤ.

Foll. 44a – 61a.

Same work as that described under No. 1107 of the D.C.S. MSS., Vol. II, but with slight difference in the beginning and the end.

Complete.

**Beginning :**

सर्वान् लोकान् पशुबन्धयाज्यभिजयति तेन यक्ष्यमाणोऽमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य सङ्कल्पं करोति पशुबन्धमारप्स्ये, तेन संवत्सरे प्रावृषि यक्ष्ये— पुनस्सङ्कल्प्य ।

**End :**

इष्टिरसि वृश्च मे ब्राह्मणांस्तर्पयत वै । अग्ने नयेत्यादि प्रजाहितं समारोप्य सन्तिष्ठते पशुबन्धः ॥

Fol. 61b gives the index of sacrificial hymns.

---

R. No. **3512.**

Palm-leaf. 15 × 1¼ inches. Foll. 47. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1920-21 by M.R.Ry. Pillalamarri Ādibhaṭṭa Śāstrigāru, Chebrol, Bapatla taluk.

(a) कृष्णामाहात्म्यम्.

KṚṢṆĀMĀHĀTMYAM.

Foll. 2a—35b. Fol. 1 is left blank.

Similar to the work described under R. No. 965 ante.

Wants the beginning. Otherwise complete in 18 Adhyāyas as found in the Skāndapurāṇa.

**Beginning :**

कृपया यः पुनातीशो नानातीर्थवपुः प्रभुः ।
सञ्जीवयति वा शेषं नमोऽस्तु प्रत्यगात्मने ॥
कदाचिन्नारदं प्राप्तं नमः कृत्वा महर्षयः ।
अर्चयित्वा मुनिं प्राहुर्द्वापरान्ते कलौ युगे ॥

ऋषय ऊचुः—

भगवन् जगतां नाथे कृष्णे त्यक्त्वा दिवं गते ।
सम्भ्रान्तानामिवान्धानां त्वं नो दृष्टिरिवागतः ॥

कथं कलियुगं घोरं प्रस्फुटं द्वापरोत्तरम् ।
छेदनं धर्मसेतूनां साधूनां दुर्गुणोदयम् ॥

* * * *

कलौ जुषाणास्तीर्थानि मां च कृष्णां विशेषतः ।
देवाः केचिद्भविष्यन्ति बीजं कृतयुगस्य हि ॥

नारदः—

एवमुक्त्वा स्वयं विष्णुः कल्पादिषु यथा पुरा ।
ससर्ज कृष्णां ब्रह्मापि तीर्थान्यपि तदाज्ञया ॥
इदं दुस्तरदोषौघत्राणार्थं निर्मितानि हि ।
कलौ तीर्थानि सेवेत न दोषः कं च न स्पृशेत् ॥

* * * *

**Colophon :**

इति स्कान्दे कृष्णामाहात्म्ये प्रथमोऽध्यायः ॥

**End :**

कृष्णामाहात्म्यमतुलं शृण्वतां भुक्तिमुक्तिदम् ।
एतच्छ्रुत्वा नरो भक्त्या सर्वपापैः प्रमुच्यते ॥
पौराणिकस्य वस्त्राद्यैर्मणिकुण्डलभूषणैः ।
अलंकृत्वा दिव्यगन्धैः सर्वकामैः प्रपूजयेत् ॥
तत्पूजने महादेवस्सन्तुष्टोऽभूत्सनातनः ।
विष्ण्वादिपूजनं सर्वमिदमेव भविष्यति ॥

**Colophon :**

इति श्रीस्कान्दपुराणे कृष्णवेण्या माहात्म्यवर्णनं नामाष्टादशोऽध्यायः ॥

Date of transcription—Wednesday, the 5th day of the lunar month Śrāvaṇa in the year Bahudhānya. Name of the scribe—Rāmanna.

---

(*b*) कृष्णामाहात्म्यम्.

KṚṢṆĀMĀHĀTMYAM.

Foll. 36*a*–46*b*. Foll. 43*a* and 47 are left blank.

Similar to the above.

Contains the Adhyāyas one and two complete and Adhyāya three incomplete.

**Beginning:**

कृष्णवेण्णा महापुण्यं(ण्या) तीर्थानामुत्तमोत्तमं(मा) ।
जाता श्रीमत्सह्यगिरौ लोकानां हितकाम्यया ॥
तस्य तीर्थस्य माहात्म्यं कन्यायुक्ते बृहस्पतौ ।
गोदावर्याश्च माहात्म्यं सिंहयुक्ते बृहस्पतौ ॥
शृण्वन्तु मुनयस्सर्वे वक्ष्याम्यहमनुत्तमम् ।
दूरात्स्मरणमात्रेण तीर्थस्यास्य विशेषतः ॥
मुच्यते सर्वपापेभ्यस्स याति परमां गतिम् ।
पृथिव्यां यानि तीर्थानि तानि कन्यागते गुरौ ॥

* * * *

**Colophon:**

इति श्रीपद्मपुराणे तीर्थभागे उत्तरांशे श्रीकृष्णामाहात्म्ये कन्याबृहस्पतिव्रतकथनं नाम प्रथमोऽध्यायः ॥

**End:**

इत्यादिकृष्णामाहात्म्यनामधेयं महर्षयः ।
श्रुत्वा पीत्वा च सततं सर्वे संहृष्टचेतसः ॥

* * * *

ततः कोटीश्वरस्थानं कोटियज्ञफलप्रदम् ॥
ततः शुक्लपुरी नाम . . . . . . ।

---

R. No. 3513.

Palm-leaf. 13¼ × 1⅝ inches. Foll. 58. Lines, 7 in a page. Grantha. Good.

Presented in 1920-21 by M.R.Ry. Dikṣita Kṛṣṇa Ayyaṅgār, Tirukkuruṅguḍi, Tinnevelly district.

कुरङ्गक्षेत्रमाहात्म्यम्.

KURAṄGAKṢETRAMĀHĀTMYAM.

Same work as that described under No. 2310 of the D.C.S. MSS., Vol. IV, Part II.

Complete in six Adhyāyas.

---

R. No. 3514.

Palm leaf. 19¼ × 1¼ inches. Foll. 62. Lines, 7 in a page. Grantha. Good.

Presented in 1920-21 by M.R.Ry. Rāmānuja Ayyangar, Tirukkuruṅguḍi, Tinnevelly district.

कुरङ्गक्षेत्रमाहात्म्यम्.

KURAṄGAKṢETRAMĀHĀTMYAM.

Foll. 2a—45b. Fol. 1a contains the name of the work and date of transcription. Foll. 1b, 46—62 are left blank.

Same work as that described under No. 2390 of the D.C.S. MSS., Vol IV, Part II.

Complete.

Date of transcription—6th day of the lunar month Vaiśākha in the year Viśvāvasu.

---

## R. No. 3515.

Palm leaf. 10½ × 1½ inches. Foll. 81. Lines, 10 in a page. Grantha. Much injured.

Presented in 1920-21 by M.R.Ry. T. Kṛṣṇa Ayyaṅgār, Eastern street, Tirukkuruṅguḍi, Tinnevelly district.

न्यायशास्त्रार्थदीपिका—प्रभा.

NYĀYAŚĀSTRĀRTHADĪPIKĀ: PRABHĀ.

Same work as that described under No. 4208 of the D.C.S. MSS., Vol. VIII. By Bhiṣagraṭ.

Wants the beginning and end.

---

## R. No. 3516.

Palm-leaf. 16¾ × 1⅝ inches. Foll. 102. Lines, 7 in a page. Telugu Slightly injured.

Presented in 1920-21 by M.R.Ry. Munisubrahmaṇya Pantalugāru, Ongole, Guntur district.

Foll. 1—6 are left blank.

आपस्तम्बश्रौतप्रायश्चित्तदीपिका.

ĀPASTAMBAŚRAUTAPRĀYAŚCITTADĪPIKĀ.

Foll. 7a—98a. Foll. 99a—101a give the Śrautaprayōgaviṣaya. Foll. 98b, 101b and 102 are left blank.

Similar to the work described under No. 1077 of the D.C.S. MSS. Vol. II.

Incomplete.

Beginning:

आपस्तम्बसूत्रस्य प्रायश्चित्तप्रकरणे दीपिका नाम ग्रन्थो लिख्यते— श्रुतिलक्षणं प्रायश्चित्तं विच्यपराधे विधीयते । श्रुतौ लक्षणमात्रमेव यस्य चिन्मात्रमेव प्रायश्चित्तं तस्योपदिश्यते । श्रुतिलक्षणं प्रायश्चित्तमिति श्रूयते । श्रुतिर्वेदः तस्यैव विधित्वात् । येन लक्ष्यते ज्ञायते तल्लक्षणं श्रुतौ लक्षणं यस्य तदिदं श्रुतिलक्षणमिति ।

End:

यदुपांशुसवनेनैव तूष्णीमभिषवं कृत्वा वसतीवरीभिरुपसृज्य सोमरसं कृत्वा तद्रसं सर्वसोमानां संसृज्येरन् । आग्रयणकलशे भक्षितिषेदिति केचित् । सर्वसोमस्योत्पादकत्वात्तत्र संसृज्य कृतान्द्वादारम्भा.(?)

R. No. 3517.

Palm-leaf. 17¼ × 1⅝ inches. Foll. 49. Lines, 9 in a page. Telugu. Slightly injured.

Presented in 1920-21 by M.R.Ry. Galiyaram Venkaṭasubbayya-gāru, Ongole, Guntur district.

सौन्दर्यलहरी, सौभाग्यवर्धनीव्याख्यासहिता.

SAUNDARYALAHARI WITH THE COMMENTARY SAUBHĀGYAVARDHANĪ.

Foll. 1a—46a.

Same text and commentary as that described under No. 10877 of the D.C.S. MSS., Vol. XIX. The commentary is by Kaivalyāśrama, disciple of Gōvindāśrama.

Complete.

Fol. 47 contains several Ṛtuvarṇanaślōkas. Foll. 48 and 49 contain Puṣyārkavratōdyāpanavidhi. Fol. 46b is left blank.

R. No. 3518.

Palm-leaf. 15¾ × 1¼ inches. Foll. 117. Lines, 8 in a page. Telugu. Much injured.

Presented in 1920-21 by M.R.Ry. Galiyaram Venkaṭasubbayya-gāru, Ongole, Guntur district.

(a) रामायणव्याख्या—रामायणतत्त्वदीपिका.

RĀMĀYAṆAVYĀKHYĀ: RĀMĀYAṆATATTVADĪPIKĀ.

Foll. 1a—51a. Fol. 51b is left blank.

Same work as that described under R. No. 1063 ante.

Contains 1—56 Sargas in the Yuddhakāṇḍa.

(*b*) चम्पुरामायणव्याख्या—पदयोजना.

CAMPURĀMĀYAṆAVYĀKHYĀ: PADAYŌJANĀ.

Foll. 52*a*—117*b*.

Same work as that described under No. 12281 of the D.C.S. MSS., Vol XXI.

Imperfect and in disorder.

---

R. No. **3519.**

Palm-leaf. 16¾ × 1¾ inches. Foll. 149. Lines, 9 in a page. Grantha. Much injured.

Presented in 1920-21 by His Holiness Śrī Pauṇḍarīkapuram Svāmigal, Srirangam, Trichinopoly district.

Fol. 1 is left blank.

वेदान्तविजयव्याख्या—विजयमङ्गलदीपिका.

VEDĀNTAVIJAYAVYĀKHYĀ: VIJAYAMAṄGALADĪPIKĀ.

Foll. 2*a*—147*a*. Fol. 148*a* gives a list of shrubs in the Tamil language. Fol. 148*b* contains the Nirdhāraṇaṣaṣṭhyarthavicāra. Foll. 147*b* and 149 are left blank.

Same work as that described under No. 5021 of the D.C.S. MSS., Vol. X. By Sudarśanaguru.

Complete.

---

R. No. **3520.**

Palm-leaf. 17 × 1½ inches. Foll. 78. Lines, 9 in a page. Grantha and Tamil.

Presented in 1920-21 by M.R.Ry. Addaṅgi Śiṅgarācāryar, Periyaperumāl, East Māḍa street, Srivilliputtūr.

भार्गवनाडिका.

BHĀRGAVANĀḌIKĀ.

Foll. 1*a*—72*b*.

A treatise on horoscopy predicting the characteristics, fortunes, etc. of persons born in the different Aṁśas of each of the Lagnas.

Complete.

**Beginning:**

विधात्रा लिखिता या सा ललाटेऽक्षरमालिका ।
दैवज्ञैर्दापिता सर्वा होरा निर्मलचक्षुभिः ॥
यस्य नास्ति खलु जन्मपत्रिका या शुभाशुभफलप्रदायिनी ।
व्यर्थमेव खलु तस्य जीवितं दीपहीनमिव मन्दिरं निशि ॥

श्रीमज्जातकपत्रिका परहितव्योमादिव्यासस्फुटैः
पश्चाद्भावतराष्टवर्गसहितस्थानादिषड्वीर्यजैः ।
आयुर्गोचरयोगभावजफलैस्सार्धं दशाचक्रजैः
दीर्घायुस्सु दारसौख्यविपुला श्रीकीर्तिदा लिख्यते ॥

दशाक्रमः—

मार्ताण्डेन्दुकुजाहिजीवशनिवित्केतुस्सिताख्याधिपाः
षट्पङ्क्तिर्मुनयो धृतिर्धरणिपालैकोनविंशाब्दकाः ।
अत्यष्टिर्मुनयो नखा इति विदुर्नाथा इमे खेचराः
सप्तार्चिर्भगविश्वभादिनवकां क्षीणे दिनेशोदयम् ॥

**End:**

शुक्रस्यान्तर्गते केतौ लग्नादुपचये बली ।
शुभयुक्ते शुभैर्दृष्टे लग्नेशेनाधिसंयुते ॥
शुभमेव फलं नित्य स्नानदानजपादिकम् ।
मुक्त्यादौ शुभमाधिक्यं नित्यं मृष्टान्नभोजनम् ॥

* * *

जीवात्मा सदशां हानिः धनधान्यपरिच्छदः ।
त्यागभोगाय सर्वेषु शुक्रप्राणगते ध्वजे ॥

**Colophon:**

इति भार्गवनाडिकाग्रन्थे रव्यादिशुक्रपर्यन्तदशापचभुक्तयस्समाप्ताः ॥

Foll. 73—78 contain the Kujādipādacārasphuṭavākyagaṇitavacanas.

---

R. No. 3521.

Palm-leaf. 15¾ × 1½ inches. Foll. 95. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1920-21 by M.R.Ry. Addangi Śingarācāryar, Periyaperumāḷ, East Māḍa street, Śrivilliputtūr.

Fol. 88*b* is left blank.

ब्रह्मसूत्रार्थटिप्पणी.

BRAHMASŪTRĀRTHAṬIPPAṆĪ.

A short commentary on the Śrī Bhāṣya of Rāmānuja; by Varadārya, son and disciple of Kṛṣṇa.

Contains the first three Pādas only in the first Adhyāya, but wants a small portion at the end.

**Beginning:**

वेदान्तवेद्यं चिदचिच्छरीरं नितम्बविन्यस्तकरारविन्दम् ।
तमालनीलं तटिद्दामचेलं लक्ष्मीपतिं विठ्ठलमाश्रयेऽहम् ॥
कृत्वानवद्यं निगमान्तभाष्यं निराकृतं येन भयं श्रुतीनाम् ।
तं योगिवर्यं यतिसार्वभौमं रामानुजार्यं शरणं व्रजेऽहम् ॥
श्रुत्वा भाष्यं शेषकल्पात् कृष्णवर्यगुरोरहम् ।
विवृणोमि सतां प्रीत्यै ब्रह्मसूत्रार्थटिप्पणीम् ॥

इह खलु भगवान् श्रियः पतिः स्वभावतो निरस्तनिखिलदोषानवधि-कातिशयासङ्ख्येयकल्याणगुणगणभूषितः सर्वेश्वरः परमकारुणिकः

* * * *

श्रीमत्पराशरात् कृष्णद्वैपायनरूपेणावतीर्य . . . . . . . . . , . . . . शारीरकं शास्त्रं निबबन्ध । तत्र तावदिदं विचार्यते—ब्रह्ममीमांसाशास्त्रं किं द्वैतविषयम्? उताद्वैतविषयम्? किंवा विशिष्टाद्वैतविषयमिति ॥

* * * *

**Colophon:**

इति श्रीकौशिककुलतिलकश्रीकृष्णसूरिपदकमलसेवासमधिगतपरावरतत्त्व-याथात्म्येन वदीरसेन श्रीवरदसूरिणा विरचितायां ब्रह्मसूत्रार्थटिप्पण्यां प्रथमस्याध्यायस्य प्रथमः पादः ॥

**End**

एतेन सर्वे व्याख्याता व्याख्याताः । अनुदाहृताः कारणवादिवाक्य-विशेषाः किमुक्तलक्षणब्रह्मपराः उत नेति विचारः। तदर्थं ते किमुक्तन्याया-नामविषया उत विषया इति विषयत्वं सम्भवति नेति? यदा न सम्भ-वति, तदा तदविषयत्वादुक्तलक्षणब्रह्मपरा इति फलफलिभावः ॥

---

## R. No. 3522.

**Palm-leaf.** 12⅜ × 1⅝ inches. Foll. 31. Lines, 8 in a page. Grantha. Good.

Presented in 1920-21 by M.R.Ry. Pukuthi Nambi Ayyangar, Tirukkuraṅguḍi, Tinnevelly district.

नक्षत्रमालाव्याख्या— प्रभा.

NAKṢATRAMĀLĀVYĀKHYĀ: PRABHĀ.

Foll. 1a–25a. Foll 25b–31b are left blank.

Same work as that described under R. No. 780 ante. By Gargya-Veṅkaṭeśa, disciple of Ramyajāmātṛmuni.

Complete.

Date of transcription—Monday, the 12th day of the solar month Tai in the Śaka year 1029.

---

R. No. **3523**.

Palm-leaf. 16⅝ × 1⅝ inches. Foll. 79. Lines, 8 in a page. Grantha. Fair.

Presented in 1920-21 by M.R.Ry. Pakuthi Nambi Ayyaṅgar, Tirukkuruṅguḍi, Tinnevelly district.

(a) श्रीगुणरत्नकोशः.

ŚRĪGUṆARATNAKŌŚAḤ.

Foll. 2a—8a. Fol. 1a gives a few stanzas of Vaiṣṇavīyastuti. Fol. 1b is left blank.

Same work as that described under R. No. 160(f) ante.

Complete.

---

(b) श्रीगुणरत्नकोशव्याख्या.

ŚRĪGUṆARATNAKŌŚAVYĀKHYĀ.

Foll. 9a–57b. Fol. 8 contains a portion of Kṣamāṣōḍaśī.

Same commentary as that described under R. No. 758(a) ante.

---

(c) अष्टश्लोकी, सव्याख्या.

AṢṬAŚLŌKĪ WITH COMMENTARY.

Foll. 58a–65b.

Similar to the work described under No. 9860 of the D.C.S. MSS., Vol. XVIII.

Complete

**Beginning:**

श्रीपराशरभट्टार्यः (. . .) मेऽस्तु भूयसे ॥

अकारार्थो विष्णुर्जगदुदयरक्षा (. . .)प्रणव इममर्थं समदिशत् ॥

उदयश्च रक्षा च प्रलयश्च उदयरक्षाप्रलयाः, जगतां लोकानामुदयरक्षाप्रलयाः जगदुदयरक्षाप्रलयाः तान् करोतीति जगदुदयरक्षाप्रलयकृत् ।

जगदुत्पत्तिस्थितिसंहारकर्तेत्यर्थः । व्याप्नोतीति विष्णुः विषु व्याप्ताविति धातुः । व्यापनशीलः श्रियः पतिरकारार्थः ॥

End :

पूर्वोत्तराघाणां च क्षयमश्लेषविनाशरूपवासनानिवृत्तिं कर्तासि करिष्यसीति दृढोऽस्मि अवसादनिवृत्त्या निर्भरोऽस्मीत्यर्थः ॥

---

(*d*) क्षमाषोडशी, सव्याख्या.

KSAMĀṢOḌAŚĪ WITH COMMENTARY.

Foll. 66*a*—79*a*. Fol. 79*b* is left blank.

Same work as that described under R. No. 88*b* of the Tamil Part ante, but the following additional stanzas are given in the beginning of the above work.

Complete.

यश्चक्रे रङ्गिणः स्तोत्रं (. .) महं भवे ॥
श्रीपराशरभट्टार्यः (. . .) भूयसे ॥
श्रीरङ्गेश यथा करोषि (. .) सर्वात्मनाम् ॥
वन्दे गुरुं दयाधीनं वात्स्यं वरगुणाकरम् ।
यदुक्तिर्यतिराजोक्तिकोकिलायाः काककालिका ॥
श्रुतप्रकाशिकाचार्यसुतेन रचिता स्तुतिः ।
श्रीरङ्गेशक्षमालम्बा गम्भीरार्था विरच्यते ॥

---

R. No. **3524.**

Palm leaf. $8\frac{3}{8} \times 7\frac{1}{2}$ inches. Foll. 86. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1920-21 by M.R.Ry. S. A. Tirumalācārya, Tekkalakkāḍu, Tinnevelly district.

Foll. 1—3, 85 and 86 are left blank.

विष्णुपारम्यवादः.

VIṢṆUPĀRAMYAVĀDAḤ.

Foll. 4*a*—84*b*.

A treatise on the supremacy of Viṣṇu which concludes that the Upaniṣads also appropriately purport that Viṣṇu is superior to Śiva.

Incomplete.

**Beginning :**

नारायणस्य पारम्ये पूर्वाचार्यैः प्रपञ्चिते ।
धूताक्षमाः पाशुपता वैष्णवद्वेषदूषिताः ॥

श्रुत्यादीनामपि ह्यक्षपारम्ये भावमूचिरे ।
तन्निरासक्रमो ह्यत्र सङ्क्षेपेण विलिख्यते ॥

ते खल्वेवमाहुः—

नारायणादधिकश्शिव एव परं ब्रह्मेति । तथाहि—यतो वा इमानि भूतानीत्यादिना जगत्कारणं परं ब्रह्मेत्यवगम्यते । तत्कारणं किमित्यपेक्षाया-मथर्वशिरसि—देवा ह वै स्वर्गं लोकमगमन् । ते देवा रुद्रमपृच्छन् को भवानिति ।

**End:**

आपादचूडं मानवधर्मशास्त्रस्य नारायणपारम्यमेव सिद्धमिति न शिवस्य परमावे मनोस्तात्पर्यमिति परपक्षनिरासादिति । अत्र

आत्मैक्यं देवतैक्यं त्रिकसमधिगतातुल्यतैक्यं त्रयाणा-
मन्यत्रैश्वर्यमित्याद्यनिपुणभणितीरादियन्ते न सन्तः ।
त्रय्यन्तैरेककण्ठैस्तदनुगुणमनुव्यासमुख्योक्तिभिश्च
श्रीमान् नारायणो नः पतिरखिलतनु(र्मुक्तिदो मुक्तभोग्यः) ॥

---

R. No. 3525.

Palm-leaf. 13 × 1¾ inches. Foll. 23. Lines, 5 in a page. Grantha. Slightly injured.

Presented in 1920-21 by M.R.Ry. Āḷvārayyaṅgār Avargaḷ, Vānamāmalai Maṭham, Srirangam.

वसन्ततिलकभाणः.

VASANTATILAKABHAṆAḤ.

Same work as that described under R. No. 1466(e) ante.

Wants the beginning and the end.

---

R. No. 3526.

Palm-leaf. 16 × 1½ inches. Foll. 105. Lines, 8 in a page. Grantha. Much injured and broken.

Presented in 1920-21 by M.R.Ry. Śivarāma-Śāstrigal, Rameswaram, Ramnad district.

(a) रसमञ्जरी.
RASAMAÑJARI.

Foll. 1a—16b.

Same work as that described under R. No. 680 ante.

Wants the beginning; otherwise complete.

---

(b) उत्तररामचरितम्.
UTTARARĀMACARITAM.

Foll. 17a—48b. Fol. 33b is left blank.

Same work as that described under No 12500 of the D.C.S. MSS., Vol. XXI.

Incomplete.

---

(c) कमलिनीकलहंसम्.
KAMALINĪKALAHAMSAM.

Foll. 49a—71b.

Same work as that described under No. 12506 of the D.C.S. MSS., Vol. XXI.

Complete.

---

(d) प्रसन्नराघवम्.
PRASANNARĀGHAVAM.

Foll. 72a—105b. Fol. 100b is left blank.

Same work as that described under No. 1256 of the D.C.S. MSS., Vol. XXI.

Contains the first four Acts only.

---

R. No. 3527.

Palm-leaf. 15⅜ × 1 inches. Foll. 143. Lines, 7 in a page. Telugu. Much injured and worm-eaten.

Presented in 1920-21 by M.R.Ry. Śivarāma-Śāstrigal, Rameswaram, Ramnad district.

(a) सुभाषितावलिः.
SUBHĀṢITĀVALIḤ.

Foll 1*a*--125*a*. Foll. 1*b*, 2*b*, 3*b*, 7*b*, 14*b*, 19*b*, 21*b*, 22*b*, 24*b*, 26*b*, 27*b*, 28*b*, 29*b*, 33*b*, 38*b*, 41*b*, 56*b*, 74*b*, 80*b*, 84*b*, 85*b*, 86*b*, 88*b*, 89*b*, 90*b*, 91*b*, 95*b*, 98*b*, 100*b*, 102*b*, 104*b*, 107*b*, 109*b*, 110*b*, 111*b*, 112*b*, 113*b*, 114*b*, 115*b*, 117*b*, 118*b*, 121*b*, 122*b* and 123*b* are left blank.

Similar to the work described under No. 12068 of the D.C.S. MSS., Vol. XX.

**Beginning:**

यन्मुक्तशास्त्रं वदनं ताम्बूलरसवर्जितम् ।
सुभाषितपरित्यक्तं बिलमेव हि केवलम् ॥
उत्क्रोशं मीतिदानं च चूतद्रव्यं सुभाषितम् ।
चोरद्रव्यविभागं च सद्यो गृह्णाति बुद्धिमान् ॥

**End:**

कोकद्वन्द्वमिदं जहाति कमलं कादम्बचञ्चूक्षतं
धत्ते चूतलता नवं किसलयं पुंस्कोकिलास्वादितम् ।
इत्याकर्ण्य सखीजनस्य वचनं सा दीर्घिकायास्तटे
चेलान्तेन तिरोदधे स्तनतटं बिम्बाधरं पाणिना ॥

---

(*b*) గరుడాచలేశస్తుతిః.

GARUḌĀCALEŚASTUTIḤ.

Foll. 124*a*--131*b*. Fol. 131*a* is left blank.

See the Telugu Part of this Triennial Catalogue.

Incomplete.

---

(*c*) రామదాసుకీర్తనములు.

RĀMADĀSUKĪRTANAMULU.

Foll. 132*a*--143*b*.

See the Telugu Part of this Triennial Catalogue.

Incomplete.

---

R. No. **3528**.

**Palm-leaf.** 16⅞ × 1½ inches. Foll. 196. Lines, 5 in a page. Grantha. Slightly injured.

Presented in 1920-21 by M.R.Ry. Śivarāma-Śāstrigaḷ, Rāmeswaram, Ramnad district.

(a) भगवद्गीताव्याख्या—पदयोजना.

BHAGAVADGĪTĀVYĀKHYĀ: PADAYŌJANĀ.

Foll. 1a—186b.

Same work as that described under R. No. 192(a) ante, but with some additional stanzas in the introduction as given below.

Complete.

श्रीरामादिदशावतारसमये रक्षोवधं कुर्वता
कृष्णे जन्मनि राजगोपललनासक्तेन यल्लम्पटम् ।
तन्मोहं हरिरेव जीवकलया सानन्दमाविर्बभौ
ब्रह्मानन्दसरस्वतीति यतिराट् तद्दासदासोऽस्म्यहम् ॥

* * * *

नारायणं पद्मभवसिष्ठशक्तीन् पराशरव्यासशुकान् मुनीन्द्रान् ।
श्रीगौडपादाह्वयोगिवर्यान् गोविन्दपूज्यानथ शङ्करार्यान् ॥
सुरेश्वरांस्तोटकपद्मपादान् नमामि हस्तामलकान् गुरून्मे ।

वन्दारुवृन्दमन्दारान् तानन्दं नन्दकोपमान् ।
चिदानन्दानहं वन्दे पूर्णानन्दसरस्वतीन् ॥

वृन्दारकपदं गत्वा मन्दारकुसुमान्यहो ।
येनानीतानि तं वन्दे पुरुषोत्तमयोगिनम् ॥

यस्मै प्रसन्ना कामाक्षी क्षीरान्नं कृपया ददौ ।
लब्धापदानं तं वन्दे शिवरामसरस्वतीम् ॥

सर्वातिशायिने वीतमायिने विश्वदायिने ।
गोपालनन्दसंज्ञाय कस्मैचिन्महसे नमः ॥

स्वयं प्रकाशमानन्दश्रीपादसुरपादपम् ।
अखण्डानन्दफलदं कृपामूलमुपाश्रये ॥

* * * *

अविघ्नशुभदं भूयाद्भूयो वैनायकं महः ।

Fol. 187a gives the date of transcription of this work.

Date of transcription—Thursday, the 13th day of the bright fortnight of the lunar month Caitra in the year Prajōtpatti.

Name of the scribe--Veṅkaṭasubrahmaṇya, pupil of Cidghanasarasvatī of Svarṇakuṭī village.

Fol. 187*b* contains a few stanzas from the Śrībhāgavata.

---

(*b*) पञ्चदशी.

PAÑCADAŚĪ.

Foll. 188*a*—192*b*.

Same work as that described under No. 4613 of the D.C.S. MSS., Vol. IX.

Contains the Pratyaktattva only.

Foll. 193 and 194 contain some horoscopes. Foll. 195 and 196 are left blank.

---

R. No. **3529.**

Palm-leaf. 14½ × 1 inches. Foll. 37. Lines, 5 in a page. Telugu. Slightly injured.

Presented in 1920-21 by M.R.Ry. Durbhā Kṛṣṇa Śāstrigāru, Gangadevipeta, Indukurpeta post, Nellore district.

Foll. 1, 2 and 37*b* are left blank.

यागकालनिर्णयः.

YĀGAKĀLANIRṆAYAḤ.

A treatise on the determination of proper time for the performance of sacrifices: by Cauṇḍapārya.

Date of transcription—The 12th day of the dark fortnight of the lunar month Vaiśākha in the year Vibhava.

Name of the scribe--Subbayya.

Complete.

**Beginning:**

अग्न्याधेयेष्टिसोमानां पशूनामुक्तकर्मणाम् ।
तथैवाहीनसत्राणां क्रियते कालनिर्णयः ॥
आपस्तम्बं सूत्रकारमन्यान् बोधायनादिकान् ।
भाष्यकारं श्रुतिं चाब्धिं गुरुं नत्वा दिवाकरम् ॥
यथाश्रुति यथासूत्रमुपयोगं च कर्मणाम् ।
अनुकूलं प्रवक्ष्यामि विरोधान् परिहृत्य च ॥

तत्रादौ समस्तयागप्रकृतिभूतदर्शपूर्णमासयोर्यागकालनिर्णय उच्यते। यदहः पुरस्ताच्चन्द्रमाः पूर्ण उत्सर्पेत्तां पौर्णमासीमुपवसेदित्यादि प्रायेण पौर्णमास्याः

कालः । यदहर्न दृश्येते यथमावास्यायाः । यस्मिन्नहनि रात्रावपराह्णे वा प्रतिपत्पञ्चदश्योस्सन्धिः, तस्मिन्नहनि पञ्चदश्यामन्वाधायापरेद्युर्यागः । पञ्चदश्याश्चतुर्थभागः प्रतिपद आदितस्त्रिभागश्च यागकालः । यदा पञ्चदश्यां मध्याह्ने तत्पूर्वं वा सन्धिः तदा चतुर्दश्यामन्वाधाय पञ्चदश्यां यागः प्रतिपदि समाप्तिः ।

**End:**

तस्मादाहिताग्निर्दारप्रयुक्तस्सन्नेव यावत्कर्मकालं प्रव्रजेत् निवृत्तिः । तस्मादुभयत्र कर्मतुल्यं कर्मफलानि । एतद्विशेषमविरुद्धं ग्रन्थान्तरादपि ग्राह्यम् । इतरन्मदीयचौण्डपायनीयप्रयोगादवबोध्यम् ॥

एतद्ग्रन्थपरिज्ञानं योऽनुवेत्ति सुनिश्चितम् ।
यागकालपरिज्ञानभ्रंशो नास्ति कदाचन ॥

**Colophon:**

इति चौण्डपायनीये अग्निहोत्रप्रणयनादिकालनिर्णयः समाप्तः ॥

यागकालविधानाख्यं श्रुतिसूत्रोपनिर्मितम् ।
रत्नं रत्नमिति ग्राह्यं कविभिः कृतबुद्धिभिः ॥

---

## R. No. 3530.

Śritāla. 16¾ × 2 inches. Foll. 335. Lines, 15 in a page. Telugu. Fair.

Presented in 1920-21 by M. R. Ry. Rao Bahadur C. S. Subrahmanyam, Tekkiruppu.

रामायणम्.

RĀMĀYAṆAM.

Foll. 1a—331a. Foll. 331b and 333—335 are left blank.

Fol. 332 contains again a few stanzas from the Yuddhakāṇḍa.

Same work as that described under No. 1836 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Kāṇḍas one to six complete.

---

## R. No. 3531.

Śritāla. 8¾ × 2 inches. Foll. 564. Lines, 15 in a page. Telugu. Good.

Presented in 1920-21 by M. R. Ry. Rao Bahadur C. S. Subrahmanyam, Tekkiruppu.

रामायणम्.

RĀMĀYAṆAM.

Same work as that described under No. 1806 of the D.C.S. MSS., Vol. IV, Part I.

Complete in six Kāṇḍas.

Date of transcription—Tuesday, the 15th day of the bright fortnight in the lunar month Māgha.

Name of the scribe—Vĕṅkaṭasubbayya, son of Ravūri Subbayya, who copied for Rāmasvāmayya, son of Vĕṅkaṭācalayya of Kalaga.

---

R. No. 3532.

Śrītāla. 19¾ × 2¼ inches. Foll. 159. Lines, 13 in a page. Telugu. Slightly injured.

Presented in 1920-21 by M.R.Ry. Rao Bahadur C. S. Subrahmaṇyam, Tekkiruppu.

रामायणम्.

RĀMĀYAṆAM.

Foll. 2a—156b. Foll. 1 and 156—159 are left blank.

Same work as that described under No. 1806 of the D.C.S. MSS., Vol. IV, Part I.

Breaks off in the 18th Sarga of the Kiṣkindhākāṇḍa ending with the words देवा मानुषरूपेण चरन्त्येते महीतले । त्वं तु धर्ममविज्ञाय केवलम् . . .

---

R. No. 3533.

Palm-leaf. 11⅞ × 1½ inches. Foll. 143. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1920-21 by M.R.Ry. Aṣṭagōtram Maṭham Vādhyār Raṅgasvāmi Ayyaṅgār, Sannidhi street, Tirukkuruṅguḍi, Tinnevelly district.

तोताद्रिमाहात्म्यम्.

TŌTĀDRIMĀHĀTMYAM.

Foll. 3a—103b. Foll. 1b and 2b give the heading of this work. Foll. 1a, 2b and 104a—143b are left blank.

Same work as that described under R. No. 2100 ante, but contains also an additional portion of 14 pages taken from the first part of the Bṛhannāradīyapurāṇa, extract being given below from this portion.

श्रीशौनकः—

सूतपुत्र महाभाग श्रुतं सर्वं मयानघ ।
क्षेत्राणां चैव माहात्म्यं तीर्थानां च विशेषतः ॥
त्रैलोक्यान्तर्गतं वृत्तं मया पूर्वं दयालुना ।
भूयः पुत्र महाभाग श्रोतुमिच्छामि वैभवम् ॥
अस्ति दक्षिणदिग्भागे रोमशाख्यं महास्थलम् ।
एवमुक्तं त्वया पूर्वं प्रसङ्गात्तत्र वै पुनः ॥

* * * *

एवं मयोक्तं तव शौनकाद्य सङ्कृथ विष्णूद्भववैभवं च ।
विलोमशस्यापि महात्मनस्तु क्षेत्रस्य तीर्थस्य सहेतुकत्वम् ॥
श्रुत्वा नरो व्योममहाद्रिवैभवं स देहभाक् सहसा सुदुर्लभम् ।
गन्तुं न शक्यं मनसा च योगिभिः तदेव विष्णोः परमं पदं व्रजेत् ॥

**Colophon:**

इति ब्रह्म(बृह)न्नारदीयपूर्वभागे व्योमशैलमाहात्म्यं नाम एकोनपञ्चा[द]-
शोऽध्यायः ॥

---

## R. No. 3534.

Palm-leaf. 16¾ × 1¼ inches. Foll. 99 Lines, 10 in a page. Grantha. Much injured.

Presented in 1920-21 by M.R.Ry. Aṣṭagōtram Maṭham Vādhyār Raṅgasāmī Ayyaṅgār, Sannidhi street, Tirukkuruṅguḍi, Tinnevelly district.

### (a) जैमिनिसूत्रवृत्तिः—भावकौमुदी.
### JAIMINISŪTRAVṚTTIḤ : BHĀVAKAUMUDĪ.

Foll. 1a—52a. Fol. 52 contains a few Vacanas of the Jyautiṣaratnākara.

Same work as that described under R. No. 343(a) ante. By Veṅkaṭēśa of Vādhūlagōtra.

Breaks off in the 12th Bhāva (ending with the words स्वर्गप्राप्तिं विनिर्दिशेत् ).

---

### (b) लम्पाकम्.
### LAMPĀKAM.

Foll. 53a—61a. Fol. 61b is left blank.

Slightly different from the work described under No. 13986 of the D.C.S MSS., Vol. XXIV.

Contains the first Adhyāya incomplete.

**Beginning:**

ब्रह्मरुद्रमहेन्द्राणां कारणं सकलस्य च ।
वन्दे परतरं विष्णु प्रणामा(माणा)तीतगोचरम् ॥
अभ्यासीनं महाविष्णोस्समीपमतुलप्रभम् ।
विघ्नध्वान्तरविं पूज्य वक्ष्ये लम्पाकमादरात् ॥
मण्डलं चतुरश्रं वा लिखित्वान्तः प्रपादयेत् ।
चतुर्दिक्षु चतुस्सूत्रं द्विपदैर्द्वयमालिखेत् ॥
मेषो वृषश्च युग्मं च कटकं सिंहयोषितः ।
तुलावृश्चिकधन्वानि मकरं कुम्भमीनकौ ॥
सपर्याया इमे शब्दा दलानां द्वादशात्मनाम् ।
नामधेयानि विद्वद्भिः कथ्यन्ते पूर्ववित्तमैः ॥

**End:**

चन्द्रभानौ क्षणिकयोः क्षणिकेन च राहुणा ।
व्यत्यासमरणं राजा पित्रोरपि विनिर्दिशेत् ॥

---

(c) कालचक्रगतिः.

KĀLACAKRAGATIḤ.

Foll. 62a—64a. Fol. 64b is left blank.

Same work as that described under No. 13640 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

---

(d) नवग्रहदशाफलम्.

NAVAGRAHADAŚĀPHALAM.

Foll. 65a—83a. Fol. 83b contains several authorities regarding the Muhūrtas.

Similar to the work described under No. 13768 of the D.C.S. MSS., Vol. XXIV.

Breaks off in the 43rd stanza of Śanidaśāphala.

**Beginning:**

दशानुरोधेन फलं वदन्ति मुनीश्वरा जातशुभाशुभं यद् ।
सारं समुद्धृत्य तदेव वक्ष्ये भेदं यथाविस्तरतो दशानाम् ॥

दीप्तस्स्वस्थस्तु मुदितश्शान्तो हीनोऽतिदुःखितः ।
विकलः खलश्च कोऽपि नवविधः खेचरो भवेत् ॥

उच्चस्थः खेचरो दीप्तः स्वर्क्षे स्वस्थोऽतिमित्रभे ।
मुदितः मित्रभे शान्तः खिल्यरी हीन उच्यते ॥

शत्रुस्थे दुःखसंयुक्तो विकलः पापसंयुतः ।
पृथक् पृथक् फलं तेषां दशाकाले विशेषतः ॥

तत्तन्नामानुरोधेन परिपाके वदन्ति हि ।

* * * *

उच्चांशकयुतो भानुः नीचस्थोऽपि महत्सुखम् ।
करोति राज्यभारं च दशान्ते विपदं कृशम् ॥

**Colophon:**

इति रविदशाफलम् ॥

**End:**

उच्चांशयुक्तश्शुक्रोऽपि नीचराशिसमन्वितः ।
कृषिगोभूमिवाणिज्यं धनधान्यविवर्धनम् ॥

**Colophon:**

इति शुक्रदशाफलम् ॥

अथ शनिदशाफलम्—

मन्दात्युच्चदशायां ग्रामसभामण्डलाधिपत्यं स्यात् ।
लभते विनोदशीलं पितृनाशं बन्धुकलहं च ।

* * * *

क्रूरद्रेक्काणसंयुक्तशनिदायेऽरिपीडनम् ।
उद्बन्धनं विषाद्भीति नृपचोराग्निजं भयम् ॥ ४२ ॥

नीचराशिगतो मन्दः स्वोच्चांशकसमन्वितः ।
दशादौ दुःखमाप्नोति

(c) शतमञ्जरीयोगः.
ŚATAMAÑJARĪYOGAḤ.

Foll. 84a—93b.

Similar to the work described under No. 13697 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

**Beginning:**

शतमञ्जरीयोगः—

लग्नात्सप्तमगे चन्द्रे चन्द्रादष्टमगे रविः ।
शिखिना संयुते लग्ने कुसुमो योग ईरितः ॥
कुसुमे योगे जातो भूपालो बन्धुरक्षको विनीतश्च ।
ग्रामपुरनगरकर्ता विंशत्यब्दात्परं तु पञ्चर्षम ॥

**End:**

मूलत्रिकोणे यदि राज्यनाथे लाभेश्वरे संयुतभाग्यनाथे ।
भाग्यस्थिते वाहनतुङ्गयुक्ते लग्नेश्वरे देवगुरौ निरीक्षिते ॥

देवेन्द्रसिंहासनप्राप्तिः स्यात्.

Fol. 94 gives the Bhallātakarasāyanaprayōga. Fol. 95 contains the Jyautiṣaviṣaya in Tamil. Fol. 96a contains the Bṛhaspativākyas on Muhūrta. Fol. 96b is left blank. Foll. 97a—99a contain several ślōkas on the Jyautiṣa Phalabhāga. Fol. 99b is left blank.

---

R. No. 3535.

Śrītāla. 17⅜ × 1⅜ inches. Foll. 276. Lines, 13 in a page. Telugu. Slightly injured.

Presented in 1920-21 by M.R.Ry. Rao Bahadur C. S. Subrahmanyam, Tekkiruppu.

रामायणम्.
RĀMĀYAṆAM.

Foll. 106b—108b, 156b—187b, 208a, 215 229b and 274—276 are left blank.

Same work as that described under No. 1806 of the D.C.S. MSS., Vol. IV, Part I.

Complete in seven Kāṇḍas, but the leaves are not in order, in the last three Kāṇḍas.

R. No. **3536.**

Śrītāla 10¾ × 2 inches. Foll. 135. Lines, 13 in a page. Telugu. Fair.

Presented in 1920-21 by M.R.Ry. Rao Bahadur C. S. Subrahmaṇyam, Tekkiruppa.

भागवतम् , सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Foll. 1, 42b—72b, 132b—133b and 135 are left blank. Fol. 134 contains a few Vacanas from Vaidyanāthīya.

Same work as that described under No. 2199 of the D.C.S. MSS., Vol. IV, Part I. By Śrīdharasvāmin.

Contains the Skandhas one, seven, and eight complete. Adhyāyas one to four in the second Skandha complete and Adhyāya five incomplete.

---

R. No. **3537.**

Palm leaf. 14¾ × 1¼ inches. Foll. 53. Lines, 6 in a page. Grantha. Much injured.

Presented in 1920-21 by M.R.Ry. Tiruvaḍi Śrinivāsa Ayyaṅgār, Pandalkuḍi, Ramnad district.

सिद्धान्तरत्नावलिः.

SIDDHĀNTARATNĀVALIḤ.

Similar to the work described under No. 4896 of the D.C.S. MSS., Vol. X.

Contains the Prakṛtilakṣaṇa, Jīvalakṣaṇa and Īśvaralakṣaṇa complete and Buddhilakṣaṇa incomplete.

**Beginning :**

श्रीमान् वेङ्कटनाथार्यः (. . .) सन्निधत्तां सदा हृदि ॥

हयवदनहर्षहेषालहरी जयतान्निपीय यां सुधियः ।

प्रभवन्ति नित्यहृष्टाः पराभवन्तीतरे च यया ॥

श्रुतिशिखरसूरियतिराड्यामुननाथार्यवकुलमाल्यधरान् ।

सेनान्यमब्जनिलयां पतिमस्याः परमपूरुषं च भजे ॥

श्रीमद्वेदवतंसदेशिकदयामन्दाकिनीस्रोतसा

प्रक्षाल्याखिलमान्तरं मलचयं श्रीशैलसूरेः गुरोः ।

पादाब्जे प्रणिधाय चेतसि तदीयानुग्रहप्रेरितः

श्रीवासस्तनुते सतामिह मुदे सिद्धान्तरत्नावलिम् ॥

श्रुतिभिस्स्वयमेव मृग्यमाणः श्रुतिसीमान्तनिगूढतत्त्वमार्गः ।
अतिमन्दधियामपीदृशानां श्रुतिचूडार्यपदाब्जभक्तिलभ्यः ॥
सन्न्यायसिद्धाञ्जनतत्त्वमुक्ताकलापसर्वार्थसुसिद्धिमुख्यान् ।
श्रीमत्प्रबन्धान् परिशील्य सम्यग्बोधाय सङ्क्षिप्य विविच्यतेऽत्र ॥
अशेषचिदचिद्रूपं ब्रह्मैकं तत्त्वमुच्यते ।
तद्विशेषणभूतं च सर्वं द्वेधा समीरितम् ॥
द्रव्याद्रव्यप्रभेदेन तत्र द्रव्यं दशाऽऽश्रयम् ।
दशा चागन्तुको धर्मस्तयोर्भेदस्तु तात्त्विकः ॥

* * * *

सेयं माया भगवतो मायिनामपि मोहिनी ।
लीलातनुरिति ज्ञेया ब्रह्मस्तम्बेन्द्रजालिकी ॥
अनादिमायया सुप्तो यं प्रपद्य प्रबुध्यति ।
अपुनस्स्वापमात्मायं तमुपास्ते श्रियः पतिम् ॥
अथ ज्ञानाश्रयो जीवः स्वतश्शेषः परात्मनः ।
अणुः प्रत्यक्कृतीच्छादेराश्रयोऽन्यश्शरीरतः ॥

**End:**

अतो ब्रह्म श्रीमदेव जगज्जन्मादिकारणम् ।
उपास्यं च शरण्यं च प्राप्यं चापि मुमुक्षुभिः ॥
प्रतिपूरुषमाश्रया धियो यो नः प्रचोदयात् ।
प्रत्यवस्थं च तद्विष्णोर्भर्गो देवस्य धीमहि ॥
सकर्तृकप्रकाशा धीस्सकर्मकतया युता ।
अतिसूक्ष्मातिवेगा चेन्द्रियद्वारा प्रसारिणी ॥

* * * *

स्वप्रकाशान्यप्रत्यक्षे सन्निकर्षस्तु कारणम् ।
स च द्विधार्थसंयोगस्संयुक्ताश्रिततेति च ॥

---

R. No. **3538**.

Palm-leaf. 16⅝ × 1½ inches. Foll. 57. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1920-21 by M.R.Ry. Tiruvaḍi Śrīnivāsa Ayyaṅgār, Pandalkuḍi, Ramnad district.

(a) गायत्र्यर्थविचारः.

GĀYATTRYARTHAVICĀRAḤ.

Foll. 4a—11b. Fol. 2b contains a few Vacanas from the Mahābharata. Fol. 3 contains a portion of the work described under this number. Foll. 1a—21a are left blank.

On the investigation of the meaning and significance of the Gāyattrimantra.

Complete.

**Beginning:**

ध्यायामि नरपश्चास्यं रविमण्डलमध्यगम् ।
उपस्थेयं जपपरैस्ताविर्भ्यां योगितल्लजैः ॥
गायत्रीप्रतिपाद्यं ये विरूपाक्षं चचक्षिरे ।
तेभ्यः पद्माक्षबोधिन्यरश्रुतयोऽदुश्चपेटिकाम् ॥
अत्रान्तरधिकारस्थगोचराः श्रुतिराशयः ।
उपबृंहणवाचश्च लिख्यन्ते साक्षितां गताः ॥
अत्रोद्ग्रन्थेषु कुशला नाद्रियन्ते कृतिं मम ।
तथापि प्रार्थये नम्रस्तानेतान् वीक्षितुं बुधान् ॥
अत्रानुक्तदुरुक्तादिदोषशोधनतत्पराः ।
वीक्षन्तां कृपयाभिज्ञा गायत्रीपांसुशोधिनीम् ॥

अन्तस्तद्धर्मोपदेशात् । आदित्याद्यन्तरवस्थितः परमात्मैव, तदसाधारणधर्मोपदेशादिति सूत्रार्थः । तैत्तिरीये—एषोऽन्तरादित्ये हिरण्मयः पुरुषः । छान्दोग्ये—अथ य एतदादित्यस्य शुक्लं भास्तैवर्गंब यन्नीलं परः कृष्णं तत्सामेत्यादि ।

* * * *

तथा तलवकारश्रुतौ—सावित्रीविषये कस्सविता? का सावित्रीति प्रश्ने तस्या एष प्रथमः पादो भूस्तत्सवितुर्वरेण्यं तस्या एष द्वितीयो भुवो भर्गमयस्तस्या एष तृतीयः स्वर्धियो यो नः प्रचोदयात् यज्ञो वै प्रचोदयात् प्रचोदयिता यज्ञ इति।

* * * *

श्रुतिस्मृतीतिहासगैः प्रमाणवाक्यतल्लजैः
त्रयीप्रसू रमासमाम्यगाद्धीरं त्वितीरितम् ।
न चण्डिकेशमादराद्घटात्कृतापि तत्स्फुट-
प्रतीतिसिद्धये परप्रकाशितोऽथ ईर्यते ॥

**Colophon:**

इति प्रथमः परिच्छेदः ॥

**End:**

यस्य प्रसादजो ब्रह्मा रुद्रश्च कोपसम्भवः इत्यादीनि च पूर्वोक्तत्रिंश-च्छ्लोकीव्याख्याग्रन्थ उदाहृतानि । तत्रैव द्रष्टव्यानीति सर्वमवदातम् ॥

**Colophon:**

द्वितीयः परिच्छेदः ॥

श्रीरामनाथपुरभूपतिसभ्यमुख्य

श्रीवेङ्कटार्यविदुषा श्रुपतस्थुषार्यान् ।

वाधूलवंशजनुषा लिखितस्तदानीं

वादाहवेषु कथितः प्रतियुक्तिवर्गः ॥

---

(*b*) पञ्चश्लोकी.

PAÑCAŚLOKĪ.

Fol. 12*a*.

Five stanzas purporting to establish the supremacy of God Śiva.

Complete.

**Beginning:**

सृष्ट्वा ब्रह्माणमादौ निगममखिलमध्यापिपच्चादिदेवो

मोक्षेच्छूनां स मन्त्रोपनिषदि शरणं प्राप्य इत्यध्यगादि ।

ख्याता शैवी समाख्या चलन इयमिहाम्नातमन्त्रोपदिष्टा

शम्भोरन्य कथं कः कथयतु कनकस्वामिनेतुस्सभायाम् ॥

ईशेशानमहेश्वरा हरशिवौ विश्वाधिको रुद्र इ-

त्याद्या यच्छ्रुतयस्स्फुटा यदपि तद्रुद्राख्ययालिङ्गितम् ।

लिङ्गं दक्षिणवक्त्रतादि पददो व्याख्यानमार्षं परं

तैषा भाति शिवेऽनुषक्तहृदया सीतेव रामे ततः ॥

**End:**

विष्ण्वैकान्त्यं प्रतिष्ठापयितुमनलमालोच्य साधारणत्वात्

पुंसूक्तस्यैतदन्तश्रुतपुरुषपदं वर्जयन्नार्जवेन ।

लिङ्गं लक्ष्मीपतित्वं न किमुपरितने चानुवाके गृहीत्वा

भावत्को देशिको हि स्वमतमचकलत्तच्चमुक्ताकलापे ॥

माहं मत्यवगां महेश्वरमहानिन्दाभिनन्दादिमेऽ-

प्यभ्युपन्तु तदीयतत्त्वकलनात् सभ्या अलभ्यादिति ।

कश्चिद्याचत मद्गृहिषन्निह जरद्वाणीसुवेणीभरं

तत्कल्याणगुणाङ्कितं सुविशदीकर्तुं विहर्तुं धिया ॥

Fol. 12*b* gives the commentary of one stanza in Viṣṇutattvapradīpikā.

---

(*c*) त्रिंशच्छ्लोकी.

TRIṀŚACCHLŌKĪ.

Foll. 13*a*—14*b*.

An unfavourable criticism in 30 stanzas of the assertion of Rāju Śāstrin to the effect that God Śiva is superior to Lord Viṣṇu: by Veṅkaṭēśa of Vādhūlagōtra, patronized by king Ponnusāmi Sētupati of Rāmanāthapuram. The author was the grandson (daughter's son) of Sundarārya of Bhāradvājagōtra. This work is also called Viṣṇutattvapradīpikā.

Complete.

**Beginning:**

अमृताब्धिसुतापादपद्मलाक्षैकलक्ष्मणे ।

सर्ववेदान्तवेद्याय पुरुषाय नमोऽस्तु ते ॥

राजुशास्त्रिकृतेशपरत्वध्वान्तवारिकाम् ।

वेङ्कटार्यो वितनुते विष्णुतत्त्वप्रदीपिकाम् ॥

पूर्वे केचिदचीकरन् विविदिषां ब्रह्मेति किं केचन

प्रत्याख्यन् प्रमिते क्षराक्षरपदाभ्यामीष्ट इत्येव तन् ।

भाषते किमिति क्षराक्षरपदे प्रश्ने प्रधानं चितं

व्यावोचन्नमृतो हरोऽक्षरपदाद्वाच्यः प्रधानं क्षरात् ॥

वावीष्ट करुणाब्धिरित्यपि वचो वक्तीममर्थं सुखात्

नो चेत्कुम्भघटादिभिर्भवतु धीः पर्यायशब्दैर्नृणाम् ।

भोक्तुर्भोगकृते त्वजेत्यचकथद्बोध्या ततो भोक्तृता

तस्माजीवपरं हरेति सुवचं क्वोपक्रमप्रक्रमः ॥

**End:**

तत्तत्त्वविवेचनात्सुमतयस्संप्रीणयन्ते च ते

तांस्तान् देववरान् व्यभिज्ञपमहं स्तव्येषु भव्येप्सया ।

न प्राणन्न रुरुत्सुरस्मि कमपि त्वाचान्तमोचारसां
वाचां देशिककोशगां सुमहयन्नास्से हरेस्सेवने ॥
रामनाथपत्तनेन्द्रसेतुभूपमानितो
वेङ्कटेशकोविदो ह्यकल्पयद्दिरं त्विमाम् ।
राजुशास्त्रिकॢप्तपूर्वपक्षखण्डनात्मिकां
त्रिंशदुक्तसङ्ख्यपद्यरूपिणीं रमापती ॥
तत्तातस्तत्पिता तज्जनक इति समाम्नातपद्गोत्रजातैः
व्यार्लर्षिस्तत्पिता तज्जनक इति गतिर्नीयते शुद्धभावात् ।
भारद्वाजो विपश्चित् कवित्ररमृगराट् सुन्दरार्यो गुणाब्धिः
यन्मातुस्तातवर्यस्स तदिदमतनोच्छु द्धवाधूलवंश्यः ॥

---

(*d*) त्रिंशच्छ्लोकी, सव्याख्या

TRIMSACCHLŌKĪ WITH COMMENTARY.

Foll. 15*a*—41*a*. Fol. 41*b* gives the same stanza of the Vīrarāghavayatīndraguru.

A commentary on the Trimśacchlōkī described under subdivision(*c*) of the same number: by Vēṅkaṭācārya, who was also a Court Pandit of King Ponnusāmi Sētupati of Rāmanāthapuram.

Complete.

**Beginning:**

लक्ष्मीप्राथ्र्याच्युताङ्घ्र्यब्जसंसक्ततुलसीत्रजात् ।
स्रवन्मधुझरीमत्तभ्रमरीगीतिमाश्रये ॥

इह खलु रमातुलसीसपत्नीभूतायां श्रीश्वेताश्वतरोपनिषदि विषये शैवजनसंमिमानविषाप्रयोज्योमापतिपरत्वप्रतिपिपादयिषया प्रवृत्ताद्वैतिराजुशास्त्रिप्रणीतसद्वाप्राणमित्यादिश्लोकपञ्चकश्रवणानन्तरं तत्प्रतिचिक्षेपयिषया प्रवर्तमानो वेङ्कटाचार्यनामा सभापण्डितः पूर्वाचार्यानुगृहीतग्रन्थावलोकनसन्धुक्षितज्ञानवैशद्यः तत्प्रतिक्षेपकयुक्तियुक्तान् लक्ष्मीनाथपारम्यप्रतिपादकान् अनेकोपनिषत्तात्पर्यसारसङ्ग्रहभूतान् त्रिंशत्सङ्ख्याकान् श्लोकतल्लजान् रिरचयिषुः प्रारिप्सितग्रन्थपरिसमाप्तये पठतां शृण्वतां मङ्गलाय च स्वेष्टदेवतानमस्काररूपं मङ्गलमनुष्ठाय ग्रन्थतो निबध्नाति—अमृताब्धिसुतेति ।

अमृताब्धिसुतापादपद्मलाक्षैकलक्ष्मणे ।
सर्ववेदान्तवेद्याय पुरुषाय नमोऽस्तु ते ॥ स्पष्टोऽर्थः ।

पूर्वोत्तरार्धगतविशेषणैश्शुभाश्रयभूतदिव्यमङ्गलविग्रहसर्वोन्नतत्वसर्वसौलभ्यवेदान्तैकवेद्यत्वसर्वान्तर्यामित्वादयोऽनुसन्धेयाः । तत्र प्रथमं श्वेताश्वतरोपनिषदन्त्यनसूयान्यायेन विष्ण्वेकनिष्ठां महानटाभिमुखीकरणेन खेदयन् पूर्वपक्षं व्याततनोदिति तन्निराचिकीर्षया पूर्वोत्तरसङ्गतिप्रदर्शनेन तां विनोदयति पूर्वे केचिदिति ।

End :

विष्णुस्मृतौ प्रथमेऽध्याये—

नारायणः परं ब्रह्म ब्राह्मणानां हि दैवतम् ॥
सोमसूर्यादयो देवाः क्षत्रियाणां विशामपि ।
शूद्रादीनां तु रुद्राद्यास्त्वर्चनीयाः प्रकीर्तिताः ॥
मङ्गल्यं मङ्गलं विष्णुं वरेण्यमनघं शुचिम् ।
नमस्कृत्य हृषीकेशं धर्मान् वक्ष्यामि शाश्वतान् ॥ इत्यादिकं चानुसन्धेयम् ॥

रामनाथपत्तनेन्द्रसेतुभूपमानितौ
वेङ्कटेशकोविदो व्यकल्पयद्गिरं त्विमाम् ।
रामशास्त्रिकृतपूर्वपक्षखण्डनात्मिकां
त्रिंशदुक्तसङ्ख्यपद्यरूपिणीं रमापतौ ॥
तत्तातस्तत्पिता तज्जनक इति समाम्नातयद्गोत्रजातैः
व्यासर्षिस्तत्पिता तज्जनक इति गतिश्श्रीयते शुद्धभावात् ।
भारद्वाजो विपश्चित् कविवरमृगराट् सुन्दरार्यो गुणाब्धिः
यन्मातुस्तातवर्यस्स तदिदमतनोच्छुद्धवाधूलवंश्यः ॥

Fol. 42 gives a portion of Sthālipākaprakāśikā. Foll. 43–57 are left blank.

## R. No. 3539.

Palm-leaf. 15¼ × 1⅞ inches. Foll. 42. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1920–21 by M.R.Ry. Tiruvadi Śrinivāsa Ayyaṅgār, Pandalkudi, Ramnad district.

(a) पञ्चश्लोकी.

PAÑCAŚLOKI.

Fol. 1a.

Same work as that described under R. No. 3538(*b*) ante. By Rāju Śāstrin.

Complete.

---

(*b*) त्रिंशच्छ्लोकी.

TRIṂŚACCHLŌKĪ.

Foll. 1*b*—2*b*.

Same work as that described under R. No. 3538(*c*) ante. By Vēṅkaṭācārya.

Incomplete and in disorder.

---

(*c*) त्रिंशच्छ्लोकी.

TRIṂŚACCHLŌKĪ.

Foll 3*a*—7*b*.

Same work as that described under R. No. 3538(*c*) ante, but the first two stanzas contain the introduction and meaning and the last stanza is different as given below :—

श्रीरामनाथपुरभूपतिपोत्तुसामिश्रीभरसदस्यबुधवेङ्कटसूरिरित्यम् ।
तद्राजुशास्त्रिकृतभर्गपरत्ववादं प्रत्याख्यदुक्तविषयापि समग्रहीच्च ॥

Foll. 8*a*—10*a* contain a few Citrapaddhaka stanzas in the Pādukasahasra of Vēdāntadēśika. Fol. 10*b* is left blank.

---

(*d*) त्रिंशच्छ्लोकी, सव्याख्या.

TRIṂŚACCHLŌKĪ WITH COMMENTARY.

Foll. 11*a*—30*a*. Fol. 30*b* is left blank.

Same work as that described under R. No. 3538(*d*) ante.

Complete.

Fol. 31*a* gives the Smṛtisvarūpavicāra. Fol. 31*b* is left blank. Foll. 32*a*—42*a* contain the Viṣṇupāramyaviṣaya. Fol. 42*b* is left blank.

---

R. No. **3540.**

Palm-leaf. 15¼ × 1⅞ inches. Foll. 64. Lines, 9 in a page. Grantha. Good.

Presented in 1920-21 by M.R.Ry. Tiruvaḍi Śrīnivāsa Ayyaṅgār, Pandalkuḍi, Ramnad district.

विष्णुपारम्यवर्णनम्.

VIṢṆUPĀRAMYAVARṆANAM.

Foll. 1a—60b. Foll. 10, 11, 21—24, 44, 46b, 47a, 57b and 61—64 are left blank.

Similar to the work described under R No 3540 ante.

Incomplete.

**Beginning:**

अजायमानो बहुधा विजायत इत्यत्र जननविधिनिषेधयोः सामानाधिकरण्येनैकविषयत्वसम्भवात्परत्वकल्पनेऽपि प्रकृते विष्णुशब्देन प्रसूतेर्न कारणमिति कारणशब्देन तन्निषेधस्य प्रतिपादनेनैकविषयत्वानवगमात् अविरोधेनावतारत्वे मानाभावात् शम्भोरेव ध्येयकारणरूपत्वं विस्पष्टमाह—कारणं तु ध्येयइत्यादिना। सर्वेषामितरेषां प्रसूत्या सेतरव्यवच्छेदपूर्वकं शिवे ध्येयत्वमर्थसिद्धं कण्ठतोऽप्याह—शिव एक इत्यादिना।

* * * *

प्रकृते च तत्तत्प्रश्नोत्तराणां निवृत्ततया ध्येयप्रश्नोत्तरस्य . . . . . वसर इति ख्यापनपरेण कारणं तु . . मन्त्रप्रश्नोत्तरवाक्ये पुरुषदैवत्येति ध्येयदेवतात्वेन प्रक्रान्ते पुरुषे नारायणे बुद्धौ विपरिवर्तमाने तत एव प्रकरणे सर्वस्मिन् पत्य(दं) न देवतान्तरस्पर्शं सहत इति सिद्धम्।

**End:**

ऐतदात्म्यमिदं सर्वमिति विशिष्टत्वेनैकीकृत्य सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमेको ह वै नारायण आसीत् इत्यादिष्वार्थेषु प्रमाणवर्गः सूक्ष्मचिदचिद्विशिष्टपरब्रह्मैक्यमुक्त्वा तथाविधवस्त्वन्तराभावतात्पर्येण च प्रवर्तते। ज्ञानं यथा सत्यं सत्यमन्यदिति प्रपञ्चगोचरासत्यत्वादिव्यवहाराश्च ज्योतिषि विष्णुः भुवनानि विष्णुः यदस्ति यन्नास्ति च विप्रवर्य। तदेतदक्षयं सत्यं जगत् मुनिवराखिलमाविर्भावजन्मनाशविकल्पवत् इत्यादितत्तत्प्रकरणपूर्वापरपर्यालोचनया स्वरूपसत्यत्वे सत्येव विनाशित्वविकारित्वसततैकरूपत्वाभावादिविषयत्वेन प्रवृत्ता इति सुव्यक्तम्।

* * * *

एवं प्रकृतिपुरुषेश्वर.

---

## R. No. 3541.

Palm-leaf. 16 × 1¼ inches. Foll. 98. Lines, 7 in page. Grantha. Good.

Presented in 1920-21 by M.R.Ry. Tiruvadi Śrinivāsa Ayyaṅgār, Pandalkuḍi, Ramnad district.

(a) परिभाषेन्दुशेखरव्याख्या.

PARIBHĀṢENDUŚEKHARAVYĀKHYĀ.

Foll. 2b—80a. Fol. 1a contains a small portion of the Daśā-bhaktiphalavacanas. Foll. 1b and 2a are left blank.

A commentary on Nāgēśabhaṭṭa's Paribhāṣēnduśēkhara, which work has been described under No. 1463 of the D.C.S. MSS., Vol. III: by Bhairavamiśra, son of Bhavadēvamiśra and grandson of Lakṣmaṇamiśra and great grandson of Vandimiśra of Agastyagōtra.

Complete.

**Beginning :**

वन्देऽहं परमात्मानं सर्वज्ञं रघुनन्दनम् ।
यत्कृपावशतो यान्ति सिद्धिमत्र महर्षयः ॥
सरस्वतीं च तां नौमि वागधिष्ठातृदेवताम् ।
देवत्वं प्रतिपद्यन्ते यदनुग्रहतो जनाः ॥
नत्वा तातं गुरून् देवं सीतां च जननीं सतीम् ।
विद्वत्नेः परिभाषाणां व्याख्यां कुर्वे यथामति ॥

चिकीर्षितस्य ग्रन्थस्य समाप्तिप्रचुरादिप्रतिबन्धकदुरितोपशमाय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति—नत्वेति । नतेरस्वावधिकोत्कर्षप्रकारकज्ञानानुकूलव्यापाररूपतयोत्कर्षस्य च सर्वजगत्कर्तृत्वादिरूपस्य मायाशालिन एव सम्भव इत्यभिप्रायेणाह—साम्बमिति । नागेश इति ।

* * * *

परिभाषेन्दुशेखरमिति । परिभाषा इन्दुरिवार्थप्रकाशकत्वात् सा शेखरो भूषणं यस्य शिवपक्ष तु परिभाषा इवेन्दुः शेखरो यस्येत्यर्थ इति । ननु कास्ताः परिभाषा अत आह—प्राचीनेति ।

**End :**

एवमादौ प्राचीनवैयाकरणतन्त्रे वाचनिकानीत्युक्तं, तच्चायुक्तम्; अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते किं पुनर्बहूनां वचनानां ज्ञापकेनैव सङ्ग्रहे आनुपूर्वीरूपेणापाठेनापि तथेति सूचितमिति ॥

श्रुतिसप्ताष्टचन्द्राब्दे नन्दनेऽखिलनन्दने ।
वसन्ततौं मधौ शुक्ले पक्षे चन्द्रतिथौ कुजे ॥
पूर्णेयं तनुतां मोदं यथाशक्ति मया कृता ।
विदुषां वक्षसि हरेर्न्यस्ता तस्मात्स तुष्यतु ॥

**Colophon:**

इति श्रीमत्तीर्थराजप्रयागनगरवासिदेवताप्रसादलब्धाखिलेष्टफलमहामहोपाध्यायागस्त्यगोत्रोत्पन्नबन्दिमिश्रात्मजलक्ष्मणमिश्रसुतभवदेवमिश्रपुत्रभैरव(मिश्र)कृतपरिभाषाव्याख्या समाप्तिमगमत् ॥

---

(*b*) णत्वदर्पणः.

ṆATVADARPAṆAḤ.

Foll. 81*a*—92*b*.

Same work as that described under No. 4888 of the D.C.S. MSS., Vol. X, but the colophon is as given below. By Śrīnivāsācārya, son of Śrīnivāsatātācārya and Lakṣmāmba of Śrīśaila family and disciple of Kauṇḍinya Śrīnivāsadīkṣita.

इति श्रीशैलकुलतिलकश्रीनिवासताताचार्यनन्दनेन लक्ष्माम्बागर्भशुक्तिमुक्ताफलेन कौण्डिन्यश्रीनिवासदीक्षितकटाक्षलक्षितभाष्यतत्त्वार्थेन निजाग्रजाण्णयदीक्षितानुग्रहलब्धबुद्धिना प्रतिदिनप्रबन्धनिर्माणधुरन्धरेण षट्तन्त्रनियन्त्रितमानसेन श्रीनिवासाचार्येण विरचितं णत्वदर्पणं समाप्तम् ॥

Foll. 93 and 94 contain the Sālagrāmalakṣaṇa. Foll. 95 and 96 contain the Sudarśanapāñcajanyapratiṣṭhāvidhi. Fol. 97 contains Kālāgnirudrōpaniṣad. Fol. 98 contains the Nityatvānumānavicāra.

---

R. No. **3542**.

Palm-leaf. 15 × 1¼ inches. Foll. 104. Lines, 9 in a page. Grantha. Good.

Presented in 1920–21 by M.R.Ry. Tiruvaḍi Śrīnivāsa Ayyaṅgār, Pandalkudi, Ramnad district.

(*a*) महाभाष्यम्.

MAHĀBHĀṢYAM.

Foll. 1*a*—27*b*.

Same work as that described under No. 1285 of the D.C.S. MSS., Vol. III.

Contains only the first two Āhnikas of the first Pāda in the first Adhyāya.

---

(*b*) महाभाष्यप्रदीपः.

MAHĀBHĀṢYAPRADĪPAḤ.

Foll. 28*a*—43*a*. Fol. 43*b* is left blank.

Same work as that described under No. 1296 of the D.C.S. MSS., Vol. III.

Breaks off in the Pratyāhārāhnika (ending with the words अथो च्वेत चित्कृतमेव यथा स्यात् णित्कृतं मा भूदिति).

---

(c) परिभाषार्थसङ्ग्रहः.
PARIBHĀṢĀRTHASAṄGRAHAḤ.

Foll. 44a—102b.

Same work as that described under No. 1474 of the D.C.S. MSS., Vol. III. By Vaidyanātha Śāstrin, son of Ratnagiridīkṣita.

वेङ्कटाचार्यीयः परिभाषार्थसङ्ग्रहाख्यः ग्रन्थः ॥

Foll. 103 and 104 contain the Magaṇādiprayōgaphalavicāra.

---

R. No. 3543.

Śrītāla. $9\frac{1}{2} \times 1\frac{1}{2}$ inches. Foll. 134. Lines, 13 in a page. Grantha. Slightly injured.

Presented in 1920-21 by M.R.Ry. Tiruvaḍi Śrīnivāsa Ayyaṅgār, Pandalkuḍi, Ramnad district.

(a) गजसूत्रार्थविचारः.
GAJASŪTRĀRTHAVICĀRAḤ.

Foll. 2a—19a. Fol. 1a contains a Nītipadya. Fol. 1b contains a portion of Nārāyaṇavitisūtrārthavicāra. Fol. 19b is left blank.

Similar to the work described under No. 1519 of the D.C.S. MSS., Vol. III.

Incomplete.

**Beginning:**

णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने ।

इह वाक्यत्रयम्—णेरित्येकम्, अणौ यत्कर्म णौ चेदिति द्वितीयं, स कर्ता इति तृतीयम् । तत्र स्यादित्यनेनाद्यं व्याख्यातम् । द्वितीयं व्याचष्टे—अणाविति । यत्तदोर्नित्यसम्बन्धाद्यच्छब्देन तच्छब्दापेक्षार्थे(णान् )प(स)चेदित्यर्थलाभः । अत्र कर्मशब्दः कर्तरि कर्मव्यतिहार इतिवत् क्रियापरः उत्तरवाक्येऽणौ कर्मणः णौ कर्तृत्वविधानात् । ननु कर्मपदस्य क्रियापरत्वे कर्मवत्कर्मणेत्यस्याग्रे णेरणावनाध्याने इति सूत्रितं स्यात् ।

**End:**

सिद्धान्ते कैयटेन कोकिलस्य कर्मत्वेऽपि प्रत्युदाहरणं युज्यत इति तदुक्त्या चात्राप्यात्मनेपदं भवत्येवेति तुल्यन्यायादुक्तप्रायमेवेति वयं विभावयामः इति प्राहुरिति मात्सर्यं सुधीभिर्विभाव्यम् । एवं च दर्शयते राजेति भाष्योदाहरणस्य पूर्वविप्रतिषेधज्ञापकता चिन्त्यैव पूर्वविप्रतिषेधो यदि प्रामाणिकस्तर्हि णेरिति पदमेव तत्तात्पर्यग्राहकमिति बोध्यम् । मिथ्या कारयत इति.

(b) पञ्चलक्षणीटिप्पणी.

PAÑCALAKṢAṆĪṬIPPAṆI.

Foll. 20a—21b.

A short commentary on the Pañcalaksani of Madhuranātha, which is a tract in the Nyāya philosophy.

Incomplete.

**Beginning:**

अनुमानप्रामाण्यं निरूप्य व्याप्तिस्वरूपनिरूपणमारभते—नन्वित्यादिना । अनुमितिहेत्वित्यस्यानुमाननिष्ठप्रामाण्यानुमितिहेत्वित्यर्थः । व्याप्तिज्ञान इत्यत्र च विषयत्वं सप्तम्यर्थः । तथा चानुमाननिष्ठप्रामाण्यानुमितिहेतुव्याप्तिज्ञानविषयीभूता व्याप्तिः केत्यर्थः ।

**End:**

साध्याभाववद्वृत्तिश्च हेतुतावच्छेदकसम्बन्धेन विवक्षणीया.

---

(c) प्रणवदर्पणः.

PRAṆAVADARPṆAḤ.

Foll. 22a—79a. Fol. 79b is left blank.

Same work as that described under No. 4932 of the D.C.S. MSS., Vol. X, wherein see for the end. By Śrīnivāsācārya.

Complete.

**Beginning:**

ओं तत्सद्ब्रह्मेति प्रतिपाद्यमनाद्यमेयमनवद्यम् ।
श्रुतिशिखरसिद्धमस्तु प्रस्तुतलाभाय निस्तुलं वस्तु ॥
यत्तत्पूर्णगुणं गणोऽप्यजगणत्प्राचीनवाचां पुनः
प्रत्यज्ञास्त मुनिस्तदर्थगतये जिज्ञास्यमेतद्ध्विति ।
तानाचन्ततयाभ्युदैदिदमिति स्वैरं समारेभिरे
ये च प्राश्च उदश्चयाम्यहमदः पर्यायचर्याकुलि(ली)म् ॥
प्राचामाचार्याणां वाचामाचान्तनैगमान्तानाम् ।
रोचंरोचं पदवीमाचूषाम्येष दोषकृत् कुहनाम् ॥
यद्यप्यत्रोदासत पूर्वे सर्वेऽप्यखर्वगर्वभरान् ।
एतद्दोषगवेषणजातान् जेतु ममायमारम्भः ॥

इह तावदोङ्कारः शब्दसूत्रेषु सर्वेष्वपि आद्यन्तयोरुच्चार्यत्वमाद्यसूत्रमात्रे च तस्यावयवत्वं केचिदाचक्षते । यथोक्तमनुव्याख्याने—सर्वत्रानुगतत्वेन पृथगों-क्रियतेऽखिलैः । तत्र ताराश्रमूलत्वं सर्वशास्त्रस्य चेष्यत इति ।

---

(d) लघुशब्देन्दुशेखरः.

LAGHUŚABDENDUŚEKHARAḤ.

Foll. 60a–128b.

Same work as that described under No. 1414 of the D.C.S. MSS., Vol. III.

Contains the Kārakaprakaraṇa only.

Foll. 129a—130a contain the Jyantiṣaviṣaya. Fol. 131a contains the Dharmaśāstravacanas. Fol. 132a contains the Vyūhacatuṣṭaya-vacanas. Fol. 133 contains the Darśatarpaṇaprayōga. Foll. 130b, 132b, and 134 are left blank.

---

R. No. 3544.

Palm-leaf. 15¼ × 1¼ inches. Foll. 53. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1920–21 by M.R.Ry. Tiruvaḍi Śrinivāsa Ayyaṅgār, Pandaikuḍi, Ramnad district.

(a) गजसूत्रार्थः.

GAJASŪTRĀRTHAḤ.

Foll. 1a—22b.

Same work as that described under No. 1520 of the D.C.S. MSS., Vol. III. By Vēṅkaṭadāsa, disciple of Śrinivāsācārya and son of Aṇṇayārya and grandson of Śrinivāsatātācārya of Śrīśaila family.

Contain the Paricchēdas one and two complete.

---

(b) दिनकरीयटिप्पणम्.

DINAKARĪYAṬIPPAṆAM.

Foll. 23a—49a. Fol. 49b is left blank.

Same work as that described under No. 3962 of the D.C.S. MSS., Vol. VIII.

Wants the beginning and breaks off in the Guṇaparicchēda.

Foll. 50a—53a contain the Siddhāntalakṣaṇapatrabhāga. Fol. 53b is left blank.

## R. No. 3545.

Palm-leaf. 15¼ × 1¼ inches. Foll. 68. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1920–21 by M.R.Ry. Tiruvaḍi Śrīnivāsa Ayyaṅgār, Pandalkuḍi, Ramnad district.

### (a) वेदार्थविचारः.

### VĒDĀRTHAVICĀRAḤ.

Foll. 1a—15a. Fol. 15b is left blank.

Same work as that described under No. 5028 of the D.C.S. MSS., Vol. X.

Complete.

---

### (b) सिद्धान्तरत्नावलिः.

### SIDDHĀNTARATNĀVALIḤ.

Foll. 16a—68a. Foll. 19b, 20a and 68b are left blank.

Same work as that described under No. 5063 of the D.C.S. MSS., Vol. X. By Vēṅkaṭācārya, disciple of Vēṅkaṭadēśika and son of Tātācārya.

Contains the first Paricchēda incomplete.

---

## R. No. 3546.

Palm-leaf. 16¾ × 1⅝ inches. Foll. 100. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1920–21 by M.R.Ry. Tiruvaḍi Śrīnivāsa Ayyaṅgār, Pandalkuḍi, Ramnad district.

Foll. 1 and 2 contain a small portion of the Śabdādhikāra of Siddhāntakaumudī.

### (a) सिद्धान्तचिन्तामणिः.

### SIDDHĀNTACINTĀMAṆIḤ.

Foll. 3a—45a.

Same work as that described under R. No. 2120 ante. By Śrīnivāsārya, pupil and younger brother of Aṇṇayārya and disciple of Śrīnivāsa of Kauṇḍinyagōtra.

This work is also called Upādānatvasamarthana.

Complete.

(b) शतदूषणी.

ŚATADŪṢAṆĪ.

Foll. 46a—51a. Fol. 51b is left blank.

Same work as that described under No. 5037 of the D.C.S. MSS., Vol. X. By Vēdāntadēśika.

Contains the Bhaṅga 53 complete and Bhaṅga 54 incomplete.

---

(c) विजयीन्द्रपराजयः.

VIJAYĪNDRAPARĀJAYAḤ.

Foll 52a—63a. Fol. 63b is left blank.

Same work as that described under No. 4994 of the D.C.S MSS., Vol. X. By Kumbhakōnam Tātācārya.

Contains the Bhaṅgas 7—10 complete and the 11 incomplete.

---

(d) आनन्दतारतम्यखण्डनम्.

ĀNANDATĀRATAMYAKHAṆḌANAM.

Foll. 64a—68a. Foll. 69a—70a contain a small portion of Ānandatāratamyakhaṇḍana. Foll. 68b and 70b are left balnk.

Same work as that described under No. 4969 of the D.C.S. MSS., Vol. X. By Śrīnivāsācārya of Śaṭhamarṣaṇagōtra.

Complete.

---

(e) श्रीसूक्तभाष्यम्.

ŚRĪSŪKTABHĀṢYAM.

Foll. 71a—78b. Fol. 79 contains a portion of Puruṣasūkta. Foll. 75b and 80 are left blank.

Similar to the work described under No. 25 of the D.C.S. MSS., Vol. I, Part I.

Complete.

**Beginning**:

व्यापनमरणस्वाम्यादिना सर्वेश्वरीत्वसुरासुरमनुष्यादिस्तुत्यत्वतत्समाराध्यत्वाखिलहेयप्रत्यनीककल्याणैकतानत्वं, सर्वलोकस्य तत्कटाक्षलवसमुल्लसितत्वं, लोकस्य सर्वस्य तत्कटाक्षाभावमात्रविनाशित्वं

* * * *

वसिष्ठपौलस्त्यवरप्रसादलब्धपरदेवतापारम्यार्थज्ञानेन भगवता पराशरेण श्रीरेव सर्वेश्वरीति सर्वासां श्रुतीनामुपबृंहणं बहुभिस्तात्पर्यलिङ्गैः सुदृढं समुद्रावितम् ।

* * * *

पवमानसूक्ते च परमात्मनि जातवेदश्शब्दः प्रयुक्तः । जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः इति । हिरण्यवर्णां हितरमणीयरूपाम् । हितत्वं नामापेक्षितार्थसाधकत्वं रमणीयत्वं पत्यनुरूपत्वम् ।

**End:**

श्रीसूक्तं च जपेन्नित्यमृग्भिस्तामर्चयेच्छ्रियम् ।
श्रीकामो जुहुयादग्नौ पक्वैर्बिल्वैस्तया फलैः ॥

Foll. 81 and 82 contain the eighth Adhyāya in the sixth Skandha of the Śrībhagavata. Fol. 83 is left blank.

---

(f) अधिकरणसारार्थदीपिका.

ADHIKARAṆASĀRĀRTHADĪPIKA.

Foll. 84a—100b.

Same work as that described under No. 4853 of the D.C.S MSS., Vol. X. By Śrīnivāsācārya, disciple of Samarapuṅgavācārya of Vādhūlagōtra.

Complete.

Date of transcription—The 27th day of the solar month Vaiyyāsi in the year Bhāva.

Name of the scribe—Tirumalārya of Ātrēyagōtra.

---

R. No. **3547**.

Palm-leaf. 14⅜ × 1⅞ inches. Foll. 86. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1920-21 by M.R.Ry. Tiruvaḍi Śrīnivāsa Ayyaṅgar, Pandalkuḍi, Ramnad district.

(a) कूरेशविजयव्याख्या.

KŪRĒŚAVIJAYAVYĀKHYĀ.

Foll. 1a—27b.

Same work as that described under No. 5227 of the D.C.S. MSS., Vol. XI. By Bhūpati Dharmācāryasudhī.

Wants the first two stanzas and slightly different in the beginning; otherwise complete.

**Colophon :**

इति श्रीभूपतिधर्माचार्यविरचितं कूरेशविजयव्याख्यानं सम्पूर्णम्.

---

(*b*) हरिकर्णामृतम्.

HARIKARṆĀMṚTAM.

Foll. 28*a*—43*a*. Foll. 34*a* and 43*b* are left blank.

A eulogy addressed to Lord Viṣṇu. The author, whose name is not given, salutes Varapradācārya, Campakeśa, Yāmunācārya, etc., and also states that he wrote this work in condemnation of the Śivakarṇāmṛta.

Incomplete.

**Beginning :**

श्रीमद्वरप्रदाचार्यसूनुतत्पादसंश्रितम् ।
कौशिकान्वयजीवातुं चम्पकेशं गुरुं भजे ॥
कल्याणगुणसम्पूर्णं कल्याणहृदयङ्गमम् ।
तुल्याधिककथागन्धशल्यातीतं भजे हरिम् ॥
वरप्रदगुरुं वन्दे वरणीयगुणोज्ज्वलम् ।
परतत्त्वपरीक्षायां पराशरमिवापरम् ॥

* * * *

नाथार्ययामुनयतीन्द्रसुदर्शनार्यवेदान्तदेशिकमहार्यमुखा महान्तः ॥
सम्यग्जयन्तु शरदामयुतं सहस्रं स्रोदन्तधावितकुदृष्टिजनप्रलापाः ॥
श्रीमान्नारायणो देवः परतत्त्वमिति स्थितिः ।
श्रुतिस्मृ(ती)तिहासैश्च पुराणैश्च निरर्गलैः ॥
इदं त्वत्यन्तराद्धान्तनिबाधं सोढुमक्षमः ।
शिवकर्णामृतमिति किञ्चित्कश्चित्प्रणीतवान् ॥
विधास्ये तन्निरासाय हरिकर्णामृतं परम् ।
सन्तस्सर्वे प्रसीदन्तु सारासारपरीक्षकाः ॥

आह नवीनः— अथर्वशिरसि तावदहमेकः प्रथममासमिति शिववचनेन सदेव सौम्येदमग्र आसीदिति प्रतिपन्नं कारणं शिव एवेति प्रतीयमानत्वात् । अत्र चान्तर्याम्यभिप्रायत्वशङ्कायाः को भवानिति स्वकीयासाधारणप्रश्नोत्तरत्वेन तदन्यविषयत्वे प्रश्नोत्तरयोर्वैयधिकरण्यप्रसङ्गेन निरासात् ।

* * *

कल्पभेदेन विरोधस्य परिहृतत्वाच्छिवस्यैव सर्वकारणत्वसिद्धेस्ततः स्वयम्भूर्भगवानित्यादिमनुवचनेन च ब्रह्मस्रष्टुः नारायणस्य प्रादुरासीत्तमोनुदः इति तमःप्रेरकत्वात् परमेश्वरादुत्पत्तिप्रतीतेः ।

End:

उरुगायत्वलिङ्गेन—

एष वो वामनो नाम . प्रभावो महात्मनः ।
वेदविद्भिर्द्विजैरेतत् कथ्यते वैष्णवं यशः ॥

इति सभापर्ववचनेनोपोद्बलितभगवत्परत्वं अङ्गीकृतम् । अनुस्तं च न सन्दृशे इत्यनेन तादृशभारतवचनोपबृंहितेन तस्यैव मोक्षदत्वमुक्तम् । अनन्तरमङ्गचस्सम्भूतो हिरण्यगर्भ इत्युष्ठाविल्येतदेक . . . . शितम् । तेनोक्तमेव दृढीकृतं भवति । अनन्तरं च एष हि देव इत्यारभ्य.

---

(c) आनन्दमयाधिकरणवादार्थः.

ĀNANDAMAYĀDHIKARAṆAVĀDĀRTHAḤ.

Foll. 44*a*—84*b*. Foll. 60*b*, 85 and 86 are left blank.

A summary bringing out the essential meaning of the Ānandamayādhikaraṇa, which is a topical subdivision appearing in the first Pāda of the first Adhyāya of the Brahmasūtras.

Incomplete.

Beginning:

आनन्दमयोऽभ्यासात् । अस्याधिकरणस्य शास्त्रकाण्डद्विकाध्यायपादपेठिकासङ्गतयस्स्फुटाः । प्रधानस्य मुख्येक्षणायोगेन जगत्कारणत्वासम्भवेऽपि जीवस्य तत्सम्भवात् स एव जगत्कारणमस्त्वित्यर्थादनन्तरसङ्गतिः ।

* * * *

जीवस्यानन्दमयाद्भेदं वदेत् । तस्मादानन्दमयः परमात्मा । अत्राह चन्द्रिकाकारः—न तावच्छारीरत्वेन जीव एवानन्दमयः इति पूर्वपक्षो युज्यते । अजीवे प्राणमयादौ तस्यैष इति शारीरत्वश्रवणेन व्यभिचारात् ।

End:

तद्धेतुव्यपदेशादित्यादाविवाधिकरणग्रहणाभावेऽपि प्रकृतत्वादेवाधिकरणालाभेनास्मिन्नित्यंशस्य व्यर्थत्वात् परमात्मोपासकत्व मन्त्रवर्णोदितायाः परमा-

त्सप्राप्तेः मान्त्रवर्णिकमेव च गीयत इति सूत्रेणैव दर्शितत्वेनेह तदुक्त्यनपेक्षणादस्य.

---

R. No. **3548.**

Palm-leaf. 15¼ × 1½ inches. Foll. 54. Lines, 9 in a page. Grantha. Fair.

Presented in 1920-21 by M.R.Ry. Tiruvaḍi Śrinivāsa Ayyaṅgar, Pandalkuḍi, Ramnad district.

अरुणाधिकरणसरणिविवरणी.

ARUṆĀDHIKARAṆASARAṆIVIVARAṆĪ.

Same work as that described under No. 4866 of the D.C.S. MSS, Vol. X. By Śrinivāsa, son of Śrinivāsatātācārya of Śaṭhamarṣaṇagōtra.

Wants the introductory stanzas in the beginning and incomplete.

---

R. No. **3549.**

Palm-leaf. 16¾ × 1⅝ inches. Foll. 45. Lines, 5 in a page. Grantha. Slightly injured.

Presented in 1920-21 by His Holiness Śrīraṅganārāyaṇa Jiyar, Śrīraṅganārāyaṇajiyar Mutt, Srirangam.

नक्षत्रमालिकाव्याख्या.

NAKṢATRAMĀLIKĀVYĀKHYĀ.

Foll. 1*a*—41*a*. Fol. 41*b* is left blank.

Same commentary as that described under R. No. 568(*a*) ante. By Vīrarāghava of Vadhūlagōtra.

Complete.

Foll. 42*a*—43*a*. Foll. 44*a*—45 contain some Vēdic Sūktas with commentary. Foll. 43*b* and 45*b* are left blank.

---

R. No. **3550.**

Palm-leaf. 17⅜ × 1⅜ inches. Foll. 68. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1920-21 by His Holiness Śrīraṅganārāyaṇa Jiyar, Śrīraṅganārāyaṇajiyar Mutt, Srirangam.

अधिकरणसारावली, प्रकाशिकासहिता.

ADHIKARAṆASĀRĀVALĪ WITH THE COMMENTARY PRAKĀŚIKĀ.

A commentary on the Adhikaraṇasārāvalī of Vēdāntadēśika, which work has been described under No. 4854 of the D.C.S. MSS., Vol. X: by Sundararājācārya (a resident of Srirangam), disciple of Caturvēdi Śatakratu Aṇṇayārya and son of Varadārya of Śrīvatsagōtra.

Contains the first two Pādas in the first Adhyāya.

**Beginning:**

श्रीमान्वेङ्कटनाथार्यः (. . .) सन्निधत्तां सदा हृदि ॥

वेदान्ते योगिनां स्वान्ते रङ्गे च कृतसान्निधिम् ।
निधिं वन्देय जगतामिन्दिरामन्दिरं हरेः(रिम्) ॥

अधिकरणसारपद्धेर्गम्भीराया मितम्पचो विवृतौ ।
यतते सुन्दरदासस्साहसमेतत्सहध्वमिह विबुधाः ॥

इह खलु भगवान् श्रीवेङ्कटाधीशदिव्यघण्टावतारस्सर्वतन्त्रस्वतन्त्र श्रीमान्निगमान्तगुरुश्श्रीरङ्गराजेन भगवता कदाचिन्महोत्सवसिसेविषासमायातप्राज्ञजनसमाजे शारीरकशास्त्राधिकरणानां पौनरुक्त्यासङ्गतत्वादिशङ्कानिरसनेन परिष्कारकरणायानितरसाधारणस्ववैभवप्रकटनाय च वेदान्ताचार्यदिव्यनामधेयं प्रसाद्य नियुक्तस्तदानीमेवाधिकरणसारावलीसमाख्यं स्वाम्बरादुग्धराशिमत्यद्भुतं प्रबन्धमारभमाणो निर्विघ्नपरिसमाप्तिप्रचयगमनाद्यर्थं स्मृत्याचारप्राप्तमाशीरूपं मङ्गलमाचरंश्शिकीर्षितग्रन्थमवतारयति—

स्वस्ति श्रीरङ्गभर्तुः किमपि दधदहं शासनं तत्प्रसत्त्यै
सत्यकालम्बिभाष्यं यतिपतिकथितं शश्वदध्याप्य युक्तान् ।
विश्वस्मिन्नामरूपाण्यनुविहितवता तेन देवेन दत्तां
वेदान्ताचार्यसंज्ञामवहितबहुविस्तार्यमन्वर्थयामि ।

स्वस्ति इदं मङ्गलार्थकमव्ययम् । सर्वेभ्योऽस्त्विति शेषः । किमपीति सर्वप्रशासि ।

* * * *

एवं जैमिनिबादरायणयोर्विरोधं परिहृत्य तत्प्रसङ्गाद्व्याख्यातृवाक्ययोरपि प्रमाणभूतयोर्विरोधमाशङ्क्य समाधत्ते—

वृत्तिग्रन्थे तु जैमिन्युपरचिततया षोडशाध्याय्युपात्ता
सङ्कर्षः काशकृत्स्नप्रभव इति कथं तत्त्वरत्नाकरोक्तिः ।

अत्र ब्रूमस्सदुक्तौ न वयमिह मुधा बाधितुं किञ्चिदर्हा
निर्वाहस्तूपचारात् क्वचिदिह घटते ह्येकतात्पर्ययोगः ॥

वृत्तीत्यादि । बोधायनीये वृत्तिग्रन्थे जैमिनीयेन षोडशलक्षणेनेति । षोडशाध्याया अपि जैमिनिकृता इत्युच्यते । तत्त्वरत्नाकराख्ये भट्टपराशरग्रन्थे सङ्कर्षाख्यश्चतुर्लक्षण्यात्मको मध्यकाण्डः काशकृत्स्नकृत इत्युच्यते । अत उभयोर्विरोध इत्यर्थः । समाधत्ते अत्रेत्यादि । सतां वचने किञ्चिदपि मुधा बाधितुं वयं नार्हाः ।

* * * *

अयमिन्द्रप्राणाधिकरणार्थः । अत्र मधुपदोपादानं सर्वाधिकरणोक्तवैभवप्रदर्शनार्थम् ॥

**Colophon:**

इति श्रीवत्सकुलतिलकश्रीवरदार्यतनूभवेन चतुर्वेदिशतक्रतुश्रीशैलश्रीमदण्णयतातार्यकटाक्षलब्धसत्सम्प्रदायेन श्रीरङ्गदिव्यनगरवास्तव्येन श्रीसुन्दरार्येण विरचितायामधिकरणसारावलीप्रकाशिकायां प्रथमस्याध्यायस्य प्रथमः पादः ॥

**End:**

कल्पितेत्यादि । अग्निर्मूर्धेत्यादिना कल्पिताग्न्याद्यवयवः अदृश्यत्वाधिकरणार्थः । स्वरित्यादि । द्युमूर्धत्वादियुक्तो वैश्वानरपदप्रतिपाद्य वैश्वानराधिकरणार्थ । एवं प्रथमाध्यायस्य द्वितीयपादे श्रुतिनिकराणामनन्तशाखानां शिरसामुपनिषदां शेखरः श्रियः पतिः एवंभूतगुणविशिष्टः प्रोक्तः इत्यर्थः ॥

**Colophon:**

इति श्रीवत्सकुलतिलकश्रीवरदार्यतनूभवेन चतुर्वेदिशतक्रतुश्रीशैलश्रीमदण्णयतातार्यकटाक्षलब्धसत्सम्प्रदायेनश्रीरङ्गदिव्यनगरवास्तव्येन श्रीसुन्दरराजाचार्येण विरचितायामधिकरणसारावलीप्रकाशिकायां प्रथमस्याध्यायस्य द्वितीयः पादः ॥

---

R. No. 3551.

Palm-leaf. 15¼ × 1 inches. Foll. 103. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1920-21 by His Holiness Śrīraṅganārāyaṇa Jiyar, Śrīraṅganārāyaṇajīyar Mutt, Srirangam.

Fol. 1*a* gives the name of this work. Foll. 1*b* and 2 are left blank.

यतिराजविजयचम्पुः.

YATIRĀJAVIJAYACAMPUḤ.

Same work as that described under No. 12338 of the D.C.S. MSS., Vol. XXI, wherein see for the beginning. By Ahōbilasūri, son of Lakṣmī and Veṅkaṭācārya of Tirumala Ghanagiri (Penukoṇḍa) family and disciple of Rājagōpālamuni.

Contains the Ullāsas 1—18 complete.

**End:**

रुचिरां तदीयप्रतिमां मठे प्रतिष्ठाप्य निरन्तरसेवादिवशा दिवसाननयन् ।
सेनेश्वरार्या विशदं वितेनुश्श्रीभाष्यसङ्ग्राहकपद्यमालाम् ।
ततश्च नारायणभट्टवर्यास्त्वरीरचन्न्यायसुदर्शनाख्यम् ॥
आख्यया विष्णुचित्तार्यश्शठमर्षणवंशजाः ।
वितेनिरे क्रमान्न्यायकुलिशाख्यानिबन्धनम् ॥
श्रीशैलपूर्णात्मजनाप्रसिद्धः यतीशशिष्यः कुरुकेश्वराख्यः ।
चरीकरीति स्म शठारिसूक्तेस्सहस्रषट्सङ्ख्यकनाम भाष्यम् ॥
आत्रेयवंश्याः कतिचिन्महान्तः यतीन्द्रपादाम्बुजलोलभृङ्गाः ।
लोकोपकर्तृत्वभृतो वि[illegible]ः भाष्यानुसारीणि निबन्धनानि ॥
जन्मन्यमोघहरिवीक्षणलब्धसत्त्वाः श्रीभाष्यवेदनपरा भुवि ये महान्तः ।
ते वै यतिक्षितिपतेरपरावतारा रक्षन्ति विश्वमधुनाप्यपवर्गदानैः ॥
अमुं यतीन्द्रस्य कथाप्रभावं योऽध्यापयेद्यस्तु पठेल्लिखेद्वा ।
तनोतु तेषां यतिसार्वभौमः शास्त्रे स्वकीये कृपया बहु (सुमु)स्साम् ॥

**Colophon:**

इति श्रीशैलघनगिरिवंश्येन लक्ष्माम्बागर्भशुक्तिमुक्तामणिना वेङ्कटसुधीमणिसूनुना श्रीमद्राजगोपालमुनिवरप्रसादसमासादितवेदान्तविद्येनाहोबिलसूरिणा विरचिते यतिराजचरित्रे चम्पूप्रबन्धे अष्टादशोल्लासः ॥

Fol. 103b contains one pithy stanza.

---

## R. No. 3552.

Palm-leaf. 15¼ × 1¼ inches. Foll. 93. Lines, 6 in a page. Grantha. Much injured.

Presented in 1920-21 by His Holiness Śrīraṅganārāyaṇa Jīyar, Śrīraṅganārāyaṇajīyar Mutt, Srirangam.

सिद्धान्तचन्द्रिका.

SIDDHĀNTACANDRIKĀ.

Same work as that described under R. No. 2194 ante. By Paravastu Vēdāntācārya, disciple of Ādivarāhārya.

Wants the beginning and the end in the first Paricchēda.

---

R. No. **3553.**

Palm-leaf. 16 × 1¼ inches. Foll. 65. Lines, 6 in a page. Grantha and Tamil. Much injured.

Presented in 1920-21 by His Holiness Śrīraṅganārāyaṇa Jīyar, Śrīraṅganārāyaṇajīyar Mutt, Srirangam.

सच्चरित्रपरित्राणम्.

SACCARITRAPARITRĀṆAM.

Foll. 2*a*—60*b*.

Same work as that described under No. 2858 of the D.C.S. MSS., Vol. V. By Vīrarāghavācārya of Vādhūlagōtra.

Wants the beginning; otherwise complete.

Foll. 60*b*—61*b* contain the Pāpasvarūpa, Pāpāślēṣādivarṇana. Foll. 61*b*—64*a* contain the Pūrvācārya-Janmanakṣatradhyānaślōkas. Foll. 1 and 64*b*—65*b* are left blank.

---

R. No. **3554.**

Palm-leaf. 12⅝ × 1 inches. Foll. 167. Lines, 6 in a page. Grantha and Tamil. Much injured.

Presented in 1920-21 by His Holiness Śrīraṅganārāyaṇa Jīyar, Śrīraṅganārāyaṇajīyar Mutt, Srirangam.

Foll. 2*a*—3*b* contain the Śaraṇāgatimantrārtha and Caramaślōkārtha in Tamil. Fol. 4 gives the Navagrahajātirūpastōtra. Foll. 5*a*—6*a* contain the Yadunandanāṣṭaka. Foll. 1 and 6*b* are left blank. Fol. 7*a* contains the name of the Vāsiṣṭhasaṁhitā.

(*a*) वासिष्ठसंहिता.

VĀSIṢṬHASAṀHITĀ.

Foll. 7*b*—71*b*. Foll. 43*b*, 69*b* and 72 are left blank.

Same work as that described under No. 5360 of the **D.C.S. MSS.**, Vol. XI.

Contains the Adhyāyas 1—12 complete and the 13th incomplete.

---

(*b*) श्रीपादतीर्थवैभवम्.

ŚRĪPĀDATĪRTHAVAIBHAVAM.

Foll. 73*a*—74*b*.

Similar to the work described under No. 5383 of the D.C.S. MSS., Vol. XI.

Incomplete.

**Beginning:**

अतिपापप्रसक्तोऽपि विष्णुचक्राङ्कितस्य तु ।
पादोदकं पिबेयस्तु सर्वपापैः प्रमुच्यते ॥

भरद्वाजः—

चक्राङ्कितस्य विप्रस्य पादप्रक्षालितं जलम् ।
पीत्वा पातकसाहस्रैर्मुच्यते नात्र संशयः ॥

**End:**

वस्त्रं तु द्विगुणीकृत्य पाणौ पाणिं निवेश्य च
तस्मिन् तीर्थं प्रतिष्ठाप्य त्रिः पिबेद्बिन्दुवर्जितम्
हृदिस्थं बुद्धिजननमास्यस्थं व्याधिनाशनम् ।
नाभिस्थं मोक्षसिद्ध्यर्थं त्रिः पिबेत्तीर्थमुत्तमम् ॥
प्रथमं कायशुद्ध्यर्थं द्वितीयं बलवर्धनम् ।
तृतीयं मोक्षसिद्ध्यर्थं त्रिः पिबेत्तीर्थमुत्तमम् ॥

---

(*c*) हारीतस्मृतिः.

HĀRĪTASMṚTIḤ.

Foll. 75*a*—87*a*. Fol. 87*b* is left blank.

Slightly different from the work described under No. 2734 of the D.C.S. MSS., Vol. V.

Wants the beginning and the end.

**Beginning:**

वैभवी वैष्णवी वाऽपि कुर्याद्दीक्षां विधानतः ।
अथवा मूलमन्त्रं तु जपेदयुतसङ्ख्यया ॥

परमापद्गतो वापि न विशेत्तु शिवालयम् ।
वर्जयेत्तत्समीपस्थं जलं पुष्पं फलादिकम् ॥

**End:**

तत्ताद्विजानां शूद्राणां तप्तचक्रादिधारणम् ।
वैखानसद्विजानां च कुर्यात्सत्यं न संशयः ॥
विष्णुसायुज्यसिद्ध्यर्थं सर्वपापहराय च ।
पञ्चसंस्कारदीक्षादीन् दत्वानुज्ञां कुरुष्व(त्वि)ति ॥

Foll. 88a–93b contain the Śrīpādatīrthagrahaṇapramāṇa, Ūrdhvapuṇḍradhāraṇa and Kṛṣṇajayantipāraṇaviṣaya. Foll. 94a—97b contain a portion of the Viśvāmitrasaṁhitā and Śrīrāmanavamīviṣaya. Fol. 98 contains the Bimbaśuddhivacana and a list of several drugs in the Tamil language. Foll. 99a—100a contain the Bhagavadgītāmantrarṣicchandōdēvatāviṣaya. Foll. 100b and 101 are left blank.

---

(d) शातातपस्मृतिः.
ŚĀTĀTAPASMṚTIḤ.

Foll. 102a—115b.

Same work as that described under No. 2726 of the D.C.S. MSS., Vol. V.

Breaks off in the 12th Adhyāya (ending with the words तिलान् दद्यात्तिलस्नायी शुचिर्नित्यं तिलोदकी).

---

(e) आत्रेयधर्मशास्त्रम्.
ĀTRĒYADHARMAŚĀSTRAM.

Foll. 116a—122a. Fol. 122b is left blank.

Same work as that described under No. 2615 of the D.C.S. MSS., Vol. V.

Contains the Adhyāyas one to four only.

---

(f) विष्णुस्मृतिः.
VIṢṆUSMṚTIḤ.

Foll. 123a—127a. Fol. 127b is left blank.

Similar to the work described under No. 2718 of the D.C.S. MSS., Vol. V.

Wants the beginning; otherwise complete.

**Beginning:**

अस्नानाशी मलं भुङ्क्ते अजपः पूयशोणितम् ।
अहुताशी कृमीन् भुङ्क्ते अदाता विषमश्नुते ॥

चतुरश्रं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य तु ।
वैश्यस्य वर्तुलं चैव शूद्रादीन्युक्षणं स्मृतम् ॥

**End:**

सर्वं गङ्गामयं तोयं राहुग्रस्ते दिवाकरे ।
सोमेऽप्येवं समं तोयं नद्यां स्नानं समाचरेत् ॥

**Colophon:**

इति विष्णुस्मृतिस्समाप्ता ॥

---

(*g*) बृहस्पतिस्मृतिः.
BṚHASPATISMṚTIḤ.

Foll. 128*a*—133*b*.

Same work as that described under No. 2658 of the D.C.S. MSS., Vol. V.

Wants the first Pada of the first stanza in the beginning.

---

(*h*) संवर्तस्मृतिः.
SAṀVARTASMṚTIḤ.

Foll. 134*a*—153*b*. Fol. 153*b* contains the Vapanaviṣaya.

Same work as that described under No. 2731 of the D.C.S. MSS., Vol. V.

Complete.

---

(*i*) व्यासस्मृतिः.
VYĀSASMṚTIḤ.

Foll. 154*a*—162*a*. Fol. 162*b* contains the Naramalanirūpaṇa.

Same work as that described under No. 2719 of the D.C.S. MSS., Vol. V.

Complete.

Foll. 163*a*—167*b* contain the] Daśavidhabrāhmaṇalakṣaṇa and Vaiṣṇavalakṣaṇa.

## R. No. 3555.

Palm-leaf. 15½ × 1¼ inches. Foll. 24. Lines, 8 in a page. Grantha and Tamil. Slightly injured.

Presented in 1920–21 by His Holiness Śrīraṅganārāyaṇa-Jīyar-Svāmi, Śrīraṅganārāyaṇa-Jīyar Mutt, Srirangam.

(*a*) விஞ்ஞாபனபத்திரிகை.

VIJÑĀPANAPATRIKĀ.

Foll. 1*a*—17*b*.

See the Tamil Part of this Triennial Catalogue, Vol. IV.

Complete.

---

(*b*) सच्चरित्ररक्षा.

SACCARITRARAKṢĀ.

Foll. 18*a*—22*a*.

Same work as that described under No. 2859 of the D.C.S. MSS., Vol. V. By Vēdāntadēśika.

Contains the third Adhikāra without the last two stanzas.

Foll. 22*b* and 23*a* contain the Ēkādaśyupavāsaviṣayavacana, etc. Fol. 24*a* gives the contents of the Rahasyatrayasāra. Foll. 23*b* and 24*b* are left blank.

---

## R. No. 3556.

Palm-leaf. 14¼ × 1½ inches. Foll. 98. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1920–21 by His Holiness Śrīraṅganārāyaṇa-Jīyar-Svāmi, Śrīraṅganārāyaṇa-Jīyar Mutt, Srirangam.

Foll. 1*a*—2*a* contain a few Bhāgavataślōkas. Fol. 2*b* is left blank.

(*a*) श्रुतिगीता.

ŚRUTIGĪTĀ.

Foll. 3*a*—6*b*.

Same work as that described under No. 2570 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

---

(*b*) गोपिकागीतम्.

GŌPIKĀGĪTAM.

Foll. 7*a*—8*b*.

Same work as that described under No. 2420 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

(c) भ्रमरगीतम्.

BHRAMARAGĪTAM.

Foll. 9a—10a. Fol. 10b is left blank.

This forms the 47th Adhyāya of the tenth Skandha of the Śrībhāgavata.

Almost complete.

**Beginning:**

श्रीशुकः—

इति गोप्यो हि गोविन्दे गतवाक्कायमानसाः ।
कृष्णदूते व्रजं प्राप्ते उद्धवे त्यक्तलौकिकाः ॥
गायन्त्यः प्रियकर्माणि रुदन्त्यश्च गतह्रियः ।
तस्य संस्मृत्य संस्मृत्य यानि कैशोर्यबाल्ययोः ॥
काचिन्मधुकरं दृष्ट्वा ध्यायन्ती कृष्णसङ्गमम् ।
प्रियप्रस्थापितं दूतं कल्पयित्वेदमब्रवीत् ॥

गोपी—

मधुप कितवबन्धो मा स्पृशाङ्घ्रिं सपत्न्याः
कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः ।
वहतु मधुपतिस्तन्मानिनीनां प्रसादं
यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक् ॥

**End:**

अहो यूयं स्म पूर्णार्थाः भवत्यो लोकपूजिताः ।
वासुदेवे भगवति यासामित्यपि तन्मनः ॥

---

(d) श्रुतिगीता, सव्याख्या.

ŚRUTIGĪTĀ WITH COMMENTARY.

Foll. 12a—53b. Fol. 11 gives a portion of this commentary.

This commentary is called Bhāgavatacandrikā on the Śrutigītā. By Vīrarāghavavidvat, son and disciple of Śrīśailaguru of Śrīvatsagōtra.

Complete.

**Beginning:**

सर्ववेदमयो विप्रस्सर्ववेदमयो ह्यहम् । इति वेदानां ब्रह्मप्रमापकत्वं भगवदुक्त्यैवावगतम् । तत्पूर्वाध्यायेऽपि विशुद्धसत्त्वधाम्न्यद्धा स्वयि शास्त्रशरीरि-

णीति बलिवचनेनाप्यवगतम्। तथा तत्पूर्वाध्याये अग्र ते हृदयं शुद्धमित्यादिना शास्त्रयोनेस्तवात्मन इत्यन्तेन नमुचिवचसाप्यवगतम्।

* * * *

चिदचिद्वाचिनां शब्दानां कथं परमात्मप्रमापकत्वमिति पृच्छति राजा ब्रह्मन्निति।

ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः।
कथं चरन्ति श्रुतयः साक्षात्सदसतः परे॥

ब्रह्मन् गुणवृत्तय इत्यत्र गुणशब्दो विशेषणपरः गुणेन जातिगुणक्रियान्यतमेन द्वारभूतेन वृत्तिर्बोधनं यासां ता जात्यादिकाः प्रवृत्तिनिमित्तीकृत्य तद्विशिष्टाभिधायिन्यश्श्रुतयश्चिदचित्पराः कथं ब्रह्मणि साक्षात् चरन्ति प्रवर्तन्ते। न हि प्रवृत्तिनिमित्तप्रहाणेन शब्दः प्रतिपादयितुमलमिति—प्रश्नार्थः।

**End:**

कैवल्यनिरस्तयोनिं संसारिणां मोक्षप्रदानेन निरस्ता योनिः योनिप्रभवदुःखं येन तं न विद्यते भयं यस्मात्तं हरिमाश्रितार्तिहरं तमजस्रं नित्यं ध्यायेदिति॥

**Colophon:**

इति श्रीमद्भागवते दशमस्कन्धे श्रीनारायणोक्तवेदकृतभगवत्स्तुतिर्नाम सप्ताशीतितमोऽध्यायः॥

इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोस्सुतेन तच्चरणकमलपरिचर्याप्रसन्नतत्सूक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैष्णवदासेन श्रीवीरराघवविदुषा विलिखितायां श्रीमद्भागवतचन्द्रिकायां दशमस्कन्धे सप्ताशीतितमोऽध्यायः॥

---

(*e*) गोपिकागीतव्याख्या—मुनिभावप्रकाशिका.

GŌPIKĀGĪTAVYĀKHYĀ: MUNIBHĀVAPRAKĀŚIKĀ.

Foll. 54*a*—91*a*. Fol. 91*b* is left blank.

Same work as that described under No. 2229 of the D.C.S. MSS., Vol. IV, Part I; but this forms the 31st Adhyāya in the tenth Skandha of the Śrībhāgavata. By Kṛṣṇaguru, pupil of Śrīrāmadēśika and son of Nṛsiṁhaguru of Bhāradvājagōtra.

Complete.

(*f*) भ्रमरगीतव्याख्या.

BHRAMARAGĪTAVYĀKHYĀ.

Foll. 92*a*—98*a*. Fol. 98*b* is left blank.

A commentary on the Bhramaragīta, which work has been described under subdivision (*e*) of this number.

Incomplete.

**Beginning:**

अथ तत्र काचिद्गोपी स्वप्रसादनार्थमुद्धवं श्रीकृष्णप्रेषितं निश्चित्य तत्कटाक्षेणैव कंचिन्मधुपं प्रियदूतत्वेन सङ्कल्प्याब्रवीदित्याह—काचिदिति । तत्र दूतत्वेन कल्पितमात्मानं प्रसादयितुमङ्घ्रिपतितं सम्भाव्याह—मधुपेति । हे कितवबन्धो कितवस्य धूर्तस्य बन्धो! अतोऽङ्घ्रि मच्चरणं मा स्पृश न केवलं तवास्पृश्यतायां कितवबन्धुत्वमात्रं हेतुरित्याह—सपत्न्याः कुचाभ्यां विलुलिताया मालायाः श्रीकृष्णवक्षस्स्थलवनमालायाः कुङ्कुमश्मश्रुभिः कुङ्कुमपुष्पाणां श्मश्रुसाकारकेसरैर्भिन्नो मिश्रः ।

**End:**

ततः किमित्यत्राह—अथेति । उद्धवः एनं वृत्तान्तं निशम्य कृष्णदर्शने लालसा उत्सुका गोपीः प्रियस्य सन्देशैः सान्त्वयन् उपलालयन् प्रथमं तावदिदमभाषत । एतदेव षड्भिः प्रपञ्चयति.

---

R. No. **3557.**

Palm-leaf. $15\frac{3}{4} \times 1\frac{3}{8}$ inches. Foll. 9. Lines, 9 in a page. Grantha and Tamil. Slightly injured.

Presented in 1920–21 by His Holiness Śrīraṅganārāyaṇa-Jiyar-Svāmi, Śrīraṅganārāyaṇa-Jiyar Mutt, Srirangam.

रहस्यत्रितयार्थकारिका.

RAHASYATRITAYĀRTHAKĀRIKĀ.

Same work as that described under R. No. 160(*k*) ante. The work is also called Rahasyatritayārthasaṅgraha.

Complete.

**Colophon:**

तिरुमन्त्रार्थकारिका समाप्ता ॥

R. No. 3558.

Palm-leaf. 16½ × 1½ inches. Foll. 95. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1920-21 by His Holiness Śriraṅganārāyaṇa-Jiyar-Svāmi, Śriraṅganārāyaṇa-Jiyar Mutt, Srirangam.

Fol. 1 gives the Pūrvācāryadhyānaślōkas of the Teṅgalai sect of Śrī-Vaiṣṇavas.

(a) शठकोपस्तोत्रम्.

ŚAṬHAKOPASTŌTRAM.

Foll. 2a—3b.

Similar to the work described under No. 10570 of the D.C.S. MSS., Vol. XIX. This work is also called Śaṭhakōpaprapatti.

Complete.

**Beginning :**

लक्ष्मीनाथप्रदीप्यत्पदकमलसदासक्तचित्तप्रसक्तः
श्रीमद्द्वयोक्तः परस्तात्सविधमिह रमासन्नियोगात्समेत्य ।
प्राह श्रीमन्त्रराजं द्वयमपि मुनये यस्तु नाथाय तस्मै
तं वन्दे बोधमुद्राप्रविलसितकरं सम्प्रपद्ये शठारिम् ॥
श्रीमत्यां श्रीनगर्यां सुविमलविबुधैस्संवृतायां महत्यां
प्राकारैर्गोपुराद्यैस्स्फटिकमणिमयैर्दीप्यमानप्रभायाम् ।
दिव्ये पीठे महार्हे कनकमणिमये तिन्त्रिणीवृक्षमूले
तिष्ठन्तं श्रीशभक्तं शठरिपुममलं भक्तबन्धुं प्रपद्ये ॥

**End :**

वकुलधवलमालाभासमानः प्रभास्वत्-
करकमलविराजद्बोधमुद्राप्रभावः ।
अभिमतफलदाता वैष्णवानां परेषां
विलसतु मम चित्ते कल्पवृक्षश्शठारिः ॥

---

(b) भाष्यकारप्रपत्तिः.

BHĀṢYAKĀRAPRAPATTIḤ.

Foll. 3b—4b.

Similar to the work described under No. 9690 of the D.C.S. MSS., Vol. XVIII.

Complete.

**Beginning :**

लक्ष्मीवल्लभपङ्कजासचरणद्वन्द्वोल्लसन्मानसं
श्रीमद्दिव्यपराङ्कुशाङ्घ्रियुगलीभक्तं सदा निर्मलम् ।
दिव्यायां लसितं महापुरि महत्सङ्घैर्महापण्डितैः
श्रीमन्तं यतिराजराजमनिशं श्रीभाष्यकारं भजे ॥

सर्वेषामास्तिकानां भुवि तु विलसतां नित्यमुज्जीवनाय
श्रीमद्व्योम्नः परस्ताद्विलसितममलं भूतपुर्यां समेत्य ।
श्रीमद्भिर्बोधवद्भिर्विबुधयतिवरैस्संवृतायां महद्भिः
श्रीमन्तं शेषरूपं प्रवरगुणनिधिं भाष्यकारं प्रपद्ये ॥

**End :**

स्वामिन् सुशील सुलभामल शेषरूप
श्रीभाष्यकार जगदेकशरण्यमूर्ते ।
अस्मद्गुरो मम निधे मम सर्वबन्धो
पाहि प्रसीद मम वृत्तमचिन्तयित्वा ॥

---

(*c*) सौम्यजामातृयोगिस्तोत्रम्.

**SAUMYAJĀMĀTṚYOGISTOTRAM.**

Fol. 5.

Similar to the work described under No. 10691 of the D.C.S. MSS., Vol. XIX.

Complete.

**Beginning :**

शेषः श्रीमाननन्तः पुनरपि च ततो लक्ष्मणश्च प्रभूतः
श्रीमान् रामो बलाख्यः पुनरपि भगवान् भाष्यकारः प्रसिद्धः ।
आविर्भूतस्त्रयाणां पुनरपि जगतां पावनार्थं महात्मा
भक्तानां कल्मषघ्नो निरवधिमहिमा रम्यजामातृयोगी ॥

दिव्ये मूले तुलायां विलसति जगतां कारणे मङ्गलाना-
माविर्भूतो महात्मा सुविमलमधुरक्षीरसङ्काशगात्रः ।
अस्मत्स्वामी प्रशस्तः प्रथितगुणनिधिर्भक्तवात्सल्यसिन्धुः
भक्तानां ज्ञानदाता लसतु मनसि मे रम्यजामातृयोगी ॥

**End:**

वरवरमुनिवर्य शान्तिसौशील्यसिन्धो
प्रणतजनहितज्ञ श्रीनिधे रङ्गराज ।
अशरणमतिदीनं घोरसंसारमग्नं
तव किल दयनीयं रक्ष मां दीनबन्धो ॥

---

(d) श्रीरङ्गनायिकास्तोत्रम्.

ŚRĪRAṄGANĀYIKĀSTŌTRAM.

Foll. 5b–9a. Fol. 9b is left blank.

Similar to the work described under R. No. 173(p) ante.

Complete.

**Beginning:**

ईशानां वरदां समस्तजगतां पद्मासनस्थां श्रियं
पद्मालङ्कृतपाणिपल्लवयुगां श्रीरङ्गिणः प्रेयसीम् ।
वात्सल्यादिगुणोज्ज्वलां मणिमयैर्भूषागणैर्भूषिता-
मस्मन्मातरमब्जकान्तवदनां वन्दे जगन्मातरम् ॥
स्वस्ति श्रीर्दिश मे शशाङ्कवदने कल्याणदे वत्सले
सर्वेषां किल रङ्गनाथदयिते तत्सान्तिसंवर्धके ।
तन्त्यक्ते निवहस्सतामशरणे तापत्रयीबाधिते
पापिष्ठे मयि दुर्मतौ तव कृपा कार्येत्यहं प्रार्थये ॥

**End:**

ईषत्प्रफुल्लकमलोत्पलकान्तनेत्रे
मुग्धस्मितप्रविलसद्वदनारविन्दे ।
श्रीरङ्गनायकि मनोहरदिव्यगात्रे
नित्यं प्रसीद मम वृत्तमचिन्तयित्वा ॥
श्रीरङ्गनाथसयुजे श्रियै कनकभूषणैः ।
माणिक्यभूषणैर्दीप्तनन्वङ्गच जय मङ्गलम् ॥

---

(e) रङ्गनाथस्तोत्रम्.

RAṄGANĀTHASTŌTRAM.

Foll. 10a–14b.

Twenty-five stanzas in praise of God Raṅganātha, worshipped at Srirangam

Complete.

**Beginning :**

श्रीरङ्गे शेषशायी विलसति भगवान् दिव्यवैकुण्ठनाथः
कावेरी दिव्यगन्धा विलसति विरजादिव्यतीर्थप्रशस्ता ।
श्रीरङ्गं दिव्यरङ्गं विलसति नगरं दिव्यवैकुण्ठमेव
श्रीमन्तस्सूरिसङ्घा दिवि च विलसिता रङ्गदेशस्थभक्ताः ॥
प्रत्युप्तैः पद्मरागस्फटिकमरकतैर्दिव्यमाणिक्यसङ्घैः
प्राकारैर्गोपुराद्यैर्विलसति विमले दिव्यवैकुण्ठतुल्ये ।
श्रीरङ्गे शेषशायी शतमखमणिभिस्तुल्यकल्याणगात्रो
भक्तानां कल्पवृक्षो दिशतु मम सुखं रङ्गनाथो दयालुः ॥

**End :**

कल्याणकल्पकतरो करुणामृताब्धे
श्रीरङ्गराज जगदेकशरण्यमूर्ते ।
भक्तप्रवत्सल मनोहरदिव्यमूर्ते
पाहि प्रसीद मम वृत्तमचिन्तयित्वा ॥

---

(*f*) वेङ्कटेशस्तोत्रम्.

VEṄKAṬEŚASTŌTRAM.

Foll. 15*a*—20*b*.

Similar to the work described under No. 10389 of the D.C.S. MSS., Vol. XVIII.

Complete.

**Beginning :**

क्षेमं मे कमलापतिर्वितरतु श्रीवेङ्कटाद्रीश्वरः
कारुण्यामृतवारिधिस्त्रिजगतां क्षेमङ्करो वत्सलः ।
श्रीमद्भाष्यकृता सुबोधनिधिना रामानुजस्वामिना
भक्त्या दत्तपरत्वचिह्नविलसद्बाहुर्महावैभवः ॥
रेखारूपमनोज्ञदिव्यकलशश्रीपाञ्चजन्यध्वज-
ज्ञानाब्जाङ्कुशकल्पचक्रविलसत्पादारविन्दद्वयम् ।
लक्ष्मीदिव्यपदाम्बुजातयुगलीजाज्वल्यमानोल्लस-
ल्लाक्षालक्षितवक्षसं सुशरणं श्रीवेङ्कटेशं भजे ॥

**End:**

कलौ लोकनाथ प्रशस्त प्रशस्त श्रियं वेङ्कटेश प्रयच्छ प्रयच्छ ।
हरे दीनबन्धो प्रसीद प्रसीद सदा वेङ्कटेशं (शरण्यं) स्मरामि ॥
स्वामिपुष्करिणीतीरे श्रीमद्वेङ्कटभूधरे ।
वसते रमया सार्धं वेङ्कटेशाय मङ्गलम् ॥

---

(*g*) वरदराजस्तोत्रम्.

VARADARĀJASTŌTRAM.

Foll. 21*a*—24*b*.

Similar to the work described under No. 10333 of the D.C.S. MSS., Vol. XVIII.

Complete.

**Beginning:**

दद्यान्मे देवराजो वितरतु भगवान् मङ्गलं मङ्गलाना-
मावासो हस्तिशैले मणिमयशिखरे शेखरो दीप्यमानः ।
लक्ष्मीनाथो दयालुर्विधिमुखविबुधैर्वन्दितश्रीपदाब्जः
सर्वेषामिष्टदाता स्मितमधुरमुखः श्रीनिधिर्लोकनाथः ॥
हस्त्यद्रौ पुण्यकोट्यां विलसितममलं वत्सलं देवराजं
शेषाद्यैस्सूरिसङ्घैर्नतपदकमलं लोकनाथं दयालुम् ।
पारावारप्रसूतापदकमलमलसल्लाक्षयालक्षिताङ्गं
वेदान्ते पाञ्चरात्रे प्रविदितविभवं वन्दिषीय क्षमाब्धिम् ।

**End:**

सकलभुवननाथस्सर्वबन्धुर्दयालुः
विमलमधुरमन्दस्मेरवक्त्रारविन्दः ।
कलशजलधिकन्याप्राणनाथो मुकुन्दः
प्रणतवरदराजः पातु मां देवराजः ॥

---

(*h*) मोहनक्षेत्रमाहात्म्यम्.

MŌHANAKṢĒTRAMAHĀTMYAM.

Foll. 25*a*—36*b*.

A treatise on the holiness and religious importance of the Mōhanakṣētra (Mōhanūr), dedicated to the worship of God Viṣṇu. The place is situated in the Namakkal taluk of the Salem district.

Complete.

**Beginning :**

वन्दे मोहनवल्लीशं पुण्डरीकदलेक्षणम् ।
सुलभं नमतां स्वस्मिन् कालमेघं गुणार्णवम् ॥
मोहनक्षेत्रमाहात्म्यं शृण्वतां पापनाशनम् ।
आश्चर्यमतुलं वक्ष्ये यथामति यथाश्रुतम् ॥
क्षीराब्धि सुरमञ्जरी सुरसुता गत्वाब्धिनाथं जगौ
सन्तुष्टो भगवान् तदा सुरभितां मालां तु तस्यै ददौ ।
अत्यन्ताद्भुतदिव्यगन्धमधुरामादाय मालां तु सा
याता तत्र समागतस्तु भगवान् दुर्वासयोगीश्वरः ॥

* * * *

इन्द्राद्यैर्विबुधैस्तदा तु समये त्वभ्यर्चनार्थं मुदा
तद्देशे त्वथ याचितस्तु भगवानर्चावतारात्मना ।
तत्रैवाविरभूच्चतुर्मुखमुखैर्देवैस्समभ्यर्चितो
विष्णुश्श्रीपतिरिन्दुकान्तवदनो भाति स्थले मोहने ॥

**End :**

श्रीमोहनेन्द्र वरदाखिललोकवन्द्यो
संसारसागरसमुत्तरणैकसेतो ।
वेदान्तवेद्यगुणवैभव भक्तभोग्य
श्रीकालमेघ करुणैव तु मन्नियस्ते ॥
त्वद्दासदासशरणागतदासदास-
तद्दासदासचरमावधिदासदासम् ।
पाहि प्रपन्नमगतिं चरणाब्जयोस्ते
श्रीकालमेघ कृपया तव केवलं माम् ॥

* * * *

स्निग्धायतैस्सुरभितैः कुन्तलैर्मण्डिताय च ।
मोहनक्षेत्रनाथाय नित्यश्रीर्नित्यमङ्गलम् ॥

Fol. 37*a* contains the names of some Stōtras. Fol. 37*b* is left blank. Fol. 38 gives the Pūrvācāryaviṣayastōtra. Fol. 39 contains the Ramyajāmātṛyōgistōtra. Foll. 40 and 41 contain the duplicate copy of Bhāṣyakāraprapatti and Śaṭhakōpaprapatti. Foll. 41*b*—44*a* contain the Śrīraṅganāyikāstōtra. Fol. 44*b* is left blank. Fol. 45*a* gives a portion of the Vēṅkaṭēśadayitāstōtra. Fol. 45*b* is left blank. Foll. 46*a*—49*b* contain the duplicate portion of Raṅganāthastōtra.

(*i*) वनाद्रिनाथदयितास्तोत्रम्.

VANADRINATHADAYITASTOTRAM.

Foll. 50*a*—53*a*. Fol. 53*b* is left blank.

A eulogy addressed to goddess Lakṣmi, conceived as the consort of god Sundarabāhu, worshipped at Aḻagar-Malai, near Madura.

Complete.

**Beginning :**

मातस्समस्तजगतां वनशैलनाथ-
वक्षोविहारिणि मनोहरदिव्यवक्त्रे ।
श्रीभूषणैर्मणिमयैश्शुभदिव्यगात्रे
त्वत्पादपङ्कजयुगं शरणं प्रपद्ये ॥

**End :**

न माता न माता विना त्वां सुशीले
न नाथो न नाथो विना सुन्दरेशम् ।
कलानाथवक्त्रे कटाक्षैस्ततस्त्वं
सुधासिन्धुकन्ये रमे रक्ष मां त्वम् ॥
श्रियै सुन्दरराजस्य महिष्यै नित्यमङ्गलम् ।
माणिक्यभूषणैर्दीप्तनन्वङ्ग्यै जयमङ्गलम् ॥

---

(*j*) सुन्दरराजस्तोत्रम्.

SUNDARARAJASTOTRAM.

Foll. 54*a*—57*b*.

Similar to the work described under R. No. 174(*o*) ante.

Complete.

**Beginning :**

लक्ष्मीदिव्यकरारविन्दमृदुलं सम्फुल्लपद्मारुणं
ब्रह्मेशानसुरासुरेन्द्रकनकश्रीमौलिनीराजितम् ।
वज्राब्जध्वजशङ्खचक्रविलसत्कल्पाङ्कुशैर्लाञ्छितं
वन्दे सुन्दरराजपादयुगलं श्रीभूषणैर्भूषितम् ॥
श्रीमन्नश्शठकोपसंयमिमुखा वैकुण्ठभक्तास्तु ये
तेषां श्रेष्ठतमो द्विजोत्तमवरः श्रीविष्णुचित्तो महान् ।
यस्मिन् श्रीमधुरापुरे त्वभिजगौ श्रीमङ्गलाशासनं
तं वन्दे मधुराधिराजममलं व्यूहात्मकं सुन्दरम् ॥

**End:**

विमाने विश्वकर्मीये वेगवत्यास्तु दक्षिणे ।
वसते श्रीमते व्यूहसुन्दरेशाय मङ्गलम् ॥

Foll. 58—61*a* contain the Varadarājastōtra. Fol. 61*b* is left blank, Foll. 62*a*—66*a* contain the Vēṅkaṭēśastōtra. Fol. 66*b* is left blank.

---

(*k*) मोहनक्षेत्रनाथसुप्रभातम्.

MŌHANAKṢĒTRANĀTHASUPRABHĀTAM.

Fol. 67.

A number of stanzas addressed to God Mōhananātha and wishing good morning to Him.

Complete.

**Beginning:**

भास्वानुदेति घनसन्तमसप्ररोहा
नष्टा भवन्ति विकचानि सरोरुहाणि ।
घोषैर्दिशो मुखरयन्त्यखिला विहङ्गाः
पद्मेश मोहनपते तव सुप्रभातम् ॥

**End:**

मोहनक्षेत्रनाथस्य सुप्रभातं तु यः पठेत् ।
प्रातर्दिने स वै विद्वान् प्राप्नुयात्परमं शुभम् ॥
मङ्गलं कालमेघाय कल्याणगुणसिन्धवे ।
मोहनक्षेत्रनाथाय नित्यश्रीर्नित्यमङ्गलम् ॥

Foll. 68*a*—76*a* contain the Mōhanakṣētramāhātmya. Fol. 76*b* is left blank.

---

(*l*) सम्पत्कुमारप्रपत्तिः.

SAMPATKUMĀRAPRAPATTIḤ.

Foll. 77*a*—79*b*.

Similar to the work described under No. 10414 of the D.C.S. MSS., Vol. XVIII.

Complete.

**Beginning:**

भक्तानां स्वाश्रितानां लसति यदुगिरौ यस्तु जाज्वल्यमानः
यस्य श्रीवक्त्रपद्मं विमलशशिनिभं मङ्गलं मङ्गलानाम् ।

कप्यासं पुण्डरीकं विलसति हि यथा तन्निभं नेत्रयुग्मं
दद्यान्मे नित्यसौख्यं स तु यतिवरराट्स्वामिसम्पत्कुमारः ॥

**End:**

देवादिभिस्सततमर्पितपारिजात-
सौरभ्यसौरभकरौ स्फुटपद्मकान्तौ ।
लोकप्रसिद्धनिजवैभवभाष्यकार-
सम्पत्कुमारचरणौ शरणं प्रपद्ये ॥

---

(m) यदुगिरिनाथदयितास्तोत्रम्.

**YADUGIRINĀTHADAYITĀSTOTRAM.**

Foll. 79b—83b.

A eulogy addressed to the goddess Yadugirinācciyar, worshipped at the shrine at (Melkota) Yadugiri in the Mysore State.

Complete.

**Beginning:**

यदुगिरिदयिते त्वं लक्ष्मि कल्याणशीले
शरणमिह भजामि त्वत्पदाम्भोजयुग्मम् ।
भवजलधिनिमग्नं दुःखसङ्घातखिन्नं
तव किल दयनीयं रक्ष मां सिन्धुकन्ये ॥
सम्पत्कुमारदयिते सकलैकमातः
सौख्यप्रदे त्रिजगतां कलशाब्धिकन्ये ।
कल्याणकल्पकलते करुणानिधे त्वं
मां रक्ष दुःखजलधौ सततं निमग्नम् ॥

**End:**

सर्वाङ्गसुन्दरशुचिस्मितभाष्यकार-
सम्पत्कुमारसुमनोहरदिव्यवक्रे ।
माणिक्यभूषणपरिष्कृतदिव्यगात्रे
मां रक्ष लक्ष्मि कमले सुभगे सुशीले ॥

---

(n) वनाद्रिनाथस्तोत्रम्.

**VANADRINĀTHASTOTRAM.**

Foll. 84a—95a. Fol. 95b is left blank.

A eulogy addressed to god Sundarabāhu, worshipped at Alagar Malai, near Madura.

Up to the 85 stanzas.

**Beginning:**

वन्देऽहं वनशैलनाथमहिषीं वात्सल्यपूर्णां श्रियं
भक्ताभीष्टफलप्रदां भगवतीं कारुण्यरूपां हरेः ।
भूषाभूषितविग्रहां मम पुनस्सौख्यप्रदां सुन्दरीं
मन्दस्मेरशुभारविन्दवदनां लक्ष्मीं जगन्मातरम् ॥

* * * *

वन्दे सुन्दरराजानमिन्दिराभूमिनायकम् ।
प्रणतार्तिहरं सम्यक् परमस्वामिनं विभुम् ॥

**End:**

इदानीन्तनतद्रीतिं कश्चिद्राजा करोत्यसौ ।
इत्येषा किंवदन्ती तु केन चिद्धेतुना क्वचित् ॥

इदानीन्तनचैत्रोत्सववैभवं भणामः—

कल्याणं दिशतादशेषजगतां राजाधिराजश्रिया
सार्धं दिव्यवृषाचले मणिमये सिंहासने सुस्थितः ।
मुक्तारत्नकिरीटकौस्तुभमुखैः श्रीभूषणैर्भूषितः
सर्वाभीष्टफलप्रदः प्रणमतां मोहङ्करः सुन्दरः ॥

* * * *

भूषिते रत्नसङ्घातैर्वृषभाख्यमहागिरौ ।
सोमच्छन्दविमानस्थसुन्दरेशाय मङ्गलम् ॥

---

R. No. **3559.**

Palm-leaf. 10¾ × 1¼ inches. Foll. 55. Lines, 8 in a page. Grantha. Much injured.

Presented in 1920–21 by His Holiness Śrīraṅganārāyaṇa-Jīyar-Svāmi, Śrīraṅganārāyaṇa-Jīyar Mutt, Srirangam.

(a) सन्ध्यावन्दनभाष्यम्.

SANDHYĀVANDANABHĀṢYAM.

Foll. 2a—14a. Fol. 1 is left blank.

Similar to the work described under No. 2876 of the D.C.S. MSS., Vol. V. By Varadarājayajvan.

Almost complete.

**Beginning:**

गुरुप्रसादसम्प्राप्तवेदवेदान्तदीप्तधीः ।
यज्वा वरदराजाख्यो मन्त्रान् व्याख्याति नैत्यकान् ॥
सङ्गृह्यते ग्रन्थमाला गुणाढ्या सुमनोहरा ।
गृह्ण(ह्ण)न्तु गुणगृह्यास्तां सन्तस्सन्तोषपोषकाः ॥
सुधियामर्चनाबुद्ध्या प्रारब्धा मन्त्रचर्चना ।
सन्तोऽपि दोषाः क्षन्तव्याः तत्र धन्यः क्षमाधनैः ॥
सन्ध्यानुष्ठाननिष्ठानां जनानां बुद्धिवृद्धये ।
ऋष्यादीनि वदन्नेषामेष व्याख्यां चिकीर्षति ॥

* * *

आपो हि ष्ठेत्यादिमन्त्रस्य सिन्धुद्वीप ऋषिः, गायत्री छन्दः, आपो देवताः। हे आपः यूयं मयोभुवः स्थ । हि प्रसिद्धौ । मय इति सुखस्य नाम । यूयं हि सर्वेषां प्राणिनां सुखस्य भावयितारो भवथ ।

**End:**

सर्वा ता सर्वाणि तानि दुष्कृतानि शिथिलानि इव विष्य विमोचय । यथा तु ग्रन्थीननायासेन नरो विस्रंसयति तथास्माकं पापकारिपुरुषसंयोगादिकारणानि कल्मषाणि विस्रंसय । अथानन्तरं हे वरुण त्वया निरस्तपापास्सन्तो वयं ते प्रियासः प्रियाः स्याम भवामेति ॥

---

(*b*) अघमर्षणसूक्तभाष्यम्.

AGHAMARṢAṆASŪKTABHĀṢYAM.

Foll. 14*a*—16*b*.

A commentary on the Aghamarṣaṇasūkta, which work has been described under No. 220 of the D.C.S. MSS., Vol. I, Part II.

Incomplete.

**Beginning:**

अघमर्षणसूक्तस्य माधुच्छन्दसोऽघमर्षण ऋषिः, अनुष्टुप् छन्दः, भाववृत्तं देवता । भावशब्दस्सत्तामात्रब्रह्मणो वाचकः तस्य वृत्तं जगत्स्रष्टुः सूक्तप्र(तिष्ठा) तस्याः स्नानादिषु विनियोगः । तत्र मनुः—

यथाश्वमेधक्रतुराट् सर्वपापप्रणाशनः ।
तथाघमर्षणं सूक्तं सर्वपापप्रणाशनम् ॥

गौतमश्च—अन्तर्जलेऽघमर्षणं त्रिरावर्तयन् सर्वपापेभ्यो मुच्यत इति। ऋतं च सत्य च । ऋतमित्यृ धातुना निष्ठान्तेन क्रियोच्यते । सत्यमिति। अस्ति भवतीति चत्प्रत्ययान्तेन सत्यशब्देन ज्ञानं तथा च ईश्वरस्य पुनस्सर्गगोचरज्ञानं प्रयत्नरूपक्रिया च ऋतसत्यशब्दाभ्याममिधीयते।

**End:**

